# पौष्करागमः

# ज्ञानपादः

# PAUṢKARĀGAMA

# JÑĀNAPĀDA

Prakashika Series
No. 16

*General Editor*
**Pratapanand Jha**

# पौष्करागमः
# ज्ञानपादः

**द्वितीयो भागः**

सम्पादकः
**टी० गणेशन**

National Mission for Manuscripts

राष्ट्रीय पाण्डुलिपि मिशन
नयी दिल्ली

तथा

न्यू भारतीय बुक कॉरपोरेशन
नयी दिल्ली

प्रकाशक :

**राष्ट्रीय पाण्डुलिपि मिशन**

11, मानसिंह रोड,

नई दिल्ली–110 001

फोन : 2338 3894; फैक्स : 2307 3387

E-mail: director.namami@nic.in

www.namami.org

सह–प्रकाशक :

**न्यू भारतीय बुक कॉरपोरेशन**

208, द्वितीय तल, प्रकाशदीप बिल्डिंग,

4735/22, अंसारी रोड, दरिया–गंज,

नई दिल्ली–110002

फोन : 011-23280214, 011-23280209

E-mail : deepak.nbbc@yahoo.in

प्रथम संस्करण : 2019

© राष्ट्रीय पाण्डुलिपि मिशन

ISBN : 978-93-80829-71-5

: 978-93-80829-02-9

मूल्य : Rs. 400.00

# PAUṢKARĀGAMA JÑĀNAPĀDA

**Volume II**

*Editor :*

**T. Ganesan**


National Mission for Manuscripts
New Delhi
&
New Bharatiya Book Corporation
New Delhi

*Publisher :*
**National Mission for Manuscripts**
11, Mansingh Road,
New Delhi - 110001
Ph.: 011-23383894; Fax: 011-23073340
E-mail: director.namami@nic.in
www.namami.org

*Co-Publisher :*
**New Bharatiya Book Corporation**
208, 2nd Floor, 4735/22,
Prakash Deep Building,
Ansari Road, Darya Ganj,
New Delhi-110002
Ph. : 011-23280214, 011-23280209
E-mail : deepak.nbbc@yahoo.in

First Edition : 2019

© National Mission for Manuscripts

ISBN : 978-93-80829-71-5
: 978-93-80829-02-9

Price : Rs. 400.00

# Foreword

Nigamāgama is fundamental to the Indian way of life. Nigama deals with the nature of act, knowledge and devotion and Āgama deals with the Sādhana (process and tools) to achieve it. The Āgamas comprise the mantras, elaborate procedure of worship, meditation technics, initiation rites and philosophical doctrines on the nature of the Supreme Reality, the individual self and the world. Based on the worshipping Supreme God, the Āgamas have been grouped in three major categories of (i) Vaishnava Āgama (ii) Shaiva Āgama and (iii) Shākta Āgama.

Amongst the Āgama corpus, that belonging to the Shaivasiddhanta system, appears to be quite vast. Paushkaragama is one such Shaiva Āgama text that contains some of the basic philosophical doctrines of the Shaivasiddhanta system in the form of interlocution between Śiva and the sages. Two important commentaries composed by Umapati and Jnanaprakasa on this text elaborate the concepts on the basis of strong logical argument.

Dr. T. Ganesan, the learned Sanskrit scholar is doing a commendable job by preparing the critical edition of these two unpublished important commetaries. The work is quite vast and is going to be published in three volumes. First volume containing Pati Paṭala and Bindu Paṭala has already been published by the Mission. The second volume dealing with Māyā Paṭala and Paśu Paṭala is now being presented to the scholarly world and to the interested readers.

The National Mission for Manuscripts does hope that young scholars should come forword to work on the important manuscripts which are still unpublished.

**Pratapanand Jha**

*Director*

National Mission for Manuscripts

# Introduction

The present volume of the Pauṣkarāgama contains the Māyāpaṭala and the Paśupaṭala, the 3rd and 4th paṭala-s—along with the two commentaries—the Vyākhyā of Umāpati and the Vṛtti of Jñānaprakāśa—as in the previous volume. While both the commentaries for the Māyāpaṭala are of normal length, those of the Paśupaṭala are quite long and elaborate. Both the commentators appear to be very keen in discussing and elaborating the concept of Paśu in the Śaivasiddhānta system. In fact Umāpati analyses many of the views of Paśu as held by the system and refutes major objections.

Some salient features of the commentaries at a glance:

According to Umāpati the entire universe excluding those that reside in the pure-path (śuddhādhvā) is under the sway of Māyā; he interprets Māyā as *mayati muhyati*.

He says through prakṛti, its product also is of the nature of creating confusion, Māyā is 'sarva mohaka.'

Jñānaprakāśa interprets Māyā as *vicitrarūpaṃ jagat mayati vikaroti* meaning that which modifies the universe into manifold form or nature. He cites Kāmika passage which interprets Māyā as that which makes [one thing] appear as different (anyathābhāna).

The fundamental characteristics of Māyā are; it is eternal (nitya) and real (vasturūpā)[1]. These two views are just the opposite of what the Advaita Vedānta system holds about Māyā[2].

Further, it is the store house of all the *karma*-s of all the *jīva*-s;

---

1. Cf. Tattvaprakāśa of Bhojadeva, v. 19; माया च वस्तुरूपा मूलं विश्वस्य नित्या सा। 19cd
2. प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।
   गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः। as quoted by Umāpati in his commentary on Pauṣkara, 3: 2

this seems to be a very logical point and reasonable as held by the Śaivasiddhānta whereas other philosophical systems do not seem to have a logical explanation about where all the *karma*-s are stored during pralaya.

As the repository of all *karma*-s Māyā serves as the cause for the creation of the psycho-physical bodies at the start of the next creation.

Umāpati stresses the uncreated nature of Māyā.

Māyā is both gross and subtle; the gross is the source of all worlds where the self experiences its fruits of actions; the subtle is the cause for the manifestation of innate power of knowledge and action. Umāpati in the course of his commenting on Māyā also refutes the view (held by some Śaiva-s) that holds Māyā to be a product of *Bindu* (= kuṇḍalinī). He cites a few passages from the Ratnatraya of Śrīkaṇṭha which also do not subscribe to this view.

Further, the Pauṣkarāgama clearly states that the concept of Māyā is completely different in the Śaivasiddhānta system. That is, in the other systems Prakṛti is a conglomeration of the three guṇa-s which means, in other words, apart from the three guṇa-s there is no separate entity called Prakṛti. But, in the Śaivasiddhānta Prakṛti is something other than the three guṇa-s. Another important feature of Māyā is that it is the subtlest of all: Being the material source (= cause) of the entire range of tattva-s beginning from *Kalā* , Māyā is the eternal and the subtlest one (saukṣmyaparākāśṭhā)[1]. As against the Advaita Vedānta position according to which Māyā, the cause of illusory creation of the manifoldness, is indeterminable and hence illusory, the Śaivasiddhānta system as evidenced by the Pauṣkarāgama, categorically states that Māyā is an existing reality. For, while the world creation which is real, its material cause, namely, Māyā cannot but be real[2]. In the Māyāpaṭala of the Pauṣkarāgama we find long arguments [ from the Advaita Vedānta point of view] establishing the unreality of the world and the counter arguments refuting this view and establishing firmly the reality of the manifold world and thereby the reality of Māyā, its material cause[3].

1. Pauṣkarāgama, Māyāpaṭala, v. 7 Cf. also ibid. v.8
2. Ibid. v.9
3. एवं वस्त्वात्मकं विश्वं भवेत् कथमवस्तुजम्।
   तस्मात् वस्त्वात्मिका माया स्थिता विश्वस्य कारणी।। Ibid.26

In the commentary of Umāpati which, at many places is, very detailed and thorough going, we find many arguments that refute the view of unreality of the world posited by the Advaita Vedānta system. Incidentally Umāpati also analyses the opponent's views on the means of knowledge (pramāṇa) and refutes them as untenable and against logic. The commentary of Jñānaprakāśa, though not so elaborate, also refutes the opponent's view of unreality of the perceived world.

Along with Māyā, the other *mala*-s, namely, *karma* is also briefly discussed in the Māyāpaṭala. The inevitability of accepting *karma* as a separate *mala* as the cause of difference in experiencing pain and pleasure by every being is explained in this chapter. Jñānaprakāśa gives a somewhat crisp definition of *karma* as 'that which is different from prakṛti, which is performed by humans and which remains in the buddhi as its guṇa.' Umāpati explains further that *karma* being inert (acetanatayā) and hence not independent, it is an auxiliary cause (sahakāri) [along with Māyā, aiding Īśvara in His acts of granting the fruits of their *karma* to each living being]. *Karma* denotes both the acts and their fruits. It is of three types: mental, verbal and physical (manovākkāyabhedena). It is also threefold due to its effects such as pain and pleasure are threefold: pertaining to (in other words, caused) by one's self (ādhyātmika), caused by the natural elements (ādhibhautika) and those caused by superhuman personalities (ādhidaivika). The *karma* is different from the prakṛti mainly because it is that which makes the self experience (bhojaka) while the prakṛti is the material cause of the entire objective world which is the object that is experienced by the self. As such these two can never be the same, states categorically the Pauṣkarāgama v. 34.

Then there is brief discussion about the group of eight that consists of jñāna, ajñāna, etc. which are established to be different forms of cognition. Further it is argued that Māyā is not *mala* in the sense of covering the innate nature of the self. The subtle (sūkṣmasṛṣṭi) and gross creation (sthūlasṛṣṭi) that proceed from Māyā are then briefly explained after which it is informed that among three classes of selves—vijñānākala, pralayākala and sakala—the pralayākala-s comprising the 108 Rudra-s, etc. reside in the Māyāmaṇḍala.

The next paṭala, namely, Paśupaṭala, which is quite long deals fully about the characteristics of individual self. The very defining features of '*paśu*' are the opposites of a liberated self (*mukta*). While the mukta is free from *mala* and *kalā* and thereby possesses unlimited power of knowledge and action (svabhāvadṛkkriyāśālī) like Śiva (but without the power of performing the five acts (pañcakṛtya) and remains like Śiva, the bound self (paśu) is not pervasive with his power of knowledge and action fully covered by *mala* and hence possesses only limited knowledge. The threefold division of paśu—vijñānākala, pralayākala and sakala—is then discussed. In the discussion on the 'sakala' type Jñānaprakāśa introduces further divisions such as *sūkṣmadehī* and *sthūladehī* and still further divisions in each of them but without any textual support. The vijñānākala-selves have the special type of *mala* called *adhikāramala* and always move in accordance with the Will of Śiva (śivecchānumatāḥ).

The next topic of discussion is the actual cause of fall of Śiva's grace on the self: In fact according to the Pauṣkarāgama it is the ripening of the *mala* (*malapāka*) the cause of fall of Śiva's grace on the self and not the equality of *karma* (*karma*sāmya) as held by some. The fall of Śiva's grace leads to the self getting the appropriate initiation (*dīkṣā*) from a qualified guru. For, it is argued, if the *karmasāmya* were the main cause of Śiva's grace then how can the vijñānākala-type of selves be blessed by Śiva as they do not have any trace of *karma*, their only bondage being the [āṇava]*mala* as explained above.

There are three types of *karma*: *dṛṣṭabhogya, adṛṣṭabhogya* and *aniyatakālopabhogya*. Taking medicines and reciting certain mantra-s for cure which acts give their fruits in this very birth belong to the first type; being a monarch or getting tormented in hell come under the second type; those acts such as the performance of *Yāga*-s like Aśvamedha and others like the killing of a Brāhmaṇa by the same person and which come to fruition at different periods (and at different births) come under the third category. When two such actions whose fruits are of opposite nature are ready to give their respective [opposite] fruits the grace of Śiva nullifies both actions and activates some other action whose fruits are not of opposite type. This is technically known as *karmasāmya* and the eventual fall of grace (śaktipāta). The marks of śaktipāta are an intense feeling of non-attachment (vairāgya) towards worldly life in the self, a

longing to 'see' Śiva arises in his mind and an intense desire to get liberated (mumukṣā) from the cycle of birth and death (saṃsāra). Accordingly the self searches for a suitable guru who will 'show' Śiva to him. In other words, the guru makes him realise his śivahood. Umāpati here enters into a long discussion on the characterstics of a guru and cites many passages from various Āgama-s and other texts. There is also a detailed discussion as to who among the four varṇa-s—brāhmaṇa, kṣatriya, vaiśya and śūdra—can be the guru and it is concluded that the brāhmaṇa can be guru to all the four varṇa-s, the kṣatriya, to his own varṇa and to the two below him, the vaiśya, to his own and to the śūdra while the śūdra can be guru only to his own varṇa. The physical and spiritual qualifications of such a guru are also discussed. Then the details of examining the disciple by the guru are discussed.

For some advanced selves Śiva removes their *mala* directly just by His 'glance' which is full of Grace (karuṇāgarbhiṇyā dṛśā) which is called śāmbhavī *dīkṣā*. For others, Śiva, in the form of Guru, performs the *dīkṣā*. The opponent's view that the *dīkṣā* performed in this way is against the Vedic injunctions and hence useless is taken for a detailed examination by both the commentators and finally it is established that the Śaiva Āgama-s are equally valid along with the Veda-s and the various rites prescribed there are also valid and appropriate to all sections of the society.

Next comes the presentation of various types of *dīkṣā* and the persons eligible for each one of them. As part of the *dīkṣā* the various worlds (bhuvana-s) in the bhuvanādhvā-section are enumerated; so also the five *kalā* -s—nivṛtti, pratiṣṭhā, vidyā, śānti and śāntyatītā—are also discussed in detail especially in the commentary of Umāpati.

The four types of 'similarity with Śiva' that characterises the final state of liberation propounded by different schools of Śaivism such as the Mahāvrata, Pāśupata, etc. are also examined. The actual status of liberation is defined after much discussion as the highest state of śivahood (śivatva) which is manifested after the removal of all coverings of *mala*. As a conclusion to the discussion it is stated that both *karma* and the *Māyāmala* do not actually cover the innate power of consciousness (cicchakti) of the self.

Based on its effect the *mala* is of seven kinds such as *moha, mada, rāga, viṣāda*, etc. and there appears to be a slight variation in this list found in the Mataṅgapārameśvarāgama as pointed out by Umāpati in his commentary. Of these seven, *moha* is considered to be the cause of the other six. For, it is *moha* that creates confusion in the minds leading to attachment to oneself and to one's own belongings whereby one loses other faculties of perception and the power of discrimination.

There is also the interesting discussion as to the possibility of the conscious self (ajaḍa) being covered by the inert (jaḍa) *mala*; after examining other possibilities that are proved to be untenable it is concluded that the conscious self can be covered only by an inert substance, namely, the *mala* and not by other conscious agents.

As the final concluding statement of the paśupaṭala it is said *mala* is thus established as the covering/obstructor of the innate omniscience (sārvajñyabādhaka) of the self.

**Dr. T. Ganesan**

Senior Researcher

French Institute of Pondichery

# Key of Transliteration

VOWELS

| | | | | | |
|---|---|---|---|---|---|
| अ a | आ ā | इ i | ई ī | उ u | ऊ ū |
| (but) | (palm) | (it) | (beet) | (put) | (pool) |
| ऋ ṛ | ए e | ऐ ai | ओ o | औ au | |
| (rhythm) | (play) | (air) | (toe) | (loud) | |

CONSONANTS

| | | | | | |
|---|---|---|---|---|---|
| Guttural | क ka | ख* kha | ग ga | घ gha | ङ ṅa |
| | (skate) | (blockhead) | (gate) | (ghost) | (sing) |
| Palatal | च ca | छ cha | ज ja | झ jha | ञ ña |
| | (chunk) | (catchhim) | (john) | (hedgehog) | (bunch) |
| Cerebral | ट ṭa | ठ* ṭha | ड/ड़ ḍa | ढ*/ढ़ ḍha | ण* ṇa |
| | (start) | (anthill) | (dart) | (godhead) | (under) |
| Dental | त ta | थ tha | द da | ध dha | न na |
| | (path) | (thunder) | (that) | (breathe) | (numb) |
| Labial | प pa | फ* pha | ब ba | भ bha | म ma |
| | (spin) | (philosophy) | | (bin) | (abhor) |
| (much) | | | | | |
| Semi-vowels | य ya | र ra | ल la | व va | |
| | (young) | (drama) | (luck) | (vile) | |
| Sibilants | श śa | ष ṣa | स sa | ह ha | |
| | (shove) | (bushel) | (so) | (hum) | |
| Others | क्ष kṣa | त्र tra | ज्ञ jña | ळ* l | ऋ* ṝ |
| | *(kṣātriya)* | *(triśūla)* | *(jñānī)* | *(play)* | |

अं (—) *ṁ* or *ṃ amusūra* (nasalisation of preceding vowel) like *saṁskṛti/or soṃskṛti.*

अः *visarga* = *ḥ* (aspiration of preceding vowel like (*prātaḥ*)

ऽ *Avagraha* consonant #′ consonant (like - *imé vasthitā*)

Anusvāra at the end of a line is presennted by m (म्) and not ṁ

* No exact English equivalents for these letters

# मायापटलः

## उमापतिशिवविरचितव्याख्या

वर्तिष्यमाणं प्रतिजानीते–

**अथ माया क्रमायाता समासादुपवर्ण्यते।**

अथ बिन्दुनिरूपणानन्तरं[१] क्रमायाता उद्देशक्रमप्राप्ता परीक्षावसरं प्राप्तेति यावत् समासात् संक्षेपेतः परीक्ष्यते[२]। अतः सावधानेन[३] श्रोतव्येति भावः। संगतिस्तु पूर्वमुद्देशावसरोक्ता द्रष्टव्या।

लक्ष्यतावच्छेदकपरिज्ञानाय[४] मायाशब्दार्थमाह–

**मयत्यस्माज्जगद्विश्वं माया तेन समीरिता।।१।।**

विश्वम् अशेषं जगत् शुद्धाध्ववर्त्यतिरिक्तपशुजातम्[५] अस्मान्मोहकात्[६] मयति मुह्यति तेन कारणेन मायेति[७] समीरिता। शुद्धाध्ववर्तिभिन्नसमस्तपशुमोहकत्वं[८] लक्ष्यतावच्छेदकम्। तेन प्रकृत्यादेः मायाकार्यस्य यत् किञ्चित् मोहकत्वेऽपि न सर्वमोहकत्वमिति न तस्य[९] संग्रहः।

---

१. बिन्दुनिरूपणानन्तरं ] क२,क३,मु; निरूपणानन्तरं–क१

२. परीक्ष्यते ] क२,क३; वक्ष्यते–क१; उपवर्ण्यते परीक्ष्यते–मु

३. सावधानेन ] क१,क३; सविधानेन–क२;सावधानतया–मु

४. लक्ष्यतावच्छेदकपरिज्ञानाय ] क२,क३,मु; लक्ष्यतावच्छेदकपरिज्ञानाया–क१

५. शुद्धाध्ववर्त्यतिरिक्तपशुजातम् ] क२,क३,मु; शुद्धाध्वव्यतिरिक्तपशुजातम्–क१

६. अस्मान्मोहकात् ] क३,मु; अस्मान्मोहकं–क१; अस्मान्मोहका–क२

७. मायेति ] क१,क२,मु; . . . .– येति–क३

८. शुद्धाध्ववर्तिभिन्नसमस्तपशुमोहकत्वं ] मु; शुद्धाध्ववर्तिभिः न समस्तपशुमोहकत्वं–क१,क२; शुद्धाध्ववर्तिभिन्नसमस्तपशुमोहकत्वा–क३

९. तस्य ] क१,क३,मु; तस्य (तेषाम्) इति–क२ कोशे उपरि लिखितम्।

## ज्ञानप्रकाशाचार्यविरचितवृत्तिः

अथ कुण्डलिनीपदार्थपरीक्षानन्तरं क्रमायाता उद्देशक्रममनतिक्रम्य परीक्षिततत्वेन[१] आगता माया समासात् संक्षेपात्

उपवर्ण्यते परीक्ष्यत[२] इति। पाटलिकः सम्बन्धः पूर्वपटलान्ते सूचितः। तन्त्रवस्तुसम्बन्धो मायापदार्थात्मकः। वाक्यात्मकस्तु मायाविनात्रेत्याद्यनेकविधः[३]। अस्मात् पदार्थात् विश्वं विचित्ररूपं जगत् मयति विकरोति तेन हेतुना माया समीरिता मायेति समुदिता। शक्तिव्यक्त्यात्मना माति यातीति[४] मायेति च क्वचित्। कामिके तु-

अन्यथाभानहेतुत्वादियं मायेति कीर्त्यते। इत्यन्वर्थिता[५]

**(व्याख्या)** मायास्वरूपमाह-

**(वृत्तिः)** पुनः परीक्षोक्तिमाविष्करोति -

**नित्यैका व्यापिनी वस्तुरूपा कर्माश्रयाऽशिवा।**
**साधारणी च सर्वेषां सकलानां मुनीश्वराः।।२।।**

**(व्याख्या)** नित्या उत्पत्तिनाशरहिता कालानवच्छिन्नेति यावत्। एका स्वान्तर्गणिकभेदशून्या[६]। व्यापिनी कलादि-क्षितिपर्यन्तस्वकार्यव्यापनशीला। यद्वा आत्मवत् सर्वव्यापिनी वा। न चैवं सर्वत्र कार्यप्रसङ्गः उपरि प्रयोजनाभावेन क्षोभाभावात्[७]। वस्तुरूपा अबाधितस्वरूपा। कर्माश्रयाऽशिवा कर्मणां धर्माधर्माणामाश्रयश्च अशिवा च सा तथोक्ता। अथवा कर्मणामाश्रयः आश्रयणं यस्याः सा कर्माश्रया। अशिवा अशुद्धस्वरूपा। किंच सर्वेषां सकलानां साधारणी तत्तद्भोगहेतुदेहेन्द्रियादिसम्पादिका[८] एषा माया समीरितेति सम्बन्धः। अत्र नित्येत्यनेन कुण्डलिनीजन्यत्ववादिशैवैकदेशिमतं निरस्तम्। यदाहुः[९]-

अवस्थामपरे बिन्दोर्मायामाहुर्विपश्चितः।
कलाव्याप्तस्वरूपा च पुद्गलाधिष्ठिता च यत्।
तथैव प्रकृतिस्तेषां स्थूला सूक्ष्मा परेत्यसौ।
महामाया भवेत् त्रेधा तत्र स्थूला गुणात्मिका।

---

१. परीक्षिततत्वेन ] ज२,ज३; परीक्ष्य तत्त्वेन-ज१,ज६

२. परीक्ष्यते ] ज२,ज३; परीक्षित-ज१

३. मायाविनात्रेत्याद्यनेकविधः ] ज१,ज६; मायापि . . . .द्यनेकविधः-ज२

४. शक्तिव्यक्त्यात्मना माति यातीति] ज३; शक्तिविद्यात्मना माति यातीति-ज१; शक्तिव्यक्त्यात्मना यातीति-ज२;

५. इत्यन्वर्थिता ] ज२; त्यन्वक् स्थिता-ज१,ज६

६. स्वान्तर्गणिकभेदशून्या ] क३,मु; स्वान्तगुणिकभेदशून्या-क१; स्वान्तर्गुणिकभेदशून्या-क२;

७. क्षोभाभावात् ] क२,क३,मु; क्षोभाभाववत्-क१;

८. ०सम्पादिका ] क१,क२,मु; ०सम्पादिता-क३

९. यदाहुः ] क१,क२,मु; यथाहुः-क३

बुद्ध्यादिभोग्यजननी[1] प्रकृतिः पुरुषस्य सा।
सूक्ष्मा कलादितत्त्वानाम् अविभागस्वरूपिणी[2]।
जननी मोहिनी माया सर्वाशुद्धाध्वकारणम्[3]।
मन्त्रयोनिः परा माया नित्या कुण्डलिनी तु सा।
उपादानं शरीराणां विद्याविद्येश्वरात्मनाम्।
येषां[4] माया मते नित्या कलाविद्यादिकारणम्।
न तेषामसितो मार्गः कलाशुद्ध्या विशुद्ध्यति।
कला हि शोधिताः पञ्च[5] निवृत्त्याद्या विशुद्धये[6]।
तत्त्वादीनामतो बिन्दोः कार्यमध्वा विशेषतः।
इत्याख्याता महामाया सर्वाध्वप्रकृतिः परा।
आचार्यैस्तैरशेषाध्वकार्यवादविचक्षणैः[7] ।इति।

**तदविचारितरमणीयम्**

मायातत्त्वं जगद्बीजमविनाश्यशिवात्मकम्। इत्याद्यागमेषु तदकार्यत्वप्रतिपादनात्।

कलाशुद्ध्या मायिककार्ये शुद्धिस्तु[8] व्यापकशुद्ध्या व्याप्यशुद्धिमभिसन्धाय। न च तथात्वे व्यापकशिवतच्छक्त्योः[9] शुद्धत्वेन सर्वदा सर्वशुद्धिप्रसङ्गः। जडव्यापकशुद्धेरेव तत्प्रयोजकत्वात्। तदुक्तम्–

अन्ये तु कथयन्त्यत्र मायामध्वस्वनश्वराम्[10]
उपादानं कलादीनामभिव्याप्तं च बिन्दुना।
व्याप्तिश्च तादृशी ज्ञेया तयोरागमवेदिभिः।
यया व्यापकशुद्ध्यैव[11] विशुद्धिरितराश्रया।

---

१. बुद्ध्यादिभोग्यजननी ] क२,क३,मु; बुद्ध्यादिभोगजननी–क१;

२. अविभागस्वरूपिणी ] क२,क३,मु; अपि भागस्वरूपिणी–क१

३. सर्वाशुद्धाध्वकारणम् ] क१,क२,मु; सर्वशुद्धाध्वकारणम्–क३

४. येषां ] मु; एषां–क१,

५. शोधिताः पञ्च ] मु; शोधिता–क१; रोधिता (शोधिता) इति उपरि लिखितम् क२ कोशे; शोधिता पञ्च–क२,क३;

६. निवृत्त्याद्या विशुद्धये ] क२,क३,मु; निवृत्त्याद्यविशुद्धये–क१;

७. आचार्यैस्तैरशेषाध्वकार्यवादविचक्षणैः ] क२,क३,मु; आचार्यैस्तैरशेषाध्वकार्यवादिविचक्षणैः–क१;

८. मायिककार्यशुद्धिस्तु ] मु; मायिककार्ये शुद्धिस्तु–क१,क२,क३

९. व्यापकशिवतच्छक्त्योः ] क२,क३,मु; व्या . . . . शिवतच्छक्त्योः–क१; व्यापकशिवतच्छक्त्योः–क२, क३,मु

१०. मायामध्वस्वनश्वराम् ] क२,मु; मायाशुद्धाध्व . . . . –क१; मायामध्वास्वनश्वराम्–क३

११. व्यापकशुद्ध्यैव ] क१,क३,मु; व्यापकशुद्ध्येव–क२

यया[1] जडप्रतियोगिन्येत्यर्थः। किंच[2] मायायाः कार्यत्वे प्रवाहरूपतया यदनादिकार्यं[3] तदुपादानं न स्यात्। न च मायाया अपि प्रवाहरूपतया अनादित्वात् तथाविधकार्ये जनकत्वमित्यत आह–एकेति। एकत्वं च धर्मिग्राहकमानेन[4] लाघवतर्कसहकृतेन[5] सिद्धमिति भावः। व्यापिनीत्यनेनाव्यापिन्या एवोपादानत्वमिति शङ्कां निरस्यति। कलादिक्षितिपर्यन्तकार्यदेश–व्यापित्वाभावे तदुपादानत्वमेव न स्यादिति भावः। वस्तुरूपेत्यनेन अनिर्वचनीयमायावादिमतनिरासः[6]। तथाहुः–

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।

गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः। इति। तदयुक्तम्। सदसद्विलक्षणकोट्यन्तरस्य[7] अप्रसिद्धत्वात् व्याहतत्वाच्च[8]। सत्त्वेन सकलप्रमाणसिद्धत्वाच्च। कर्माश्रयेत्यनेन कर्मणां जीवनिष्ठत्ववादिमतनिरासः। स चाग्रे आकर[9] एव स्फुटः। अशिवेत्यनेन शुद्धमायाचिच्छक्त्योर्व्यावृत्तिः। साधारणीत्यनेन असाधारणबन्धहेतुसंस्काररूपाविद्यावादि–मतनिरास[10] इति विशेषणानां प्रयोजनानि[11] द्रष्टव्यानि।

**( वृत्तिः )** यागादिक्रियायाः[12] समनुष्ठितक्षणविध्वंसित्वात् स्वर्गादिहेतुत्वेन पुरुषसंस्कारित्वे विकारित्वजडत्वप्रसङ्गात्। बुद्धौ तत्क्रियाजनितापूर्वाख्यसंस्कारलक्षणं कर्माभ्युपगन्तव्यम्। बुद्धेः प्रलये पुनरुपसंहृतकार्यात्मकारणरूपत्वेन स्थितेः सा माया आश्रयाश्रयिद्वारा[13] कर्माश्रया। तत्सुखदुःखमोहात्मकर्माश्रयत्वाद्धेतोरशिवा अशुद्धा। नन्ववस्तुरूपत्वेन वेदान्तविदुदितायाः कथम्[14] आश्रयत्वम्। तदयुक्तम्। इयं वस्तुरूपैव तथोत्तरत्र साधनीया। जगत्कारणत्वेन

---

१. यया ] क१,क२,क३; यया यादृश्या–मु

२. किञ्च ] क२,क३,मु; किन्तु–क१;

३. यदनादिकार्यं ] क२,क३,मु; अनादिकार्यं–क१;

४. धर्मिग्राहकमानेन ] क१,क३,मु; धर्मिग्राहकमनेन–क२

५. लाघवतर्कसहकृतेन ] क२,क३,मु; लाघवसहकृतेन–क१;

६. अनिर्वचनीयमायावादिमतनिरासः ] क२,क३,मु; अनिर्वचनीयं मायावादिमतनिरासः–क१;

७. सदसद्विलक्षणकोट्यन्तरस्य] क३,मु; सदसत्त्वलक्षणको भङ्ग्यन्तरस्य–क१; सदसत्त्व–लक्षणकोट्यन्तरस्य–क२;

८. व्याहतत्वाच्च ] क३,मु; व्यवहितत्वाच्च–क१; व्यवहतत्वाच्च–क२

९. आकर ] क३,मु; आकार–क१,क२;

१०. असाधारणबन्धहेतुसंस्काररूपाविद्यावादिमतनिरासः ] क२,क३,मु; साधारणबन्धहेतुसंस्काररूपा–विद्या०–क१;

११. प्रयोजनानि ] क१,क३,मु; प्रयोजकानि–क२

१२. यागादिक्रियायाः ] ज६; यागादिक्रियाः–ज१; यागादिक्रि . . . .–ज२

१३. आश्रयाश्रयिद्वारा ] ज१,ज६; आश्रयाश्रयद्वारा–ज२

१४. नन्ववस्तुरूपत्वेन वेदान्तविदुदितायाः कथम् ] ज१,ज६; नन्वस्तुरूपत्वेन वेदान्तविदुदि ... .थम्–ज२

न्यायविदुदितपरमाणवः सन्ति। तदयुक्तम्। इयमेका। अचैतन्ये[१] सत्यनेकत्वाद् मूर्तत्वाद् वारनित्यत्वे नानावस्थाप्रसंगतः[२] परमाणूनां परमकारणत्वायोगात्।[३] मूर्तत्वादिति हेतोः कालात्ययापदिष्टत्वं नाशंकनीयम्। अस्मदागमे परमाणूनामनित्यत्वेन सिद्धेः। अत एव नित्या नाशरहिता। एकत्वतः[४] स्वकार्याव्यापकत्वे कारणत्वायोगात्। व्यापिनी व्याप्तस्वकार्या[५] अत एव सर्वेषां सकलानां स्वकार्यद्वारा भिन्नापि साधारणी सामान्या।

**(व्याख्या)** लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन लक्षणप्रमाणे दर्शयति–

**(वृत्तिः)** तां पुनः साधयति–

**प्रलये लीनदेहस्य कर्मिणोऽणोरहर्मुखे।**
**देहादेः कारणं माया सूक्ष्मस्थूलात्मकस्य तु।।३।।**
**कलादिक्षितिपर्यन्तमविभक्तिपुरःसरम् ।**
**विभक्तत्वात् यथाबीजे स्कन्धपर्णफलादिकम्।।४।।**

**(व्याख्या)** प्रलये महाप्रलये[६] लीनदेहस्य उपादानकारणे लीनः कारणत्मना स्थितो देहो यस्य तादृशस्याणोः कर्मिणः कर्मविशेषवतो[७] जीवस्याहर्मुखे सर्गाद्यकाले सूक्ष्मस्थूलात्मकस्य देहेन्द्रियसंघातस्य या कारणम्[८] उपादानं सा मायेत्यर्थः। एवं च सर्गाद्यकालीनकर्मिदेहाद्युपादानत्वं[९] मायात्वमिति लक्षणं द्रष्टव्यम्। अत्र[१०] देहाद्युपादानत्वमात्रं बिन्दावतिव्याप्तम् अत उक्तं कर्मीति। तावत्युक्ते इदानींतनदेहाद्युपादाने प्रधानादावतिव्याप्तिरित्यत उक्तं सर्गाद्यकालीनेति[११]।

कलातत्त्वमादिर्यस्य तत् कलादिक्षितिः[१२] पर्यन्ते यस्य तत् क्षितिपर्यन्तं[१३] तत्त्वजातमिति शेषः। इदं च कलातत्त्वं मायाप्रथमपरिणाम इति मतमवलम्ब्य उक्तम्। एतावता पक्षनिर्देशः। अविभक्तिपुरःसरं न विद्यते विभक्तिर्विभागो यस्य तदविभक्ति तत् पुरःसरं[१४]

१. अचौतन्ये ] ज२,ज६; आचौतन्ये–ज१;
२. मूर्तत्वाद् वारनित्यत्वे नानावस्थाप्रसंगतः ] ज१,ज६; मूर्ति . . . . नित्यत्वेनानवस्थाप्रसंगतः–ज२
३. कालात्ययापदिष्टत्वं ] ज२,ज६; कालाप्ययापदिष्टत्वं–ज१;
४. एकत्वतः ] ज१,ज६; तत्वत–ज२
५. व्याप्तस्वकार्या ] ज१,ज६; व्याप्तव्यकार्या–ज२
६. महाप्रलये ] क१,क२,मु; महाप्रलये महाप्रलये–क३
७. कर्मविशेषवतो ] क१,क२,मु; कर्मशेषवतो–क३
८. कारणम् ] क१,क३,मु;करणम्–क२
९. सर्गाद्यकालीनकर्मिदेहाद्युपादानत्वं ] क२,मु; सर्गाद्यकालीनकर्मदेहाद्युपादानत्वं–क१,क३;
१०. अत्र ] क३,मु; नात्र–क१;मात्र–क२;
११. उक्तं सर्गाद्यकालीनेति ] क३,मु; उक्तम्–क१; उक्तं सर्गाद्येति–क२;उक्तं सर्गाद्यकालीनेति–क३,मु
१२. कलादिक्षितिः ] मु; कलादिक्षितिपर्यन्ते–क१,क२,क३
१३. पर्यन्ते यस्य तत् क्षितिपर्यन्तं ] मु; यस्य क्षितिपर्यन्तं–क१;तत् क्षितिपर्यन्तं–क२;
१४. तत् पुरःसरं ] क२,क३,मु; पुरःसरं–क१;

तदुपादानकमित्यर्थः। अविभक्तमिति पाठे अविभक्तं सूक्ष्ममनेन साध्यनिर्देशः तत्र हेतुः विभक्तत्वात् अविभक्तत्वात् विभक्तत्वात् स्थूलत्वादिति[१] यावत्। जडत्वे[२] सति नानारूपत्वादिति हेतुनिष्कर्षः। तत्र दृष्टान्तमाह– यथेति। स्कन्धः काण्डः पर्णानि पत्राणि फलादीत्यादिशब्देन कुसुमानि गृह्यन्ते। यथा वा स्कन्धपर्णफलादिकं विभक्तं[३] बीजे त्वविभक्ते सत्येव[४] भवति तद्वदिति कलाद्युपादानत्वेन मायासिद्धिरिति भावः।

**( वृत्तिः )** प्रलये लीनदेहस्य दीक्षाशोधितकर्मिणः[५] तदसम्भवात्। कर्मिणः प्रलयकेवलिनः अणोरहर्मुखे[६] सर्गारम्भकाले तदनन्तरं वा सकलत्वप्राप्तेः पूर्वमपूर्वं सूक्ष्मस्थूलात्मकस्य देहादेस्तु अयोगान्ययोगव्यवच्छेदेन कारणमुपादानलक्षणं माया। आदिशब्देन साक्षात् परम्परया च कपालीशादिकालाग्न्यन्तभुवनात्मसाधारणत्वं गृह्यते[७]। सत्कार्यवाददृशा प्रलये अनभिव्यक्तकलादिस्वरूपत्वान्मायाया अविभक्तिपुरःसरं[८] कलादिविभागानभिव्यक्तिपूर्वं यथा भवति तथा। सर्गे कलादिक्षितिपर्यन्तं यथा भवति तथा तत्र विभक्तत्वाद्विकृतीकृतत्वात्। यथा अनभिव्यक्तस्कन्धपर्णफलादिलक्षणे न्यग्रोधादेर्बीजे स्कन्धपर्णफलादिकं यथा भवति तथा विभक्तत्वात् तत्कारणमिति शेषः। सर्वथा[९] न दृष्टान्तः वायुना विकृतीकृतत्वं महोदधेरिवैकदेशतोऽनन्तेशेन कलाद्यात्मना विकृतीकृतत्वात्। यदि सर्वथा तर्ह्यनित्यत्वादनवस्थाप्रसङ्गः। मृगेन्द्रे कर्तृसाधनकार्यत्वहेतुना तत्कार्यात्मोपादानरूपत्वेनानेकोक्तिभिः साधिता तत एवावधार्यम्।

**( व्याख्या )** ननु सांख्यमतसिद्धसत्त्वरजस्तमोगुणानां साम्यावस्था[१०] प्रकृतिरिति प्रकृतेरेव[११] कलाद्युपादानत्वम् इति सिद्धसाधनम्[१२] अर्थान्तरता वा किं न स्यादित्याक्षिप्य प्रतिक्षिपति–

**( वृत्तिः )** सांख्यादयः प्रकृतिरेव जगदुपादानमित्याहुः। तदयुक्तमित्याह –

**न च गौणमुपादानं त्रिगुणानां विभागतः।**

---

१. विभक्तत्वात् स्थूलत्वादिति ] क१,क३;स्थूलत्वादिति–क२; विभक्तत्वादिति स्थूलत्वादिति–मु

२. जडत्वे ] क१,क२,मु; जडनित्व–क३

३. विभक्तं ] क२,क३,मु; विभक्ते–क१;

४. त्वविभक्ते सत्येव ] क१; त्वविभक्ते सत्येवं–क२;अविभक्ते सत्येव–क३,मु

५. दीक्षाशोधितकर्मिणः, ज१,ज६; ०कर्मणः–ज२

६. अणोरहर्मुखे ] ज२,ज६; अणोरहन्मुखे–ज१;

७. ज२ (टि.१८०) कोशे पटलान्तरस्य वृत्तेः कश्चन भागः पृ० ११७–१२३ पर्यन्तं निवेशितः। पृ० १२४ तः पुनः मायापटलस्य वृत्तिरारभ्यते।

८. अविभक्तिपुरःसरं, ज१,ज६; अविमुक्तिपुरःसरं–ज२

९. सर्वथा ] ज१,ज६;यथा–ज२

१०. साम्यावस्था ] क१,क२,मु;बाह्यावस्था–क३

११. प्रकृतेरेव ] क२,क३,मु; प्रकृतेरिव–क१;

१२. इति सिद्धसाधनम् ] क१,क२,मु; . . . .सिद्धसाधनम्–क३

**( व्याख्या )** गुणानां समूहो गौणं प्रकृतिः कलादेरुपादानं न। तत्र हेतुमाह[१] त्रिगुणानामिति। त्रित्वसंख्यायुक्ता गुणाः त्रिगुणा इति मध्यमपदलोपी समासः न तु त्रयो गुणास्त्रिगुणा इति[२] कर्मधारयः। दिक्संख्ये संज्ञायामिति संज्ञायामेव संख्यावाचिनः[३] कर्मधारयसमासनियमात्। तेषां विभागतः विभक्तत्वात् अविभक्तिपुरःसरम्[४] इति साध्ये विभक्तमादाय नार्थान्तरमिति भावः। एवमपि अविभक्तगुणकप्रकृतिमादाय[५] अर्थान्तरं किं न स्यादिति चेन्न। अत्र किमिदं चोद्यं वियूथ्यस्य उत सयूथ्यस्य[६]। नाद्य इत्याह–

**गुणाविभागरूपा तु[७] प्रकृतिर्न दृगन्तरे।।५।।**

गुणाविभागरूपा गुणानामविभागः गुणाविभागः[८] गुणाविभागः तद्रूपा अविभक्तगुणेति यावत्। तादृशी प्रकृतिः। तु शब्दो विशेषद्योतनार्थः। दृगन्तरे दर्शनान्तरे नाङ्गीकृता तथा च तदङ्गीकारेऽपि सिद्धान्त इति भावः। तर्हि गुणाविभागरूपा अविभक्तगुणाविभागरूपा प्रकृतिरिति कुत्रत्योऽयं प्रवादः[९] आकाङ्क्षायामाह–

**गुणाविभागरूपा सा सिद्धान्ते प्रतिपादिता।**

सा प्रकृतिः गुणाविभागरूपा[१०] अविभक्तगुणस्वरूपेति[११] सिद्धान्ते शैवशास्त्रे प्रतिपादिता।

ततः किमित्यत आह–

**दर्शनान्तरदृष्ट्यातस्तया न समचर्चिता।।६।।**

---

१. हेतुमाह ] क२,क३,मु; हेतुता–क१;

२. त्रिगुणा इति मध्यमपदलोपी समासः न तु त्रयो गुणास्त्रिगुणा इति ] क२,क३,मु; त्रिगुणाः इति–क१;

३. संख्यावाचिनः ] क१,क२,मु; संख्यावाचकः–क३

४. अविभक्तिपुरःसरम् ] क१,मु; अविभक्तपुरःसरम्–क२,क३

५. अविभक्तगुणकप्रकृतिमादाय ] क१,क३,मु; अविभक्तगुणक (गुणात्)प्रकृतिमादाय–क२

६. वियूथस्य उत सयूथस्य ] क३,मु; वियूथ्यस्य इति सयूथ्यस्य–क१,क२;

७. गुणाविभागरूपा तु ] क२,क३,मु; गुणाविभागरूपात्–क१;

८. गुणानामविभागःगुणाविभागः ] मु; विभागो–क१,क२; विभागे–क३;

९. गुणाविभागः तद्रूपा अविभक्तगुणेति यावत्। तादृशी प्रकृतिः। तु शब्दो विशेषद्योतनार्थः। दृगन्तरे दर्शनान्तरे नाङ्गीकृता तथा च तदङ्गीकारेऽपि सिद्धान्त इति भावः। तर्हि गुणाविभागरूपा अविभक्तगुणाविभागरूपा प्रकृतिरिति कुत्रत्योऽयं प्रवादः ] मु; गुणविभागरूपा प्रकृतिरिति–क१; गुणविभागरूपा अविभक्तगुणेति यावत् तादृशी प्रकृतिः। तु शब्दो विशेषद्योतनार्थः। दृगन्तरे दर्शनान्तरे नाङ्गीकृता तथा च तदङ्गीकारेऽपि सिद्धान्त इति भावः। तर्हि गुणाविभागरूपा अविभक्तगुणाविभागरूपा प्रकृतिरिति कुत्रत्योऽयं प्रवादः–क२; ०तदङ्गीकारेऽपसिद्धान्त इति भावः। तर्हि गुणाविभागरूपा अविभक्तगुणाविभागरूपा प्रकृतिरिति त्रत्योऽयं प्रवादः–क३

१०. सा प्रकृतिः गुणाविभागरूपा ] मु; सा प्रकृतिः गुणाविभागः–क१,क२;सम्प्रति गुणाविभाग–क३;

११. अविभक्तगुणस्वरूपेति ] क१,क३,मु; अविगुणस्वरूपेति–क२

दर्शनान्तरे अविभक्तगुणरूपा प्रकृतिः नास्ति यतः अतः दर्शनान्तरदृष्ट्या दर्शनान्तरसिद्ध-प्रकृत्यभिप्रायेण[१] आक्षेपे सति सा प्रकृतिः तया अस्मत्साध्यमायया समचर्चिता न समं तुल्यं[२] यथा भवति तथा अभ्यूहिता[३] न विचारितेति यावत्। अविभक्तपुरःसरत्वे साध्ये विभक्तगुण-प्रकृतिमादाय नार्थान्तरं विलक्षणस्वभावतया[४] मायया साम्याभावादिति भावः।।

**(वृत्तिः)** गुणानां समूहः साम्यं गौणं गुणतत्त्वं सांख्यादिभिः प्रकृतिरित्युक्तम्। न चोपादानं त्रिगुणानां सत्त्वादीनां विभागतः। अचैतन्ये सत्यनेकत्वादनित्यत्वे घटादीनामिव कारणपूर्वकत्वान्न परमकारणत्वमिति भावः। तर्हि अविभागरूपा प्रकृतिरस्तु। तदयुक्तम्। दृगन्तरे सांख्यादिशास्त्रे गुणाविभागरूपात्[५] प्रकृतिर्न प्रतिपादिता। गुणाविभागरूपा सा प्रकृतिः सिद्धान्ते प्रतिपादिता। अतः कारणात् सा सिद्धान्तसिद्धप्रकृतिः[६] दर्शनान्तरे शास्त्रान्तरे सिद्धा दृष्टिः ज्ञप्तिः स्वविषयत्वेन यस्याः सा[७] दर्शनान्तरदृष्टिस्तया दर्शनान्तरदृष्ट्या प्रकृत्या न समा सती[८] चर्चिता[९] न समचर्चिता न समतर्किता।

**(व्याख्या)** नन्वस्तु तर्हि द्वितीयः पक्षः। अविभक्तपुरःसरत्वे साध्ये सिद्धान्त-प्रकृतेरविभक्तगुणतया[१०] अन्यथासिद्धिसम्भवादिति शङ्कां निराकर्तुं तादृशप्रकृत्यपेक्षया कलादीनां सूक्ष्मतरत्वप्रतिपादनाय तन्मात्रादिसूक्ष्मकारकपरम्पराम्[११] अनुक्रमते।

**(वृत्तिः)** तर्हि सिद्धान्तसिद्धा सा प्रकृतिः परमकारणम् अस्त्विति[१२] नाशंकनीयम्। प्रतिलिङ्गशरीरं प्रतिस्रोतोभिन्नतया स्थूलतया च यत्र परमकारणत्वसंपादयितृ[१३] सूक्ष्मभावपरनिरतिशयत्वं सा मायेत्युच्यतेत्याह –

**तन्मात्राणि पृथिव्यादेः सूक्ष्माण्येभ्यस्त्वहंकृतिः।**

---

१. दर्शनान्तरसिद्धप्रकृत्यभिप्रायेण ] क२,क३,मु; दर्शनान्तरदृष्टसिद्धप्रकृत्यभिप्रायेण-क१;

२. समं तुल्यं ] क२,मु; समतुल्यं-क१,क३;

३. अभ्यूहिता ] क२,क३,मु; असूहिता-क१;

४. विभक्तगुणप्रकृतिमादाय नार्थान्तरं विलक्षणस्वभावतया ] क२, क३, मु; विभक्तगुणप्रकृतिमादायानर्थान्तरं विलक्षणस्वभावतया -क१

५. गुणाविभागरूपात् ] ज१,ज६; गुणाविभागरूपानु-ज२

६. सा सिद्धान्तसिद्धप्रकृतिः ] ज२; सांसिद्धान्तसिद्धप्रकृतिः-ज१,ज६;

७. यस्याः सा ] ज१,ज६;यस्य स-ज२

८. समा सती ] ज१,ज६;सम्भवति-ज२

९. चर्चिता ] ज१,ज६;न चर्चिता-ज२

१०. सिद्धान्तसिद्धप्रकृतेरविभक्तगुणतया-क३,मु; सिद्धान्तप्रकृतेरविभक्तगुणतया-क१; सिद्धान्तसिद्धिप्रकृतेरविभक्तगुणतया-क२

११. तन्मात्रादिसूक्ष्मकारकपरम्पराम्] क१,मु; तन्मात्रादिसूक्ष्मकारणीपरम्पराम्-क२; तन्मात्रादिसूक्ष्म-कारकपरम्परा-क३

१२. अस्त्विति ] ज२; स्तुति-ज१,ज६

१३. परमकारणत्वसम्पादयितृ ] ज२; परमकारणत्वसंवादयित्र-ज१,ज६;

**तस्याः सूक्ष्मतरा बुद्धिः तस्याः प्रकृतिरेव च।।७।।**
**तस्याः कलादिवर्गश्च माया सूक्ष्मतरा ततः।**

**(व्याख्या)** तन्मात्राणि शब्दादीनि पञ्चतन्मात्राणि पृथिव्यादिभूतेभ्यः सूक्ष्माणि येभ्यस्तन्मात्रेभ्यः[१] सकाशादहंकृतिरहंकारः सूक्ष्मा। तस्याः अहंकृतेः सकाशात् सूक्ष्मतरा बुद्धिः सूक्ष्मतरा अत्यन्तसूक्ष्मा तस्या बुद्धेः सकाशात् प्रकृतिरेव च गुणत्रयाविभागरूपा[२] प्रकृतिरेव च गुणत्रयाविभागरूपा प्रकृतिरेवात्यन्तसूक्ष्मा[३]। तस्याः प्रकृतेः कलादिवर्गः कालकलानियत्यादिसमूहः[४] सूक्ष्मतरः ततः कलादिवर्गात् माया सूक्ष्मतरा अत्यन्तसूक्ष्मा अत्र सूक्ष्मा अत्र प्रकृत्यपेक्षया कलादिवर्गस्य सूक्ष्मत्वात् न तया कलादिहेतुमायासाधकस्य[५] अन्यथासिद्धिरिति[६] ततः सूक्ष्मतरमायासिद्धिरिति[७] भावः।

ननु कलाद्यपेक्षया सूक्ष्मा प्रकृतिरेव[८] किं न स्यात् मायाप्रकृत्योः सौक्ष्म्यस्थौल्ययोर्वा वैपरीत्यं किं न स्यादित्यत आह –

**यत्र सौक्ष्म्यपराकाष्ठा[९] सा मायेत्यभिधीयते।।८।।**

**(व्याख्या)** यत्र यस्मिन् परमकारणे सौक्ष्म्यस्य परा काष्ठा परावधिः तारतम्यविश्रान्तिः सा मायेत्यभिधीयते। मायाप्रकृत्योः पदार्थयोः स्वीकारस्याविशेषेऽपि नाम्नि परं विवादः[१०] क्रियते सोऽपि नास्ति मयत्यस्मादित्यादिना[११] मायापदप्रवृत्तिनिमित्तस्योक्तत्वात्[१२] कलादिवर्गोपादाने मायाशब्दवाच्यत्वस्योचितत्वादिति भावः।

**(वृत्तिः)** सुकरः सूत्रार्थः। ऋषिभिश्चोदितो अवस्तुरूपप्रतिभाषणपरान् मायावादिनो निराकर्तु[१३] माया सिद्धान्ते वस्तुरूपकार्यजनकत्वाद्[१४] वस्तुरूपा।

---

१. येभ्यस्तन्मात्रेभ्यः ] क३,मु; येभ्यस्तन्मात्राण्येभ्यः–क२; "तन्मात्राणि शब्दादीनि . . . सकाशादहंकृतिरहंकारः सूक्ष्मा" इत्ययं व्याख्याभागः क१ कोशे न विद्यते।
२. गुणत्रयाविभागरूपा ] क३,मु; गुणत्रयविभागरूपा–क१, क२
३. प्रकृतिरेवात्यन्तसूक्ष्मा ] क२,क३, मु; प्रकृतिरेव च गुणत्रयविभागरूपा प्रकृतिरेवात्यन्तसूक्ष्मा–क१
४. कालकलानियत्यादिसमूहः ] क१,क२; कलाकालनियत्यादिसमूहः–क३,मु
५. कलादिहेतुमायासाधकस्य ] क३,मु; कलादिहेतुमायासाधनस्य–क१; कलादिहेतुमायासाध-कास्या–क२;
६. अन्यथासिद्धिरिति ] क१,क२,मु; अन्ययासिद्धिरिति–क३
७. सूक्ष्मतरमायासिद्धिरिति ] क१,क२; तदितरमायासिद्धिरिति–क३,मु
८. सूक्ष्मा प्रकृतिरेव ] क३,मु; सूक्ष्मप्रकृतिरेव–क१,क२;
९. सौक्ष्म्यपराकाष्ठा ] क२,क३,मु; सौक्ष्म्यं परा काष्ठा–क१
१०. परं विवादः ] क१,क३,मु; परमविवादः–क२
११. मयत्यस्मादित्यादिना ] क१,मु; मयत्यस्मादित्यस्मदित्यादिना–क२,क३
१२. मायापदप्रवृतिनिमित्तस्योक्तत्वात् ] क२,क३,मु; मायाप्रवृत्तिनिमित्तस्योक्तत्वात्–क१;
१३. मायावादिनो निराकर्तु ] ज१,ज६; मायावादि . . . . कर्तु–ज२
१४. वस्तुरूपकार्यजनकत्वाद् ] ज२; वस्तुरूपा कार्यजनकत्वाद्–ज१,ज६;

**( व्याख्या )** नित्यैका व्यापिनीत्यत्र मायाया यद्वस्तुरूपत्वमुक्तं तत् प्रमाणेन साधयति–

**( वृत्तिः )** नह्यवस्तुजवस्तुदर्शनमिति प्रकृतसिद्ध्यर्थां चिन्तामाविष्करोति –

**मायैषा वस्तुरूपैव कलादिजननी यतः।**

**( व्याख्या )** एषा[1] पूर्वोक्तलक्षणप्रमाणाभ्यां सिद्धा माया[2] वस्तुरूपैव नानिर्वचनीयरूपा[3]। तत्र च हेतुमाह– कलादिजननी यतः। यस्मात् कारणात् कलादिजननी माया तत इत्यर्थः। प्रयोगप्रकारश्च माया वस्तुरूपा कलादिजनकत्वात्[4] शिववत्। वस्ततस्तु जनकत्वादित्येव हेतुः जनकत्वस्य ससंबन्धित्वेन[5] संबन्धिविशेषप्रदर्शनाय[6] कलादीति।

उक्तहेतोः अप्रयोजकत्वशंकां निराकर्तुं[7] कलादेः वस्तुत्वं तावदाह–

**कलादिरिह वस्त्वात्मा वस्त्वात्मा न ह्यवस्तुजः।।९।।**

**( व्याख्या )** इह दर्शने कलादिः वस्त्वात्मा[8] अबाधितस्वरूपः अप्रयोजकत्वनिरासकं तर्कं दर्शयति–वस्त्वात्मेति। कलादिः यदि[9] वस्तूपादानको न स्यात् वस्तुरूपो न स्यादिति तर्कः।

**( वृत्तिः )** स्पष्टस्तु श्लोकार्थः।

**( व्याख्या )** अत्रेष्टापत्तिमभिप्रेत्य शङ्कन्ते ऋषयः –

**( वृत्तिः )** एवं तेन समुद्भेदितचित्ता ऋषयो मायासाधककलादिकार्यरूपप्रपञ्चे[10] वस्तुत्वं न सम्भवतीति चोदयन्ति–

**न हि प्रपञ्चो वस्त्वात्मा प्रमाणानामभावतः।**
**प्रमेयाभावतस्तद्वत् सम्बन्धाभावतोऽपि च।।१०।।**

**( वृत्तिः )** अर्थस्तूत्तरत्रोक्त्या सुकरो भविष्यति।

तदेव विविच्य दर्शयन्ति –

---

१. एषा ] क१,क२,मु;एषां–क३
२. सिद्धा माया ] क२,क३,मु; सिद्धमाया–क१;
३. नानिर्वचनीयरूपा ] क२,क३,मु; नानियमरूपा–क१;
४. कलादिजनकत्वात् ] मु; कलाजननत्वात्–क१; कलाजनकत्वात्–क२,क३;कलादिजनकत्वात्–मु
५. ससंबन्धित्वेन ] क२,क३,मु; संबन्धित्वेन–क१;
६. संबन्धिविशेषप्रदर्शनाय ] क२,क३,मु; संबन्धिविशेषप्रदर्शना–क१;
७. निराकर्तुं ] क२,क३,मु; निराकर्तुः–क१;
८. कलादिः वस्त्वात्मा ] क२,क३,मु; ह्यकलादिवस्त्वात्मा–क१;
९. कलादिः यदि ] क१,क२,मु; कला . . . . दि–क३
१०. मायासाधककलादिकार्यरूपप्रपञ्चे ] ज१,ज६; मायासाधकादिकार्यरूपप्रपञ्चे–ज२

**प्रपञ्चोऽयं प्रमात्रादिभेदात्मा नाक्षगोचरः।**
**यतः प्रत्यक्षमर्थानां विधातृ न निषेधकम्।।११।।**

**निषेधमन्तरा भेदो न समस्ति[1] कदाचन।**
**तस्मात् प्रपञ्चसद्भावे प्रत्यक्षं[2] न तु साधकम्।।१२।।**

**( वृत्तिः )** प्रमात्रादिभेदात्मा आदिशब्देन प्रमाणप्रमेयप्रमितयो गृह्यन्ते[3]। अयं प्रपञ्चः न[4] चतुष्टयव्यतिरिक्तं किंचिदस्तीति भावः। नाक्षगोचरः न तावत् प्रत्यक्षविषयः यतः प्रत्यक्षमर्थानां मेयलक्षणानां विधातृ[5] इदमित्यस्तित्वमात्रग्रहणव्यापारलक्षणमर्थशक्तिजन्यं निर्विकल्पकमिति यावत्। न निषेधकम्। न हि नायं घटः पट इति इतरेतराभावग्रहणव्यापारलक्षणं निर्विकल्पकत्वात्[6]। सविकल्पकस्य[7] देशकालाद्यपेक्षत्वात् नार्थसामर्थ्यजन्यत्वमिति नास्माभिः[8] प्रमाणत्वेन स्वीकृतम्। तथात्वेऽपि तदप्यर्थे सप्रकारकतया[9] अयं घट इति समुत्थविधातृ[10] नेतरेतराभावग्रहीतृ सन्निवेद्धृ[11] निषेधृ[12] प्रत्यक्षस्य प्रमाणत्वेन अस्माभिरनभ्युपगमात्। न चास्तु किमनेनेति वाच्यम्। निषेधमन्तरा तदितरेतराभावग्रहणं विना भेदग्रहणासम्भवात्।

कदाचन भेदः प्रमात्रादिगतः न समस्ति न सम्भवति[13]। तस्मादन्योन्याभावग्रहणासमर्थद्वारा[14] भेदग्रहणासमर्थत्वात् प्रपञ्चसद्भावे प्रत्यक्षं न तु साधकं न प्रमाणम्।

अनुमानागमगोचरत्वमपि[15] निराकुर्वन्ति –

**व्याप्तेस्तत्पूर्वकत्वेन नानुमानमपि प्रमा।**
**प्रत्यक्षादिविरुद्धार्थे नागमस्य प्रमाणता।।१३।।**

---

१. समस्ति ] ज१,ज६; समोऽस्ति–ज२
२. प्रत्यक्षं ,ज१,ज६;अक्षं–ज२
३. गृह्यन्ते ] ज२;अधिशंस्यन्ते–ज१;विशंस्यन्ते–ज६
४. प्रपञ्चः न ] ज१; . . . .–ज२
५. विधातृ ] ज१,ज६; विधात्रा–ज२
६. निर्विकल्पकत्वात् ] ज१,ज६; निर्विकल्पत्वात्–ज२
७. सविकल्पकस्य–ज२ सविकल्पस्य ] ज१,ज६;
८. नार्थसामर्थ्यजन्यत्वमिति नास्माभिः ] ज१; नार्थसामर्थ्यजन्य . . . . स्माभिः–ज२; नार्थसामर्थ्यजन्यमिति नास्माभिः–ज६
९. सप्रकारकतया ] ज१,ज६; सप्रकारतया–ज२
१०. समुत्थविधातृ ] ज२, ज६; समुत्थविधात्र–ज१;
११. नेतरेतराभावग्रहीतृ सन्निषेद्धृ ]ज२ नेतरेतराभावग्रहीत्र सन्निवेद्धृ ज१, ज६;
१२. निषेधृ ] सं० पाठः; निषेधु–ज१, ज६; निषेद्धु–ज
१३. न सम्भवति ] ज१, ज६;न स . . . .–ज२
१४. तस्मादन्योन्याभावग्रहणासमर्थद्वारा–ज२; यस्मादन्योन्यभावग्रहणासमर्थद्वारा–ज१, ज६;
१५. अनुमानागमगोचरत्वमपि ] ज१, ज६; अनुमानागोचरत्वमपि–ज२

**( वृत्तिः )** गृहीतव्याप्तिकत्वादनुमानस्य व्याप्तेः साध्यसाहचर्यनियमस्य तत्पूर्वकत्वेन प्रत्यक्षग्राह्यत्वेन[१] प्रत्यक्षस्य निर्विकल्पकत्वात्[२] लिङ्गादिभेदागोचरत्वेन[३] अनुमानमपि न प्रमा न प्रमाणम्। वाचकशक्तिग्रहस्यापि प्रत्यक्षमूलत्वात्[४] प्रत्यक्षादिविरुद्धार्थे[५] इह भूतले घटो नास्तीत्यादिनिषिद्धार्थे नागमस्य प्रमाणता। सिद्धान्तदृशोपमानादीनां[६] त्रिष्वन्तर्भूतत्वात् न निराक्रियन्ते।

इत्थं प्रपञ्चवस्तुत्वसाधकं प्रमाणाभावं[७] प्रसाध्य तल्लक्षणप्रमेयतदुभयसम्बन्धाभावं तु साधयन्ति–

**तस्मात् प्रमेयाभावोऽपि प्रमाणाभावतः स्थितः।**
**अस्तु मानं[८] प्रमेयं च सम्बन्धो दुर्लभस्तयोः।।१४।।**

**( वृत्तिः )** व्यक्तोर्थः[९]।

परीक्षां वितन्वन्ति[१०]–

**न तावद् ज्ञानघटयोर्योगस्तादात्म्यलक्षणः।**
**ज्ञानस्याभ्यन्तरत्वेन घटश्चाभ्यन्तरो भवेत्।।१५।।**
**नोत्पाद्योत्पादकात्मापि स्वप्नेऽप्यर्थस्तु[११] सम्भवेत्।**
**एवं प्रपञ्चावस्तुत्वे वस्तु माया कथं भवेत्।।१६।।**

**( वृत्तिः )** ज्ञानघटयोश्चिच्छक्तिरेव प्रमाणमिति साध्यमानत्वात् प्रमाणप्रमेयलक्षणयोर्योगः[१२] सम्बन्धः न तावत्तादात्म्यलक्षणः। तावच्छब्दः क्रमार्थः न समवायलक्षणः ज्ञानस्य आभ्यन्तरत्वेन ान्तर्व्यक्तानुभवसिद्धत्वेन[१३] घटश्च बहिःसिद्धः समवायान्यथानुपपत्याभ्यन्तरो भवेत्। तदस्तिवेऽपि जडत्वप्रसङ्ग इत्याशयः। ज्ञानस्य गुणत्वादन्यथाप्यनुरञ्जने विकारित्वजडत्वप्रसङ्गाच्च

---

१. प्रत्यक्षग्राह्यत्वेन ] ज१ ,ज६; प्रत्यक्षप्रमाणग्राह्यत्वेन–ज२
२. निर्विकल्पकत्वात् ] ज१ , ज६; निर्विकल्पत्वात्–ज२
३. लिङ्गादिभेदागोचरत्वेन ] ज१ , ज६; लिङ्गाल्लिङ्गलिङ्ग्यादिभेदागोचरत्वेन–ज२
४. वाचकशक्तिग्रहस्यापि प्रत्यक्षमूलत्वात् ] ज२; याचकशक्तिग्रहस्यापि प्रत्यक्षमूलकत्वात्–ज१ , ज६;
५. प्रत्यक्षादिविरुद्धार्थे ] ज१ , ज६; प्रत्यक्ष . . . .विरुद्धार्थे–ज२
६. सिद्धान्तदृशोपमानादीनां ] ज१ , ज६; सिद्धान्तोपमानादीनां–ज२
७. प्रमाणाभावं ] ज१ , ज६; प्रमाणभ्वं–ज२
८. अस्तु मानं ] ज२ , ज६; अनुमानं–ज१ ;
९. व्यक्तोऽर्थः ] ज२; व्यक्तोत्रार्थः–ज१ , ज६;
१०. परीक्षां वितन्वन्ति ] ज२ , ज; परीक्षान्विन्वन्ति–ज१ ;
११. स्वप्नेऽप्यर्थस्तु ] ज२ , ज६; स्वप्ने व्यर्थस्तु–ज१ ;
१२. प्रमाणप्रमेयलक्षणयोर्योगः ] ज१ , ज६; प्रमाणलक्षणयोर्योगः–ज२
१३. आभ्यन्तरत्वेनान्तर्व्यक्तानुभवसिद्धत्वेन] ज६;आभ्यन्तरत्वेनान्तर्व्यक्तानुभवसिद्धत्वेन घटादिकः सम्भवेत्–ज१ ; आभ्यन्तरचेतनान्तर्व्यक्तानुभवसिद्धत्वेन–ज२;

दूरापास्तः संयोगलक्षण इत्याशयः। नोत्पाद्योत्पादकात्मापि न कार्यकारणलक्षणश्च। तथात्वे स्वप्नेऽपि ज्ञानकार्यान्यथानुपपत्त्या घटादिकः सम्भवेत्[१]। जाग्रेप्यतीतानागतविषयज्ञानं न सम्भवतीत्याशयः। एवमित्यादि श्लोकार्थेनोपसंहृतम्।

**( व्याख्या )** प्रपञ्चः वस्त्वात्मा नेति साध्यम्। तत्र हेतुः प्रमाणानां प्रत्यक्षादीनामभावतः अविद्यमानत्वात्। अयं भावः– प्रत्यक्षस्य वर्तमानसत्वग्राह्यत्वेऽपि त्रिकालाबाध्यत्वरूपवस्तु–त्वविशिष्टप्रपञ्चग्रहे असामर्थ्यादिति। अत एव तदुपजीव्यनुमानादिकमपि न सम्भवतीति भावः। अत एव प्रमाणाभावतः[२] प्रमेयस्य प्रपञ्चस्याभावात् प्रपञ्चस्यावस्तुत्वे हेत्वन्तरमाह–सम्बन्धाभावत इति। ज्ञानज्ञेययोः संबन्धाभावः। प्रपञ्चस्यावस्तुत्वं प्रतिपादयितुमुपोद्घातसंगत्या भेदे प्रत्यक्षादिप्रमाणानि[३] निराकरोति–प्रपञ्च इति। प्रमाता आदिः येषां तानि प्रमात्रादीनि तेषां[४] प्रमातृप्रमेयप्रमाणानां[५] परस्परं ये भेदाः तदात्मा तत्स्वरूपः[६]। अयं प्रपञ्चो नाक्षगोचरः न प्रत्यक्षविषयः। तत्र हेतुमाह–यत इति। यतः कारणात् प्रत्यक्षः कर्तृ अर्थानां[७] घटपटादीनां विधातृ पटोऽस्ति घटोऽस्तीति[८] विधिमुखेन सद्भावावगाहि न निषेधकं न तु निषेधमुखेन घटो न पटो नेत्यादिरूपेण भेदमुखेन वस्त्वगाहि। ननु[९] निषेधकत्वाभावेऽपि भेदावगाहि किं न स्यादित्यत आह निषेधमिति[१०]। भेदः स्वरूपभेदादिः निषेधमन्तरा नञर्थमन्तरा[११] भेदस्यैवाभावात्[१२] इत्यर्थः। यद्यपि प्रमेयत्वाकारेण भेदग्रहे नञर्थापेक्षा[१३] नास्ति तथापि भेदत्वाकारेण तज्ज्ञाने नञर्थापेक्षाया[१४] आवश्यकत्वादिति भावः। उपसंहरति – तस्मादिति। यस्मात् कारणात् प्रत्यक्षं भिन्नप्रपञ्चं न विषयीकरोति तस्मात् प्रपञ्चस्य वस्तुत्वेन साधकं न

---

१. समवायान्यथानुपपत्याभ्यन्तरो भवेत्। तदस्तिवेऽपि जडत्वप्रसङ्ग इत्याशयः। ज्ञानस्य गुणत्वादन्यथाप्यनुरञ्जने विकारित्वजडत्वप्रसङ्गाच्च दूरापास्तः संयोगलक्षण इत्याशयः। नोत्पाद्योत्पादकात्मापि न कार्यकारणलक्षणश्च। तथात्वे स्वप्नेऽपि ज्ञानकार्यान्यथानुपपत्त्या घटादिकः सम्भवेत् ] ज२, ज६;समवायान्यथानुपपत्या–ज१

२. प्रमाणाभावतः ] क१;प्रमेयाभावतः–क२,क३;प्रमाणाभावादेव प्रमेयाभावतः–मु

३. प्रत्यक्षादिप्रमाणानि ] क३,मु; प्रत्यक्षादिप्रमाणं–क१,क२;

४. प्रमात्रादीनि तेषां ] क१,क२,मु; प्रमात्रा–क३

५. प्रमातृप्रमेयप्रमाणानां ] क१,क२,मु; प्रमेयप्रमाणानां–क३

६. तदात्मा तत्स्वरूपः ] क२,क३,मु तदास्तत्स्वरूपः–क१;

७. कर्तृ अर्थानां ] क२,क३,मु; कर्तु अर्थानां–क१;

८. पटोऽस्ति घटोऽस्तीति] क३;पटोऽस्तीति–क१; पटोऽति पटोऽस्तीति–क२; घटोऽस्ति पटोऽस्तीति–मु

९. ननु ] क२,क३,मु; न–क१;

१०. निषेधमिति ] मु; निषेधति–क१; निषेधेति–क२,क३;

११. नञर्थमन्तरा ] क२,क३,मु; नन्तार्थमन्तरा–क१;

१२. भेदस्यैवाभावात् ] क१,क२,मु; भेदस्यैवाभावः–क३

१३. नञर्थापेक्षा ] क२,क३,मु; नन्तार्थापेक्षा–क१; नञर्थापेक्षा–क२,क३,मु

१४. नञर्थापेक्षाया ] क२,क३,मु; नन्तार्थापेक्षाया–क१;

प्रमापकमित्यर्थः। भेदे निराकृते भिन्नप्रपञ्चस्य प्रामाणिकत्वासिद्ध्या[१] प्रपञ्चस्य मिथ्यात्वेन तदुपादानस्यावस्तुत्वमेवेति भावः। ननु प्रत्यक्षेण न भेदग्रह इत्ययुक्तम्[२]। घटपटौ भिन्नौ घटात् पटो भिन्न इति प्रत्यक्षस्य सर्वानुभवसिद्धत्वादिति चेन्न। एतादृशप्रतीतीनां सविकल्पकत्वेन[३] भ्रमत्वात्। ननु मास्तु भिन्नप्रपञ्चसद्भावे प्रत्यक्षं प्रमाणम् अनुमानं तु भविष्यति। तथाहि – अयं घटः एतद्घटवृत्तिबाध्यभेदातिरिक्तभेदाश्रयः वस्तुत्वात् आत्मवदित्याशंक्याह– व्याप्तेरिति। व्याप्तेः हेतुसाध्यसंबन्धग्रहस्य तत्पूर्वकत्वेन साक्षात् परंपरया[४] वा प्रत्यक्षोपजीवकत्वेनानुमानमपि अनुमितिकरणमपि भिन्नप्रपञ्चसद्भावे न प्रमा[५] प्रमापकं न भवतीति। भेदे प्रत्यक्षासम्भवेन[६] सामग्र्यभावादिति भावः। उक्तहेतोरप्रयोजकत्वं च द्रष्टव्यम्। ननु प्रत्यक्षानुमानयोरभावेऽपि जगत्सृष्ट्यादिप्रतिपादकश्रुत्यागमवाक्यानि भिन्नप्रपञ्चसद्भावे प्रमाणानि भविष्यन्तीत्यत आह– प्रत्यक्षादीति। प्रत्यक्षम् आदिर्येषां तानि प्रत्यक्षादीनि। तद्विरुद्धार्थे तद्गृहीतार्थविपरीतार्थे[७] आगमस्य न प्रमाणतेत्यन्वयः[८]। प्रत्यक्षं तावत् घटः पटो[९] नेति इदमिदं नेत्यादिज्ञानप्रसञ्जकम्। परमतेऽप्यभेदग्रहं विना भेदस्य दुर्ग्रहत्वात्। प्रसक्तिं विना प्रतिषेधासम्भवात्। तथा चोपजीव्यत्वादभेदांशे प्रामाण्यमावश्यकम्। उक्तं च खण्डनकृता –

अभेदं नोल्लिखन्ती धीर्न[१०] भेदोल्लेखनक्षमा। तथा चाद्ये[११] प्रमासा स्यान्नान्त्ये[१२] स्वापेक्ष्यवैशसादिति[१३]। अनुमानमपि घटः पटादभिन्नः द्रव्यत्वात्[१४] पटवत्। आगमोऽपि सर्वं सर्वस्याभेदबोधको द्रष्टव्यः। तथा चैतत् सकलविरुद्धार्थे पूर्वोक्तसृष्ट्यादिवाक्यरूपस्य न प्रमाणता। ग्रावप्लवनादिवाक्यवत्[१५] उपचरितार्थतैवेत्यर्थः। प्रमेयाभावत इति यदुक्तं तत् हेतुना साधयति। तस्मात् पूर्वमुपपादितात् प्रमाणाभावतः प्रमाणानां प्रत्यक्षादीनामभावात्[१६]

---

१. प्रामाणिकत्वासिद्ध्या ] क१,क२,मु; प्रमाणिकत्वासिद्ध्या–क३
२. न भेदग्रह इत्ययुक्तम् ] मु; भेदग्रह इत्ययुक्तम्–क१,क२; न भेदग्रह इत्युक्तम्–क३;
३. सविकल्पकत्वेन ] क३,मु; सविकल्पत्वेन–क१,क२;
४. परंपरया ] क१,क३,मु; परंपराया–क२
५. न प्रमा] क२,क३,मु; न–क१;
६. भेदे प्रत्यक्षासम्भवेन] क१,मु;भेदे प्रत्यक्षासम्भवस्योक्तत्वेन व्याप्तिग्रहासम्भवेन–क२; भेदप्रत्यक्षासद्भावेन–क३
७. तद्विरुद्धार्थे तद्गृहीतार्थविपरीतार्थे ] क१,क२,मु; तद्विरुद्धार्थतद्गृहीतार्थविपरीतार्थे–क३
८. न प्रमाणतेत्यन्वयः ] क१,क२,मु; प्रमाणतेत्यन्वयः–क३
९. पटो ] क२,क३,मु; घटो–क१;
१०. नोल्लिखन्ती धीर्न ] क१,मु; नोल्लिखन्तीर्न–क२;नोल्लिखं न धीर्न–क३
११. चाद्ये ]क२,क३; चाद्या– मु; चा–क१;
१२. प्रमा सा स्यान्नान्त्ये सं० पाठः प्रमैव स्यान्नान्त्या– मु; प्रमासाध्यान्नान्त्ये–क१; प्रमासाध्यान्नान्ये–क२; प्रमा स्यास्यान्नान्त्ये–क३;
१३. स्वापेक्ष्यवैशसादिति] क२,मु; स्वापेक्ष्य वैशासदिति–क१; स्वापेक्ष्य . . . . वैशसादिति– क३
१४. पटादभिन्नः द्रव्यत्वात्] क१,मु; पटाभिन्नद्रव्यत्वात्–क२;पटाभिन्नः द्रव्यत्वात्–क३
१५. ग्रावप्लवनादिवाक्यवत्] क२,क३,मु; ग्रावप्लावनादिवाक्यवत्–क१;
१६. प्रमाणानां प्रत्यक्षादीनामभावात्] क१,क३,मु; प्रमाणानामप्रत्यक्षादीनामभावात्–क२

प्रमेयस्य कलादिरूपप्रपञ्चस्य भेदविशिष्टकलादेः अभावोऽपि स्थितः। स्वत एव सिद्ध इत्यर्थः। एवं सम्बन्धाभावत इति यदुक्तं तदुपपादयति- अस्तु मानमिति। मानं प्रमितिः तत्करणं वा प्रमेयं विषयः[१] अस्तु इत्युपेक्षायामङ्गीकाराभिनयः तयोः मानमेययोः[२] संबन्धो विषयविषयिभावादिः[३] दुर्लभः दुर्निरूपः वक्ष्यमाणदूषणग्रासादिति भावः। अत्र मानमेययोः सम्बन्धोऽस्तीति वदन् वादी प्रष्टव्यः किं तयोः तादात्म्यलक्षणः उत जन्यजनकभाव इति अन्यो वा संयोगादिरिति[४]। विकल्प्याद्यं प्रत्याह - न तावदिति। तावच्छब्दः क्रमार्थः ज्ञानघटयोः संबन्धः तादात्म्यरूपो[५] न। तत्र हेतुः ज्ञानस्येति। घटज्ञानस्यान्तरत्वेन घटोऽपि तथा स्यात्। आभ्यन्तरः स्यात् बाह्यो[६] न भवेत्। न चेष्टापत्तिः बहिष्ट्वानुभवविरोधात्। द्वितीयं प्रत्याह- नोत्पाद्येति। ज्ञानघटयोः इत्यनुवर्तते। उत्पाद्योत्पादकेत्यत्र[७] भावप्रधानोऽयं निर्देशः कार्यकारणभाव इत्यर्थः। अपिशब्द उक्तसमुच्चयार्थः। [८]अत्र ज्ञानं वा अर्थहेतुः अर्थो वा ज्ञानहेतुः[९]। नाद्य इत्याह स्वप्नज्ञान[१०] इति। स्वप्ने गजादिज्ञानस्य विद्यमानत्वात् तज्जन्यो गजादिरपि सम्भवेत् वस्तु भवेदित्यर्थः। न द्वितीयः। स्वप्ने जन्यज्ञानस्य सत्वेन तज्जनकीभूतोऽर्थोऽपि संभवेत् इत्यावृत्त्या योजनीयम्[११]। अपिशब्दसमुच्चितौ[१२] संयोगसमवायौ तदा अर्थाभावादेव निरस्तौ तयोः संबन्धिद्वयसापेक्षत्वात् न च विषयविषयिभावोऽपि[१३] संबन्धः तस्य सम्बन्धलक्षणरहितत्वेन[१४] सम्बन्धत्वात्[१५] विषयत्वस्यापि दुर्निरूप्यत्वाच्च। तथा हि- न तावत् ज्ञानजन्यज्ञातताधारत्वम् अतीतानागतयोः वृष्टिरासीत्[१६] वृष्टिर्भविष्यतीत्यत्र तदभावात् ज्ञाततायां प्रमाणाभावाच्च। नापि यस्यां संविदि योऽर्थोऽवभासते स तस्या विषय इति तत्र विषयविषयिभावस्य सप्तम्यर्थत्वे आत्माश्रयात् अन्यस्य निरूपयितुमशक्यत्वादित्यभिप्रायेण उपसंहरति - एवमिति। एवम्

---

१. प्रमेयं विषयः ] क१,क३,मु; प्रमेयविषयः-क२
२. मानमेययोः ] क१,क३,मु; मायामेययोः-क२
३. विषयविषयिभावादिः ] मु; विषयविषयीभावादिदं-क१; विषयविषयीभावादि-क२,क३;
४. संयोगादिरिति ] क२,क३,मु; संभोगादिरिति-क१;
५. तादात्म्यरूपो ] क२,क३,मु; तादात्म्यानुरूपो-क१;
६. आभ्यन्तरः स्यात् बाह्यो ] मु; अभ्यन्तरो-क१;बाह्यो-क२,क३;
७. उत्पाद्योत्पादकेत्यत्र ] क२,क३,मु; उत्पाद्योत्पादकेऽन्यत्र-क१;
८. अत्र ज्ञानं वा . . . वस्तु भवेदित्यर्थः। पर्यन्तं ग्रन्थभागः क३ कोशे नास्ति।
९. अर्थहेतुः अर्थो वा ज्ञानहेतुः ] क२,मु; अर्थहेतुः-क१
१०. स्वप्नज्ञान ] क१,मु; स्वप्ने ज्ञान-क२
११. योजनीयम् ] क३,मु; योजयन्-क१,क२;
१२. अपिशब्दसमुच्चितौ ] क२,क३,मु; अपिशब्दः समुच्चिता-क१;
१३. विषयविषयिभावोऽपि ] क२,मु; विषयविषयीभावोऽपि-क१,क३;
१४. संबन्धलक्षणरहितत्वेन ] क२,क३,मु; संबन्ध लक्षणं रहितत्वेन-क१;
१५. सम्बन्धत्वात् ] क२,क३,मु; असंबन्धात्-क१;
१६. वृष्टिरासीत् ] क१,क३,मु; वृष्टिरस्तित्-क२

उक्तयुक्तिभिः प्रमाणाभावादिभिः प्रपञ्चस्यावस्तुत्वे अप्रामाणिकत्वे[१] मायापि वस्तु कथं भवेत्। कलादीनामवस्तुत्वेन तदुपादानभूतमायायाः वस्तुत्वं कथं भवेत् न कथमपीत्यर्थः।

**( व्याख्या )** सर्वप्रमाणज्येष्ठस्य प्रत्यक्षस्य भिन्नप्रपञ्चग्राहकत्वे अप्रामाणिकत्वे समर्थिते[२] ज्ञानज्ञेययोः सम्बन्धे च निरूपिते प्रपञ्चस्य वस्तुत्वसिद्ध्या तदुपादानमायाया वस्तुत्वसिद्धिरित्यभिप्रेत्य सिद्धान्तयति ईश्वरः–

**( वृत्तिः )** ईश्वरः सविकल्पकमप्यप्रमितिं विवक्षितुमशक्यमित्याकलय्य परिहरति –

**अस्ति प्रमाणं सद्भावे प्रपञ्चस्य पुरातनम्।**
**प्रत्यक्षं तावदर्थानां प्रमाणं भेदगोचरम्।।१७।।**

**( वृत्तिः )** प्रपञ्चस्य सद्भावे तावत् पुरातनं प्रथमं प्रत्यक्षं प्रमाणमर्थानां भेदगोचरं प्रमाणमस्ति।

तत्र तावत् सविकल्पप्रमितिं[३] प्रत्यक्षप्रमाणव्यापृतिं[४] विविच्य दर्शयति –

**स्थाणुर्वा पुरुषो वेति सन्देहे स्थाणुरेव सः।**
**पुरुषो नेति भेदात्मा दृश्यते प्रत्ययोऽक्षतः।।१८।।**

अक्षतः प्रत्यक्षप्रमाणात् स्थाणुर्वा पुरुषो वेति सन्देहे स्थाणुरेव सः पुरुषो नेति भेदात्मा भेदो विसदृशत्वमात्मा स्वरूपं स्वविषयत्वेन यस्य स तथोक्तः भेदगोचरपूर्व इत्यर्थः। प्रत्ययः प्रमाणफलरूपं ज्ञानमितरेतराभावग्रहणरूपतया दृश्यतेऽनुभूयते नेतरेतराभावग्रहणपूर्वं[५] निषेधकं भवेत्। अन्यथा पयोऽर्थी पावकमप्यनुधावेत्[६]।

**( व्याख्या )** प्रपञ्चस्य कलादिभिन्नप्रपञ्चस्य[७] सद्भावे वस्तुत्वे पुरातनं पुराणं[८] सर्वज्येष्ठं प्रमाणमस्ति। न च तस्य वर्तमानसत्तामात्रग्राहित्वेन[९] कालत्रयाबाध्यत्वरूपसत्त्वग्रहे असामर्थ्यमिति वाच्यम्। इदं रजतमिति भ्रमस्थले नेदं रजतमिति बाधवत् प्रकृते उत्तरकालं बाधाभावेन प्रत्यक्षविवयस्य[१०] वस्तुतस्त्रिकालाबाध्यत्वरूपत्वात्। यद्वा यद्यपि प्रत्यक्षं

---

१. प्रपञ्चस्यावस्तुत्वे अप्रामाणिकत्वे ] क१,क२; प्रपञ्चस्यावस्तु अप्रमाणिकत्वे-क३
२. अप्रामाणिकत्वे समर्थिते ] क१;समर्थिते-क२,क३,मु
३. सविकल्पप्रमितिं ] ज१, ज६; सविकल्पप्रमितं-ज२
४. प्रत्यक्षप्रमाणव्यापृतिं ] ज२, ज६;प्रत्यक्षप्रमाणं व्यापृतिं-ज१
५. नेतरेतराभावग्रहणपूर्वं ] ज१, ज६; नेतरेतराभावग्रहणपूर्वम् अभेदग्रहणमिति सर्वत्रायं घट इति विधिमुखविकल्पसिद्धावपि व्यक्तिभेदः पुरः स्फुरति। ततः प्रत्यक्षं भेदग्रहणपूर्वं-ज२
६. पावकमप्यनुधावेत् ] ज२; पावकमप्यनुयाचेत्-ज१, ज६;
७. कलादिभिन्नप्रपञ्चस्य ] क२,क३; कलाभिन्नप्रपञ्चस्य-क१,मु;
८. पुराणं ] क१,मु;पूर्वं-क२,क३
९. वर्तमानसत्तामात्रग्राहित्वेन ] क१,क३,मु; वर्तमानसत्तामात्रग्राह्यत्वेन-क२
१०. प्रत्यक्षविवयस्य ] क१,क२; प्रत्यक्षविवयस्य सत्त्वस्य-क३,मु

वर्तमानसत्वमेव गृह्णाति तथापि तत्रोत्तरकालं धर्मिस्वरूपबाधाभावेन[१] तादृशसत्त्वस्यावगन्तुं शक्यत्वात्[२]। ननूक्तं प्रत्यक्षमर्थानां विधातृ न निषेधकम् [३]इति भेदस्वरूप एव प्रमाणं नास्तीत्युक्तम्। तत्राह–प्रत्यक्षमिति। अर्थानां कलादीनां भेदगोचरं परस्परभेदावगाहि प्रत्यक्षं प्रमाणमस्तीत्यन्वयः। [४]यद्यपि घटादिप्राथमिकप्रत्यक्षस्य भेदत्वेन भेदो न विषयः तथापि धर्मिप्रतियोगिकज्ञानजन्यप्रत्यक्षविशेषे भेदत्वेन[५] भेदो विषयीभवितुम्[६] अर्हतीति भावः। किं तत् प्रत्यक्षमित्याकांक्षायां[७] तादृशं प्रत्यक्षमुदाहरति–स्थाणुर्वेति। क्वचित् ऊर्ध्वताविशिष्टे धर्मिणि[८] साधारणधर्मदर्शनात् स्थाणुर्वा पुरुषो वेति संशये सति अयं स्थाणुरेव पुरुषो नेति भेदात्मा वैधर्म्यादिभेदगोचरः प्रत्ययः साक्षात्कारः अक्षतः इन्द्रियाज्जायमानः[९] सर्वैः दृश्यते अनुभूयते। सर्वानुभवसिद्धो नापलापमर्हतीति भावः।

**( व्याख्या )** नन्वयं प्रत्ययो न प्रमाणं सविकल्पकत्वात् रज्जौ सर्पसविकल्पकवत्[१०] इत्याशंक्य परिहरति –

**( वृत्तिः )** अर्थसामर्थ्यजनितनिर्विकल्पकस्य प्रत्यक्षत्वं न हि नामजात्यादिविषयस्येत्युपन्यस्तं प्रतिक्षिपति –

**भ्रान्तोऽयं सविकल्पत्वात्[११] रज्जुवन्नेष्यतामिति।**
**सर्वेषां सर्वदा कुम्भः कुम्भ एवेक्ष्यते[१२] यतः[१३] ।। १९ ।।**

**नैवं रज्जुः कदाचित्तु यश्च[१४] सर्पायते नृणाम्।**
**मालायते तदन्येषां नैवं कुम्भघटादयः[१५] ।।२०।।**

---

१. धर्मिस्वरूपबाधाभावेन ] क१,क२,मु; धर्मिस्वरूपबाधाभावे–क३
२. तादृशसत्त्वस्यावगन्तुं शक्यत्वात् ] क१,क२,मु; तादृशसत्त्वस्यावग . . . . –क३
३. इति भेदस्वरूप एव . . . प्रमाणमस्तीत्यन्वयः पर्यन्तं ग्रन्थभागः क३ कोशे नास्ति।
४. यद्यपि . . . नेति भेदात्मा वैधर्म्यादिभेद पर्यन्तं ग्रन्थभागः क३ कोशे नास्ति।
५. धर्मिप्रतियोगिकज्ञानजन्यप्रत्यक्षविशेषे भेदत्वेन ] क२,क३,मु; ०प्रत्यक्षविशेषभेदत्वेन–क१
६. विषयीभवितुम् ] क२,क३,मु; विषयविषयीभवितुम्–क१;
७. प्रत्यक्षमित्याकांक्षायां ] क१,क२,मु; प्रत्यक्षमाकांक्षायां–क३
८. ऊर्ध्वताविशिष्टे धर्मिणि ] क२,क३,मु; ऊर्ध्वताविशेषधर्मिणि–क१;
९. अक्षतः इन्द्रियाज्जायमानः ] मु; अक्षतया अजायमानः–क१; अक्षतइन्द्रियाज्जायमानः–क२,क३;
१०. रज्जुसर्पसविकल्पवत् ] क३ रज्जौ सर्पसविकल्पकवत् मु; रज्जुसर्पवत् सविकल्पकम् इव–क१; रज्जुसर्पसविकल्पकम्–क२
११. सविकल्पत्वात् ] क१,क३,मु; सविकल्पकत्वात्–क२
१२. एवेक्ष्यते ] क१,क२; ए . . . .ष्यते–क३;एवेष्यते–मु
१३. यतः ] क१,क३,मु;क्षितः–क२
१४. यश्च ] क१;यः–क२;यतः–क३,मु
१५. कुम्भपटादयः ] क२,क३,मु; कुम्भघटादयः–क१;

**( व्याख्या )** नेष्यतामिति। इतिशब्दस्य[१] प्रकारवचनत्वात्[२]। एवं प्रकारेणान्यदपि यद्यदांशकते विकल्पा वस्तुनिर्भासादित्यादि[३] तत्सर्वं[४] निराकार्यमिति भावः। अत्र हेतुमाह–सर्वेषामिति। सर्वेषां पुरुषाणां सर्वदा कालत्रयेऽपि अक्षतः अक्षीन्द्रियात् कुम्भः स्फीतालोकमध्यवर्ती घटः[५] कुम्भ एवेक्ष्यते[६] न तद्विलक्षणरूपान्तरेण। तथा च सर्वपुरुषीयसार्वकालिककुम्भप्रत्ययस्य न भ्रमत्वं युक्तम्[७]। इदं तु स्थाणुपुरुषभेदप्रत्ययानामुपलक्षणं द्रष्टव्यम्। उक्तानुमाने दृष्टान्तदार्ष्टान्तिकयोः[८] वैषम्यमाह–कदाचिदिति। रज्जौ सर्पप्रत्ययः कुम्भप्रत्ययवत् न भवति। कुतः। यतो रज्जुः कदाचित् सर्पायते सर्पवदाचरति सर्पवत् अवभासत इति यावत्। तदन्येषां सर्पभ्रमवद्भ्यो[९] ऽन्येषां पुरुषाणां मालायते मालावदवभासते। तथा च रज्ज्वाः[१०] सर्पत्वेन वा मालात्वेन वा कदाचित्[११] कैश्चिदिष्यमाणत्वात् तेन रूपेण सर्वदा सर्वैरनिष्यमाणात्वात् भ्रम इत्यर्थः। कुम्भपटादयस्तु[१२] कुम्भत्वेन पटत्वेन[१३] सर्वदा सर्वैः ज्ञायन्त इति तद्विषयज्ञानं प्रमैवेति[१४] भावः। पूर्वं बाधकाभावात्[१५] भेदप्रत्यक्षस्य भ्रमत्वं[१६] निराकृतम्।

**( वृत्तिः )** अयं घट[१७] इत्यादिप्रत्ययोऽयं भ्रान्तः अतद्रूपार्थावलम्बी सविकल्पत्वात्[१८] रज्जुवत्। रज्ज्वादिषु सर्पादिप्रतिभासवदिति पुनरेवं प्रकारेण नेष्यतां न मन्यताम्। यतः सर्वेषां

---

१. इतिशब्दस्य ] क२,क३,मु; इतिशब्दः–क१;

२. प्रकारवचनत्वात् ] क२,क३,मु; सप्रकारवचनत्वात्–क१;

३. वस्तुनिर्भासादित्यादि ] क१,क२,मु; वस्तुनिर्भासादिति–क३

४. तसर्व–क१;तत्सर्वं–क२,क३,मु

५. कुम्भः स्फीतालोकमध्यवर्ती घटः] मु; कुम्भस्थितालोकमध्यवर्तिघटः–क१; कुम्भः स्थितालोकमध्यवर्तिघटः–क२,क३

६. एवेक्ष्यते ] क१,क२; एवेष्यते–क३,मु

७. न भ्रमत्वं युक्तम् ] मु; न युक्तम्–क१; न दामत्वं युक्तम्–क२,क३;

८. उक्तानुमाने दृष्टान्तदार्ष्टान्तिकयोः ] क१,क३,मु; उक्तानुमानदृष्टान्तदार्ष्टान्तिकयोः–क२

९. सर्पभ्रमवद्भ्यो ] क२,क३; तेभ्यो–मु

१०. रज्ज्वाः–मु; रज्ज्वा–क२,क३

११. सर्पवत् अवभासत इति यावत्। तदन्येषां सर्पभ्रमवद्भ्योऽन्येषां पुरुषाणां मालायते मालावदवभासते। तथा च रज्ज्वा सर्पत्वेन वा मालात्वेन वा कदाचित् ] क२,क३,मु; सर्पवत्–क१

१२. कुम्भपटादयस्तु ] क३,मु; कुम्भघटादयस्तु–क१,क२;

१३. पटत्वेन ] क३; घटत्वेन–क१,क२;

१४. प्रमैवेति ] क१,मु;भ्रमैवेति–क२;प्रथममेवेति–क३

१५. पूर्वं बाधकाभावात् ] क१,क२,मु; पूर्वबाधकाभावात्–क३

१६. भ्रमत्वं ] क१,क३,मु;क्रमत्वं–क२

१७. घटः ] ज२; पट–ज१,ज६;

१८. सविकल्पत्वात् ] ज१, ज६;. . . . त्वात्–ज२

सर्वदा कुंभः कुम्भ एवेक्ष्यते। कुम्भोऽयं कुम्भोऽयमितीक्ष्यते। एवं रज्जुर्न[१] समीक्ष्यते यतः कारणात् कदाचिन्नॄणां सर्पायते सर्प इवाचरति सर्प इव भासत इत्यर्थः।

तदन्येषां नराणां मालायते मालेवाऽऽचरति। निवृत्ततिमिरादिके रज्जुरूपेण लक्ष्यते न[२] बाधितत्वात्। सोऽयमवभासः तिमिरादिदोषकृतो[३] भ्रान्त एव कालान्तरदेशान्तरयोरपि विशेषादर्शनात्। कुम्भोऽयमित्यादिसमुत्थकुम्भाद्यवभासस्याबाधितत्वात् कुम्भपटादयः नैवं नान्यथा समीक्ष्यन्ते।

**( व्याख्या )** इदानीं भ्रमकारणीभूतस्याधिष्ठानारोप्ययोः सादृश्याभावादपि न भ्रमत्वमित्याह–

**( वृत्तिः )** सादृश्ये त्विदं बुद्ध्यविवेकाध्यवसायात्मकमज्ञानं सम्पद्यते। विरुद्धधर्मतयात्र[४] का समानता तद्रूपेण चित् कथं विवर्तत इत्याह –

**किंचाहिरज्ज्वोः साम्ये न भ्रान्तिरत्रोपपद्यते।**
**चितो घटादिरूपेण प्रतीतौ का समानता।।२१।।**

**( व्याख्या )** किंचाहिरज्ज्वोरारोप्याधिष्ठानभूतयोः साम्येन आयामवक्रत्वादि-लक्षणसादृश्येन[५] अत्र रज्जौ भ्रान्तिः[६] सर्पभ्रमः उपपद्यते। चितः चैतन्यस्य घटादिरूपेण प्रतीतौ बुद्धौ घटेन चितः का समानता[७] ? चितो निरवयवत्वात् निर्धर्मकत्वाच्च आरोप्यमाणस्य घटस्याध्यासमात्राधीनसिद्धिकस्य सादृश्यं दुर्घटमिति भावः।।

**( वृत्तिः )** सुकरः श्लोकार्थः।

ननु आत्मसंवित् स्वरूपसुखादिरूपेण विवर्तते। सत्यम्। अज्ञानं द्विविधं ह्येकं प्राक्तनानुभूतवस्तुसादृश्यजन्यम् अरजते रजतमित्यादिकम्। द्वितीयं तु काचकामलादिदोषद्रव्यजन्यं पीतः शङ्ख इत्यादिकम्। ततः संविदि विसदृश्यामपि ससुखेति सदुःखेति सुखादिविवर्तनम् अद्वैतप्रतिहन्तृ सदज्ञानजनकमलाद्युपाध्यनुषङ्गित्वात्[८] इति न किंचिदसमञ्जसम्।

---

१. रज्जुर्न ] ज१, ज६; रज्जुं न–ज२

२. निवृत्ततिमिरादिके रज्जुरूपेण लक्ष्यते न ] ज१, ज६;तिमिरादिके लक्ष्यत्वेन बाधितत्वात्–ज२

३. तिमिरादिदोषकृतो ] ज१, ज६; . . . . कृतो–ज२

४. विरुद्धधर्मतयात्र ] ज१, ज६; विरुद्धधर्मत . . . . त्र–ज२

५. आयामवक्रत्वादिलक्षणसादृश्येन ] मु; अयं वक्त्रादिलक्षणेन सादृश्येन–क१; आयामवक्त्रादिलक्षणेन सादृश्येन–क२;आयामवक्त्रादिलक्षणसादृश्येन–क३

६. भ्रान्तिः ] क३,मु; भ्रान्तिकः–क१,क२;

७. का समानता ] क१,क३,मु; कालमानता–क२

८. अद्वैतप्रतिहन्तृ सदज्ञानजनक० ] ज२; अद्वैतप्रतिहन्त्रसदज्ञानजनक०–ज१, ज६;

**( व्याख्या )** ननु सादृश्यज्ञानस्य देहात्मभ्रमादौ व्यभिचारेणाहेतुत्वात्[१] सादृश्यज्ञानं विनाऽपि[२] भ्रान्तिरुपपद्यते। किञ्च पूर्ववादिनो मते सर्वस्यापि सविकल्पकस्याप्रमात्वेनोभय-वादिसम्प्रतिपत्त्यभावाच्चेत्याशंक्य संप्रतिपन्ननिर्विकल्पविषयतयैव[३] भेदं साधयति[४] –

**( वृत्तिः )** सविकल्पकस्य भेदात्मविकल्पत्वात् न प्रामाण्यमित्युक्तं यत्तदयुक्त-मित्यनैकान्तिकत्वं प्रदर्शयन् निर्विकल्पकस्य[५] भिदा ग्रहणं नास्तित्वोक्तिं प्रतिवादिवचसि समुत्थां प्रतिक्षिपति–

**निर्विकल्पाक्षबोधेऽपि भेदात्मा प्रत्ययः स्थितः।**
**अन्यथोत्तरविज्ञानं व्यावृत्तं नोपजायते।।२२।।**
**अगृहीतार्थभेदस्य तन्नामादिविशेषवत्[६]।**

**( व्याख्या )** निर्विकल्पाक्षबोधेऽप्यक्षजन्यो बोध अक्षबोधः अक्षजन्यनिर्विकल्पकज्ञानेऽपि भेदात्मा[७] भेदस्वरूपः प्रतीयत इति प्रत्ययः विषय इति यावत्। स्थितः प्रकारतया भानाभावेऽपि स्वरूपेण भासत[८] इत्यर्थः। ननु निर्विकल्पकज्ञानस्यातीन्द्रियत्वेनानुव्यवसायाविषयत्वात् तस्य भेदविषयत्वे किं प्रमाणमित्यत आह–अन्यथेति। अन्यथा निर्विकल्पकज्ञानस्य[९] भेदविषयत्वाभावे अत एवागृहीतार्थभेदस्य[१०] अगृहीतः अर्थनिष्ठो भेदः येन तादृशस्य[११] पुरुषस्य तन्नामादिविशेषवत् तस्यार्थस्य नामादि नामरूपजात्यादिविशेषवत्। पटः[१२] शुक्लो द्रव्यमित्यादिविशेषावगाहि व्यावृत्तम्[१३] अद्रव्यादिव्यावृत्तविषयकम्[१४] उत्तरविज्ञानम्[१५] उत्तरसविकल्पकज्ञानं[१६] नोपजायते

१. व्यभिचारेणाहेतुत्वात् ] क२,क३,मु; व्यभिचारो हेतुत्वात्–क१;
२. विनाऽपि ] क२,क३,मु; विना–क१; विनाऽपि–क२,क३,मु
३. निर्विकल्पविषयतयैव ] क१,क२; निर्विकल्पतयैव–क३; निर्विकल्पकविषयतयैव–मु
४. साधयति ] क१,क३,मु; बाधयति–क२
५. निर्विकल्पकस्य ] ज१, ज६; निर्विकल्पस्य–ज२
६. तन्नामादिविशेषवत्–उमापतिशिवव्याख्याधृतः पाठः; तन्नामादिविशेषतः–ज्ञानप्रकाशवृत्तिगृहीतः पाठः
७. निर्विकल्पाक्षबोधेऽप्यक्षजन्यो बोध अक्षबोधः अक्षजन्यनिर्विकल्पकज्ञानेऽपि भेदात्मा, मु; अगृहीतार्थभेदस्य तन्नामादिविशेषवत्। निर्विकल्पाक्षबोधेऽप्यक्षजन्यो बोध अक्षबोधः अक्षजन्या-निर्विकल्पकज्ञानेऽपि भेदात्मा–क२,क३
८. स्वरूपेण भासते ] क३,मु; भासते–क१,क२
९. निर्विकल्पकज्ञानस्य ] क२,क३,मु; निर्विकल्पज्ञानस्य–क१;
१०. अत एवागृहीतार्थभेदस्य ] क२,क३,मु; अगृहीतार्थभेदस्य–क१;
११. तादृशस्य ] क१,क३,मु; तादृश्यस्य–क२
१२. पटः ] क३,मु; घटः–क१,क२;
१३. व्यावृत्तं ] क२,क३,मु; व्यावृत्तः–क१;
१४. अद्रव्यादिव्यावृत्तविषयकम् ] मु; द्रव्यादिव्यावृत्तविषयकम्–क१,क२,क३;
१५. उत्तरविज्ञानम् ] मु; उत्तरत्र विज्ञानम्–क१,क२,क३;
१६. उत्तरसविकल्पकज्ञानं ] क१,क२,मु; उक्तसविकल्पकज्ञानं–क३

न जायतैवेत्यर्थः[१]। दण्डी देवदत्त इति विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वावधारणात् प्रकृतेऽपि निर्विकल्पकस्य भेदविषयत्वाभावे[२] भेदविशिष्टसविकल्पकमेव न स्यात् कारणाभावे कार्याभावादिति भावः। निर्विकल्पकं चोपरिष्टात् साधयिष्यते। यदुक्तं पूर्ववादिना अभेदं नोल्लिखन्तीत्यादिना भेदज्ञानस्योपजीव्यत्वेन प्रमात्वात् तद्विरुद्धेऽर्थे नागमस्य प्रामाण्यमिति, तन्न[३]। अभेदज्ञानं प्रत्यपि भेदज्ञानस्य उपजीव्यत्वात् भेदप्रसक्त्यभावे[४] अभेदज्ञानस्यापि अनुदयादित्यपि[५] वक्तुं सुवचत्वात्। तस्मात् उपजीव्यत्वं न प्रमात्वे तन्त्रं किन्तु अबाधितत्वमेव। एवं च प्रकृते घटात् पटो भिन्न इत्यादिज्ञानस्याबाधितत्वात् अभेदज्ञानस्य सबाधितत्वात् प्रमात्वाप्रमात्वे[६] द्रष्टव्ये। एवं च पूर्वोक्ताभेदसाधकानुमानमपि बाधितमेवेति[७] द्रष्टव्यम्। अन्यथा घटेऽपि पटार्थिनः प्रवृत्तिप्रसङ्गात्। एवं च तदभेदबोधकागमोऽपि उपचरितार्थ एवेति द्रष्टव्यम्।

**( वृत्तिः )** निर्विकल्पार्थबोधेऽपि निर्विकल्पप्रत्यक्षप्रमाणचिच्छक्तिसमुत्थसामान्यार्थज्ञाने च भेदात्मा शब्दानुल्लेखनेन नामजात्याद्यस्पृष्ट्वा[८] अतिसूक्ष्मार्थशक्तिमात्रावलम्बनेन शिवादिनामार्थस्य[९] अर्थान्तरेभ्यो व्यावृत्तरूपभेदविषयः प्रत्ययः व्यापारः नानावयवनाना-गुणसादृश्यलक्षणजातिस्फुरणविकल्पाविकल्पनिर्विकल्पप्रत्यर्थवेदनं[१०] स्थितः निश्चितम्। अन्यथा अगृहीतार्थभेदस्य पुरुषस्य शब्दादिसापेक्षस्य तस्यार्थस्य नामादिविशेषतः तन्नामादिविशेषः ततस्तन्नामादिविशेषतः परेभ्यो व्यावृत्तं स्वतो[११] विलक्षणस्वलक्षणतदर्थविषयमुत्तरविज्ञानं सविकल्पकं नोपजायते। कार्यस्य कारणगुणान्वयात् सत्कार्यवादाभ्युपगमाच्च। ततः सविकल्पत्वात् अप्रामाण्यमित्युक्ते समनयदृशा वस्तुभेदाविकल्पनिर्विकल्पकस्यापि[१२] अप्रामाण्यापातनात्। अबाधितत्वाद्धेतोः सविकल्पकनिर्विकल्पकयोः[१३] प्रामाण्यमभ्युपगन्तव्यम्। यदाहुः –

---

१. न जायेतैवेत्यर्थः ] क२,क३,मु; न जायतेत्यर्थः–क१;

२. निर्विकल्पकस्य भेदविषयत्वाभावे ] क१,क३,मु; निर्विकल्पस्याभेदविषयत्वाभावे–क२

३. प्रामाण्यमिति, तन्न ] क१,क२,मु; प्रा . . . .–क३

४. उपजीव्यत्वात् भेदप्रसक्त्यभावे ] क१,क३,मु; उपजीव्यत्वाभेदप्रसक्त्यभावे–क२

५. अनुदयादित्यपि ] क१,क३,मु; अन्वयादित्यपि–क२

६. प्रमात्वाप्रमात्वे ] क१,क२,मु; प्रमात्वात् प्रमात्वाप्रमात्वे–क३

७. बाधितविषयमेवेति ] क२,मु; बाधितमेवेति–क१,क३;

८. नामजात्याद्यस्पृष्ट्वा ] ज१, ज६; नामजात्यादयः स्पृष्ट्वा–ज२

९. शिवादिनामार्थस्य ] ज२; शिवादीनामार्थस्य–ज१, ज६;

१०. व्यापारः नानावयवनानागुण० ] ज१, ज६; व्यापारं नानावयवनानाशास्त्रेण०–ज२

११. व्यावृत्तं स्वतो ] ज१, ज६; व्यावृत्तः सतो–ज२

१२. वस्तुभेदाविकल्पनिर्विकल्पकस्यापि] ज१; वस्तुभेदाविकल्पसविकल्पनिर्विकल्पकल्पकस्यापि–ज२, ज६

१३. सविकल्पकनिर्विकल्पकयोः ] ज१, ज६; सविकल्पनिर्विकल्पकयोः–ज२

अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्।
ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यथा।
बुद्ध्याऽवसीयते साऽपि प्रत्यक्षत्वेन सम्मता। इति।।

**( व्याख्या )** प्रकारान्तरेणापि प्रपञ्चस्य वस्तुत्वं साधयति–

**( वृत्तिः )** प्रकारान्तरतः प्रपञ्चसिद्धिं दर्शयति[1] –

**किंच[2] येन प्रमाणेन प्रपञ्चाभाव उच्यते।।२३।।**
**तत् प्रमाणं प्रमाणं वा न वेति परिचिन्त्यताम्।**
**प्रमाणं चेत् प्रपञ्चोऽस्ति तत्तदन्तर्गतं यतः।।२४।।**
**यद्यप्रमाणं सुतरां भावरूपं जगद्भवेत्।**

**( व्याख्या )** येन प्रमाणेन प्रमाणत्वाभिमतेन प्रपञ्चाभावः प्रपञ्चस्यावस्तुत्वमुच्यते साध्यते तत्साधकं प्रमाणं वा न वा वस्तु वेति विकल्पद्वये परिचिन्त्यताम् उत्तरं कथ्यतामित्यर्थः। कस्मिन् सति किं स्यात् इत्याशंक्याद्यं प्रत्याह[3]– प्रमाणं चेदिति। तत्साधकं प्रमाणं चेत् अवस्तुन[4] प्रमाणत्वायोगात् तस्य वस्तुत्वे सिद्धे[5] तन्न्यायेन प्रपञ्चोऽस्त्येव[6] वस्तुभूतः सिद्ध इत्यर्थः। कुत इत्यत आह तदिति। यतः कारणात् प्रपञ्चावस्तुत्वसाधकं[7] प्रमाणं तदन्तर्गतं प्रपञ्चान्तर्गतम् उक्तयुक्त्या वस्तुभूतं तत इत्यर्थः। प्रपञ्चमिथ्यात्वसाधकस्यापि प्रपञ्चान्तर्गतत्वेन मिथ्यात्वप्रसङ्गात्। माता वन्ध्येतिवद्व्याहतत्वेन[8] अवस्तुत्वासाधकत्वे सति प्रपञ्चस्य वस्तुत्वमेव[9] स्थितम्। किञ्च मिथ्याभूतस्यापि सत्यवस्तुसाधकत्वे आरोपितेनापि[10] धूमेन सत्यवह्निसिद्धिप्रसङ्गात्[11]। द्वितीयं प्रत्याह–यद्यप्रमाणमिति। तत् साधकत्वाभिमतमप्रमाणं[12] यदि तदा सुतरां भावरूपं भवेत्। प्रमाणेन बाधाभावादिति भावः।

---

१. दर्शयति ] ज१, ज६;प्रदर्शयति–ज२
२. किंच ] क३,मु; किन्तु–क१,क२;
३. इत्याशंक्याद्यं प्रत्याह ] क२,क३, मु; इत्याशंक्याह–क१;
४. अवस्तुनः ] क२,क३, मु; वस्तुनः–क१;
५. वस्तुत्वे सिद्धे ] क२,क३; वस्तु वस्तुत्वेसिद्धे–क१;
६. प्रपञ्चोऽस्त्येव ] क१; प्रपञ्चोऽप्यस्त्येव–क२,क३, मु
७. प्रपञ्चावस्तुत्वसाधकं ] क२,क३, मु; प्रपञ्चावस्तुसाधकं–क१;
८. वन्ध्येतिवद्व्याहतत्वेन ] मु; वध्येति मद्व्याहतत्वेन–क१;वन्ध्येति व्याहतत्वेन–क२,क३;
९. प्रपञ्चस्य वस्तुत्वमेव ] क२,क३, मु; प्रपञ्चवस्तुत्वमेव–क१;
१०. आरोपितेनापि ] क२,क३, मु; क्रूरोऽपि तेनापि–क१;
११. सत्यवह्निसिद्धिप्रसङ्गात् ] क१,क३, मु;सध्यवह्निप्रसङ्गात्–क२
१२. साधकत्वाभिमतमप्रमाणं ] क२,क३, मु; साधकत्वाभिमतप्रमाणं–क१;

**( वृत्तिः )** किंच इतोऽपि प्रपञ्चाभावः संविदैक्यं[1] येन प्रमाणेनोच्यते तत् प्रमाणं प्रमाणं वा सत्यभूतं[2] किं न वा सत्यभूतमितीत्थं परिचिन्त्यताम्[3]। प्रमाणं चेद्यदि[4] सत्यभूतं तर्हि प्रपञ्चोऽस्ति यतस्तत् प्रमाणमागमादि अद्वैतसिद्धौ प्रमाणाभावात् स्वप्नवत्[5] अद्वैतप्रतिहन्तृभिः पदवाक्यादिलक्षणैः स्वाङ्गैः सह तदन्तर्गतं प्रपञ्चान्तर्गतम्[6]। तदिदं रत्नत्रये सविस्तरं तत एवावधार्यम्। यद्यप्रमाणं यद्यसत्यभूतं तदाद्वैतसिद्धौ प्रमाणाभावात्। स्वप्नदृष्टवदद्वितीयसत्यब्रह्ममात्रसिद्धिरिति सुतरां जगद्भावरूपं भवेत्। तदुक्तं च मोक्षकारिकासु–

भेदे सति प्रमाणानां प्रवृत्तिर्नान्यथा मता।
कघ्प्तः किमिति विद्वद्भिरभेदो निष्प्रमाणकः[7]।। इति।

ननु यद्यसदपि सदिवावभास्यं[8] श्रुत्यादिकं भवतु सदद्वैतसाधकम्। तदयुक्तम्। सद्रूपायां संविदि नासतां[9] भासनमुपपद्यते। शशविषाणादीनामसतां तद्दर्शनात्[10]। कथं तर्हि शुक्तिकादौ[11] रजदाद्यवभासः। सत्यम्। स तु न तावदाकारः संविदो विकारित्वात्। न ह्यसक्तालम्बनः[12] असतां भासात्[13] न संभाव्यमित्युक्तत्वात्। नापि विपरीतार्थः तेन रूपेणासतोऽर्थस्य तद्रूपेण अवभासनायोगात्[14]। किन्तु तद्भ्रमकारकदेशकालविशेषावष्टम्भेन[15] शुक्तिकादेः सतो रजतादेरिव आभासः[16] स्वप्नेऽप्यनन्तवासनायोगात्। बुद्धेरसत्यर्थेऽपि स्मृतिद्वारा तत्तत्सदर्थाकारत्वात्[17]।

**( व्याख्या )** यदुक्तं ज्ञानज्ञेययोः सम्बन्धो दुर्निरूप इति तत्राह–

---

१. संविदैक्यं ] ज२; स विदैत्व–ज१, ज६;
२. सत्यभूतं ] ज२; सत्वभूतं–ज१, ज६;
३. परिचिन्त्यताम् ] ज१;विचिन्त्यतां परीक्ष्यताम्–ज२; परिचिन्त्यतां परिलक्ष्यताम्– ज६
४. चेद्यदि ] ज२; चेद्यति–ज१, ज६;
५. अद्वैतसिद्धौ प्रमाणाभावात् स्वप्नवत् ] ज१, ज६; इमानि पदानि ज२ कोशे न विद्यन्ते।
६. तदन्तर्गतं प्रपञ्चान्तर्गतम् ] ज२, ज६; तदन्तर्गतम्–ज१;
७. निष्प्रमाणकः ] ज१, ज६; . . . . कः–ज२
८. सदिवावभास्य ] ज२; सदिवाभास्य–ज१, ज६;
९. नासतां ] ज२; सतां–ज१, ज६;
१०. असतां तद्दर्शनात् ] ज१, ज६; सतां दर्शनात्–ज२
११. शुक्तिकादौ ] ज१, ज६; शुक्तिकाद्यैः–ज२
१२. ह्यसक्तालम्बनः ] ज१, ज६; ह्यसत्ताद्यवलम्बनः–ज२
१३. भासात् ] ज१;भासनं–ज२, ज६
१४. अवभासनायोगात् ] ज१, ज६; अवभासनाद्ययोगात्–ज२
१५. तद्भ्रमकारक० ] ज१, ज६; तद्भ्रमाकारक०–ज२
१६. आभासः ] ज२;अवभासः–ज१, ज६;
१७. तत्तत्सदर्थाकारत्वात् ] ज१, ज६; तत्तत्सदर्थाकारकत्वात्–ज२

**( वृत्तिः )** न ह्यसत्तालम्बनोऽवभासः[१] संबन्धोऽपि न दुर्लभः स विषयविषयीभावः सुलभ इत्युक्त्वोपसंहृत्य[२] मायायाः परमकारणतया कर्मणः[३] स्थित्यन्यथानुपपत्या च नित्यत्वं साधयति –

**सम्बन्धो ज्ञानघटयोः ज्ञाप्यज्ञापकलक्षणः ।।२५ ।।**

**( व्याख्या )** ज्ञानं च घटश्च ज्ञानघटौ तयोः ज्ञाप्यो विषयः ज्ञापकं विषयी तल्लक्षणः सम्बन्धः। विषयविषयिभावलक्षणस्वरूपसम्बन्ध[४] इत्यर्थः। यदुक्तं[५]–सम्बन्धलक्षणाभावात् विषयत्वं दुर्निरूपमिति। तदयुक्तम्। विषयविषयिभावानङ्गीकारे[६] भवदुक्तप्रपञ्चबाधकस्य बाध्यविषयकत्वं न स्यात्। तथा च बाधकत्वं न तस्य स्यात् नियामकाभावात्। तथा च विषयत्वानुयोगस्योभयसमाधेयत्वेन नान्यतरपर्यनुयोगो युक्तः। तदुक्तम्– यश्चोभयोः समो दोषो परिहारोऽपि वा समः। इति। विषयत्वलक्षणनिर्वचनस्य[७] च यथा मन्त्रस्य मन्त्र इत्यभियुक्तप्रयोग एव लक्षणम् तथा ज्ञानविषयस्यापि[८] ज्ञानविषय इत्यभियुक्तप्रयोग एव लक्षणम्। न चान्योन्याश्रयः पूर्वपूर्वप्रयोगस्य ज्ञानेनोत्तरोत्तरप्रयोगोपपत्तेः[९]। यस्यां[१०] संविदि योऽर्थोवभासते स तस्या विषय[११] इत्यपि[१२] लक्षणम्। न चात्माश्रयः सति सप्तम्यङ्गीकारात्। भासमानत्वं च व्यवहारयोग्यत्वम्। योग्यत्वं च सति[१३] कारणान्तरे व्यवहारावश्यम्भावः। एवं च यस्यां संविदि सत्यां योऽर्थो व्यवहारयोग्यः स तस्या विषय इति लक्षणार्थः। उपसंहरति– एवमिति[१४]।

**एवं वस्त्वात्मकं विश्वं भवेत् कथमवस्तुजम्[१५]।**
**तस्मात् वस्त्वात्मिका माया स्थिता विश्वस्य कारणी ।।२६ ।।**

---

१. ह्यसत्ता० ] ज२; ह्यवित्ता०–ज१, ज६;
२. सुलभ इत्युक्त्वोपसंहृत्य ] ज२, ज६; सुलक्तोपसंहृत्य–ज१;
३. कर्मणः ] ज१, ज६; . . . . कर्मणां–ज२
४. विषयविषयिभावलक्षणस्वरूपसम्बन्धः ] क२,क३, मु;
५. यदुक्तं ] क३, मु; तदुक्तं–क१,क२
६. विषयविषयिभावानङ्गीकारे ] क२, मु; विषयविषयी०–क१,क३;
७. विषयत्वलक्षणनिर्वचनस्य ] क१; ०निर्वचनं च–क२,क३, मु
८. ज्ञानविषयस्यापि ] क२,क३, मु; ज्ञानविषयव्यापि–क१;
९. पूर्वपूर्वप्रयोगस्य ज्ञानेनोत्तरोत्तरप्रयोगोपपत्तेः ] क२, मु; पूर्वप्रयोगस्य ज्ञानेनोत्तरोत्तरप्रयोगोपपत्तेः–क१,क३;
१०. यस्यां ] क१,क३, मु;यद्वा यस्यां–क२
११. तस्या विषय ] क१,क३, मु; तस्य विषया–क२
१२. इत्यपि ] मु; इत्येव–क१,क२; इत्येवं–क३
१३. सति ] क२,क३,मु; असति–क१
१४. एवमिति ] क१, क२; एवमिति –क३, मु कोशयोर्नास्ति।
१५. कथमवस्तुजम् ] क३, मु; कथमवस्तुजः–क१,क२

**(व्याख्या)** एवमिति[१]। एवमुक्तयुक्तिभिः विश्वं वस्त्वात्मकं सत् कथमवस्तुजम्[२] अवस्तूपादानकं[३] कथं भवेत्। कार्यस्य वस्त्वात्मकत्वेन उपादानमपि वस्त्वात्मकमेव। तस्मात् विश्वस्य कारणीभूता माया वस्त्वात्मिकेति स्थिता सिद्धेत्यन्वयः[४]। ननु मुक्तेः पाशनिवृत्तिरूपत्वान्मायाया[५] अपि पाशत्वान्तनिवृत्त्यभावे अनिर्मोक्षप्रसङ्गात्। पूर्वं मायायाः स्वरूपकथनावसरे नित्यत्वकथनमयुक्तम् इत्याशंक्य प्रमाणेन नित्यत्वं साधयति–

**नित्यैषाऽशेषकार्याणां[६] कारणत्वाद् यदन्यथा[७]।**
**तत्[८] नित्यं यथा तन्तुस्तस्मान्मायाप्यनीश्वरी।।२७।।**

**(व्याख्या)** एषा उक्तप्रमाणसिद्धा[९] अनेनाश्रयासिद्धिशंका निराकृता। मायेति पक्षः नित्या कालानवच्छिन्नेति साध्यनिर्देशः अशेषकार्याणाम् अशुद्धसमस्तकार्याणां[१०] कारणत्वात् उपदानत्वादिति हेत्वर्थः कर्मणां[११] सकलकार्यहेतुत्वेऽपि अनुपादानत्वात्[१२] न व्यभिचारः। अशेषपदं तन्त्वादिषु[१३] व्यभिचारवारणार्थं कार्यपदं[१४] तु मलमायानुपादानत्वे असिद्धिवारणाय[१५]। अत्रान्वयासम्भवात् व्यतिरेकव्याप्तिमाह–यदन्यथा न तन्नित्यनिति[१६]। यत्तदोः व्यत्यासेन योजना। तथा च यत् नित्यं[१७] न तदन्यथा। उक्तसाधनवत्[१८] न भवतीत्यर्थः। तत्र दृष्टान्तमाह[१९]– यथा तन्तुरिति। तन्त्वादिरित्यर्थः[२०]। उक्तं साध्यं[२१] पक्षे निगमयति–तस्मादिति। न च मायाया

---

१. एवमिति ] क१, क२; एवमिति –क३, मु कोशयोर्नास्ति।
२. सत् कथमवस्तुजम् ] क१,क३, मु;कर्म वस्तुजम्–क२
३. अवस्तूपादानकं ] क२,क३, मु; अवस्तूपादानकः–क१;
४. स्थिता सिद्धेत्यन्वयः ] क१,क३, मु;सित्यन्वयः–क२
५. पाशनिवृत्तिरूपत्वान्मायाया ] मु; पाशनिवृत्तिरूपमायाया–क१; पाशनिवृत्तिरूपमाया–क२;
६. नित्यैषाऽशेषकार्याणां ] क२, मु; नित्यैवाशेषकार्याणां–क१
७. यदन्यथा ] क१, मु; यदन्यत्वा–क२
८. तत् ] क२, मु; तु–क१;
९. उक्तप्रमाणसिद्धा ] क१, मु; उक्ताप्रमाणसिद्धा–क२
१०. अशुद्धसमस्तकार्याणां ] क२, मु; शुद्धसमस्तकार्याणां–क१
११. हेत्वर्थः कर्मणां ] क२, मु; हेत्वर्थकर्मणां–क१
१२. अनुपादानत्वात् ] क२, मु; अनुपादानात्–क१;
१३. तन्त्वादिषु ] क२, मु; तत्वादिषु–क१;
१४. कार्यपदं ] क१, मु;पदं–क२
१५. असिद्धिवारणाय ] मु; सिद्धवारणाय–क१; सिद्धिवारणाय–क२;
१६. तन्नित्यमिति ] क१,मु; तन्नित्यत्वमिति–क२
१७. यत् नित्यं ] क२, मु; अयं नित्यं –क१;
१८. उक्तसाधनवत् ] क२, मु; उक्तसाधनं–क१;
१९. दृष्टान्तमाह ] क२, मु; दृष्टान्तः–क१;
२०. तन्त्वादिरित्यर्थः ] क२, मु; तन्त्वादित्यर्थः–क१;
२१. उक्तं साध्यं ] क१; उक्तबाध्यं–क२

नित्यत्वे पाशनिवृत्तिरूपमुक्त्यसम्भवः मायाकार्यनिवृत्तेरेव पाशनिवृत्तित्वात्। नन्वस्य हेतोः शिवादौ सपक्षे[1] सति पक्षमात्रवृत्तित्वेनासाधारण्यं स्यादित्याशंक्यासाधारण्यस्यानुकूलतर्कावतारकाले दोषत्वात्। प्रकृते तदवतारे त्वसाधारण्यप्रयोजकत्वयोर्युगपदेव निरास इत्यभिप्रेत्य विषयपरिशोधकतर्कमाह–

**अनित्यैषा यदीष्येत कर्मणां कुत्र संस्थितिः[2]।**

**(व्याख्या)** एषा माया अनित्या यदीष्येत अङ्गीक्रियते[3] तर्हि महाप्रलये कर्मणां धर्माधर्मस्वरूपाणाम् अवस्थितिः अवस्थानं क्वापि अधिकरणे न स्यात्[4]। तथा च प्रलयकाले कर्माश्रयत्वेनापि मायाया नित्यत्वम्[5] आवश्यकमिति भावः। न चापाद्यापादकयोः[6] वैयधिकरण्यं दोषः[7]। माया यदि नित्या न स्यात् प्रलयकालीनकर्माश्रयो न स्यादिति तदर्थत्वात्[8]। नन्वस्तु बिन्दुः कर्मणामधिकरणं तन्नित्यत्वावश्यकत्वात् तथा च उक्ततर्के[9] इष्टापत्तिरित्यत[10] आह–न बिन्दुरिति।

**न बिन्दुः कर्मणां स्थानं बिन्दुः कर्मोत्तरो यतः।।२८।।**

**(व्याख्या)** बिन्दुर्यतः[11] यस्मात् कारणात् कर्मोत्तरः कर्मातीतः अतो बिन्दुः कर्मणां स्थानमाश्रयो नेत्यर्थः। बिन्दोः कर्मानाश्रयत्वं बिन्दुपटले समर्थितं द्रष्टव्यम्।। ननु कर्मणां बिन्दुसम्बन्धाभावेऽपि सुखदुःखभोक्तृनिष्ठता वाच्या फलव्यधिकरणस्यापि[12] अदृष्टस्य हेतुत्वे अतिप्रसङ्गादित्याशंक्याह–

**न चात्मनि स्थितिस्तेषां यस्मादात्मा जडो भवेत्।**

**(व्याख्या)** यस्मात् जन्यजडधर्माश्रयत्वे आत्मापि जडो भवेत्। अतः कर्मणामात्मनि स्थितिः अवस्थानं न सम्भवतीति[13] शंका। वादिमते धर्माधर्मयोरात्मगुणत्वे[14] नीलघटयोरिव

---

१. शिवादौ सपक्षे ] मु; शिवापक्षे–क१; शिवासपक्षे–क२;
२. कुत्र संस्थितिः ] क२, मु; कृतसंस्थितिः–क१
३. यदिष्यते अङ्गीक्रियते ] क२, मु; यदिष्येत अङ्गीक्रियेत–क१;
४. न स्यात् ] क१, मु;तस्या–क२
५. नित्यत्वम् ] क२, मु; अवश्यत्वम्–क१;
६. चापाद्यापादकयोः ] क२, मु; चापाद्यापादक्योः–क१;
७. वैयधिकरण्यं दोषः ] क१, मु; वैयधिकरण्यदोषः–क२
८. तदर्थत्वात् ] क१, मु; तदनर्थत्वात्–क२
९. उक्ततर्क ] मु; उक्ततर्को–क२;
१०. इष्टापत्तिरित्यत ] मु; इष्टापत्तेरित्यत–क२
११. बिन्दुर्यतः ] क२, मु; यतः–क१;
१२. वाच्या फलव्यधिकरणस्यापि ] क२, मु; वाच्यफलव्यधिकरणस्यापि–क१;
१३. सम्भवतीति ] क१; सम्भवति क२, मु
१४. धर्माधर्मयोरात्मगुणत्वे ] क२, मु; धर्माधर्मयोरात्मनि गुणत्वे–क१;

तादात्म्यस्यापि वक्तव्यत्वात् जडोपादानस्य जडत्वनियमाच्च। जन्यनडधर्माद्याश्रयत्वे[१] आत्मनोऽपि जडत्वं स्यादिति भावः। न च फलादृष्टयोः सामानाधिकरण्यनियमः। तवमते पुत्रकृतगयाश्राद्धादिजन्येन पुत्रसमवेतेनादृष्टेन पितरि फलदर्शनात्। पितृकृतजातेष्ट्यादिजन्येन[२] पितृसमवेतेनादृष्टेन पुत्रे पूतत्वादिफलदर्शनाच्च[३]। शास्त्रैकगम्यकारणत्वे वैयधिकरण्यं न दोष इति नातिप्रसङ्ग इति भावः।।

**( वृत्तिः )** सुकरोऽक्षरार्थः। अनेन मायायाः कुण्डलिनीजन्यत्वं[४] प्रवदन्तः शैवैकदेशिनः प्रतिक्षिप्ताः। सांख्यछायया[५] केचित् रागद्वेषादिवासनात्मकप्रकृतिस्वभावविशेष एव कर्म न हि तत्र बुद्धौ पुरुषस्य कर्तृत्वाद्यनभ्युपगमात्[६] प्रकृतीतरकर्तृसमुद्भावितसंस्कृतिलक्षणं सत्पुरुषकर्तृकं कर्मेति कथयन्ति। तदपरे तदितरदिति।

**( व्याख्या )** ननु मायायाः कर्माश्रयत्वेन नित्यत्वमुक्तं तदनुपपन्नं[७] कर्मणि प्रमाणाभावात् प्रयोजनाभावाच्च। तस्यैवासिद्धेरित्याशंकन्ते ऋषयः।

**( वृत्तिः )** तत्र सन्दिहाना[८] ऋषयः प्रश्नयन्ति –

**कानि तानीह कर्माणि किं तैरत्र प्रयोजनम्।।२९।।**

**प्राकृतान्येव तान्याहुः अन्यानीति तथाऽपरे।**
**तत् सर्वं कथयेशान सन्देहोऽस्माकमीश्वर।।३०।।**

**( व्याख्या )** इह अशुद्धाध्वनि[९] यथा[१०] शुद्धाध्वनि न कर्मापेक्षा[११] तद्वदत्रापीति[१२] तत् किमर्थमिति भावः। तानि यदाश्रयत्वेन मायाया नित्यत्वं साध्यते तानि तादृशानि कर्माणि कानि किंप्रमाणकानीत्यर्थः। अत्र अशुद्धाध्वनि तैः कर्मभिः किं प्रयोजनं साध्यमिति शेषः। अन्वयः शुद्धाध्वनि शुद्धाध्वनीव दृष्टकारणेनैवोपपत्तौ अदृष्टेन किं प्रयोजनमिति भावः। सिद्ध्यन्तु[१३] वा कर्माणि तथापि प्राकृतान्येव प्रकृतिरेव। स्वार्थेऽण्। केचिदाहुः प्रतिवचनेन चात्र प्रकृतिहेतुरिति

---

१. जन्यनडधर्माद्याश्रयत्वे ] क२, मु; जन्यनडधर्माश्रयत्वे–क१;
२. पितृकृतजातेष्ट्यादिजन्येन ] क२, मु; पितृकृते जातेष्ट्यादिजन्येन–क१
३. पूतत्वादिफलदर्शनाच्च ] मु; पुत्रत्वादिदर्शनाच्च–क१; पूतत्वादिदर्शनाच्च–क२;
४. अनन्तत्वेन ] क१, मु; अनन्तरत्वेन–क२
५. सांख्यछायया ] ज२, ज६; सांख्याश्रायया–ज१;
६. कर्तृत्वाद्यनभ्युपगमात् ] ज१, ज६; कर्तृत्वाद्यनभ्युपगमात् . . . .–ज२
७. तदनुपपन्नं ] क१, मु; तदुपपन्नं–क२
८. सन्दिहाना ] ज१, ज६;सन्ति सन्दिहाना–ज२
९. अशुद्धाध्वनि ] क१, मु; शुद्धाध्वनि–क२
१०. यथा ] क२, मु; यथा माया–क१
११. कर्मापेक्षा ] क२, मु; कर्मानपेक्षा–क१
१२. तद्वदत्रापीति ] क२, मु; तद्वदत्रापि–क१;
१३. सिद्ध्यन्तु ] क२, मु; सिद्धन्तु–क१;

अभिधानात्। अपरे अन्यानि बुद्धिगतधर्मादिभावाष्टकरूपाणीत्याहुः[१] हे ईशान[२] अस्माकम् एवं वादिविप्रतिपत्तिजन्यः संशयो वर्तते। तत्सर्वं तत्प्रमाणप्रयोजनतदितरभेदानां च कथयेत्यर्थः।

**( वृत्तिः )** प्राकृतानि प्रकृतिस्वभावलक्षणानि। स्पष्टोऽत्रार्थः।

**( व्याख्या )** चन्दनलेपनादिक्रियाजन्यो भोगो यथा तथा वाऽस्तु[३] कालान्तरभाविस्वर्गनरकादिभोगवैचित्र्यं तु इष्टापूर्तिरूपकर्मजन्यविचित्रादृष्टमन्तरेण दुस्साधमित्यभिप्रायेणोत्तरमाह ईश्वरः–

**( वृत्तिः )** ईश्वरस्तदितरदित्युक्तेः[४] अनुग्रहरूपं भाषणं विनिर्गमयति –

**अविशिष्टे तु भोक्तृत्वे भुञ्जते दिवि केचन।**
**केचनावीचिमुख्येषु न स्यादेतद्[५] अहेतुकम्।।३१।।**
**यत्तत्र हेतुः कर्मेति मन्तव्यं मुनिपुङ्गवाः।**

**( व्याख्या )** कलादियोगसंजाते भोक्तृत्वे अविशिष्टेऽपि[६] सति केचनाणवः दिवि स्वर्गेषु भुञ्जते। दुःखासम्भिन्नं[७] सुखमनुभवन्ति केचन। अन्ये नारकिणः अवीचिमुख्येषु अवीचिः नरकविशेषः तत्प्रभृतिषु नरकेषु सुखासम्भिन्नदुःखं भुञ्जत इत्यन्वयः। एतद् इदं[८] भोगवैचित्र्यमहेतुकं[९] विचित्रशून्यं न स्यात् भवितुं नार्हतीत्यर्थः। तथा च हे मुनिपुङ्गवाः[१०] तत्र स्वर्गनरकभोगवैचित्र्ये यत् हेतुः विचित्रं कारणं तत् कर्म[११] धर्माधर्मात्मकमिति मन्तव्यम् अङ्गीकर्तव्यम्। अनेन धर्माधर्मात्मककर्मसद्भावे इदमनुमानं सूचितम्। विचित्रत्वेनानुभूयमानं सुखादिकं विचित्रकारणजन्यं विचित्रकार्यत्वादिति। तादृशं च विचित्रकारणं धर्माधर्मात्मकमिति। न च तज्जनकीभूतकर्मवैचित्र्यादेव[१२] सुखादिवैचित्र्योपपत्तौ तज्जन्येन स्थायिना

---

१. अन्यानि बुद्धिगतधर्मादिभावाष्टकरूपाणीत्याहुः ] मु; अन्यानीहापाष्टकरूपाणीत्याहुः–क१ ;अन्यानि बुद्धिगतानीत्याहुः–क२;
२. ईशान ] क१, मु; ईश–क२
३. तथा वाऽस्तु ] मु; तस्यास्तु–क१; तथास्तु–क२;
४. ईश्वरस्तदितरदित्युक्तेः–ज२, ज६; ईश्वरस्तदितरदित्युक्तो–ज१;
५. न स्यादेतद् ] क२, मु; तस्यादेतद्–क१;
६. अविशिष्टेऽपि ] क२, मु; अविशिष्टे–क१;
७. दुःखासम्भिन्नं ] क१, मु; दुःखाभिसम्भिन्नं–क२
८. इदं ] क२, मु; उदितं–क१;
९. भोगवैचित्र्यमहेतुकं ] क२, मु; भोगवैचित्र्यहेतुकं–क१;
१०. हे मुनिपुङ्गवाः ] क२, मु; मुनिपुङ्गवाः–क१;
११. कारणं तत् कर्म ] क२, मु; कारणं–क१;
१२. तज्जनकीभूतकर्मवैचित्र्यादेव] मु; तं जननीभूतकर्मावैचित्र्यादेन–क१; तं तर्जनीभूतकर्मावैचित्र्यादेव–क२;

धर्माधर्मात्मकेनेति वाच्यम्। ईष्टापूर्तादिकं फलोत्पत्तिप्राक्क्षणवर्तिव्यापारकं तदुत्पत्तेः पूर्वं[१] विनष्टत्वे सति तज्जनकत्वात् कृषिचिकित्सादिवदित्यनुमानेन तज्जन्यफलपर्यन्तस्थाय्य-पूर्वसिद्धेः। तथा च तदाधारत्वेन मायानित्यत्वसिद्धिः। नन्वप्रयोजकमिदं चिरध्वस्तस्य व्यापाराभावेऽपि फलजनकत्वात् विरोधाभावात्। न च पूर्वक्षणवृत्तित्वरूपं कारणत्वं विनष्टस्य व्यापाराभावेन निर्वहन्तीति वाच्यम्[२]। चिरध्वस्तस्यापि पूर्वक्षणवृत्तित्वसम्भवात्। पूर्वक्षणवृत्तित्वं [३]पूर्वकालवृत्तित्वमात्रं तच्च व्यवहितपूर्वकालवृत्तित्वेऽपि सम्भवति। न चाव्यवहितपूर्वक्षणवृत्तित्वमेव कारणत्वमिति वाच्यम्। गौरवात् यागादौ व्यवहितफल-जनके तदभावाच्च[४]। न चाव्यवहितपूर्वक्षणवर्तिव्यापारकत्वमेव कारणत्वम्। तच्च यागादावपीति वाच्यम्[५]। एवमपि व्यापारे तदभावापत्तेः। न हि व्यापारस्याप्यव्यवहितपूर्वक्षणवर्तिव्यापारकत्वम्[६] अस्ति। व्यापारस्यापि अव्यवहितपूर्वक्षणवर्तिव्यापारान्तरस्वीकारे[७] अनवस्थानात्। न चाव्यवहितपूर्वक्षणावर्तिव्यापारतद्वदन्यतरत्वं तत्त्वम्। तदपेक्षया लाधवेन पूर्वक्षणवृत्तित्वमात्रस्यैव कारणत्वात्। किं च धर्मिकल्पनातो[८] परं धर्मकल्पना लधीयसीति न्यायेन स्वर्गजनकत्वेन[९] क्लृप्तयागादावेव[१०] स्थायित्वमात्रं स्वीक्रियतां न त्वपूर्वं कल्पयित्वा तस्य जनकत्वमपि गौरवात्। न चैवं तृतीयक्षणेऽपि क्रियायाः प्रत्यक्षत्वप्रसङ्गः। द्वितीयक्षणादूर्ध्वं तस्याः सूक्ष्मरूपतास्वीकारात्। किं च व्यापारकल्पनायामपि इन्द्रादिदेवताप्रीतिरेव व्यापारोऽस्तु। न च वाच्यं तीर्थस्नानादौ[११] देवताप्रीतिः व्याभिचरतीति। तत्रापि तदधिष्ठात्रभिमानदेवतायाः प्रीतिसम्भवात् उपवासादौ तदभिमानदेवताया अभावेऽपि सर्वत्रेश्वरप्रसादस्य व्यापारत्वसम्भवाच्च। यद्वा ध्वंस एव व्यापारोऽस्तु न च ध्वंसस्य अनन्तत्वेन[१२] फलानन्तरमपि फलोत्पत्तिप्रसङ्गः।

---

१. तदुत्पत्तेः पूर्वं ] मु; तदुत्पत्तिपूर्वकं-क१; तदुत्पत्तिपूर्वं-क२;

२. वाच्यम् ] क१, मु; वाच्यः-क२

३. हि ] क२, मु; अपि-क१;

४. न चाव्यवहितपूर्वक्षणवृत्तित्वमेव कारणत्वमिति वाच्यम्। गौरवात् यागादौ व्यवहितफलजनके तदभावाच्च ] क२, मु; न चाव्यवहितफलजनके तदभावाच्च-क१

५. यागादावपीति वाच्यम् ] मु; चाव्यवहितपूर्वक्षणवर्तिव्यापारकत्वम्-क१; यागादावपि सम्भाव्यत इति वाच्यः-क२

६. चाव्यवहितपूर्वक्षणवर्तिव्यापारकत्वमेव कारणत्वम्। तच्च यागादावपीति वाच्यम्। एवमपि व्यापारे तदभावापत्तेः। न हि व्यापारस्याप्यव्यवहितपूर्वक्षणवर्तिव्यापारकत्वम् ] क२,मु; चाव्यवहितपूर्वक्षणवर्तिव्यापारकत्वम्-क१

७. अव्यवहितपूर्वक्षणवर्तिव्यापारान्तरस्वीकारे] मु; व्यापारान्तरस्वीकारे-क१,क२; अव्यवहितपूर्वक्षण-वर्तिव्यापारान्तरस्वीकारे- मु

८. धर्मिकल्पनातो ] मु; धर्मिकल्पनातो परं-क१; धर्मिकल्पनातो वरं-क२

९. स्वर्गजनकत्वेन ] क२, मु; स्पर्शजनकत्वेन-क१; स्वर्गजनकत्वेन-क२, मु

१०. कप्तयागादावेव ] क२, मु; प्रयागादावेव-क१;

११. तीर्थस्नानादौ ] क१, मु; तीर्थस्थानादौ-क२

१२. अनन्तत्वेन ] क१, मु; अनन्तरत्वेन-क२

समयविशेष एव तस्य फलजनकत्वात् अन्यथाऽपूर्वकल्पनेऽपि[१] तस्य तुल्यत्वात्। किं च व्यापारत्वेनापूर्वकल्पने[२] विहिताकरणदुरितापूर्वं[३] न सिध्येत्। विहितक्रियोत्पादस्यैव स्थायित्वेन नरकादिहेतुतया व्यापारानपेक्षत्वात्। न च धर्मः क्षरति कीर्तनात् इति वचनानुरोधेन ध्वंसविलक्षणकीर्तनादिविनाश्यापूर्वकल्पनं धर्मशब्दस्य विहितक्रियापरत्वात्[४]। तस्मात् स्थाय्यपूर्वसद्भावे[५] न किंचिदपि मानम्। अत्रोच्यते न तावत् प्रयोजनकत्वं चिरध्वस्तकर्तृकोत्पादनक्रियाया[६] व्यापारव्याप्तत्वात्[७] न चात्रापि व्याप्तावप्रयोजकत्वम्[८]। चिरध्वस्तकर्तृकोत्पादनक्रियात्वावच्छेदेन व्यापारस्य जनकत्वावधारणेन तन्मूलकस्य विपक्षबाधकस्य[९] सत्वात्। अन्यथा[१०] निर्व्यापारध्वस्तेन देवदत्तेनापि पाकादिक्रियोत्पादनापत्तेः। यद्यापि उक्तं क्रियाया एव स्थायित्वं कल्पयित्वा तस्याः तृतीयक्षणादौ सूक्ष्मत्वं कल्प्यत इति तदपि न। सूक्ष्मावस्थाया एव अपूर्वपदव्यपदेश्यत्वात्[११] स्थूलरूपावस्थापरित्यागस्यैव[१२] ध्वंसशब्दार्थत्वाच्च। नापीश्वरप्रसाद एव व्यापारः तथात्वे अनन्तरमेव फलोत्पत्तिप्रसङ्गात्। सतीश्वरप्रसादे फलविलम्बायोगात्। तस्मात् यागादिजनितात् पक्वाद्धर्माद्[१३] ईश्वरप्रसादे फलं जायत इति धर्मादिकमवश्यमङ्गीकार्यम्। नापि ध्वंस एव व्यापारः। तथात्वे कारणभूताभावप्रतियोगित्वेन[१४] यागस्य प्रतिबन्धकत्वापत्तेः। किं च ध्वंसस्य कारणत्वे कारणतावच्छेदकं न ध्वंसत्वमिति प्रसक्तेः किन्तु यागादिध्वंसत्वमेव वाच्यम्। तथा च यागस्य जनकतावच्छेदकत्वेन कारणत्वं न स्यात्। न च वाच्यम् आलोकशतोद्भूतरूपस्य कारणत्वेऽपि आलोकनिष्ठकारणतावच्छेदकत्वात्[१५] उभयमपि अविरुद्धमिति तत्रोद्भूतरूपोत्कर्षस्य विद्यमानत्वेन अवच्छेदकस्यापि

---

१. अपूर्वकल्पनेऽपि ] क२, मु; पूर्वकल्पनेऽपि–क१;
२. व्यापारत्वेनापूर्वकल्पने ] क२, मु; व्यापारत्वेन–क१;
३. विहिताकरणदुरितापूर्वं ] मु; विहिताकारणे दुरितापूर्वं–क१; विहिताकरणे दुरितापूर्वं –क२;
४. विहितक्रियापरत्वात् ] क२, मु; विहितव्यापरत्वात्–क१;
५. स्थाय्यपूर्वसद्भावे ] मु; स्थाप्यपूर्वसद्भावेन–क१; स्थार्यपूर्वसद्भावेन–क२;
६. चिरध्वस्तकर्तृकोत्पादनक्रियाया ] क२, मु; चिरध्वस्तकत्तकोत्पादा नक्रियाया–क१;
७. व्यापारव्याप्तत्वात् ] क२, मु; व्यापारव्याप्रत्वात्–क१;
८. चिरध्वस्तकर्तृकोत्पादनक्रियायाः . . . व्याप्तावप्रयोजनकत्वम्। –इत्येकं वाक्यं क१ कोशे अधिकतया विद्यते।
९. विपक्षबाधकस्य ] मु; विपक्षो बाधकस्य–क१; विपक्षे बाधकस्य–क२;
१०. अन्यथा ] क१, मु; अन्यया–क२
११. अपूर्वपदव्यपदेश्यत्वात् ] क१, मु;घटपूर्वपद० –क२
१२. स्थूलरूपावस्थापरित्यागस्यैव ] क१, मु; स्थूलरूपावस्थापत्तिरित्यागस्यैव–क२
१३. पक्वाद्धर्माद् ] क२,मु; पक्वाधर्माद्–क१;
१४. कारणीभूताभावप्रतियोगित्वेन, क२, मु; कारणभूताभाव० –क१;
१५. आलोकनिष्ठकारणतावच्छेदकत्वात्] मु; आलोकनिष्ठकारणतावच्छेदकत्वम्–क१; आलोकनिष्ठकारणतावच्छेदकवद्–क२;

कारणत्वं कल्प्यते। तथा अन्वयव्यतिरेकाभ्यां उद्भूतरूपवदालोकत्वेन[१] कारणत्वे गृह्यमाणे उद्भूतरूपस्यावच्छेदकत्वमपि। न चैवं यागेऽस्ति[२] तत्र यागस्य कारणताग्राहकश्रुतिसत्वेऽपि अवच्छेदकत्वग्राहकप्रमाणाभावात् फलस्यातीन्द्रियत्वेनान्वयव्यतिरेकयोरभावात्। यदपि उक्तं दुरितापूर्वं न सिध्येत् इति तदपि न। तत्तद्विहितकालावच्छिन्नस्याविहितकरणस्य हेतुत्वे तत्तत्कालापगमेन तदवच्छिन्नविहिताकरणस्यापि विनाशेन तत्रापि व्यापारतया दुरितकल्पनोपपत्तेः व्यापारीभूतस्यादृष्टस्याश्रयश्च बुद्धिद्वारा मायैव। एतच्चातीन्द्रियत्वाद् अदृष्टम्[३] इत्युच्यते। कर्मजन्यत्वात् कर्मेत्यपि कार्यस्य भोगादेः प्रतिपुंनियतत्वात्[४] विचित्रत्वात् प्रवाहानादित्वाच्च स्वयमपि तथाविधम्। अचेतनतया स्वतन्त्रत्वेनेश्वरसहकारिभूतं च। तच्च प्रत्येकं मनोवाक्कायभेदेन त्रिविधम्। यद्वा कार्यस्य सुखदुःखादेः आध्यात्मिकाधिभौतिकाधिदैविकभेदेन त्रैविध्यात् कर्मापि त्रिविधम्। तत्र चेतःप्रसादोद्वेगादिकमाध्यात्मिकं चन्दनानुलेपनगजाद्यभिभवजन्यम् आधिभौतिकम् अभिमतानभिमतवर्षातपादिजन्यमाधिदैविकं। मह्यादिकलान्ताध्ववर्ति-देहेन्द्रियार्थप्रवर्तकतया पाशरूपं च। तदुक्तं श्रीमन्मृगेन्द्रे–

तस्य प्रदेशवर्तित्वात् वैचित्र्यात् क्षणिकत्वतः।
प्रतिपुंनियतत्वाच्च[५] सन्ततत्वाच्च तद्गुणम्।
ईशाविद्याद्यपेक्षितत्वात्[६] सहकारि[७] तदुच्यते। इति।

**(वृत्तिः)** भोक्तृत्वे कलाविद्यारागप्रावृताविद्यादिकलिकलुषिताविवेकज्ञानभोग-क्रियाकर्तृत्वे[८] अविशिष्टे साधारणीभूते। तुशब्दोऽपिशब्दार्थः[९]। केचन केचिद्दिवि स्वाराज्ये सुखात्मकभोगं भुञ्जते। केचन[१०] अवीचिमुख्येषु अवीचिप्रमुखेषु नरकेषु दुःखात्मकभोगं भुञ्जते। एतद्विपर्यस्तमहेतुकमकारणकं न स्यान्न सम्भवेत्[११]। यत् तत्र विपर्यासे हेतुस्तत् कर्मेति मन्तव्यं चिन्तनीयम्[१२]।

---

१. उद्भूतरूपवदालोकत्वेन ] क२, मु; उद्भूतरूपम् आलोकत्वेन–क१;
२. यागेऽस्ति ] मु; यागे समस्त . . . .–क१,क२
३. अदृष्टम् ] क२, मु; दृष्टम्–क१;
४. प्रतिपुंनियतत्वात् ] क२, मु; प्रतिपुर्जनियतत्वात्–क१;
५. क्षणिकत्वतः प्रतिपुंनियतत्वाच्च ] क२, मु; क्षणिकत्वप्रतिपुर्जनियतत्वाच्च–क१;
६. ईशाविद्याद्यपेक्षितत्वात् ] क२, मु; ईशविद्या० –क१;
७. सहकारि ] क२, मु; सहकारी–क१;
८. कलाविद्यारागप्रावृताविद्यादिकलिकलुषिताविवेकज्ञानभोगक्रियाकर्तृत्वे–ज२; कलाविद्या रागः प्रकृताविद्यादिकलितकलुषिताविवेकज्ञानभोगक्रियाकर्तृत्वे–ज१, ज६;
९. तुशब्दोऽपिशब्दार्थः ] ज१, ज६; तुशब्दोऽपिश . . . .–ज२
१०. केचन ] ज१, ज६; केचन केचित्–ज२
११. सम्भवेत् ] ज१, ज६;भवेत्–ज२
१२. चिन्तनीयम् ] ज१, ज६;चिदयम्–ज२

**( व्याख्या )** इयता सुखादिवैचित्र्यकरणं किंचिदस्तीति सिद्धं[१] कारणम्। येन वादिना स्वर्गनरकादिकं नाङ्गीक्रियते तं प्रत्याह–

**( वृत्तिः )** अदृष्टफलविपर्यासेन तदस्तित्वं प्रसाध्य दृष्टफलविपर्यासेनापि साधयति –

**उभयोः कृषिसाम्ये तु कश्चिद् धात्यानि यच्छति।।३२।।**
**न किञ्चिदपरस्तस्य कर्म कारणकं द्विजाः।**

**( व्याख्या )** उभयोः कर्षकयोः कृषिसाम्ये तु कर्षणादिक्षितिसलिलादि-दृष्टकारणपौष्कलसाम्य[२]तुशब्दोऽप्यर्थकः[३] कश्चित् कर्षकः धान्यानि यच्छति प्राप्नोति। अपरः कर्षकः किञ्चिदपि धान्यं न प्राप्नोति। तस्य प्राप्त्यप्राप्तिलक्षणद्विविधकार्यस्य कर्म धर्माधर्मात्मकमेव कारणकं स्वार्थे कः।

**( वृत्तिः )** सुलभः श्लोकार्थः।

**( व्याख्या )** प्रकृतिरेवेति यत् कैश्चिदुक्तं तन्निराकरोति[४]–

**( वृत्तिः )** प्राकृतत्वं निराकरोति–

**न चात्र प्रकृतिर्हेतुः भोग्यत्वेन विरोधतः।।३३।।**

**( व्याख्या )** अत्र[५] लौकिकालौकिकफलवैचित्र्ये[६] प्रकृतिरेव हेतुरिति यदुक्तं तत् न भवति। तत्र हेतुमाह–भोग्यत्वेनेति। प्रकृतिः न भोजिका भोग्यत्वात् चन्दनादिवदित्यनुमानेन सह विरोधात्। न प्रकृतिः करणीभूतकर्मस्थानीयेत्यर्थः।

उक्तानुमाने अनुकूलतर्कमाह–

**यद् भोग्यं भोजकं नैकं तस्मात् कर्मान्यदिष्यताम्।**

**( व्याख्या )** यस्मात् कारणात् भोग्यं भोजकं चैकं[७] न भोग्यत्वभोजकत्वयोः सामानाधिकरण्यानुपपत्तेः तस्मात् कारणात् भोजकं कर्म भोग्यायाः प्रकृतेरन्यदिष्यतां भिन्नमङ्गीक्रियताम्।

---

१. किंचिदस्तीति सिद्धम् ] मु; किञ्चस्तिति सिद्धम्–क१; किञ्चिदस्तीति सिद्धिस्तत्कारणप्राकृतावैतानीत्यादिना प्रकृतिरेव यं कैश्चिन्मतनिराकरणेति कर्मसिद्धिः –क२

२. कर्षणादिक्षितिसलिलादिदृष्टकारणपौष्कलसाम्येऽपि ] क२, मु; कर्षणा क्षितिसलिलादिदृष्टिकारणं पौष्कलसाम्येऽपि –क१;

३. तुशब्दोऽप्यर्थकः ] मु; तुशब्दोत्यर्थः–क१; तुशब्दोऽप्यर्थः–क२;

४. तन्निराकरोति ] क२, मु; निराकरोति–क१;

५. अत्र ] क२, मु; ननु–क१;अत्र–क२, मु

६. लौकिकालौकिकफलवैचित्र्ये ] क२, मु; अतिलौकिका लौकिकं फलवैचित्र्ये–क१;

७. भोजकं चौकं ] मु; चन्दनं भोजकं चौकं–क१; चन्दनादि भोजक . . . . कं–क२

**( वृत्तिः )** अत्र भोगवैचित्र्ये प्रकृतिस्वभावः[1] न च हेतुः न भोजकत्वेन निमित्तं भोग्यत्वेन[2] बुद्ध्यात्मना भोग्यस्वभावेन विरोधतः विरुद्धत्वात्। यस्माद्यद्भोग्यं नैतत् भोजकं न तद्भोजयितृ यथा चन्दनादिकं तस्मात् कर्म प्रकृतिस्वभावादन्यत् विसदृशलक्षणं पुरुषकर्तृकं सत् बुद्धौ गुणत्वेन स्थितमिष्यतां स्वीक्रियताम्। तदुक्तं मतङ्गे –

कर्मणः कारणं कर्ता[3] स पुमान् तत्र कीर्तितः।
भोग्यस्य कारणं कर्म भोगो बन्धस्य कारणम्। इति।।

**( व्याख्या )** अन्यानीति तथाऽपर[4] इति द्वितीयं पक्षमपि दूषयितुमनुवदति–

**( वृत्तिः )** पराशयमाशंक्य निराकरोति –

**प्रकृतेः परिणामो यो बौद्धो भावाष्टकात्मकः।।३४।।**
**स स्यात् कर्मात्मकोऽन्यस्तु भोग्यः स्यादिति चेन्मतिः।**

**( व्याख्या )** बौद्धः बुद्धिगतः धर्मादिभावाष्टकः यः प्रकृतेर्बुद्धिद्वारा परिणामः स स्यात् कर्मशब्दवाच्यं[5] भोजकं स्यात् अलं[6] भावाष्टकादन्यः यः विषयाकारेण परिणामः विषयादिः भोग्यः[7] स्यात् भोगविषयः स्यात्। एवं भोग्यभोजकयोः भिन्नकत्वात् न पूर्वोक्तसामानाधिकरण्यविरोधोऽपीति भावः।

एवं मतिः अभिप्रायश्चेत् प्रकाशस्वरूपस्य भावाष्टकस्य[8] अप्रकाशकर्मात्मकत्वं [9] न सम्भवतीति अभिप्रायेण परिहरति–

**तदप्यसारं भावानां प्रत्ययात्मकता यतः।।३५।।**

**( व्याख्या )** यतः कारणात् बुद्धिगतानां धर्मज्ञानवैराग्यैश्वर्याणाम् अधर्माज्ञानावैराग्यानैश्वर्याणां चेत्यष्टानां भावानां प्रत्ययात्मकता[10] प्रकाशस्वरूपता अतः कारणात् तेषां कर्मत्वमिति यत्तदसारम्। उक्तसमुच्चयार्थोऽपिशब्दः। यथा भोग्यत्वभोजकयोः विरोधः तथा प्रकाशाप्रकाशात्मकत्वयोरपि विरोध इति भावः।

---

१. प्रकृतिस्वभावः ] ज१, ज६;स्वभावः–ज२
२. निमित्तं भोग्यत्वेन ] ज२; निमित्तभोग्यत्वेन–ज१, ज६;
३. कर्ता ] ज१, ज६;कर्म–ज२
४. अन्यानीति तथाऽपर ] मु; अन्यानीति। तथाहि–क१; अन्यानि तथाहीति–क२
५. कर्मशब्दवाच्यं ] क२,मु; कर्म वाच्यं–क१;
६. अन्यः ] क२, मु; अलं–क१;
७. विषयादिः भोग्यः ] मु; विषयादभोग्यं–क१; विषयादिः भोग्यं–क२
८. भावाष्टकस्य ] मु; भावाष्टकस्वरूपस्य–क१; –क२
९. अप्रकाशकर्मात्मकत्वं ] मु;प्रकाशधर्मात्मकं–क१;अप्रकाशकधर्मात्मकं–क२
१०. प्रत्ययात्मकता ] क१, मु; प्रत्ययात्मका–क२

किञ्च भावाष्टकस्य कर्मत्वस्वीकारेऽपि तद्वैचित्र्यहेतुतया कर्मान्तरमावश्यकमिति तदेव सर्वत्र वैचित्र्यहेतुरस्तु इत्यभिप्रायेणाह–

**प्रत्ययास्ते च विविधा दृश्यन्तेऽणुषु सर्वदा।**
**न समास्तत्र केनापि हेतुना भाव्यमग्रजाः।।३६।।**

**(व्याख्या)** हे अग्रजाः किं च ते[1] प्रत्ययाः कर्मत्वेनाभिमन्यमानाः अणुषु विविधाः विचित्रा दृश्यन्त इत्यर्थः। सर्वदा च न समा दृश्यन्ते। तथा चाणुषु सर्वदेति च पदाभ्यां देशतः कालतश्च प्रत्ययानां न साम्यं किन्तु वैचित्र्यमेव दृश्यते। तत्र वैचित्र्ये केनापि विचित्रेण हेतुना भाव्यम्। तदेव कर्मेत्याभिप्रायः।

ननु स्ववैचित्र्ये स्वयमेव हेतवः सन्तु किं कारणान्तरकल्पनयेत्याशंक्य निषेधति– न च स्वयमिति।

**न च स्वयं स्ववैचित्र्ये[2] हेतवस्त्वनवस्थितेः।**

**(व्याख्या)** एते भावाः स्वनिष्ठवैचित्र्ये[3] विचित्रस्य[4] भावो वैचित्र्यं वैविध्यमिति[5] यावत् तत्र स्वयमेव हेतवो न किन्तु सामग्रीवैचित्र्यमेव हेतुः। अन्यथा अनवस्थितेः विचित्रकार्यस्य विचित्रसामग्रीजन्यत्वानङ्गीकारे अतिप्रसङ्गादित्यर्थः।

**(वृत्तिः)** प्रकृतेः बौद्धो बुद्धिगुणत्वेन[6] स्थितः भावाष्टकात्मकः धर्मादिलक्षणः यः परिणामः स कर्मात्मकः कर्मलक्षणं स्यात् प्रकृतेरिति परमतानुसारेण परम्परया वा साक्षात् स्वमतानुसारेण तु बहिः क्रियाभिः स्वाहितसंस्कारलक्षणस्वगुणविभिन्नबुद्धिविकृतत्वेन[7] कर्मोपादनत्वाद्धर्मादेः[8] अन्यस्तु स्रक्चन्दनवनितादिलक्षणः भोग्यः[9] स्यादिति चेन्मतिः। यदि बुद्धिरस्ति तदपि तन्मननमप्यसारं नार्थवत्। भावानां प्रत्ययात्मतया ततस्तथापि तथास्त्विति न वाच्यम्। यतस्ते च[10] भावानां स्थूलरूपभोग्यावस्थात्मकाः[11] प्रत्ययाः अणुषु सकलात्मसु सर्वदा न समा दृश्यन्ते। किन्तु विविधा नानाप्रकारा दृश्यन्ते। हे अग्रजाः। तत्र वैचित्र्यरूपकार्ये केनापि

---

१. ते ] क१, मु;एते–क२

२. स्ववैचित्र्ये ] क१;स्ववैविध्ये–क२, मु

३. स्वनिष्ठवैचित्र्ये ] क१; स्वनिष्ठवैविध्ये–क२, मु

४. विचित्रस्य ] क१; विविधस्य–क२, मु

५. वैचित्र्यं वैविध्यमिति ] क१;वैविध्यं वैचित्र्यमिति–क२, मु

६. बुद्धिगुणत्वेन ] ज२; बुद्धिगुणास्त्वेन–ज१;बुद्धिगुणस्त्वेन-- ज६

७. स्वाहितसंस्कारलक्षणस्वगुणविभिन्नबुद्धिविकृतित्वेन] ज२, ज६; स्वाहितसंस्कारलक्षणं स्वगुणविभिन्नबुद्धिविकृतत्वेन–ज१;

८. कर्मोपादनत्वाद्धर्मादेः ] ज१, ज६; कर्मेन्द्रियत्वाद्धर्मादेः–ज२

९. भोग्यः ] ज१, ज६; भोग्यं–ज२

१०. यतस्ते च ] ज१, ज६; यतस्ते–ज२

११. स्थूलरूपभोग्यावस्थात्मकाः ] ज२, ज६; स्थूलरूपं भोग्यावस्थात्मकाः–ज१

हेतुना भाव्यं यत् किंचित् कारणं भवितुमर्हति। स्वयं निमित्तान्तरम्[1] अनपेक्ष्य स्ववैचित्र्ये न च हेतवः कुतोऽनवस्थितेः। ततो विचित्रं विचित्रात् विचित्रान्तरं[2] ततोऽपि तथेत्यनवस्थानात्।

**( व्याख्या )** भावाष्टकस्यैव कर्मात्मकत्वे बाधकान्तरमाह–

**( वृत्तिः )** इतोपीत्याह –

**किं चैते सर्वसामान्या पुंसो निष्कर्मकानपि।।३७।।**
**मायाविचित्रसंसृष्टौ भवेयुः कारणं कथम्।**

**( व्याख्या )** एते भावप्रत्ययाः सर्वसामान्यास्त्रिविधपशुसाधारणा। अतो निष्ककर्मकान् कर्मशून्यान् विज्ञानाकलान्[3] अपि व्याप्नुवन्तः। मायाविचित्रसंसृष्टौ सकलासाधारणमायासंसृष्टौ कथं कारणं भवेयुः। सर्वसाधारणत्वेन असाधारणकार्यवैचित्र्यनिर्वाहकत्वायोगात्[4] इति भावः।

**( वृत्तिः )** किंच तिष्ठतु स्ववैचित्र्यविषयालोचना निष्कर्मकान् पुंसोऽपि प्रतिकर्मान्तरालम्बनाभावात्। एते प्रत्ययाः सर्वसामान्याः सर्वसाधारणाः। मायाविचित्रसंसृष्टौ कारणं[5] वेदाः प्रमाणमितिवत् लिङ्गवचनव्यत्ययः कथं भवेयुः। न कथंचिदपीत्यर्थः।

**( व्याख्या )** स्वभाववादाश्रयणेन पूर्वोक्तसर्वदोषपरिहारमाशंक्य परिहरति–

**( वृत्तिः )** पराशयान्तरमाशंक्य निराकरोति –

**प्रकृतेः परिणमोऽयं चित्रस्वाभाविकस्तु चेत्।।३८।।**
**अस्तु स्वाभाविकश्चित्रः परिणामः प्रधानजः।**
**विचित्रपरिणामो यन्न हि स्वाभाविकस्य तु।।३९।।**

**( वृत्तिः )** अयं प्रकृतेश्चित्रः परिणामः स्वभावस्तु चेत् साक्षात् प्रधानजश्चित्रः परिणामः। मन्मते गुणोऽपि त्वन्मते बुद्ध्यात्मकः स्वाभाविकोऽस्तु। तस्य स्वाभाविकस्य प्रतिपुरुषं विचित्रस्य बुद्ध्यात्मकस्य न हि[6] विचित्रः परिणामः न हि विविधभावप्रत्ययाद्यात्मायं[7] स दृश्यते च। यदि हि सोऽपि न नैमित्तिकः स्यात्। तदा निरपेक्षत्वात् अनवस्थितिः समापतेत्।

अस्त्वित्यभ्युपगम्यापि पराकरोमीत्याह –

---

१. निमित्तान्तरम् ] ज१, ज६; निमित्तोत्तरम्–ज२
२. विचित्रान्तरं ] ज२; विचित्रान्तरः–ज१, ज६;
३. कर्मशून्यान् विज्ञानाकलान् ] क१, मु; कर्मशून्यविज्ञानाकलान्–क२
४. असाधारणकार्यवैचित्र्य०, क१, मु; असाधारणकारणवैचित्र्य०–क२
५. कारणं ] ज१,ज६; ज२ कोशे नास्ति।
६. न हि ] ज१, ज६;न–ज२
७. विविधभावप्रत्ययाद्यात्मायं ] ज२; विविधभावः प्रत्ययाद्यात्मायं–ज१, ज६;

**अस्य प्रवृत्तिस्वाभाव्ये निवृत्तिस्तत्क्रिया कथम्।**
**प्रवृत्तिश्च निवृत्तिश्च विरुद्धे ह्येकधर्मिणि[१] ।।४०।।**

**( वृत्तिः )** अस्य प्रधानस्य प्रवृत्तिस्वाभाव्ये विचित्रपरिणामभवनात्मप्रवर्तनस्य स्वतःसिद्धत्वे निवृत्तिस्तद्विलीनलक्षणा तत्क्रिया कथम्। प्रवृत्तिश्च निवृत्तिश्च द्वे विरुद्धे स्वतःसिद्धविरोधलक्षणे ततो धर्मिणि न भवतः।

यथेति निदर्शयति –

**अग्नेः प्रकाशस्वाभाव्यो नाप्रकाशोऽपि तत्कृतः।**
**प्रवृत्तिश्च निवृत्तिश्च न स्वतः किंतु कारणात्।।४१।।**
**यदत्र कारणं कर्म तस्मान्नाकस्मिकं जगत्।**

**( वृत्तिः )** अप्रकाशः प्रकाशान्तता न तत्कृतः न स्वभावः कृतः किन्तु उपाधिकृत इत्यर्थः। नाकस्मिकं नाकरणिकं न कारणान्तरनिरपेक्षमित्यर्थः[२] । इतरपदार्थः स्पष्टः।

**( व्याख्या )** अयं प्रपञ्चात्मकः प्रकृतेः विचित्रः परिणामः स्वाभाविकः स्वभावादेवोपपन्नः[३] । नित्यवस्तूनां आत्माकाशादीनां वैविध्यं कारणान्तरनिरपेक्षमेवेति शंकार्थः। वैविध्ये स्वभाववादम्[४] अङ्गीकृत्य विरुद्धवैविध्ये न स्वभाववादो निर्वाहक इत्यभिप्रायेण परिहरति अस्त्विति। प्रधानजः प्रकृतिजन्यः परिणामस्वाभविकः चित्रोऽस्तु स्वभावादेव विविधोऽस्तु अस्तु इत्यङ्गीकारः प्रौढिवादेन[५] सिद्धान्ते कर्महेतुत्वाङ्गीकारात्[६] । किन्तु विचित्रः विरुद्धः परिणामः स्वाभाविकस्य स्वभाववादिनो न हि उपपादयितुं न शक्य इत्यर्थः। इमवेव[७] विशदयति अस्येति। अस्य प्रधानस्य वा प्रवृत्तिस्वाभाव्ये[८] प्रवृत्तिरेव[९] स्वभावो यस्य तत् प्रवृत्ति-स्वभावः तस्य भावः स्वाभाव्यं तस्मिन् प्रवृत्तिस्वभावकत्वे इत्यर्थः। निवृत्तिः तद्विरुद्धा निवृत्तिः तत्क्रिया तस्य प्रपञ्चस्य क्रिया कथं स्वभावविरोधादिति। एकस्य विरुद्धोभयस्वभाववत्त्वासम्भवादिति भावः। तमेव विरोधं दर्शयति। प्रवृत्तिश्चेत् एको धर्मी

---

१. ह्येकधर्मिणि ] सं० पाठः; ह्येकधर्मिणी-ज१ ;नैकधर्मिणि-ज२ ;नैकधर्मिणी- ज६

२. न कारणान्तरनिरपेक्षमित्यर्थः ] ज१ , ज६; निवृत्तिस्तद्विलीनलक्षणा . . . न कारणान्तरनिरपेक्षमित्यर्थः पर्यन्तं ग्रन्थभागः ज२ कोशे नास्ति।

३. परिणामः स्वाभाविकः स्वभावादेवोपपन्नः ] क१ ,मु; परिणामस्वाभाविकस्वभावादेवोपपन्नः-क२

४. स्वभाववादम् ] क२, मु स्वभाववादान्-क१ ;

५. प्रौढिवादेन ] क२ , मु; प्रौढवादेन-क१ ;

६. कर्महेतुत्वाङ्गीकारात् ] क२ , मु; कर्मणे हेतुत्वाङ्गीकारात्-क१ ;

७. इमवेव ] क१ ; इदवेव-क२ ; इदमेव-मु

८. प्रवृत्तिस्वभाव्ये ] क२ , मु; प्रवृत्तिः स्वाभाव्ये-क१ ; प्रवृत्तिस्वभाव्ये-क२

९. प्रवृत्तिरेव ] क१ , मु; प्रवृत्तिर्वे-क२

यस्याः सा[1] एकधर्मिणी[2] तादृशी प्रवृत्तिश्च विरुद्धेत्यर्थः। इदमेव दृष्टान्तेन प्रतिपादयति अग्नेरिति। अग्नेः प्रकाशस्वाभाव्यः स्वभावसिद्धः अप्रकाशोऽपि तत्कृतो न वह्निकृतो न प्रकाशस्वभावस्य अप्रकाशस्वभावत्वविरोधादिति भावः। दार्ष्टान्तिके[3] योजयति प्रवृत्तिश्चेति। प्रवृत्तिश्च निवृत्तिश्च न स्वतः स्वभावादेव नेत्यर्थः। कारणादिति। तत्तत्कारणादित्यर्थः। नन्वेवमपि अदृष्टसिद्धौ किमायातमित्यत आह यदत्रेति। अत्र प्रवृत्तिनिवृत्त्यात्मके[4] विरुद्धे वैविध्ये यत् कारणं तत् कर्मैव धर्माधर्मात्मकं कर्मैवेत्यर्थः। उपसंहरति तस्मादिति। नाकस्मिकं स्वाभाविकं न भवतीत्यर्थः।

**( व्याख्या )** नन्वेकस्य प्रवृत्तिनिवृत्तिस्वाभाविकं कालभेदेनाविरुद्धमिति कर्मस्वीकारो व्यर्थ इत्यत आह–

**( वृत्तिः )** तथापि प्रवृत्तिनिवृत्त्योरसमानकालवृत्तित्वे[5] नैकधर्मित्वमस्त्वित्या-शंकायामाह–

**किंच[6] यो यत्स्वभावस्तु धर्मः सोऽस्य सदा भवेत्।।४२।।**

**अग्निः प्रकाशमानोऽपि यथा दाहं करोत्यापि।**
**तदेवं प्रकृते[7] स्यातां प्रवृत्तिविनिवर्तने[8]।।४३।।**

**( व्याख्या )** यो धर्मी यत्स्वभावः यद्धर्मस्वभावः तस्य धर्मिणः स धर्मः सदा भवेत्। यावद्वस्तु न वर्तमानः स्यात्। तथा चोभयस्वभावत्वे उभयं युगपदेव स्यात्द्य तत्र दृष्टान्तमाह–अग्निरिति। अपिशब्द एवकारार्थः। प्रकाशमान एव दाहं करोति तस्मात् कारणात् स्वाभाविकधर्मयोः कदाप्यनपायात् प्रवृत्तिनिवृत्त्योरपि स्वाभाविकत्वे यौगपद्यं[9] स्यादित्यर्थः।

**( वृत्तिः )** किंचोक्तं विनापि यत्स्वभावो यो धर्मः सोऽस्य धर्मिणः सदा भवेत्। यथाऽग्निः प्रकाशमानोऽपि प्रकाशन् सन्नपि[10] दाहमपि करोति। तत्तस्मात् कारणादेवमित्थमेककाले प्रकृतेः प्रवृत्तिनिवर्तने द्वे[11] स्याताम्। न दृश्यते। तस्मात् द्वितीयं सापेक्षम्[12] इत्यर्थः।

---

१. यस्याः सा ] क२, मु; यस्यास्य–क१;
२. एकधर्मिणी ] क१, मु; एकधर्मिणि–क२
३. दार्ष्टान्तिके ] मु;दृष्टान्तिको–क१; दृष्टान्तिके–क२
४. प्रवृत्तिनिवृत्त्यात्मके ] क१, मु; प्रवृत्तिनिवृत्त्यात्मको–क२
५. प्रवृत्तिनिवृत्त्योरसमानकालवृत्तित्वे ] ज१, ज६;
६. किंच ] क२, मु; किन्तु–क१;
७. प्रकृते ] मु; प्रकृतेः–क१; प्रकृतौ–क२
८. प्रवृत्तिविनिवर्तने ] क१, मु; प्रवृत्तिनिवर्तने–क२
९. यौगपद्यं ] क२, मु; चौगपद्यं–क१;
१०. प्रकाशन् सन्नपि ] ज१, ज६; प्रकाशयन्नपि–ज२
११. द्वे ] ज१, ज६; . . . .–ज२
१२. सापेक्षम् ] ज२, ज६; सपेक्ष्यम्–ज१;

**(व्याख्या)** नन्वेकत्र एकदा विरुद्धनानापरिणामासम्भव इत्युक्तं तदयुक्तम्। सिद्धान्तिनाप्येकत्र बुद्धौ प्रकृतौ च विरुद्धानां धर्मादीनां भावानां सत्त्वादीनां गुणानां च परिणामस्वीकारात् इत्याशंकन्ते ऋषयः।

**(वृत्तिः)** ऋषयः विरुद्धयोरेकधर्मित्वमस्तीति चोदयन्ति–

**अष्टौ धर्मादयो भावा विरुद्धास्तु परस्परम्।**
**गुणाः सत्त्वादयश्चैवमेककारणिकाः कथम्।।४४।।**

**(व्याख्या)** धर्मादयः धर्म आदिः येषां ते धर्मादयः तद्गुणसंविज्ञानो बहुव्रीहिः अत एवाष्टावित्यभिधानं[1] परस्परं धर्मो धर्मेण ज्ञानं ज्ञानेनेत्येवंप्रकारेण परस्परविरहात्मकत्वप्रतीतेरिति भावः। गुणाः सत्त्वादयः एवं परस्परविरुद्धाः प्रकाशप्रवृत्तिनिरोधस्वभावत्वादेवं विरुद्धा इत्यर्थः। अतः[2] कथमेककारणिकाः कारणमेषामस्तीति कारणिकाः। कारणमेषामस्तीति कारणिनः एककारणिनः तृतीयातत्पुरुषः स्वार्थे कः। कर्मधारयपक्षे तु न कर्मधारयात् मत्यर्थीय इत्यस्यासार्वत्रिकत्वादिनिप्रत्ययो द्रष्टव्यः।

**(वृत्तिः)** अर्थः परिहारोक्त्या सुकरी भविष्यति।

**(व्याख्या)** धर्मादीनामधर्मसत्त्वादीनां च परस्पराविरोधमभिप्रेत्य परिहरति–

ईश्वरः–

**न विरुद्धास्तु धर्माद्या[3] यतस्ते प्रत्ययात्मकाः।**
**ज्ञानाभावोऽत्र नाज्ञानमन्यथाज्ञानमेव तत्।।४५।।**

**(वृत्तिः)** भावशब्देन कथ्यमाना[4] धर्माद्याः परस्परं तु उत्तरत्रोक्त्या न विरुद्धाः तदेव दर्शयति। यतस्ते भावाः प्रत्ययात्मकाः भोग्यदशाम्[5] आपन्नेषु सिद्ध्यादिप्रकाशरूपाः। उत्तरत्र बुद्धिपरीक्षायां विविधपरीक्षोक्तिमन्तः। ततः नवीति पूर्वानुषङ्गः। अविरोधप्रकाशत्वं दर्शयति। अत्र धर्मादिमध्ये पठितमज्ञानं न ज्ञानाभावः[6] न बौद्धमसिद्ध्यनध्यवसायात्मकं पौरुषमज्ञत्वं वा[7] किंतु तदन्यथाज्ञानमेव। चिच्छक्तेः स्वतो भ्रान्तेरसम्भवात्। येन बुद्धिगुणेनानुषङ्गेण संशयविपर्ययवेदनं संपद्यते तदत्र तमोलक्षणकर्मोपादानजम्[8] अज्ञानमित्युच्यते।

---

१. एवाष्टावित्यभिधानं ] क२, मु; एवाष्टाविंशत्यभिधानं–क१;
२. अतः ] क१, मु; 'क२' कोशे न विद्यते।
३. धर्माद्या ] ज१, ज६; धर्मो–ज२
४. कथ्यमाना ] ज१, ज६; . . . . –ज२
५. भोग्यदशाम् ] ज१, ज६; भोग्यदशायाम्–ज२
६. न ज्ञानाभावः ] ज२, ज६; ज्ञानाभावः–ज१;
७. पाफ्षमज्ञत्वं वा ] ज१, ज६; पाफ्ष . . . . –ज२
८. तमोलक्षणकर्मोपादानजम् ] ज१, ज६; तमोलक्षणधर्मोपादानजम्–ज२

फलितमाह –

**तस्मात् ज्ञानविशेषास्ते सर्वे धर्मादयः स्थिताः।**
**न विशेषास्तु सामान्याद्विरुद्धा हि कदाचन।।४६।।**

**( वृत्तिः )** विशेषास्तु अन्यथात्वादिविशेषयुक्ताः। सामान्यात्[1] ज्ञानत्वसाधारणात् कदाचन कदाचिदपि न विरुद्धा हि। पूर्वार्धार्थस्तु[2] स्पष्टः। भावविरोधं[3] परिहृत्य गुणविरोधः चिद्व्यञ्जकत्वसाधारणान्येवेति[4]।

यदज्ञानं चिच्छक्त्यनर्थक्रियारूपं पुरा ज्ञानाभाव इत्युक्तं तत् तमोगुणोपादानकार्यं न भवतीति[5] च वदति –

**न चेह[6] सत्त्वतमसी विरुद्धे स्तः कदाचन।**
**यथावद्बोधकं सत्त्वमन्यथाबोधकं तमः।।४७।।**
**बोधकत्वाविशेषान्न विरोध इति चोदितम्।**
**न कदाचित्तमः कार्यमज्ञानं तु मलाद्यतः।।४८।।**

**( वृत्तिः )** यतः यस्मात् कारणात् चिच्छक्त्यनर्थक्रियालक्षणं पौरुषमज्ञानं च[7] तद्द्वारा कर्तव्यसत्त्वोपादानकार्यसिद्ध्यध्यवसायानभिव्यक्तिलक्षणमसिद्धिरनध्यवसाय इत्युक्तं तमोनिमित्तजं बौद्धं चाज्ञानं[8] मलाद्धेतोर्जातम्। ततः संशयविपर्ययलक्षणान्यथाज्ञानात्मकम्[9] अज्ञानं तमोलक्षणकर्मोपादानजमिति न काचित्[10] क्षतिः। सुकरस्तदितराक्षरार्थः।

उपसंहरति –

**ततो न कुत्रचित् किंचित् स्वभावेन विरुद्धयोः।**
**कार्ययोः कारणं[11] तस्माद्विरोधः कारणान्तरात्।।४९।।**

---

१. सामान्यात् ] ज१, ज६; . . . . न्यात्–ज२
२. पूर्वार्धार्थस्तु ] ज२; पूर्वार्थस्तु–ज१, ज६;
३. भावविरोधं ] ज२, ज६; भावः विरोधं–ज१;
४. चिद्व्यञ्जकत्वसाधारणान्येवेति ] ज१, ज६; चिद्व्यञ्जकत्वसाधारणा . . . . ति–ज२
५. भवतीति ] ज१; न भवतीति–ज२, ज६
६. चेह ] ज२; वेह–ज१, ज६;
७. पाप्षमज्ञानं च ] ज१, ज६;पाप्ष . . . . –ज२
८. बौद्धं चाज्ञानं ] ज२; बौद्धाज्ञानं–ज१, ज६;
९. संशयविपर्ययलक्षणान्यथाज्ञानात्मकम् ] ज१, ज६; संशयविपर्ययलक्षणः . . . . न्यथाज्ञानात्मकम्–ज२
१०. काचित् ] ज१, ज६; कदाचित्–ज२
११. कारणं ] ज२, ज६; करणं–ज१;

**कारणं तच्च कर्मैव तदपीश्वरचोदितम्[1]।**
**ततः स्वभाववादोऽयं भ्रान्तिमूल इति स्थितः॥५०॥**

**(वृत्तिः)** ततः पुरोक्तकारणात् कुत्रचित् क्वचिदपीत्यध्याहार्यम्। स्वभावेन विरुद्धयोः कार्ययोः किंचिदेकं कारणं न भवति[2]। तस्मादुक्तरीत्या स्वतोऽसम्भवाद्विरोधः प्रकृतेः प्रवृत्तित्वनिवृत्तित्वलक्षणः कारणान्तरात्। तच्च सहकारिलक्षणं कारणं कर्मैव। अयमाशयः। शक्तिरूपत्वेन मायावद्विचित्ररूपरहिततद्धेतुकारणकृतविचित्रोक्तिमद्धोजकसजातीयकर्मान्तरालम्बनात्[3]। प्रकृतिस्वभावादन्यस्मात् बुद्धौ गुणत्वेन पुरुषकर्तृकबहिर्यागादिक्रियाजनितसंस्कारलक्षणात् कार्यद्वारा भोग्यलक्षणकर्मण[4] उपादानात् सत्त्वरजस्तमोमयं भोक्तुमुद्भूतसत्त्वादिकत्वेन सुखाद्यात्मना परिणतत्वात्। सुखदुःखमोहाद्यात्मकं[5] साक्षात् भोग्यं भेदभावप्रत्ययबृन्दं तावत्[6] जातं तदन्वयतस्तदर्थत्वात् भोगाधिकरणत्वात् परम्परया भोग्यं तत्त्वभुवनशरीरादिकं तु कर्मणैव सहकारिणा मायाख्यादुपादानात् साक्षात् परम्परया चोत्पन्नमिति। कर्मलक्षणं तु जनकं धारकं भोग्यमध्यात्मादित्रिसाधनम्।

तत् सत्यानृतयोनित्वाद्धर्माधर्मस्वरूपकम्। इत्यादिना मृगेन्द्रादौ विविच्य कृतम्। तदपि कर्म ईश्वरचोदितं प्रेरितं प्रवर्तते। ईश्वरसिद्धौ जडस्य स्वतः प्रवृत्तिर्नेति निराकृतत्वात्। सात्त्विकान् सुखात्मिकां प्रीतिं च तज्जातीयेषु भोग्येषु धरणं करोतीति धर्मः। सात्त्विकान् प्रीतिं च न धरणं करोतीति वा पुनरसात्त्विकान् तामसान् राजसांश्च दुःखात्मिकाम् अप्रीतिं[7] च तज्जातीयेषु भोग्येषु धरणं करोतीति वा अधर्मः। तदुभयात्मकं कर्म प्रतिपुरुषमनुष्ठेयविचित्रत्वादनेकप्रत्ययात्मनोपभोग्यमनन्तमेव। तदपि न तत्त्वान्तरं धर्मादिभावाष्टकभेदस्वविकारप्रकृतिसंस्काररूपत्वात्। तेन विना प्रकृतेः[8] बन्धत्वायोगात्। ततस्तस्मात् कारणात् प्रकृतिस्वभावादेव वैचित्र्यं जगत् इत्ययं स्वभाववादः[9] भ्रान्तिमूल इति स्थितः बुद्धिगतान्यथाज्ञाननिमित्त इति निश्चितः। न मायाव्यतिरिक्तो मल उपादानकारणात् कार्यस्योत्पत्तेरिति हेतूक्तिं प्रकुर्वन्तो व्यतिरिक्तव्यतिरिक्तमलव्यापृतित्वेन[10] वक्ष्यमाणचिच्छक्तितिरस्कृतिर्मायाव्यापृतिरिति।

---

१. तदपीश्वरचोदितम् ] ज१, ज६; तदपीश्वरचोदितः-ज२
२. भवति ] ज१;न भवति-ज२, ज६
३. द्धसजातीयकर्मान्तरालम्बनात् ] ज१, ज६; द्धसजातीयकर्मान्तरावलम्बनात्-ज२
४. भोग्यलक्षणकर्मण ] ज१, ज६; भोज्यलक्षणकर्मण-ज२
५. सुखदुःखमोहाद्यात्मकं ] ज२; सुखदुःखमोहात्मकं-ज१, ज६;
६. भेदभावप्रत्ययबृन्दं तावत् ] ज२; भोग्यं भावप्रत्ययविन्दतावत्-ज१, ज६
७. अप्रीतिं ] ज१, ज६; प्रीतिं-ज२
८. प्रकृतेः ] ज२; प्रकृते-ज१, ज६;
९. स्वभाववादः ] ज१, ज६; संवादः-ज२
१०. व्यतिरिक्तमलव्यापृतित्वेन ] ज२, ज६; व्यतिरिक्तव्यतिरिक्तमलव्यापृतित्वेन-ज१;

**( व्याख्या )** धर्माद्याः अष्टौ धर्माद्याः यतो यस्मात् कारणात् प्रत्ययात्मकाः प्रकाशस्वरूपा एव न तु भावाभावात्मकाः[१] अतः कारणात्ते[२] परस्परं न विरुद्धाः। तु शब्दः पूर्वोक्तशंकाव्यावृत्त्यर्थः[३]। ननु अज्ञानमित्युक्ते[४] ज्ञानाभावः प्रतीयते[५] कथं प्रत्ययात्मकत्वमित्यत आह–ज्ञानाभाव[६] इति। अत्र भावाष्टकमध्ये अज्ञानमित्यतो ज्ञानाभावो न विवक्षितः। किन्तु तदज्ञानपदवाच्यं अन्यथाज्ञानं प्रकारान्तरेण[७] विषयावगाहिज्ञानमेव विशेष्यावृत्तिप्रकारकज्ञानमिति यावत्। अस्त्वेवं[८] ज्ञानाज्ञानयोः सामान्यविशेषभावः[९] तद्धर्मादीनां कथमित्यत आह– तस्मादिति। यस्मात् कारणात् अज्ञानं ज्ञानविशेष एव तस्मात् कारणात् ते धर्मादयः ज्ञानविशेषा एवेति स्थिताः। न हि लोके घटनीलघटादीनां परस्परविरोधो दृश्यते। तद्वत् प्रकृतेऽपि अविरोध इत्याह–न विशेषा इति। विशेषास्तु कदाचन कदाचिदपि सामान्यात् सामान्येन सह विरुद्धा न भवन्ति। हि प्रसिद्धौ। एवं धर्मादीनां[१०] विरोधं परिहृत्य सत्त्वादीनामपि अविरोधमाह–न चेति। इह गुणत्रयमध्ये सत्त्वतमसी सत्त्वगुणतमोगुणौ कदाचन विरुद्धौ न स्तः न भवतः। एतदेवोपपादयति–यथावदति। सत्त्वं[११] सत्वगुणः यथावत् बोधकं यथार्थज्ञानजनकम् अन्यस्तु अन्यथाबोधजनकम् अयथार्थज्ञानजनकं[१२] न तु सत्त्वाभावः। तथा च सत्त्वतमसोः[१३] बोधजनकत्वाविशेषात् ज्ञानजनकत्वसामान्यात् विरोधो नास्तीति चोदितमुक्तप्रायमित्यर्थः। ज्ञानतदभावयोरेव विरोधो न तु ज्ञानजनकयोरिति भावः।

ननु ज्ञानाभावरूपमज्ञानं[१४] तमःप्रयुक्तम्[१५]। तथा च कार्यतो विरोधः तदवस्थ इत्याशंकां[१६] निराकरोति–न कदाचिदिति। यतः कारणात् अज्ञानं तु ज्ञानाभावरूपम् अज्ञानं तु मलादेव[१७]

१. भावाभावात्मकाः ] क२, मु; भावाभावात्मकं–क१;
२. अतः कारणात्ते ] मु; कारणं ते–क१; कारणत्ते–क२
३. पूर्वोक्तशंकाव्यावृत्त्यर्थः ] क२, मु; पूर्वोक्तशंकाव्यावृत्त इत्यर्थः–क१;
४. अज्ञानमित्युक्ते ] मु; घटज्ञानमित्युक्ते–क१ घटाज्ञानमित्युक्ते–क२
५. ज्ञानाभावः प्रतीयते ] मु; ज्ञानाभावप्रतीतेः–क१, क२
६. ज्ञानाभाव ] क२, मु; ज्ञानभाव–क१;
७. प्रकारान्तरेण ] मु; प्रकाश्यन्तरेण–क१; प्रकाशान्तरेण–क२
८. अस्त्वेवं ] मु; अस्त्येव–क१;अस्त्वेव–अ२
९. सामान्यविशेषभावः ] क२, मु; सामान्यविशेषाभावः–क१;
१०. एवं धर्मादीनां ] क२,मु; एव मध्यमादीनां–क१;
११. सत्त्वं ] क१, मु; 'क२' कोशे नास्ति।
१२. अयथार्थज्ञानजनकं ] क२, मु; यथार्थज्ञानजनकं–क१;
१३. सत्त्वतमसोः ] क२, मु; तत्वतमसो–क१;
१४. ज्ञानाभावरूपमज्ञानं ] क२ मु; ज्ञानं भावरूपमज्ञानं–क१;
१५. तमःप्रयुक्तम् ] क१, मु; तमःप्रवृत्तम्–क२
१६. इत्याशङ्कां ] क२; इत्याहुः कार्यं–क१; इत्याशंक्य–मु
१७. मलादेव ] क२, मु; मलात्–क१;

भवति ततः कारणात् कदाचिदपि तमःकार्यं न तमोजन्यं न[१]। तथा च सत्त्वतमसोः कार्यद्वारापि न विरोध इति भावः। विशेषसमर्थितं न्यायं सामान्येऽपि संचारयति–तत इति। यस्मात् कारणात् विरुद्धोभयकार्यजननस्वाभाव्यम्[२] एकस्य न सम्भाव्यत इति सम्मतम्। ततः[३] कारणात् कुत्रचिद्धेशे काले च किञ्चिदपि वस्तु विरुद्धयोः परस्परविरहरूपयोः कार्ययोः स्वभावेन आगन्तुककारणनैरपेक्ष्येण न कारणं न जनकम्[४]। तस्मात् कारणात् एककारणजन्ययोः कार्ययोः विरोधः कारणान्तरादेवात्र भवतीति शेषः। अस्तु[५] कारणान्तरात् कर्मणि किमायातमित्यत आह–कारणं तच्चेति। तच्चैकस्य कारणस्य विरुद्धोभयकार्यजनकत्वनिर्वाहकं[६] कारणान्तरं कर्मैव। ननु तर्हि कर्मण एव सकलकार्यनिर्वाहकत्वे किमीश्वरेणेत्यत आह–तदपीश्वरचोदितमिति। तदपि कर्म ईश्वरचोदितमेव ईश्वरप्रेरितमेव कार्यवैचित्र्यनिर्वाहकम्। प्रसङ्गादुक्तं स्वभावाददूषणं[७] उपसंहरति–तत इति। यस्मात् कारणात् कर्मणा विना स्वभावादेव कायवैचित्र्यं न निर्वहति[८] तस्मात् कारणात् अयं स्वभाववादः कारणस्वभाव एव कार्यवैचित्र्यजनक इत्ययं वादः भ्रान्तिमूलः अप्रामाणिक इति स्थितः निर्णीतः।

**( व्याख्या )** ननु मयत्यस्मादित्यादिना मायाया मोहकत्वमुक्तं तच्च पदार्थस्वरूपाच्छादनं विना न युक्तम्। न हि शुक्तित्वमनाच्छाद्य भ्रमसानग्री मोहं जनयति। तदाच्छादकत्वमपि[९] मायाया एवेत्यत आह–

**( वृत्तिः )** तद्धेतुर्नित्यः शब्दः काकस्य कार्ष्ण्यादितिवद्व्यधिकरणासिद्ध इत्यबुध्यन्तो मायामलवादिनः पाशुपतप्रमुखाः प्रलपन्ति। ततस्तदुक्तिं तिरस्करोति –

**न च माया मलस्तस्माद्यतः कार्यात् प्रकाशिका।**
**कार्यात् प्रकाशकं यत्तु स्वात्मना जनकं न तत्।।५१।।**

**यथा प्रकाशकौ दृष्टौ वह्निदीपावुभावपि।**
**न दीपकारणं वह्निः क्वाचिदप्यप्रकाशकः।।५२।।**

**( व्याख्या )** माया मलो न आच्छादको न। तत्र हेतुमाह–यत इति। यतः कारणात् यद्वस्तु कार्यात् प्रकाशकं तत् स्वात्मना स्वरूपेणाजनकं प्रकाशाजनकं आच्छादकं नेत्यर्थः।

---

१. तमोजन्यं न ] क२, मु; तमोक्त . . . . न्यः–क१;

२. ०जननस्वाभाव्यम् ] क२, मु; ०जनस्वाभाव्यम्–क१;

३. ततः ] मु; तनु–क१;तन्नतः–क२

४. आगन्तुककारणनैरपेक्ष्येण न कारणं न जनकं ] मु; आगन्तुककारणं नैरपेक्ष्येण कारणेन जनकं–क१; अवगन्तुककारणनैरपेक्ष्येण कारणजनकं न–क२

५. शेषः। अस्तु ] क२, मु; शेषवस्तु–क१;

६. ०निर्वाहकं ] क१, मु; ०निर्वाहकः–क२

७. प्रसङ्गादुक्तं स्वभावाददूषणं ] मु; स्वभावात् अदूषणं–क१; स्वभावाद्दूषणं–क२

८. न निर्वहति ] क२,मु; निर्वहति–क१;

९. तदाच्छादकत्वमपि ] क२, मु; तदाच्छादकत्वेऽपि–क१;

कार्यद्द्वारा प्रकाशकस्य स्वरूपेणाच्छादकत्वाभावे[1] दृष्टान्तावाह–यथेति। वह्निश्च दीपश्च वह्निदीपौ उभावपि प्रकाशकौ यथा दृष्टौ स्वस्वकार्यद्वारा प्रकाशकौ दृष्टौ। ननु कार्यस्य विद्यादेः प्रकाशकत्वेऽपि तत्कारणीभूताया मायाया आच्छादकत्वं किं न स्यादित्यत आह–न दीपकारणं वह्निरिति। यथा दीपस्य कारणं कारणीभूतो वह्निः क्वचिदपि आच्छादको न दृष्टः अत्र वह्निपदं दीपान्तरजनकदीपस्यापि[2] उपलक्षणम्। तस्यापि पूर्वं दृष्टान्तत्वेनोपात्तत्वात्[3] तथा प्रकाशहेतुभूतविद्याकारणीभूतायाः मायाया अपि आच्छादकत्वं न युक्तमिति भावः। पूर्वोक्तशुक्तिरजतस्थलेऽपि[4] न भ्रमसामग्र्या आच्छादकं किन्तु मलादेरेवेति[5] द्रष्टव्यम्। प्रयोगप्रकारश्च माया आच्छादिका न कार्यद्वारा प्रकाशकत्वात् वह्निवत् दीपवच्चेति।

**( वृत्तिः )** माया न च मलः न च मलव्यापारलक्षणचिच्छक्तितिरस्कृतिकरी। सेयं प्रतिज्ञा। यतः[6] कारणात् कार्यात् कलादिद्वारा प्रकाशिका चिच्छक्त्यभिव्यञ्जिका। तस्माद्व्यञ्जकत्वात् सोऽयं हेतुः। यत्तु कार्यात् प्रकाशकमभिव्यञ्जकं तत् स्वात्मना स्वरूपेण नाजनकं नानभिव्यञ्जकं न तिरस्कर्तृ[7]। यथेत्यादिप्रकाशक इत्यन्तश्लोकार्थः स्पष्टः। सोऽयं दृष्टान्तः। यद्यप्यस्ति तिरस्कर्तृत्वं मायायाः कार्यद्वारा अपि नानुपपत्तेः[8] चिच्छक्त्यप्रकाशककार्यजन–कत्वमसम्भावनीयम्। यदि कार्यद्वारा तथा तस्याः[9] सम्भावनीयं तिरस्कर्तृत्वं स्यात्। तदा तस्यां सत्यां प्रलयोपसंहृतकार्यायां सर्वेषां सर्वज्ञत्वप्रसङ्गः। ननु विरुद्धकारणान्तरानुविधानाद् विरुद्धलक्षणप्रवर्तननिवर्तनवतीति[10]। तथा अप्रकाशककारणान्तरानुविधानात् स्वरूपेण भवत्वप्रकाशिका[11]। तन्न। मलेन विना अप्रकाशककारणान्तराभावात्।

**( व्याख्या )** अत्र[12] हेतौ कार्यपदं व्यर्थमित्याशंक्यासिद्धिवारणं प्रयोजनमित्याह–

**( वृत्तिः )** यदि स्यादपि स्वरूपेण न संभवतीत्याह –

**न च माया स्वरूपेण पुंसां कार्यकरी स्थिता।**

---

१. स्वरूपेणाच्छादकत्वाभावे ] मु; स्वरूपेणाच्छादकाभावे–क१; स्वरूपेच्छादकत्वाभावे–क२

२. दीपान्तरजनकदीपस्यापि ] क२, मु; दीपान्तरजनकं दीपस्यापि–क१;

३. दृष्टान्तत्वेनोपात्तत्वात् ] क२, मु; दृष्टान्तत्वे पान्तत्वात्–क१;

४. पूर्वोक्तशुक्तिरजतस्थलेऽपि ] क२, मु; पूर्वोक्तं शुक्तिरजतस्थलेऽपि–क१;

५. मलादेरेवेति ] क२, मु; मलादेवेति–क१;

६. यतः ] ज१, ज६;ज२ कोशे नास्ति।

७. तिरस्कर्तृ ] सं० पाठः; तिरस्कर्तुः–ज१, ज६; तिरस्कर्तुम्–ज२

८. अपि नानुपपत्तेः ] ज१, ज६;विनाऽनुपपत्तेः–ज२

९. तस्याः ] ज२, ज६; तस्य–ज१;

१०. विरुद्धलक्षणप्रवर्तननिवर्तनवतीति ] ज१, ज६; विरुद्धलक्षणप्रवर्तनवतीति–ज२

११. भवत्वप्रकाशिका ] ज१, ज६;प्रकाशिका–ज२

१२. अत्र ] क२, मु; अतः–क१;

**कार्यैरणूपकारित्वाद्यदित्थं[१] तन्न चात्मना॥५३॥**
**यथा तन्तुः स्वकार्येण पटेनैव न चात्मना।**

**( व्याख्या )** माया स्वरूपेण स्वात्मना पुंसां सकलानामपेक्षितकार्यकरी न। तथा च मायायाः स्वरूपेण प्रकाशरूपकार्यहेतुत्वं [२] नास्तीत्यर्थः। तत्र हेतुमाह–कार्यैरिति। कलादिभिः अणूनां उपकारित्वात् अपेक्षितकार्यकारित्वात्[३]। तत्र व्याप्तिपुरःसरं दृष्टान्तं[४] दर्शयति–यदित्थमित्यादि। यद्यत् कार्यैरेवोपकारि तत् आत्मना[५] स्वरूपेण स्वकार्यजन्योपकारिहेतुर्न। तत्र दृष्टान्तमाह–यथेति। तन्तुः यथा स्वात्मना पटजन्याच्छादनादिहेतुर्न। किन्तु स्वकार्येण पटेनैवाच्छादनादिहेतुः। एवं प्रकृतेऽपीत्यर्थः।

**( वृत्तिः )** अणूपकारित्वादित्यन्तप्रतिज्ञाहेतुरूपवाक्यार्थः स्पष्टः। यत् यद्वस्तु इत्थं स्वकार्यद्वाराऽऽत्मोपकारकं तत् न चात्मना तत् स्वरूपेण न चोपकारकम्। यथा तन्तुः स्वकार्येण पटैनैवाच्छादनकार्यलक्षणकार्यकरः। न चात्मना न च स्वरूपेण सोऽयं दृष्टान्तः। ततो यथा मन्दाग्नितायां सुसत्यां क्षीरं श्लेष्मादिदोषहेतुर्भवति तथा व्यतिरिक्तमले सति माया अनात्मन्यात्माभिमानरूपमोहादिदोषहेतुः कार्यद्वारा भवति। न तु[६] साक्षात् प्रलयकेवलिषु तद्दर्शनात्[७]।

**( व्याख्या )** ननु स्वभावेन विरुद्धयोः कार्ययोः यत् कारणान्तरमित्यादिना ईश्वरप्रेरितं कर्म कारणमित्युक्तम्। न च माया मल इत्यतः प्राक् तदयुक्तम्। परस्परविरुद्धयोः मनुष्यतिर्यगादिदेहप्रापकयोः कर्मणोः युगपत् फलौन्मुख्ये युगपदनुभवानुपपत्त्या स्वभाववादाश्रयणस्यैव[८] श्रेयस्त्वं इत्याशंक्य कर्मणां फलभोगदत्वादिव्यवस्थामाह[९]–

**( वृत्तिः )** सिंहावलोकनपरिचरणया पुनः कर्मस्वरूपं निरूपयति –

**एकस्मिन् भुज्यमाने तु कर्मण्यन्यदुपस्थितम्॥५४॥**
**बाधकं प्रबलं तच्चेदविरोधे समुच्चयः।**

**( वृत्तिः )** एकस्मिन् कर्मणि भुज्यमाने अन्यत् कर्मणि भुज्यमाने[१०] अन्यत् कर्म भुज्यमानं सदुपस्थितं प्राप्तं तत् प्रबलं चेद्विरोधे बाधकं स्यात्। न नाशकमिति[११] व्याख्येयम्। किन्तु

---

१. कार्यैरणूपकारित्वाद्यदित्थं ] मु; कार्यैरनुपकारित्वात् यदित्थं–क१; कार्यैरणूपकारित्वात् इत्यर्थं–क२

२. मायायाः स्वरूपेण प्रकाशरूपकार्यहेतुत्वं ] क२, मु; मायास्वरूपेण प्रकाशरूपकार्यहेतुः–क१;

३. अपेक्षितकार्यकारित्वात् ] क२, मु; अपेक्षितकार्यकरित्वात्–क१;

४. व्याप्तिपुरःसरं दृष्टान्तं ] क१, मु; व्याप्तिपुरःसरदृष्टान्तं–क२

५. आत्मना ] क२,मु; तदात्मना–क१;

६. न तु ] ज१, ज६;ननु–ज२

७. तद्दर्शनात् ] ज१, ज६; . . . . दर्शनात्–ज२

८. स्वभाववादाश्रयणस्यैव ] मु; स्वभाववादाश्रयणमेव–क१; स्वभाववादाश्रयस्यैव–क२

९. फलभोगदत्वादि० ] क२,मु; फलभोगत्वादि० –क१;

१०. अन्यत् कर्मणि भुज्यमाने ] ज१, ज६;ज२ कोशे नास्ति।

११. न नाशकमिति ] ज२; नानाशंकमिति–ज१, ज६;

प्रथमं भुज्यत इत्यर्थः। अविरोधे समुच्चयः। समानकाले प्रबलं चाप्रबलं[1] च भुज्यत इति द्वन्द्वं स्यात्।

तदेव विस्पष्टयति –

**भुज्यमाने तु मानुष्ये शुनो योनिर्यदा भवेत्।।५५।।**
**बाधिका प्रबला स्याच्चेन्मानुष्यस्य द्विजोत्तमाः।**
**अविरुद्धादथ प्राप्तिर्यदि तत्र समुच्चयः।।५६।।**

**(वृत्तिः)** यदा यस्मिन् काले मानुष्ये मनुष्यत्वफलस्वरूपिणि कर्मणि भुज्यमाने भोक्तुं योग्ये शुनो योनिः श्वजन्मफललक्षणमिति यावत् भुज्यमाना सती भवेत्। हे द्विजोत्तमाः तदा सा तु प्रबला चेत् मानुष्यस्य बाधिका स्यात् प्रथमं भोग्या स्यात्। अथ तत्र तयोरविरुद्धान्मानुष्यत्वब्राह्मणत्वादिलक्षणा यदि प्राप्तिः तत्र तयोः समुच्चयः समानकालभोग्यत्वलक्षणद्वन्द्वो भवेत्।

क्वचित् समबलस्यापि बाधकं भवतीत्याह –

**आरब्धमप्यनारब्धं बलेन तु समं यदि।**
**आरब्धमेव भोग्यं स्याद्रोधयित्र्या निरोधनात्।।५७।।**

**(वृत्तिः)** आरब्धं फलितदेवशरीरादिफललक्षणमनारब्धं[2] फलितव्यं मनुष्यशरीरादिफललक्षणं[3] तदनारब्धस्य तीव्रवेगेन पाकेन तद्द्वितयमपि बलेन समं यदि रोधयित्र्या समानाभिधानशिवशक्तिप्रेरितया[4] अनन्तशक्त्या निरोधनादनारब्धे[5] [–नद्धे सत्यारब्धमेव भोग्यं स्यात्। तस्मिन् भुक्ते कालान्तरे तदपि स्यात्। यद्यारब्धमपि कर्म यदा लघुर्भवति तदा बलात् तीव्रवेगेनानारब्धेन विरुद्धेन निरुध्यते। यथा नहुषस्यातिसुखदेवशरीरतिरस्कारात्[6] अतिदुःखदाजगरशरीरप्राप्तिः।

अनारब्धसमबलसमारम्भे युगपद्विरोधेन भोगानुपपत्तेः शिवशक्तिस्तत्र नाशहेतुर्भवतीत्याह–

**विरुद्धयोः यदाऽऽरम्भः[7] कर्मणोः समयोर्बलात्।**
**तदैव शक्तिपातेन नाश एव तयोर्भवेत्।।५८।।**

---

१. प्रबलं चाप्रबलं ] ज१, ज६; प्रबलबलं–ज२

२. आरब्धं फलितदेवशरीरादिफललक्षणमनारब्धं ] सं० पाठः; आरब्धफलितदेवशरीरादिफललक्षणमनारब्धं–ज१, ज६; आरब्धं फलितदेवशरीरादिफललक्षणमनपेक्ष्य–ज२

३. फलितव्यं मनुष्यशरीरादिफललक्षणं ] ज१, ज६; . . . . फलितव्यमनुष्यशरीरादिफललक्षणं–ज२

४. रोधयित्र्या समानाभिधानशिवशक्तिप्रेरितया ] ज२, ज६; रोधयित्र्यसमानाभिधानशिवशक्तिप्रेरितया–ज१;

५. निरोधनादनारब्धे ] ज२, ज६; निरोधनारब्धे–ज१;

६. नहुषस्यातिसुखदेवशरीरतिरस्कारात् ] ज१, ज६; नहुषसुखदेवशरीरतिरस्कारात्–ज२

७. यदाऽऽरम्भः ] ज२, ज६; यदाऽऽरम्भे–ज१;

**( वृत्तिः )** सुलभः श्लोकार्थः।

**( व्याख्या )** एकस्मिन् कर्मणि मनुष्यत्वप्रापके[१] कर्मणि भुज्यमाने अन्यत् कर्मान्तरं श्वयोन्यादिप्रापकम्[२] उपस्थितं बाधकं[३] प्रबलं चेत्तत् प्रबलं कर्म पूर्वमनुभूयमानस्य दुर्बलस्य बाधकमित्यर्थः। दुर्बलं चेत् प्रबलेन[४] अनुभूयमाने बाध्यमिति बहिरेव द्रष्टव्यम्। अविरोधे अनुभूयमानोपस्थितकर्मणोः मनुष्यत्वादिब्राह्मणत्वादिप्रापकयोः[५] समुच्चयः युगपत् अनुभव इत्यर्थः। उक्तमेवार्थं विषयविशेषतया दर्शयति–भुज्यमाने त्विति। मानुष्ये मनुष्यभावे अनुभूयमाने सति शुनो भोनिः श्वयोनिप्रापकं कर्म भवेत्। फलोन्मुखं भवेत्। सा श्वयोनिः प्रबला चेत् श्वयोनिप्रापकं दृष्टमिति यावत्। मानुष्यस्य मनुष्यत्वप्रापकस्य[६] कर्मणो बाधिका निवर्तिकेत्यर्थः। विरोधे बाध्यबाधकभाव[७] उक्तः अविरोधे कथमित्यत आह–अविरुद्धादिति[८]। अनुभूयमाने मानुष्यप्रापककर्मणः सकाशात् अघस्य पापफलस्य[९] रोगविशेषस्य[१०] प्राप्तिर्यदि तदा तस्यामवस्थायां समुच्चयः तयोः युगपदनुभव इत्यर्थः। आरब्धानारब्धयोः व्यवस्थामाह आरब्धमपीति[११]। आरब्धं भुज्यमानम् अनारब्धं सञ्चितमागामि च बलेन तदनुभवप्रयोजकसाम–ग्रीसमवधानस्वरूपेण[१२] बलेन तुल्यं यदि। तदेत्यध्याहारः। आरब्धमेव कर्म भोग्यं न सञ्चितमागामि वा तत् कुत इत्यत आह–रोधयित्र्येति। तिरोधायि शक्त्या नियमनादागामिसञ्चितयोः इति शेषः आरब्धयोरेव समबलत्वे परस्परविरोधे च व्यवस्थामाह–विरुद्धयोरिति[१३]। यदा विरुद्धयोः बलात् बलेन समयोः तुल्यबलयोरित्यर्थः तादृशयोः कर्मणोः यदारम्भः युगपत् फलदानाय प्रवृत्तिः तदेव शक्तिपातेन शक्तिपाताख्येन शिवानुग्रहविशेषेण तयोः नाश एव भवेत् न त्ववस्थितिः

---

१. मनुष्यत्वप्रापके ] क२, मु; मानुष्यत्वप्रापके–क१;

२. श्वयोन्यादिप्रापकम् ] क२, मु; च योन्यादिप्रापकम्–क१;

३. बाधकं ] क१, मु; 'क२' कोशे नास्ति।

४. प्रबलेन ] क१, मु; प्रबन्धेन–क२

५. मनुष्यत्वादिब्राह्मणत्वादिप्रापकयोः ] क२, मु; मनुष्यत्वादिति ब्राह्मत्वादिप्रापकयोः–क१;

६. मनुष्यत्वप्रापकस्य ] क२, मु; मनुष्यकस्य–क१;

७. बाध्यबाधकभाव ] क२, मु; बान्धबाधकभाव–क१;

८. अविरुद्धादिति ] मु; अविरुद्धा इति–क१; विरुद्धादिति–क२

९. अघस्य पापफलस्य ] मु; अघस्य पापबलस्य–क१; अस्य पापफलस्य–क२

१०. रोगविशेषस्य ] क२, मु; भागविशेषस्य–क१;

११. व्यवस्थामाह आरब्धमपीति ] मु; व्यवस्थामाह–क१; व्यवस्थामाह आरब्धमिति। –क२

१२. तदनुभवप्रयोजकसामग्रीसमवधानस्वरूपेण ] क२, मु; तदनुभवप्रयोजकसामग्री वधान स्वरूपेण–क१;

१३. इति शेषः आरब्धयोरेव समबलत्वे परस्परविरोधे च व्यवस्थामाह–विरुद्धयोरिति। ] क२, मु; इति–क१

न वा तत्फलानुभवः[1]। परस्परविरुद्धत्वेन युगपदनुभवासम्भवात् समबलत्वेन क्रमकल्पने[2] प्रमाणाभावादिति भावः।

**( व्याख्या )** आत्मनः कर्मानाश्रयत्वं पूर्वोक्तमेव युक्त्यन्तरेण दृढयति–

**( वृत्तिः )** कर्मणां आत्मन्यवस्थानं स्वात्मन्यवस्थानं वदन्तं न्यायवादिनं[3] निराकरोति–

**न चात्मनि स्थितिस्तेषां कर्मणामुपपद्यते।**
**कृष्यादिवत् प्रधानस्य संस्कारोत्पादकत्वतः।।५९।।**

**( व्याख्या )** तेषां पूर्वं साधितानां कर्मणामात्मनि स्थितिः नोपपद्यते। तत्र हेतुमाह–संस्कारोत्पादकत्वत इति। प्रधानस्य यागादिकर्मणः[4] संस्कारोत्पादकत्वतः संस्कारजनकत्वात्। तत्र दृष्टान्तमाह–कृष्यादिवदिति। प्रयोगश्च यागादिकर्म आत्मनिष्ठ–संस्कारजनकं न संस्कारजनकत्वात् कृष्यादिवदिति। न चाप्रयोजकत्वं संस्काराणामात्मनिष्ठत्वे मायानिष्ठफलव्यधिकरणत्वेन तत्कारणतानुपपत्तेः।

तमिमं न्यायसिद्धमर्थमुपसंहरति–

**मायायामेव नान्यस्मिन् संस्थितानि द्विजर्षभाः।**

**( व्याख्या )** हे द्विजर्षभाः तानि पूर्वोक्तानि कर्माणि मायायामेव संस्थितानि तिष्ठन्ति। एवकारो व्यवच्छेद्यमाह। नान्यस्मिन्निति। अन्यस्मिन्नात्मादौ न संस्थितानि पूर्वोक्तबाधकेभ्य इत्यर्थः।

**( वृत्तिः )** हे द्विजर्षभाः। तेषामुक्तलक्षणानां कर्मणां न चात्मनि स्थितिरुपपद्यते। प्रधानस्य प्रकृतिकार्यस्य बुद्धेरिति यावत् संस्कारोत्पादकत्वतः। कृष्यादिवत् पुरुषकर्तृकस्य कृष्यादेः क्षेत्रादिसंस्कारोत्पादकत्वात् कर्तरि पुरुषे न[5] स्थितिर्यथा तथेत्यर्थः। किंचाचेतनत्वप्रसङ्गाच्चात्मनः[6] न चास्माकमात्मनो[7] ऽचित्वात्। तत्राचिति कार्यकरणेन चिदुत्पत्तेरिष्टापत्तिरिति वाच्यम्। तस्याश्चितः सदात्मस्वरूपत्वेनोत्तरत्र[8] साधनीयत्वात्। ततोऽनुष्ठितप्रध्वंसित्वात् क्रियाया[9] स्वजनितसंस्काररूपतया बुद्धिगुणत्वेन परमकारणलक्षणायां[10] मायायामेव प्रलये[11]

१. न वा तत्फलानुभवः ] क२; तावत् फलानुभावः–क१, मु
२. समबलत्वेन क्रमकल्पने ] क२, मु; समबलत्वेनाकल्पने–क१;
३. स्वात्मन्यवस्थानं वदन्तं न्यायवादिनं ] ज२, ज६; आत्मन्यवस्थानं वदन्त्यन्यायवादिनं–ज१;
४. यागादिकर्मणः ] क२, मु; यागादिकर्मणा–क१;
५. पुरुषे न ] ज१, ज६; पुरुषेण–ज२
६. किंचाचेतनत्वप्रसङ्गाच्चात्मनः ] ज२; किंचाचेतनत्वं प्रसङ्गाच्चात्मनः–ज१, ज६;
७. चास्माकमात्मनो ] ज१, ज६; चास्माकमा . . . . –ज२
८. सदात्मस्वरूपत्वेनोत्तरत्र ] ज२;सादात्मस्वरूपत्वेनान्तरत्र–ज१; सदात्मस्वरूपत्वेनान्तरत्र– ज६
९. क्रियाया ] ज१, ज६; क्रियायां–ज२
१०. परमकारणलक्षणायां ] ज२; परमकारणलक्षणया–ज१, ज६;
११. प्रलये ] ज१,ज२; प्रलयेऽपि– ज६

बिन्दुलक्षणस्वोपादानकारणात्मस्वगुणिना[१] सह स्थितानि नान्यस्मिन्। पुनः सृष्टौ कलादिक्षित्यन्तभुक्तिनिमित्ततत्कर्माणि[२] मायातः स्वसामर्थ्यं निमित्तीकृत्य समुत्थां[३] प्रतिपुरुषं भिन्नां कलां पुनः स्वसामर्थ्यं निमित्तीकृत्य तदुत्थां तादृशीं प्रकृतिं च समाश्रित्य[४] पुनः स्वसामर्थ्यं निमित्तीकृत्य गुणद्वारा तदुत्थां तादृशीं बुद्धिं समतिष्ठन्ति[५] तत्त्वसृष्टेः अनन्तरं[६] भुवनसृष्टिरिति सूचयन् पुरोक्तनादात्मपरदेहानुबन्धस्य तदनन्तरं चिद्व्यञ्जकसूक्ष्मदेहात्मतत्त्वबन्धो भवति। तदनु भुवनात्मजशरीरात्मस्थूलबन्धो भवति।

**( व्याख्या )** मायाया यदणूपकारित्वमुक्तं तद्द्विविधया[७] सृष्ट्या प्रतिपादयति–

**( वृत्तिः )** तद्वर्तिनोऽपि सकलत्वं प्राप्ता गुर्वधिकरणेन शिवेनानुग्राह्या इत्याह –

**मायातो द्विविधा सृष्टिः स्थूला सूक्ष्मात्मिकेत्यपि[८] ।।६०।।**
**दृक्च्छक्तिव्यञ्जिका सूक्ष्मा स्थिता तत्त्वात्मनाऽऽत्मनि।**
**स्थूला भुवनरूपेण शरिराद्यात्मना स्थिता।।६१।।**

**( व्याख्या )** मायातः[९] मायाया उपादानात् सृष्टिः सृज्यत इति सृष्टिः कार्यं सा द्विविधा द्विप्रकारा। स्थूला प्रकृत्यादिः[१०] सूक्ष्मा कलादिः तत्र सूक्ष्मायाः सृष्टेः[११] प्रयोजनमाह– दृक्च्छक्तीति। आत्मनि पशौ तत्त्वात्मना कलाविद्यादिरूपेण[१२] दृक्च्छक्तिव्यञ्जिका अणुनिष्ठ–ज्ञानक्रियाशक्त्यावारकमलशक्तिनिवर्तिका। स्थूलसृष्टेः प्रयोजनमाह–स्थूलेति। आदिपदेन कलादिकं गृह्यते।

स्थूलसूक्ष्मसृष्ट्योः यदणूपकारित्वमुक्तं तदपि बन्धद्वारेति मन्वानः स्थूलसूक्ष्मबन्धयोः पौर्वापर्यनियममाह–

**सूक्ष्माः कलादयः पूर्वं स्थूला बध्नन्त्यणूंस्ततः[१३] ।**

---

१. बिन्दुलक्षण० ] ज१; प्रवृत्तिलक्षण०–ज२;बुद्धिलक्षण०–ज६
२. कलादिक्षित्यन्तभुक्तिनिमित्ततत्कर्माणि ] ज६;कलादिक्षित्यन्तभुक्तिनिमित्तम् तत्कर्माणि–ज१; कलादिक्षिति . . . . भुक्तिनिमित्ततत्कर्माणि–ज२
३. समुत्थां ] ज१, ज६; ज२ कोशे न वर्तते।
४. समाश्रित्य ] ज१, ज६;समा. . . . त्य–ज२
५. समतिष्ठन्ति ] ज२, ज६; समतिषुन्ति–ज१;
६. अनन्तरं ] ज१, ज६;अत्र–ज२
७. तद्द्विविधया ] क२, मु; तद्विधया–क१;
८. स्थूला सूक्ष्मात्मिकेत्यपि ] क२, मु; स्थूलसूक्ष्मात्मिकेत्यपि–क१;
९. मायातः ] क१, मु;स्थूला भुवनात्मना स्थिता। मायातः–क२
१०. स्थूला प्रकृत्यादिः ] क१, मु; स्थूल प्रकृत्यादि–क२
११. सूक्ष्मायाः सृष्टेः ] मु; सूक्ष्मसृष्टेः–क१; सूक्ष्मदृष्टेः–क२
१२. कलाविद्यादिरूपेण ] क२, मु; कलाविद्यादिरूपे–क१;
१३. बध्नन्त्यणूंस्ततः ] क१, मु; बध्नन्त्यसूंस्ततः–क२

**( व्याख्या )** सूक्ष्माः कलादयः अणून् सकलाणून्[1] स्थूला भुवनादिरूपेण[2] बध्नन्ति।

मायाया द्विविधसृष्टिद्वारा अणूपकारित्वमभिधाय तत्सृष्टिमध्यवर्तिनामभिधानभेदमभिधानसृष्टेः परं प्रयोजनमाह–

**मायामण्डलमध्यस्थाः पुमांसः सकला मताः।।६२।।**
**अनुग्राह्यास्त्वमी साधिकरणेन शिवेन च।**

**( व्याख्या )** मायामण्डलमध्यस्थाः मायामण्डलं तत्कार्यसमूहः तन्मध्यस्थाः सकला मताः कलादिवश्यत्वात् सकला इति व्यवहर्तव्या। चकार एवकारार्थः। साधिकरणेनाचार्यमूर्त्यधिकरणेन शिवेनैवानुग्राह्याः।

**( वृत्तिः )** व्यक्तोऽक्षरार्थः।

**( व्याख्या )** मायामण्डलमध्यस्थत्वाविशेषात् क्रोधादीनामपि सकलत्वं साधिकरणानुग्राह्यत्वं च[3] स्यादित्यत आह–

**( वृत्तिः )** प्रलयाकालेषु निरधिकरणेन शिवेनानुगृहीतान्[4] आह–

**विद्यामण्डलिन्यश्चाष्टौ क्रोधादीन् श्रीगलं तथा।।६३।।**
**शतरुद्रांश्च वीरेशमपि तान् परमेश्वरः।**
**स्वयमेवानुगृह्यादावधिकारे नियुक्तवान्।।६४।।**

**( व्याख्या )** श्रीगलं श्रीकण्ठं शतरुद्रान् तत्तद्दिक्पालाधिष्ठातॄन् अन्यानपि[5] आधिकारिकपुरुषान् नन्दिकेश्वरप्रभृतीनपि[6] स्वयमेव निरधिकारिणः सन्।

अग्रिमपटले निरूपयिष्यमाणं पशुपदार्थं प्रस्तुत्य मायापदार्थनिरूपणमुपसंहरति–

**एवं समासतः प्रोक्ता माया विश्वजगन्मयी।**

**( व्याख्या )** विश्वजगन्मयी अशुद्धसर्वजगदुपादानभूता।

**।।इति श्रीमदुमापतिशिवाचार्यविरचिते पौष्करसंहिताभाष्ये ज्ञानपादे तृतीयो मायापटलः समाप्तः।।**

---

१. सकलाणून् ] क१, मु; 'क२' कोशे नास्ति।

२. भुवनादिरूपेण ] मु; भुवनरूपेण–क१; भुवनेति रूपेण–क२

३. सकलत्वं साधिकरणानुग्राह्यत्वं च] मु; सकलाधिकरणानुग्राह्यत्वं–क१; सकलसाधिकरणानुग्राह्यत्वं–क२

४. शिवेनानुगृहीतान् ] ज६; शिवेनानुगृहीतम्–ज१; शिवे . . . .हीतान्–ज२;

५. शतरुद्रान् तत्तद्दिक्पालाधिष्ठातॄन् अन्यानपि ] मु; शतरुद्रवदिक्षु फलाधिष्ठातघ्नन्यानपि–क१; शतरुद्राद्दिक्षु दिक्पालाधिष्ठातघ्नन्यानपि–क२

६. नन्दिकेश्वरप्रभृतीनपि ] मु; नाकेश्वरप्रभृतीन्यपि–क१; नाकेश्वरप्रभृतीरपि–क२

**( वृत्तिः )** विद्यामण्डलिन गर्भितकलारागविद्यामण्डलिनश्चाष्टौ रागतत्त्वाधोभागमुपक्रम्य प्रतिमण्डलं मण्डलेशसहिताष्टाष्टक्रमेण[१] कलामस्तकवर्तिस्वष्टसु मण्डलेषु स्थितान्। तदुक्तं मृगेन्द्रे–

महापुरचतुःषष्टिमण्डले मण्डलाधिपा इति[२] ।

प्रधानाधिपान् प्रकृतेः सूक्ष्मत्वेन भुवनाधारत्वायोगात् क्रोधादिभिर्दत्तगुरुत्वप्राप्तिमतां[३] वामदेवादित्रयोदशरुद्राणामपि वसतीभूतगुणमस्तकस्थितान् क्रोधादींश्चाष्टौ तथा तद्वत् गुणत्वनिलयं प्रकृत्यग्रनिलयं च श्रीगलं च। तदुक्तं मतङ्गे –

द्विधा विभज्य स्वं वीर्यं प्रधानादवतीर्य इति।

तस्य सर्वरुद्राग्रनायकस्य[४] प्रधानाग्रवर्तिनि भुवने गुणतत्त्वावध्यात्मप्रलये कालाग्न्यादिगुणनिलयश्रीकण्ठशिष्योपसंहृतिरूपे गुणनिलयश्रीकण्ठशतरुद्रादिशिवशिष्याश्चा नन्तशिष्या श्रीकण्ठादयश्च स्थिता विराजन्ते। तस्मिन्नप्युपसंहृते रागतत्त्वस्य श्रीकण्ठभुवने विराजन्ते।

तदुक्तं मतङ्गे–

श्रीकण्ठभुवनं प्राप्य क्रीडयन्ति। इति।

ब्रह्माण्डबहिः कपालजभुवनस्थितान्[५] शतरुद्रांश्च ब्रह्माण्ड-द्वारभागनिलयं मध्यमप्रलये प्रकृत्यधोभागवर्तिरुचिमद्भुवननिलयं वीरेशं वीरभद्रमपि शिवः स्वयमेव गुर्वधिकरणमनपेक्ष्यादौ मायासृष्ट्यारम्भेऽनुगृह्य पाशविमोचनद्वारा सर्वज्ञत्वस्वावधिसर्वकर्तृत्वलक्षणस्वैश्वर्यं संप्रयोज्य[६] शिवान् कृत्वा[७] अनन्त-द्वाराऽतिदिव्यदेहयुक्तान्[८] संप्रकृत्यानुगृह्य भुवनसृष्टिनिर्माणादिलक्षणेऽधिकारे[९] नियुक्तवान्।

ननु सर्वथा कर्ममलमायाविच्छित्तित्रयपूर्वं व्यक्तशिवत्वाभिव्यक्त्यपरशिवनामभ्यां पिहितप्रलयकेवलनामत्वात्[१०] कथं माया कलाकलितमायागर्भाधिकरित्वम्। सत्यम्।

---

१. मण्डलेशसहिताष्टाष्टक्रमेण] ज१; मण्डलेशसहिताष्टकक्रमेण–ज२; मण्डलेशसहिताष्टाष्टकक्रमेण–ज६

२. महापुरचतुःषष्टिमण्डले मण्डलाधिपा इति ] ज६; महापाचतुःषष्टिमण्डले मण्डलाधिपा। इति–ज१; महापुरचतुःषष्टिमण्डले मण्डलाधि . . . . –ज२

३. क्रोधादिभिर्दत्तगुरुत्वप्राप्तिमतां ] ज१, ज६; क्रोधादिभिर्दत्त . . . . त्वप्राप्तिमतां–ज२

४. सर्वरुद्राग्रनायकस्य ] ज१, ज६; सर्वरुद्राग्र . . . . स्य–ज२

५. ब्रह्माण्डबहिः कपालजभुवनस्थितान् ] ज१, ज६; ब्रह्माण्ड . . . . बलजभुवनस्थितान्–ज२

६. संप्रयोज्य ] ज२; असंप्रयोज्य–ज१, ज६;

७. शिवान् कृत्वा ] ज१, ज६; शिवान्–ज२

८. अनन्तद्वाराऽतिदिव्यदेहयुक्तान् ] ज१, ज६; अनन्तद्वारा . . . . हयुक्तान्–ज२

९. भुवनसृष्टिनिर्माणादिलक्षणेऽधिकारे ] ज१, ज६; भुवनसृष्टिनिर्माणलक्षणेऽधिकारे–ज२

१०. पिहितप्रलयकेवलनामत्वात् ] ज६; पिहितप्रलयकेवलं प्रलयकेवलनामत्वात्–ज१; पिहितप्रलयकैवल्यप्रलयकेवलनामत्वात्–ज२;

विच्छिन्नमलादिपाशत्वेऽपि मान्द्यपाककत्वात्[1]। मायायां प्रकृतमलवासनोत्थाधिकारमलनि-बन्धनाधिकारस्थानविशेषात्[2] अनन्तादीनां शुद्धकलेव मायातः सैवानुन्नतिमती कर्मनिरपेक्षा[3] सती शुद्धा तद्वश्याः पुनः कला प्ररोहतीति न काचित्[4] क्षतिः। तदुक्तं[5]–

कलायोगेऽपि नो वश्याः कलानां पशुसंघवत्। इति।

अन्येऽपि भुवनेशाः कपालीशादिकालाग्न्यन्ता साञ्जना निरञ्जनाश्च श्रीमन्मतङ्गादौ स्वनामतोऽवधार्याः। तत्र च शुद्धभुवनेशेषु च निरञ्जनाः शिवशिष्याः अनन्तश्रीकण्ठादयः अनन्तशिष्या ब्रह्माण्डान्तर्निलयश्रीकण्ठादयः महाप्रलये उपरतौ स्थितौ वा शिवसाम्यमुक्तिं यान्ति। उपरतिमद्रुद्राधिकारस्थाने अनुपरतिमन्तोऽनुक्रमेणाधिकारिणो भवन्ति च। ब्रह्माण्डान्तर्निलयगुणनिलयद्विश्रीकण्ठशिष्या निरञ्जनाः। प्रथमप्रलये मध्यमप्रलये उपरतौ स्थितौ वा परमुक्तिं यान्ति। अनुपरतौ महाप्रलयान्तं साभिलषिता परमुक्तिपरापरभुक्तिभाजो भवन्ति। अनन्तशिष्याः साञ्जनां कपालीशादिगुणनिलयब्रह्मविष्णवादिमध्यमपञ्चाष्टकामरेशान्तिमाः। महाप्रलयावधिस्थित्वा महाप्रलये स्थितौ कर्मक्षये विज्ञानकैवल्यं तदक्षये प्रलये प्रलयकैवल्यं पुनः सृष्टौ स्वभुवनाधिपत्यं सोपरिभुवनं वा प्राप्नुवन्ति। मलपरिणतौ सत्यां स्वभुवनगुरुनिरीक्षिताः परापरमुक्तिभाजो भवन्ति च नाधो यान्ति। श्रीकण्ठशिष्यास्साञ्जनाः ब्रह्माण्डान्तर्निलयब्रह्मविष्णवादयः मध्यमप्रलयावधि स्थित्वा गुणनिलयतच्छ्रीकण्ठोपसंहृताः पुनः सृष्टौ बुद्धितत्त्वमारभ्य क्रमतो भोगभुजो महाप्रलये स्थितौ वा कर्मक्षये विज्ञानकैवल्यं तदक्षये प्रलये प्रलयकैवल्यं पुनः सृष्टौ स्वाभिलषितभुक्तिं मलपरिणतौ सत्यां स्वभुवनगुरुनिरीक्षिताः परापरमुक्तिं वा यान्ति नाधो यान्ति। अथ परिक्षीणकर्मणामेव ब्रह्माण्डान्तर्निलयब्रह्मत्वादिकेऽधिकारात्। ननु अनन्तशिष्यो महाप्रलयवधिसुस्थिमान् ध्वंसितमलकर्मत्वात् स्वेदजखद्योतवत् अधिकारनिबन्धनमायाजातिमत्तनुः मध्यमप्रलये प्रकृतिनिलयश्रीकण्ठभुवनं प्राप्य क्रीडमानः ब्रह्माण्डान्तर्निलयश्रीकण्ठः यः स कथं गुणनिलयश्रीकण्ठनियोज्यः। मध्यमप्रलये तद्रूपसंहार्य-कालाग्निरुद्रतया वर्तत इति सर्वज्ञानोत्तरे श्रूयते। सत्यम्। मध्यमप्रलये प्राकाम्यशक्त्या धृत-कालाग्न्याकृतिमात्रोपसंहृतिः अथवा तदधिष्ठितस्य कस्यचित्तत्सदृशरुद्रस्योपसंहृतिरिति च गम्यते। ननु ब्रह्मविष्णवादयः निधनेशाद्यनुगृहीता निरञ्जना श्रुतस्वायम्भुवाद्यागमाश्च श्रूयन्ते। सत्यम्। श्रीकण्ठस्य प्रतिनिशं प्रलयं गन्तारः। प्रत्यहमधिकारमनुप्रविशन्तः ब्रह्मविष्णवादयो

---

१. मान्द्यपाककत्वात् ] ज२; मान्द्यपाककालविच्छिन्नत्वात्–ज१, ज६;

२. प्रकृतमलवासनोत्थाधिकारमलनिबन्धनाधिकारस्थानविशेषात् ] ज६;प्रकृतमलवासनोर्थाधिकारस्थान विशेषात्–ज१; कृतमलवासनोत्थाधिकारमलनिबन्धनाधिकारस्थानविशेषात्–ज२

३. सैवानुन्नतिमती कर्मनिरपेक्षा ] ज२; सैवान्नुन्नतिमतिकर्मनिरपेक्षा–ज१, ज६;

४. काचित् ] ज१, ज६; कदाचित्–ज२

५. इतः परं ज२ कोशे ग्रन्थपातः। अस्य पटलस्यान्त एव न विद्यते। ज१, ज६ कोशयोरितः परं पूर्णसादृश्यमेव दृश्यते।

असंख्याः। तेषु मध्ये केषांचिदधिकारे नियोगसमनन्तरं किंचित्कालमतीत्य वा मलपरिणतौ सत्यामनुग्रहपूर्वं निरञ्जनत्वमाविर्भवतीति न किंचिदसमञ्जसम्।

इत्थं प्रतिस्रोतसा माया सह मायागर्भाधिकारिभिः सर्वरुद्राग्रनायकश्रीकण्ठादि-भिरनेकविधा स्रोतोभेदेन लक्ष्यते भुवनात्मसाधारणैकैकमायानुस्यूतस्रोतसि सूक्ष्मदेहात्मा-साधारणानेकमायानुसूतस्रोतांसि विद्यन्ते। तदुक्तं मतङ्गे- मधुकोशपुटाकारा निचिता परमाणुभिः। इति।

शुद्धस्रोतांसि महामायानुस्यूतानि साधारणैकरूपाणि सूक्ष्मदेहात्मासाधारणशुद्धकलादेः पृथक् पृथक् यथोचितं शुद्धविद्यानुस्यूतत्वेन महामायानुस्यूतत्वासम्भवात्।

मायानुस्यूतानिव महामायानुस्यूतानि भुवनरूपाणीति स्रोतंसि बहूनि सन्ति। तदुक्तं ललितभेदे स्वच्छन्दे -

संस्थितोऽयंभसो मूर्ध्नि शक्त्याकारस्तु भूर्भुवः।
अपतत्त्वमेव तदथ आग्नेयं तदनन्तरम्।
वायव्यं नाभसं चैव तन्मात्राणीन्द्रियाणि च।
विविधाश्च मनश्चैव अहंकारो ह्यनुक्रमात्।
बौद्धं गौणं च देवेशि प्राकृतः पौरुषं तथा।
नियतिः कालरागौ च विद्या चैव कला तथा।
मायातत्त्वं ततो विद्या ईश्वरश्च सदाशिवः।।
बिन्दुरर्धेन्दुनैरोधि नादो नाडी ह्यतः परम्।
ऊर्ध्वं ब्रह्मबिलं देवी शक्तितत्त्वमतः परम्।।
पञ्चकारणसंयुक्ता व्यापिनी च ततः परम्।
समना उन्मना चैव प्रक्रियाण्डैर्युतं ततः।।
यथा चात्माणवो देवि असंख्याता व्यवस्थिताः।
एवं वै प्रक्रियाण्डानि असंख्येयानि कोटिशः।।
एकेन वर्णितेनैव सर्वाध्वा वर्णितः प्रिये।
यथा एकं तथा सर्वं प्रक्रियाण्डं व्यवस्थितम्।।
सर्वेषां प्रक्रियाण्डानां स्वस्वरूपे तु सुव्रते।
व्यापकस्तु शिवः सूक्ष्मः स बाह्यान्तरे स्थितः।। इति।

एकैकं प्रक्रियाण्डं षोडशाण्डस्कन्धात्मकं ज्ञेयम्। अनन्तादिमश्रीकण्ठमध्यमकालाग्यान्तिमाः ब्रह्मादयः। मन्त्राः आणवाः शाम्भवाः शाक्ता इति त्रिधा भवन्ति। तत्राणवास्त्वधिष्ठेयतया वास्तववपुष्मन्तो निरञ्जनाः साञ्जनाः स्वाधिकारं निर्वर्तयन्तो वास्तववपुष्मतीभिः स्वतः

सत्त्वलोकादिस्थितिमतीभिः ब्राह्म्यादिभिः प्रतिनियतस्वस्वभार्याभिर्मनोभिलषितान् भोगानपि भुञ्जते। शाम्भवास्तधिष्ठातृतया क्लृप्ता ब्रह्माद्याकृतिमान् शिव एव। शाक्ता स्वधिष्ठानतया क्लृप्ता ब्रह्माद्याकृतिमती शिवशक्तिरेव। एवमित्यादिश्लोकार्थेन मायापरीक्षोपसंहृता।

**।।इति श्रीशालिवाटिपुरनिवासिज्ञानप्रकाशाचार्यविरचितायां पौष्करविद्यापादवृत्तौ तृतीयः पटलः।।**

• • •

# पशुपटलः

## उमापतिशिवविरचितव्याख्या

**( व्याख्या )** एवं मायां सपरिकारां[१] निरूप्य पूर्वं मायामण्डलेत्यादिना प्रस्तुतमृषिभिश्च जिज्ञासितमुद्देशक्रमप्राप्तं पशुपदार्थं निरूपयति–

**पशुः पशुत्वसंयोगात् न मुक्तः पशुरुच्यते।**
**यस्मात् स्वदृक्क्रियाशाली कलाहीनोऽप्यनीश्वरः।।१।।**
**व्यापकश्चिन्मयः सूक्ष्मः शिववत् संव्यवास्थितः।**

**( व्याख्या )** पशुरिति लक्ष्यनिर्देशः। तस्य च पशुत्वसंयुक्तत्वं लक्षणं पशुत्वं चाणवमलः तत्र च रूढं न यौगिकम्। तथा चोक्तं स्वायंभुवे– अथाऽनादिमलः पुंसां पशुत्वं परिकीर्तितम्। इति।

नन्वीश्वरस्य व्यापकत्वेन सर्वसम्बन्धित्वात् मलसंबन्धस्यापि सद्भावेन तत्रातिव्याप्तिरिति चेन्न। आवरणप्रयोजकमलसंबन्धत्वस्यैव लक्षणत्वेन विवक्षितत्वात् न तत्रातिव्याप्तिः। नन्वेवं मुक्तात्मनि अतिव्याप्तिरित्यत[२] आह– न मुक्त इति। मुक्तः पशुः न पशुत्वेन लक्ष्यो न। किञ्चिज्ज्ञत्वस्य लक्ष्यतावच्छेदकत्वेन तस्यालक्ष्यत्वादिति भावः। लक्ष्यतावच्छेदकमेव[३] उपपादयति–यस्मादिति। यस्मात् मुक्तः कलादिहीनतया स्वाभाविकदृक्क्रियाशाली अतो न किञ्चिज्ज्ञ इति भावः। नन्वेवं स्वाभाविकदृक्क्रियाशालीत्वे मुक्तस्येश्वरत्वं स्यादित्यत आह–अनीश्वर इति। ईश्वरभिन्न इत्यर्थः। मुक्तात्मनः शिवसाम्येऽपि पञ्चकृत्यकारित्वाभावेन नेश्वरत्वमिति भावः। तदुक्तं ब्रह्मामीमांसायाम्–जगद्व्यापारवर्जं प्रकरणात्। इति। अत एव मुक्तस्य जगद्व्यापारातिरिक्तशिवसाम्यं[४] दर्शयति–व्यापक इत्यादिना। सूक्ष्मः दुर्विज्ञेय इत्यर्थः।

---

१. सपरिकारां ]क२,मु सपरिकारात्–क१;

२. अतिव्याप्तिरित्यत ]क१; अव्याप्तिरित्यत–क२, मु

३. लक्ष्यतावच्छेदकमेव ]क१; लक्ष्यतावच्छेदकाभावमेव–क२, मु

४. जगद्व्यापारातिरिक्तशिवसाम्यं ]क१; जगद्व्यापारातिरिक्तं शिवसाम्यं–क२, मु

## ज्ञानप्रकाशाचार्यविरचितवृत्तिः

**( वृत्तिः )** मायापरीक्षानन्तरं पटलान्ते अनुगृह्येत्यादिनाऽननुगृहीतः पशुरिति सूचितः पशुपदार्थः[1] परीक्ष्यत इति पाटलिकः सम्बन्धः। तन्त्रवस्तुसम्बन्धः पशुपदार्थात्मकः। वाक्यात्मकस्त्वणून् इत्याद्यनेकविधः पशुत्वेन मलेन सह संयोगः सम्बन्ध आवार्यावारकलक्षणः पशुत्वसंयोगः[2]। न हि संयोगः संश्लेष इति व्याख्येयम्। द्वयोरप्यमूर्तत्वात्। तस्मात् पशुत्वसंयोगाच्चतुर्थः पदार्थः[3] पशुरुच्यते। तत् पशुत्वान्मुक्तः तस्मान्न पशुरुच्यते। पशुरिति न निगम्यते 'यस्मात्[4] स पतिपदार्थेऽन्तर्भूतसजातीयतया शिववत् संव्यवस्थितः। कुतः स मुक्तो यतः सूक्ष्मः मलादिपाशरहितत्वात् स्थूलत्वाद्विदुरीकृतः। ननु सूक्ष्मत्वमस्ति हि परमाण्वादीनां न खलु हि शिवसदृशत्वम्। सत्यम्। स मुक्तश्चिन्मयः। ननु यद्यपि स्तः सूक्ष्मत्वचिन्मयत्वे पाञ्चरात्रदृष्टिसिद्ध मुक्त इव यथाकथंचिद्येनकेनचिदुपाधिनोपरुद्धव्याप्तिकः स यदि स्यात् पुनः कुतः शिवसदृशत्वम्। सत्यम्। सिद्धान्तसिद्धः स मुक्तो व्यापकः न यथाकथंचिद्येनकेन-चिदुपाधिनोपरुद्धव्याप्तिकः। ननु यद्यस्त्यपि तत् त्रिलक्षणत्वम् असतोऽनभिव्यक्तत्वाद्धेतोः सतः पर्वतादेरनभिव्यक्तिपूर्वाभिव्यक्त्यदर्शनात्। प्रागनभिव्यक्ततत्स्वभावे प्रमाणा-भावात्। पुनरसत्कार्यवाददृशा असदुत्पत्तित्वे सत्कार्यवाददृशा वा सतोऽभिव्यक्तित्वे घटादीनामिवानित्यत्वप्रसङ्गाच्च। पर्यवसितविवादवादनिर्मलत्वमात्रं मुक्तिरिति सुखं प्रपठन्[5] मलकारकदृष्ट्याऽनभिव्यक्तशिवत्वे कुतः शिवसदृशत्वम्। सत्यम्। स मुक्तः कलाहीनोऽपि निर्द्धूतचिदभिव्यक्तिनिमित्तसूक्ष्मदेहोऽपि सुदृक्क्रियाशाली। स्वदृक्क्रियासमृद्धिः सत्स्वशिवत्वाभिव्यक्तिमान्। अयमाशयः पशोः किञ्चिज्ज्ञत्वदर्शनात् शिवस्य सर्वज्ञत्वश्रुतेस्तदुभयविलक्षणतयाऽननुभूतज्ञानशक्तितया स पाषाणप्रख्यो भवति। असदुत्पत्तिरसंभाव्येत्युत्तरत्र साधनीयत्वात् सतोऽभिव्यक्तिः सुसिध्यतीति। ननु सतः पर्वतादेरनभिव्यक्तिपूर्विकाभिव्यक्तिरसंभाव्येति कुतः कारकैः सतोऽभिव्यक्तिः। तदयुक्तम्। सतः प्रागनभिव्यक्तिः पुनः कारकवैयर्थ्यप्रतिहन्त्री सदभिव्यक्तिश्च यथा भवति तथोत्तरत्र साधयामः।

ननु तर्हि त्वद्दृशापि सतोऽभिव्यक्तस्योत्पन्ननाशत्वश्रुतेः कथमत्र समाधिः। सत्यम्। द्विधा खल्वभिव्यक्तिरेका हि स्वाकारान्तरातिरस्कृतप्रतिबन्धकान्तरान्धक ारादिप्रतिबद्धस्वाकारानुपलब्धिप्राप्तिमदलब्धार्थक्रियस्य घटादेः पुनर्दीपादिकार-कैस्तदुत्सारणमात्रेणोपलब्धिप्राप्तिमदर्थक्रियायोजनात्मिका। अन्या तु

---

१. अनुगृह्येत्यादिनाऽनुगृहीतः ] सं० पाठः; अनुगृह्येत्यादिना ननु गृहीतः पशुरिति सूचितः पशुपदार्थः-ज२; वाक्यमिदं ज१ कोशे नास्ति।

२. आवार्यावारकलक्षणः पशुत्वसंयोगः] ज२; आवार्यावारकलक्षणपशुत्वसंयोगः-ज१

३. पदार्थः] ज२; पशुपदार्थः- ज१;

४. "यस्मात् . . . . परिपक्वभोजकसजातीयकर्मालम्बनात्" पर्यन्तं ग्रन्थभागः ज२ कोशे न विद्यते।

५. सुखं प्रपठन् ] ज३; स्वसंप्र . . . . -ज१,ज६

मृत्स्वरूपादिकारणरूपस्वाकारान्तरप्रतिबद्धघटादिकार्याकारानुपलब्धिप्राप्तिमदलब्धार्थ-क्रियस्य वस्तुनः पुनश्चक्रादिकारकैस्तत् कारणाकारप्रोत्सारणेन कार्याकाररूपलब्धि-प्राप्तिमदर्थक्रियायोजनात्मिका अत्रैव विकृतिकलिताभिव्यक्तिविशेषशाकल्याद्यवस्थासु तदनभिव्यक्तिविशेषे चोत्पत्तिशब्दो नाशशब्दश्च ब्राह्मणविशेषे कर्णादिशब्दरूपोपचर्यते। न पुरोक्तघटादिविकृतिविकलिताभिव्यक्तिविशेषे तदनभिव्यक्तिविशेषे च।

तथापि वक्ष्यमाणनयेन क्वचिच्छरीराद्युपाधिकलितसमलात्मसंवित्तेः विकृतिविकलिताभिव्यक्तिविशेषे शरीराद्युपाधिविकलितसमलात्मसंवित्तेरनभिव्यक्तिविशेषे च स उत्पत्तिशब्दः स नाशशब्दश्चोपचर्यते। न तु शरीराद्युपाधिविकलितविकलात्मसंवित्ते-र्विकृतिभुवोऽनभिव्यक्तिव्यक्त्यन्तरविहतित्रयविकलितसर्वधाभिव्यक्तिविशेषेऽत्रोप-चर्यते। ननु घटादेरन्धकारावरणनिवृत्तिरिव मलावरणनिवृत्तिः किं किल शिवत्वाभिव्यक्तिः। तन्न। पटलाद्यावरणनिवृत्तिक्रियया चक्षुःशक्तिस्तम्भनबीजवासनानिवृत्तिद्वाराऽभिव्यक्ति-निमित्ताञ्जनसेवादिरूपस्वाङ्गविकलया न च चक्षुरादेर्ग्राहकशक्तिर्दृष्टेत्यनेकान्ति-कत्वात्। यथा पुनस्वाकारप्रोत्सारणं विना सुपक्वसुशिक्षितवैद्यव्यापृतिनिर्वर्तितात्यन्तिकपटल-निवृत्तिमती सती तदनु पटलवासनानिवर्तकस्वोद्बोधकतदङ्गाञ्जनसेवनक्रियासेविता पुनस्तदन-पेक्षणी भूयो विलुप्तिविरतिमती नेत्रतेजोऽभिव्यक्तिः। तथा पुनस्वाकारप्रोत्सारणं विना सुपक्वसुशिक्षिताचार्यदीक्षाख्यशिवशक्त्योपबृंहितव्यापृतिनिवर्तितात्यन्तिकमलनिवृत्ति-मती सती तदनु अधिकारमलबीजमलवासनानिवर्तकस्वोद्बोधकतदङ्गविशेषक्रिया-सेविता पुनस्तदनपेक्षणी भूयो विलुप्तिविरतिमती वृत्तिपरिणतिविवर्तारम्भविधुरनिरतिशय-शिवत्वपराभिव्यक्तिः। ततः सात्वभिव्यक्तिः कारणरूपस्वाकारान्धकाराभ्यां भूयो दण्ड-चक्रादिकृतदीपादिकृतविकृतिचलितविकृतिविकलितघटाकाराभिव्यक्तीव मलशिवत्व-पराभिव्यक्तिभ्यां भूयः कलाकृतदीक्षाकृतचिदभिव्यक्त्यपरशिवत्वाभिव्यक्तीव न बाध्येति सर्वमनवद्यम्। व्यक्तिस्वरूपत्वादभिव्यक्तेर्व्यक्त्यन्तरव्यङ्ग्यत्वाभावात्।

पूर्वमपि सती शिवत्वाभिव्यक्तिः सहकारिसन्निधौ तथा तदभिव्यक्तिस्वभावा यथा घटगुप्तदीपप्रकाशः पूर्वमपि सन् घटविदारणकर्तृरूपसहकारिसन्निधौ तत्प्रकाशस्वभावो न प्रकाशान्तरप्रकाश्य इत्यतर्कमहिम्न्यभिवादे किमभिव्यक्तिरप्यसती कार्या। पुनरुक्तपूर्वमपि सत्यनभिव्यक्तिमती सत्यभिव्यङ्ग्या यदि सत्यभिव्यङ्ग्या तदा ऽभिव्यक्तेरभिव्यक्तिरपि। तथा विक्लृप्तिकलिता तथेति तत्र तत्रेत्यनवस्थारो-परूपकुतार्किकविफलकुविकल्पः स दुरापास्त इति न परिहृतिरस्य विस्तरभीरुणात्र विस्तीर्यते। ननु पूर्वमुक्तसूक्ष्मत्वचिन्मयत्वव्यापकत्वदृक्क्रियाशालित्वलक्षणचतुष्टये सत्यपि मुक्तशिवे कर्तृत्वस्येश्वरप्रयोज्यतयाऽनादिसिद्धत्वात् मुक्तः शिवप्रेर्य इति तन्नीतिज्ञदृशा शिवप्रेर्यत्वात् कथं शिवसदृशत्वम्। सत्यम्। स मुक्तोऽनीश्वरः अविद्यमानः ईश्वरः प्रेरको यस्य स तथोक्तः। अयमाशयः अस्वातन्त्र्यमानादिसिद्धमपि कदाचिन्निवर्तते मलादिनिमित्तत्वात् कलादिवत्।

तदनिवृत्तेरसावपि विद्येश्वरवत् प्रयोज्यत्वनिमित्ताधिकारमलबद्धः सन्नसम्पूर्णमनोरथत्वादमुक्त एवेति शिववदित्युक्तत्वाच्छिवादाधिक्यमैक्यं च सुकरत्वेन निराकरणीयं कथयन्तः क्रियेत्युक्तत्वात् स्वरूपावाप्तेरेव परनिश्रेयसत्वात् कर्तृत्वस्यापि स्वरूपत्वात्। तदनवाप्तिमतामसम्पूर्णमनोरथतया सर्वज्ञत्वमात्रं पठन्तश्चान्येऽपि प्रतिक्षिप्ताः परमोक्षनिरासकारिकासु शिवादाधिक्यवादादि-निराकृतिः सविस्तरेति विस्तरभयान्न लिख्यते।

**(व्याख्या)** एवं पशूनां सामान्यलक्षणमभिधाय विशेषलक्षणकथनाय विभागेनोद्दिशति–

**(वृत्तिः)** अथ परीक्षार्थं विशेषलक्षणं वक्तुं विभजते–

**पशवस्त्रिविधा ज्ञेयाः सकलः प्रलयाकलः।।२।।**
**विज्ञानाकल इत्येषां शृणुध्वं लक्षणं क्रमात्।**

**(व्याख्या)** ता एव विधा[1] दर्शयति सकल इत्यादिना। इतिशब्दः प्रकारवचनः। एषां सकलादीनां क्रमात् क्रमेण[2] लक्षणानि जातावेकवचनं शृणुध्वमित्यात्मनेपदं छान्दसम्। अस्मिन्नर्थे श्रुतिः।

**(वृत्तिः)** अर्थः सुव्यक्तः।

**(व्याख्या)** अत्र सकलं लक्षयति–

**(वृत्तिः)** क्रमतः सकलं लक्षयति –

**मलोपरुद्धदृक्च्छक्तिः तत्प्रसृत्यै कलादिमान्।।३।।**
**भोगाय कर्मसंबन्धः सकलः परिपठ्यते।**

**(व्याख्या)** मलोपरुद्धदृक्च्छक्तिः मलेन तत्संबन्धविशेषेण तच्छक्त्या वा उपरुद्धा आच्छादिता दृक्च्छक्तिः व्यञ्जनाय कलादिमान्। आदिशब्देन विद्यारागादिकं गृह्यते। तत्प्रसृतिः किमर्थेत्यत आह– भोगायेति। भोगः किंप्रयुक्त इत्यत आह–कर्मसंबन्ध इति। कर्मसंबन्धित्वात् तत्क्षयाय भोगोऽपेक्ष्यत इत्यर्थः। तथा च मलमायाकर्मरूपबन्धत्रयवत्वं सकललक्षणं द्रष्टव्यम्। अत्र यद्यपि कलादिमत्वमेव सकललक्षणमस्त्विति प्रसक्तं तथापि सकलस्य कलादिबन्धदा एक एवेति भ्रान्तिवारणायेतरबन्धद्वयोपादानमिति द्रष्टव्यम्। अत्र श्रुतिः।

**(वृत्तिः)** मलोपरुद्धदृक्च्छक्तिः क्रियाविनाभूतदृगित्यध्याहार्यम्। तत्प्रसृत्यै तच्छक्त्यभि-व्यक्त्यर्थं कलादिमान्। कलाशब्देन सूक्ष्मदेहलक्षणत्रिंशत्तत्त्वमुच्यते। आदिशब्देन स्थूलदेहादिकं गृह्यते। भोगाय सुखदुःखमोहात्मवेदनाय कर्मसम्बन्धः नामिश्रं परिणमत इति परस्परोपकारेण

१. ता एव विधा]क१; तानेव त्रिविधान्- मु
२. क्रमेण]क१;उद्देशक्रमेण लक्षणं-क२, मु

परिपक्वभोजकसजातीयकर्मालम्बनात्[१] समुत्थभावप्रत्ययभेदेन सुखदु:खमोहात्मनोपस्थितोपस्थातव्यकर्मसम्बन्धः सकलः परिपठ्यते।

**( व्याख्या )** क्रमप्राप्तं प्रलयाकलं भेदेन लक्षयति–

**( वृत्तिः )** प्रलयकेवलिनं लक्षयति–

**प्राग्वन्निरुद्धदृक्छक्तिः कर्मपाकात् कलोज्झितः।।४।।**
**कर्मणैष्यत्कलायोग्यो यः स च प्रलयाकलः।**

**( व्याख्या )** प्राग्वत् सकलावस्थायामिव मलेन निरुद्धदृक्छक्तिः कलोज्झितः कलादिरहितः कर्मपाकात् कर्मपरिपाकात् एकः प्रलयकालः। यः कर्मणा परिपक्वेन एष्यत्कलायोग्यः स अपरः प्रलयाकलः। तदुक्तं–

प्रलयाकलेषु येषां पक्वे मलकर्मणी व्रजन्त्यन्ये।
पुर्यष्टकदेहयुतो योनिषु निखिलासु कर्मवशात्। इति।

एवं च मलकर्मरूपबन्धद्वयमात्रवत्वं प्रलयाकलस्य लक्षणं द्रष्टव्यम्। तत्र बन्धवत्वमात्रं विज्ञानाकलेऽतिव्याप्तमिति कर्मोपादानमात्रपदं च सकलेऽतिव्याप्तिवारणाय।

**( वृत्तिः )** प्राग्वन्मलेन निरुद्धदृक्शक्तिः[२] कर्मणां पक्वानामुपभुक्तत्वादपरिपक्वस्य[३] न भोगदानकलाधृतिनिर्मातृत्वमिति[४]। तदर्थं कर्मपाकाद्धेतोर्महाप्रलये प्राप्ते कलोज्झितः कलया सूक्ष्मदेहरूपया उज्झितः मुक्तः तथोक्तः कर्मणा तदवधि पक्वेनैष्यत्कलायोग्यः सृष्ट्यारम्भ–कालागमनीयसूक्ष्मदेहानुषङ्गार्हः यः स च प्रलयाकलः।

**( व्याख्या )** क्रमप्राप्तं विज्ञानाकलं लक्षयति–

**( वृत्तिः )** विज्ञानकेवलिनं लक्षयति –

**मलोपरुद्धशक्तित्वात् शून्यकल्पस्वदृक्क्रियः।।५।।**
**तृतीयः पठ्यते तन्त्रे नाम्ना विज्ञानकेवलः।**

**( व्याख्या )** शून्यकल्पा अविद्यमानप्राया स्वीया दृक्क्रिया ज्ञानक्रियाशक्तिः यस्य स तथोक्तः। दृक्क्रियेत्येतत् इच्छाशक्तेरपि उपलक्षणम्। एवं च मलमात्रबन्धवत्वं विज्ञानाकलस्य लक्षणं द्रष्टव्यम्। तदुक्तम्–

अणवस्त्रिविधा ज्ञेया विज्ञानप्रलयकेवलौ सकलः।
मलयुक्तस्तत्राद्यो मलकर्मयुतो द्वितीयः स्यात् मलमायाकर्मयुतः सकलः। इति।

---

१. इतः प्रभृति ज२ कोशे ग्रन्थः पुनः अनुवर्तते।

२. निरुद्धदृक्शक्तिः ] ज२,ज३; निरुद्धं दृक्शक्तिः– ज१

३. पक्वानामुपभुक्तत्वादपरिपक्वस्य ] ज१,ज३; पक्वानामुपभुक्तत्वा अपरिपक्वस्य– ज२

४. भोगदानकलाधृतिनिर्मातृत्वमिति] ज१;भोगदानकलाधृतिनिर्मातृ .... मिति– ज२;भोगदान–कलादाननिर्मातृत्वमिति–ज३

विज्ञानाकललक्षणे च मात्रपदमितरयोरतिव्याप्तिवारणाय। ननु मलमात्रबन्धवत्वं नाम कलादिकर्मबन्धराहित्ये सति मलयुक्तत्वम्। तत्र च विशेष्यांशो व्यर्थ इति चेन्न। ईश्वरे अतिव्याप्तिवारकत्वात्।

**( वृत्तिः )** शून्यकल्पेत्यसद्भूतसदृशेत्यर्थः। सुकरः श्लोकार्थः। प्रातिलोम्येनैकद्वित्रिबन्धिनः इति ज्ञेयाः। सकलस्तु द्विविधः सूक्ष्मदेही स्थूलदेही चेति। पुनः सूक्ष्मदेही च द्विविधः। अप्राप्तबाह्यशरीरी प्रणष्टबाह्यशरीरी चेति। प्रणष्टबाह्यशरीरी च द्विविधः। सूक्ष्मदेही सन् मलकर्ममायीयबन्धी सन् त्रिबन्धी च वक्ष्यमाणसंन्यासादिषु कुतश्चिदुपायाद्विकर्मी सन् वासनाव शान्निर्धूतस्थूलदेहोऽप्यवष्टब्धसूक्ष्मदेहित्वात् मलमायीयसम्बन्धी सन् विज्ञानकैवल्यप्राप्त्यवधि द्विबन्धी चेति। स्थूलदेही च द्विविधः मलकर्ममायीयबन्धी सन् त्रिबन्धी च विज्ञानयोगसंन्यासैर्भोगाद्वा कर्मण क्षयात्। संस्कारवशेनैव चक्रभ्रमवद्धृतशरीरत्वात् तद्वासनावेदनमात्रभुक्तिमान् मलमायीयबन्धी सन् द्विबन्धी चेति। स एष एव स्थूलदेहपतनसमनन्तरं[१] निरवशेषवासनात् सद्यो विज्ञानकैवल्यं प्राप्तिमान् सावशेषवासनात्। विज्ञानकैवल्यप्राप्त्यवधिप्रोक्तद्विबन्धी प्रणष्टबाह्यशरीरत्वप्राप्तिमांश्च भवति।

**( व्याख्या )** उक्तत्रिविधपशूनां बन्धभेदप्रयुक्तं स्थानभेदमपि[२] आह–

**( वृत्तिः )** त्रयस्थितिं दर्शयति –

**मायादावुदरे चान्ते क्रमेणैषां व्यवस्थितिः।।६।।**
**अवस्थानं च बन्धेन लक्ष्यतेऽणोर्विभुत्वतः।**

**( व्याख्या )** मायादाविति कलादिक्षितिपर्यन्तदेशो[३] मायादिः उपसंहृतकार्यात्मा[४] माया मायोदरदेशः मायोर्ध्वं मायान्तः यद्यप्यात्मनां[५] व्यापकत्वेन तत्तत्स्थानविशेष एवावस्थानमनुपपन्नं तथापि उक्तबन्धानां नियतदेशत्वेन[६] तेषामपि तत्तद्देशवर्तित्वम्। उपचारादित्याह[७] अवस्थानं चेति। ननु मायाकर्मणोः बन्धयोः क्वाचित्कत्वेन तद्बन्धानां सकलप्रलयाकलानां क्वाचित्कत्वम् उपपद्यताम्।

**( वृत्तिः )** बन्धेनेति सकलस्य मायाकार्यकलानुबन्धेन प्रलयकेवलिनस्तदनुबन्धयोग्यक-रकर्मानुबन्धेन विज्ञानकेवलिनस्तदुभयेविधुरमलानुबन्धेन लक्ष्यते तदुपचारबीजतो दृश्यते। इतरपदार्थः सुगमः।

---

१. स्थूलदेहपतन० ] ज२,ज३; स्थूलदेहवतः ०–ज१

२. स्थानभेदमपि– क१; स्थानभेदम्– मु

३. कलादिक्षितिपर्यन्तदेशो– क१; कलादिक्षितिपर्यन्ततत्त्वसमूहः– मु

४. उपसंहृतकार्यात्मा ] मु इव संसृतकार्यात्मा– क१;

५. यद्यप्यात्मनां ] मु यद्यप्यात्मना– क१;

६. उक्तबन्धानां नियतदेशत्वेन ] मु उक्तबन्धनात् नियतदेशत्वेन– क१;

७. उपचारादित्याह ] मु ह–क१;

**( व्याख्या )** विज्ञानकेवलानां तु बन्धकस्य मलस्यापि व्यापकत्वेन[१] तद्बन्धानां तेषां कथं क्वाचित्कत्वम् इत्याशंकन्ते ऋषयः–

**( वृत्तिः )** ऋषयः यद्येवं विज्ञानकेवलिनो मायासंस्पर्शिन्युक्तिरनुचितेत्याशंकयन्ति –

**विज्ञानकेवलाणूनां बन्धस्तु मल एव हि।।७।।**
**मलस्य व्यापकत्वेन मायान्ते संस्थितिः कथम्।**

**( व्याख्या )** मल एव न कर्मकलादिः[२] बन्धस्य व्यापकत्वेऽपि प्रकारान्तरेण मायान्ते अवस्थानोक्तिः उपपद्यत इत्याह ईश्वरः।

**( वृत्तिः )** मायां प्रतीत्यध्याहार्यम्। सुगमः श्लोकार्थः।

**भद्रं विप्रा महाप्राज्ञाः शुद्धाध्वा यः पुरोदितः।।८।।**
**भोक्ष्यमाणतया तस्य भुक्तत्वेनेतरस्य च।**
**अर्थादेव स्थिता[३] मध्ये प्रोक्ता विज्ञानकेवलाः।।९।।**

**( व्याख्या )** पुरा कुण्डलिनीपटले शुद्धाध्वा शिवतत्त्वादिः निरूपितः तस्य दीक्षाविशेषरूपसहकारिविलम्बेन समयान्तरे भोक्ष्यमाणतया भोक्तव्यक्तेन इतरस्याशुद्धाध्वनश्च भुक्तत्वेनात एव कर्मक्षयाच्च अर्थात् वस्तुसामर्थ्यात् न तु बन्धवशादित्यर्थः। विज्ञानकेवलाः[४] मध्ये शुद्धाध्वनोरिति शेषः।

ननु शुद्धाध्ववर्तिनः पुनः के इत्याकांक्षायामाह–

**विज्ञानकेवलाः साक्षात् त एव मुनिपुङ्गवाः।**
**शुद्धाध्ववर्तिनः पश्चाद् भविष्यन्ति शिवेच्छया।।१०।।**

**( व्याख्या )** त एव मायान्तवर्तिन एव पश्चात् मलपाकानन्तरं शिवेच्छया निरधिकरणशिवानुग्रहेण शुद्धाध्ववर्तिनो भविष्यन्ति भोगायेति[५] शेषः।

**( वृत्तिः )** इतरस्याशुद्धाध्वनः अर्थादुक्तप्रयोजनात्। सार्धश्लोकेऽन्यपदार्थः सुलभः। हे मुनिपुङ्गवाः। साक्षात् अथ[६] सकलत्वप्रलयाकलत्वद्विभावाव्यवहितोपरिशिवत्वैकभावापिहितकैवल्यस्वलक्षणात्[७] त एव विज्ञानकेवलाः आगमसिद्धत्वात् पुनः[८] केनाप्यप्रतिक्षेप्याः युक्तिसिद्धाश्च

---

१. व्यापकत्वेन ]मु अशुद्धकर्मव्यापकत्वेन–क१;
२. न कर्मकलादिः ] मु कर्मकलादिः– क१;
३. अर्थादेव स्थिता ] मु अर्थ्यात् व्यवस्थिता– क१;
४. विज्ञानकेवलाः ] मु विज्ञानकेवलानां– क१;
५. भोगायेति ] क१; तद्भोगायेति– मु
६. अथ ] ज१,ज३; अधः–ज२
७. ० व्यवहितोपरि शिवत्वैकभावा० ] ज१,ज३; ०व्यवहितो परशिवत्वैकभावा०– ज२
८. पुनः ] ज१,ज३; ज२ कोशे नास्ति।

पशवः कर्ममायात्मकबन्धिता[१] अपि केवलमलयुक्ताः सम्भवन्ति। तद्व्यतिरिक्तमलस्य बन्धत्वेनाभ्युपगमात्। यो यद्बन्धव्यतिरिक्तो येषां बन्धः स तदाभावेऽपि तेषां बन्धः सिद्धः[२] निगलादिवदिति। पश्चान्मलपरिपाके शिवेच्छया निरधिकरणशिवदीक्षया लब्धापर-शिवत्वलक्षणस्वलक्षणापरशिवस्वनामभ्यामपिहितमलमात्रयुक्तत्वविज्ञानकैवल्यपशुत्व-लक्षणस्वलक्षणविज्ञानकेवलस्वनामानः[३] शिवजातीया ह्यमलपरिपाकवशात् सद्यः[४] परमुक्तिमद्ध्योऽवशिष्टा मलपरिपाकमान्द्यात् शुद्धाध्ववर्तिनो भविष्यन्ति। तत्र वर्तिनां मलरहितत्वात् न विज्ञानकैवल्यलक्षणमित्यपरशिवलक्षणात् पतय एव पुनः शिवदीक्षां विना न शुद्धवर्त्मप्रवेश इति भावः। अपरिपक्वमलास्तु दीक्षाशुद्धिविधुरत्वात्। समलत्वान्मलमात्रयुक्तत्वं विज्ञानकैवल्यलक्षणम् इत्युक्तत्वान्मायोपरि शुद्धविद्याधो मलपरिपाकान्तं विज्ञानकैवल्यवन्तः संतिष्ठन्ति।

**( व्याख्या )** ननु गुद्धाध्ववर्तिनोऽपि भोक्तृत्वाविशेषात् सकला एव किं न स्युः इत्याशंक्याह–

**( वृत्तिः )** नियमयति –

**अणोर्नियामकत्वेन मायावत् शुद्धवर्त्मनः।**
**तद्वर्तिनो न सकलाः किन्तु विज्ञानकेवलाः।।११।।**

**( व्याख्या )** यथा माया कलादिद्वारा अणोः नियामिका[५] तथा शुद्धवर्त्मनः कुण्डलिन्याः कलादिसंपादनद्वारा अणोः नियामकत्वेन तद्वर्तिनः शुद्धाध्ववर्तिनोऽपि कलादिसहितत्वात् सकलाः किं न स्युरिति शंकार्थः। तुशब्देन तामाशंकां निवर्तयति विज्ञानकेवला इति। तेषां कलादियोगित्वेऽपि[६] तत्कृतपारतन्त्र्याभावात् न सकला इति भावः। तदुक्तम् अधस्तात् यस्मात्[७] सकला अकला अपीति।

ननु पारन्त्र्याभावे तेषामशक्तत्वमेव किं न स्यादित्यत आह–

**अधिकारमलोपेताः शिवेच्छानुमताः सदा।**

**( व्याख्या )** अधिकारमलः सृष्ट्याद्यधिकारमलवासना। तयोपेता एतदेव कुत इत्यत आह– शिवेच्छेति। सदा यावदधिकारम्।

---

१. कर्ममायात्मकबन्धिता ] ज१,ज३ कर्ममायात्मका बन्धिता– ज२

२. बन्धः सिद्धः ] ज२,ज३; बन्धसिद्धः– ज१;

३. लब्धापारशिवत्वलक्षणस्वलक्षणापरशिवस्वनामसामविहितमलमात्रयुक्तत्वविज्ञानकैवल्यपशुत्व-लक्षणस्वलक्षण-विज्ञानकेवलस्वनामानः ] ज१,ज३; लब्धापरशिवत्वलक्षणस्वलक्षणापरशिवस्वनाम भ्यामपिहितमलमायायुक्तत्वविज्ञानकैवल्यपशुत्वलक्षणस्वलक्षणविज्ञानकेवलस्वनामानः– ज२

४. ह्यमलपरिपाकवशात् सद्यः ] ज२; ह्यतिमलपरिपाकवशात् सद्यं– ज१

५. नियामिका ] मु; नियामका– क१;

६. कलादियोगित्वेऽपि] मु; कलादियोगत्वेऽपि– क१;

७. अधस्तात् ] मु; यस्मात्– क१;

**( वृत्तिः )** अणोरात्मनः कार्यद्वारा प्रलयकैवल्यप्राप्तिपूर्वाशुद्धकलाकलितसकलस्येति नियामकत्वेन मायावत् शुद्धवर्त्मन इदमस्य विज्ञानकैवल्यप्राप्तिपूर्वदीक्षालब्धशुद्धकलाकलि-तापरशिवस्य[१] नेतरस्येति नियामकत्वेन नियतिकारकत्वेन तद्वर्तिनो संख्याताः सर्वे न सकलाः। न प्रलयकैवल्यप्राप्तिपूर्वाशुद्धकलाकलिताः[२]। किन्तु विज्ञानकेवलाः शुद्धविद्याधस्तनस्थान-वर्तिष्वसंख्यातेषु विज्ञानकेवलेषु पक्वमलास्ते दीक्षाकृतस्वापरशिवत्वाभिव्यक्तिस्वापरशिवनाम-स्वशुद्धकलाकलितशुद्धवर्त्मस्थितिभिः पिहितकैवल्यपशुत्वलक्षणस्वलक्षणविज्ञानकेवल-स्वनामस्वमलकलितशुद्धविद्याधस्थितिक्लृप्तिमन्तः। न तु विज्ञान-केवलास्तत्र स्थिता इति व्याख्येयम्। तेषां मलमात्रयुक्तस्वलक्षणात् शुद्धवर्त्मवर्तीनां तु मलोत्तीर्णत्वात्। अधिकारमलोपेताः मलसहकृतमायीयविपरीतप्रतिपत्त्यात्म-पुंस्त्वमलवन्तः सकला इव[३] दृक्क्रियावारकानादिमलमायात्यन्त-विच्छित्तेर्महामायायां मलनिहितवासनासमुत्थसृष्ट्यादिनिर्माणभोगभुक्तिरक्तिलक्षणा-धिकारमलोपेताः[४] महाप्रलये निःशेषतः पारतन्त्र्याद्विनिर्मुक्ताः परमुक्तिं गमिष्यन्ति इति तदवधि सदा सर्वदा शिवेच्छानुमताः अनतिलङ्घितशिवशक्तितन्त्राः।

**( व्याख्या )** नन्वेवमपि विज्ञानकेवलावस्था अणोः नोपपद्यते। दीक्षया कलादिकर्मनाशे मले च[५] सति सा वक्तव्या। तच्च न संगच्छते। दीक्षायाः कलाकर्मनाशकत्ववत्[६] मलनाशकत्वस्यापि श्रवणात्। तदुक्तम्-

दीयते ज्ञानसद्भावः क्षीयते च मलत्रयम्। इत्यादिनेत्याशंक्य[७] विज्ञानकेवलावस्थां साधयितुं प्रतिजानीते-

**( वृत्तिः )** यद्येवं मायामण्डलस्थानां सकलानां दीक्षया शुद्धाध्वभोगप्राप्त्यर्थं[८] तु गुरुकृतयोजना व्यर्थेत्याशंक्य परिणतमलानामस्मदादीनामपि दीक्षया कलातत्त्वान्तशुद्ध्या सूक्ष्मदेहशुद्धिसमनन्तरं कर्मशुद्धेः प्राक् प्रलयकैवल्यं सिद्धमिति कृत्वा कर्मशुद्धि-समनन्तरं विज्ञानकैवल्यप्राप्तिपूर्वमनुपदमेव तदङ्गात्यन्तमलक्षयकर्या क्रियया शुद्धाध्वप्राप्तिरपरिणतमलानां तदुचितथा तावत्या तया[९] विज्ञानकैवल्यमात्रप्राप्तिरस्तीति सूचयन् तत्सिद्धिं दर्शयति -

**विज्ञानकेवलानां तु सिद्धौ युक्तिरिहोच्यते।।१२।।**

---

१. विज्ञनकैवल्यप्राप्तिपूर्वदीक्षालब्ध० ] ज१; विज्ञनकैवल्यपूर्वदीक्षालब्ध०- ज२

२. न प्रलयकैवल्यप्राप्ति० ] ज२; प्रलयकैवल्यप्राप्तिपूर्वाशुद्धकलाकलिता- ज१;

३. इव ] ज१;इतिवत्-ज२

४. मलनिहितवासनासमुत्थ० ] ज२; मलरहितवासनासमुत्थ०-ज१;

५. मले च] मु मले-क१;

६. दीक्षायाः कलाकर्मनाशकत्ववत्] मु दीक्षया कर्मनाशकर्मनाशकर्मकत्वं-क१;

७. इत्यादिनेत्याशंक्य] मु इत्यादीत्याशंक्य-क१;

८. दीक्षया शुद्धाध्वभोगप्राप्त्यर्थं ] ज१; दीक्षाशुद्धाध्वभोगप्राप्त्यर्थं- ज२

९. तदुचितया तावत्या तया ] ज२; तद्विचितयातावर्थातया- ज१;

**( व्याख्या )** स्पष्टोऽर्थः[१] ।

तामेवयुक्तिमाह–

**कलातत्त्वान्तशोधिन्या दीक्षया ज्ञानतोऽपिवा।**
**योगेन भोगतो वापि संन्यासाद्वा परिक्षयः।।१३।।**

**कर्मणां तु तदायत्तमायायाश्च[२] परिक्षयात्।**
**मल एकोऽवशिष्टः[३] स्यात् तस्मात् विज्ञानकेवलाः।।१४।।**

**( व्याख्या )** कलातत्त्वान्तशोधिन्या पृथिव्यादिकलान्ततत्त्वमात्रशोधिन्या[४] दीक्षया दीक्षाख्यशिवशक्त्या ज्ञानतः उपासनाज्ञानात्[५] योगेन यमनियमाद्यष्टाङ्गयोगेन भोगतः अनुभवात् सन्यासाद्वा[६] विविदिषापूर्वकं सकलकर्मपरित्यागात्[७] कर्मणां धर्माधर्मरूपाणां परिक्षयो नाशो भवतीति शेषः। किंच तदायत्तमायायाः[८] कर्मप्रयुक्तकलादिसंबन्धस्य परिक्षयात् मल एकोऽवशिष्टः[९] स्यात्। यस्मात् मलमात्रयोगित्वमिति लक्षणसद्भावस्तस्मादित्यर्थः[१०] । अत्रार्ये श्रुतिः।

**( वृत्तिः )** कलातत्त्वान्तशोधिन्या दीक्षया ज्ञानतोऽपि वा। कलापुरुषविवेके कृतप्रायत्वान्मायापुरुषविवेकस्य मायापुरुषविवेकविषयज्ञानादपि वा योगेन प्रत्याहाराद्यङ्गोपकृतचित्तजयात्ममायापुरुषविवेकफलेन वा संन्यासाद्वा सर्वमेतदीश्वरायेति ईश्वरार्पणलक्षणकर्मसंन्यासाद्वा। अथ भोगतो वा ईश्वरार्पितकर्मफलवेदनात्मभोगाद्वा कर्मणां तु परीक्षय इत्यनुषङ्गः। शेषं सुगमम्।

**( व्याख्या )** ननु कर्मक्षये सति दर्शनान्तरे मुक्तिः श्रूयते। तत् कथमित्याशंक्याह–

**( वृत्तिः )** वेदान्तसांख्यक्षपणसौगातपाञ्चरात्रपादार्थिकदृष्ट्यभ्यासजनितज्ञानादिना[११] भवतु विज्ञानकैवल्यं किमेतैर्विशिष्टैरिति हृदि समाशंक्य रागादीन् तदभ्यासतो विविच्यापरिज्ञानान्न कर्मक्षय इति तद्विज्ञानिनः सकलत्वं न मुञ्चतीत्याह –

---

१. स्पष्टोऽर्थः– मु; क१ कोशे नास्ति।

२. तदायत्तमायायाश्च ] मु तदायुक्त मायायाश्च– क१;

३. एकोऽवशिष्टः ] मु एको विशिष्टः– क१;

४. पृथिव्यादिकलान्ततत्त्वमात्रशोधिन्या ] मु पृथिव्यादिकलान्तं तत्त्वमात्रशोधिन्या– क१;

५. उपासनाज्ञानात् ] मु उपासनाज्ञानां– क१;

६. सन्यासाद्वा ] मु सन्यासाद्–क१;

७. विविदिषापूर्वकं सकलकर्मपरित्यागात् ] क१; दीक्षाविधिपूर्वकसकलकर्मपरित्यागात्– मु

८. तदायत्त० ] मु तदा यत्न०– क१;

९. अवशिष्टः ] मु एव शिष्टः– क१;

१०. लक्षणसद्भावः तस्मादित्यर्थः ] मु लक्षणसंभवः तदित्यर्थः–क१;

११. ०जनितज्ञानादिना ] ज१; ०जनितज्ञानार्थिना–ज२

**बौद्धादिदृष्टिमुक्तानां कैवल्यमपि नेष्यते।**
**यतस्तद्बुद्धितत्त्वोर्ध्वकर्मणाम्[१] अपरिक्षयः।।१५।।**
**सकला एव ते ज्ञेयाः कलायोगो यतः स्थितः।**

**(व्याख्या)** बौद्धादिदृष्टिमुक्तानां बौद्धा विज्ञानवादिप्रभृतयः आदिपदेन क्षपणकादयो गृह्यन्ते। तेषां दृष्टिः दर्शनं तत्र मुक्तानां मुक्तत्वेन प्रतिपाद्यमानानां कैवल्यं विज्ञानकेवलत्वम् अपि शब्दात् प्रलयाकलत्वमपि नेष्यते। दूरे मुक्तत्वमिति भावः। कुत इत्यत आह। यत इति। बुद्धितत्त्वोर्ध्वकर्मणां बुद्धितत्त्वात् ऊर्ध्वतत्त्वात् ऊर्ध्वतत्त्वेषु[२] प्रकृत्यादितत्त्वेषु स्थितानां कर्मणां भोगाभावेनापरिक्षयात् यतः तस्मादित्यर्थः[३] बुद्धितत्त्वस्यैव तत्त्वावधित्वस्वीकारादिति भावः। के तर्हि ते इत्यत आह– सकला एवेति। ते तन्मतमुक्ताः सकला एव न प्रलयाकलाः नापि विज्ञानकेवला इति भावः। साकल्ये हेतुमाह कलायोग इति।

**(वृत्तिः)** वेदान्तविदादीनामपि प्रतिस्वावध्यूर्ध्वोक्तिः क्रियताम्। सुकरोऽक्षरार्थः।

**(व्याख्या)** ननु विज्ञानकेवलसिद्धावपि प्रलयकालसिद्धौ न प्रमाणं पश्यामः। तेषां कर्ममलयुक्तत्वलक्षणयोगेन कर्मभोगाय तदायत्तकलादियोगस्यापि[४] अवश्यम्भावेन सकलत्वस्यैव औचित्यात् इत्यत आह–

**(वृत्तिः)** प्रलयकेवलसिद्धिं दर्शयति –

**एवमेवाणवो युक्तिसिद्धाः प्रलयकेवलाः।।१६।।**
**तत्त्वानामुपसंहारे प्रलयात् कर्मणोऽथ वा।**
**त्यक्तसूक्ष्मबहिर्देहा एष्यद्भोगनिबन्धनैः।।१७।।**
**अपक्वैः कर्मभिर्युक्ता इष्यन्तां प्रलयाकलाः।**

**(व्याख्या)** एवमेव विज्ञानकेवलवदेव प्रलयाकलाः प्रलयकेवलावस्थावन्तोऽपि युक्तिसिद्धाः प्रमाणसिद्धा इत्यर्थः। तामेव युक्तिं दर्शयति तत्त्वानामिति। प्रलये कलादिक्षितिपर्यन्तानां तत्त्वानामुपसंहारे उपादानात्मना अवस्थाने स्थूलसूक्ष्मदेहपरित्यागे युक्त्यन्तरमाह प्रल्यात् कर्मण इति। जातावेकवचनं पक्वकर्मणामित्यर्थः। अपक्वैः कर्मभिः इत्युत्तरत्राभिधानात्। सकलकर्मक्षये विज्ञानकेवलत्वप्रसङ्गाच्च। तथा च कर्मक्षये उभयविधशरीरशून्या[५] इत्याह त्यक्तसूक्ष्मबहिर्देहा इति। सूक्ष्मदेहपदेन[६] पुर्यष्टकशरीरमुच्यते।

---

१. ०तत्त्वोर्ध्वकर्मणाम् ] ज२; ०तत्त्वोर्ध्वे कर्मणाम्– ज१;

२. ऊर्ध्वतत्त्वात् ऊर्ध्वतत्त्वेषु] क१; ऊर्ध्वतत्त्वेषु– मु

३. भोगाभावेनापरिक्षयात् यतः तस्मादित्यर्थः] मु भोगाभावेनापरिक्षयात्– क१;

४. तदायत्तकलादियोगस्यापि] मु तदा यत्नकलादियोगस्यापि– क१;

५. उभयविधशरीरशून्या ] मु उभयविधशरीरशून्यता– क१;

६. सूक्ष्मदेहपदेन ] मु सूक्ष्मपदेन– क१;

त्यक्ताः सूक्ष्मा बहिर्देहाश्च यैः ते तथोक्ताः पक्वकर्मणां नाशे कलादीनां च नाशे[1] सति पुनः अपक्वकर्मसद्भावे किं प्रमाणमित्यत आह एष्यदिति। निबन्धनानि निमित्तानि अपक्वकर्मसद्भावे भविष्यद्भोगलक्षणं कार्यमेव प्रमाणं सूचितम्।

**( वृत्तिः )** तत्त्वानां स्थूलसूक्ष्मरूपाणामुपसंहारे लये जाते अथवा अथवेत्येकैकोक्त्या सिद्ध्यन्तीति भावः। कर्मणस्तत्त्वस्थितिकारणतया पक्वस्य प्रलयात् सुखादिलक्षणात् स्वपरिणते स्वकर्तृभुक्तिपुरःसरं क्षयात्[2] त्यक्तेत्यनुषङ्गः। स्पष्टस्तदितरपदार्थः।

**( व्याख्या )** प्रलयाकलसिद्धौ युक्तिमुक्त्वा सकलसिद्धौ युक्तिमाह–

**( वृत्तिः )** सकलसिद्धिं दर्शयति –

**सकलास्तु कलायोगात् सूक्ष्मा स्थूला च सा द्विधा।।१८।।**
**प्रतिपुंनियतं तत्त्वं कलाद्यवनिपश्चिमम्।**

**( व्याख्या )** अणवः कलायोगात् सकला भवन्ति सा च कला स्थूलसूक्ष्मभेदेन द्विविधा। तत्र सूक्ष्मा प्रतिपुंनियतं कलादितत्त्वं तत्तत्पुरुषमात्रविश्रान्तम् असाधारणमिति यावत्। स्थूला तु[3] कलाद्यवनिपश्चिमं साधारणं तत्त्वम्। साधारणासाधारणकलादिसद्भावे[4] श्रुतिरप्यस्ति प्रमाणम्। एवं विज्ञानकेवलप्रलयाकलसकलान् युक्तितः प्रसाध्य विज्ञानकेवलानां साक्षात् अनुग्रहः भविष्यन्ति शिवेच्छयेत्यादिनोक्तः। अनुग्राह्यास्त्वमी इत्यादिना सकलानां साधिकरणानुग्रह उक्तः।

प्रलयाकलानां कीदृशोऽनुग्रह इत्याकांक्षायामाह–

**स्वेच्छयैवानुगृह्णाति प्रलयाणूनपीश्वरः।।१९।।**

**( व्याख्या )** प्रलयाणून् प्रलयाकलानित्यर्थः। नामैकदेशे नामग्रहणम्। भीमो भीमसेन इतिवत्। अपिशब्द उक्तसमुच्चयार्थः। स्वेच्छयैव आचार्यमूर्तिमधिष्ठाय।

**( वृत्तिः )** प्रतिपुंनियतमसाधारणदेहात्मकं तत्त्वं सूक्ष्मा कला। कलाद्यवनिपश्चिमं कपालीशादिकालाग्न्यन्तसाधारणभुवनात्मकं तत्त्वं स्थूला कला आत्मान्तरैरपि भोग्यत्वात्। साधारणासाधारणोक्तिमत् भुवनजदेहादिकम् अप्यत्रान्तर्भूतम्। पूर्वार्धार्थः स्पष्टः।

**( व्याख्या )** ननु प्रलयाणूननुगृह्णातीत्येतदनुपपन्नम्। तेषां कलाद्यायत्तभोगासम्भवेन[5] अनुग्रहासम्भवादित्याशंकन्ते ऋषयः–

---

१. नाशे ] मु देहनाशे– क१;
२. स्वकर्तृभुक्तिपुरःसरं क्षयात् ] ज१; स्वकर्तृभुक्तिपुरःसरक्षयात्– ज२
३. स्थूला तु] मु स्थूला–क१;
४. साधारणासाधारणकलादिसद्भावे ] मु साधारणकलादिसद्भावे– क१;
५. कलाद्यायत्तभोगासम्भवेन ] क१; कलाद्यायत्तभोगासम्भवेन तदायत्तकर्मसाम्याद्यभावेन– मु

**( वृत्तिः )** तदानीं गुर्वधिकरणत्वायोगात् प्रलयाणूनपि विज्ञानाणूनिव शिवः स्वेच्छया निरधिकरणस्वशक्त्यैवानुगृह्णाति पाशविमुक्तिशिवत्वाभिव्यक्ती भवतां स्यातामिति संकल्पयति।

ऋषयः –

**अथ कर्मसमत्वेऽणोरनुग्रह इहेष्यते।**
**कर्मसाम्यं च भोगेन कथमेषामनुग्रहः।।२०।।**

**( व्याख्या )** अणोः पशोः जातावेकवचनम् अनुग्रह दीक्षादिलक्षणः कर्मसमत्वे कर्मसाम्ये। तदुक्तं श्रीमत्किरणे– समे कर्मणि संजाते कालान्तरवशात् ततः। इति। ततः किमित्यत आह कर्मसाम्यमिति।

**( वृत्तिः )** इह सकलविषये अणोरात्मनः कर्मसमत्वे पाकेन भोग्यकालसाम्ये अनुग्रह इष्यते। तदनुग्रहनिमित्तं कर्मसाम्यं च भोगेन पक्ववशात् सुखदुःखात्मना परिणतस्वभुक्त्यात्मककालदानेन[1] भाव्यम्। एषां प्रलयाकलानां तदसम्भवात् अनुग्रहः कथमिष्यते। मलपाकमन्तराऽनुग्रहकारणं कर्मसाम्यमिति केनोक्तं पूर्वापरोक्तिविरुद्धार्थ–विधातृभिर्वक्तुं किलोचितमिदम्।

**( व्याख्या )** कर्मसाम्यस्य अनुग्रहाहेतुत्वम्[2] इत्यभिप्रेत्य परिहरति ईश्वरः।

**( वृत्तिः )** मदुक्तिस्तन्त्रान्तरे यथा[3] क्वचित् समुत्थापि मदभिप्रेतमविरुद्धं ज्ञात्वाऽर्थः क्रियतामिति सूचयन्नीश्वरः समाधत्ते –

**समत्वं कर्मणां नात्र निमित्तं तदनुग्रहे।**
**परिपाको मलस्यैव किं त्वनुग्रहकारणम्।।२१।।**

**( व्याख्या )** अत्र प्रलयाकलेषु तदनुग्रहे ईश्वरानुग्रहे कार्ये कर्मणां साम्यं निमित्तं न कारणं न। किं तर्हि अनिमित्तोऽनुग्रहः[4]। नेत्याह किंत्विति। मलस्य परिपाकः फलौन्मुख्यम्।

**( वृत्तिः )** सुलभः श्लोकार्थः।

**( व्याख्या )** ननु मलपरिपाकस्यैवानुग्रहहेतुत्वेऽपि किं सर्वेषां प्रलयाकलानामनुग्रहहेतुता। नेत्याह–

**( वृत्तिः )** अन्यथा बाधास्तीत्याह –

---

१. भोग्यकालसाम्ये अनुग्रह इष्यते। तदनुग्रहनिमित्तं कर्मसाम्यं च भोगेन पक्ववशात् सुखदुःखात्मना परिणतस्वभुक्त्यात्मककालदानेन ] ज२; भोग्यकालदानेन– ज१;

२. अनुग्रहाहेतुत्वम्–] मु अनुग्रहाहेतुकत्वम्– क१;

३. यथा ] ज१ ;तथा– ज२

४. अनिमित्तोऽनुग्रहः]क१ ;निर्निमित्तोऽनुग्रहः–मु

**किंचैष्यद्भोगहेतूनि सन्ति येषामनुग्रहे।**
**न ते शिवस्य विषयाः किंतु पक्वाः स्वकर्मणा।।२२।।**

**( व्याख्या )** प्रलयाकला द्विविधाः अपक्वकर्माणः पक्वकर्माणश्चेति। तत्राद्यानां नानुग्रह इत्याह येषामिति। येषां प्रलयाकलानां एष्यद्भोगहेतूनि एष्यतां वर्तिष्यमाणानां भोगानां हेतवः सहकारिणो[1] येषां कर्मणां तानि कर्माणीति शेषः। षष्ठीतत्पुरुषपक्षे[2] नपुंसकत्वं छान्दसम्[3]। ते अपक्वकर्माणः शिवस्यानुग्रहे विषया न। के तस्यानुग्रहविषया इत्यत आकांक्षायां द्वितीया इत्यत आह किन्त्विति। उक्तेषु पक्वकर्मसु तत्त्वोपसंहारकाले कलाद्यसम्भवेन भोगासंभवात् तत्प्रयुक्तकर्मसाम्याभावेन व्यभिचार उक्तः।

इदानीं विज्ञानाकलेषु कर्मणामेवाभावेन तत्साम्यस्य हेतुत्वं व्यभिचारमाह–

**सर्वत्र कर्मसाम्यस्य यद्यनुग्रहहेतुता।**
**विज्ञानकेवलानां तु भवेत् कथमनुग्रहः।।२३।।**

**( व्याख्या )** कथमिति। तेषां कर्माभावेन तत्साम्यस्य दुःसम्पादत्वादिति भावः।

**( वृत्तिः )** किंचानुग्रहरूपकार्यावच्छिन्नतया हेतुत्वं वक्तव्यमिति सर्वत्रानुग्रहहेतुता कर्मसाम्यस्य यद्यस्ति येषामेष्यद्भोगहेतूनि अपरिपक्वानि कर्माणि सन्ति न ते प्रलयाकलाः शिवस्यानुग्रहे विषयाः। किंतु स्वकर्मणा पक्वाः परिपक्वकर्माणः सकला विषया इति किल संपन्नम्। तर्हि पुनः कर्मनिरपेक्षितत्वात्। विज्ञानकेवलानामनुग्रहः कथं भवेत् न सम्भाव्यः कथंचिदपीत्यर्थः। विज्ञानाकलस्यापि विज्ञानाकलावस्थालक्षणस्वफलसूक्ष्मस्वशरीरं दुर्लक्ष्यकर्मणां[4] साम्यं शक्तिपातकारणमस्तीत्याहुः केचिदाचार्याः। तदपि विज्ञानकेवलानां तु भवेत् कथमनुग्रह इति शिवाक्षेपोक्त्या निरस्तम्।

**( व्याख्या )** ननु सकलानुग्रहे कर्मसाम्यस्य हेतुत्वम् अस्ति[5] इत्याशंक्य किं सर्वेषां सकलानामनुग्रहे कर्मसाम्यं हेतुरुत सकलविशेष इति द्वेधा विकल्प्य क्रमेण निराकरोति–

**( वृत्तिः )** तथा हि विज्ञानयोगसंन्यासभोगानां प्रत्येकं प्रतिपुरुषं विज्ञानकैवल्यैकचरितार्थानां पुनर्मिलितानाम्[6] अविरोधित्वेन समविरोधान्योन्यसन्निपातसमत्वं कथं स्यात् मायापुरुषविवेकलक्षणा द्वितीया प्रतिभटविज्ञानैकचरितकैवल्यस्य विज्ञानकलान्यतमस्य वा कर्मसमत्वं कथं स्यात् सकलविषये वा तदपेक्षास्ति किं नेत्याह –

---

१. सहकारिणो– ] मु कृषिसहकारिणो– क१;

२. षष्ठीतत्पुरुषपक्षे– ] मु षष्ठीतत्पुरुषे– क१;

३. छान्दसम्–मु कलात्वं छान्दसः–क१;

४. ० स्वफलसूक्ष्मस्वशरीरं दुर्लक्ष्यकर्मणां ] ज१; ० स्वफलसूक्ष्म . . . . शरीरदुर्लक्ष्यकर्मणां– ज२

५. अस्ति– ] मु अस्तु–क१;

६. पुनर्मिलितानाम् ] ज१; नर्मलितानाम् अपि– ज२

**सकलानां च सर्वत्र कर्मसाम्यं न कारणम्।**
**यतः कर्मसमत्वेऽपि तदन्येषां तु कर्मणाम्।।२४।।**

**अपाके[१] परमेशाज्ञाऽविरुद्धान्यप्रदा स्थिता।**
**कर्मणोऽप्यस्य साम्ये वा पक्वे तदितरेऽपि च।।२५।।**

**तं प्रत्येवैश्वरी शक्तिरुपसर्पति तच्छिदे[२]।**
**अनुग्रहे ततो नेष्टं तत्साम्यं मुनिपुंगवाः[३]।।२६।।**

**( व्याख्या )** सर्वत्र पक्वापक्वकर्मावस्थायां वर्तमानं सर्वेषां सकलानामनुग्रहे कर्मसाम्यं विरुद्धयोः[४] कर्मणोः युगपत् फलौन्मुख्यं न कारणम्[५]। तत्र हेतुमाह यत इत्यादिना अन्यप्रदा स्थिता इत्यन्तेन। कर्मसमत्वेऽपि कतिपयकर्मणां समबलत्वे सत्यपि तदन्येषां तेभ्यः समेभ्यो भिन्नानां कर्मणां पाके फलोन्मुखत्वे[६] परमेशाज्ञा ईश्वरेच्छा अविरुद्धा अन्यप्रदा। अविरुद्धं यदन्यकर्मफलं तद्भोजयित्री न त्वनुग्रहपर्यवसायिनीत्यर्थः। द्वितीयं दूषयति कर्मणोऽपीत्यादिना। अस्य विरुद्धस्य सकलसम्बन्धिकर्मणः एवंविधेन कर्मान्तरेण साम्येऽपि तदितरे तद्विरुद्धं[७] समबलं कर्म इतरद्यस्मात् तत्तथोक्तम्। पञ्चमी तत्पुरुषे तु तदितरस्मिन्निति। प्रसङ्गात् पक्वे फलोन्मुखे तच्छिदे तत्सकलकर्मच्छेदनाय तं प्रत्येव ऐश्वरीशक्तिः उपसर्पति[८] अभिमुखीभवति। एवं च कर्मसाम्यस्य स्वविनाशकशक्तिनिपातहेतुत्वेऽपि दीक्षाहेतुभूतेश्वरानुग्रहे[९] न हेतुत्वमिति भावः। परं प्रकृतम्[१०] उपसंहरति अनुग्रह इति।

**( वृत्तिः )** सकलानां च सर्वत्र वर्तमानं कर्मसाम्यं न कारणं न चानुग्रहनिमित्तं श्रुतम्। अन्यार्थप्रदत्वानर्हतया क्वचित् कर्मसाम्ये पदोक्तिश्रुतापि[११] पुनः काकतालीयन्यायमवलम्ब्येत्याशयः। अत एव अन्यार्थपदत्वानर्हतयात्र[१२] किरणे

---

१. अपाके ] ज१ ;न पाके- ज२
२. तच्छिदे ] ज१ ;विच्छिदे- ज२
३. तत्साम्यं मुनिपुंगवाः ] ज२; तत् सामान्यमुनिपुंगवाः- ज१;
४. विरुद्धयोः-] मु न विरुद्धयोः- क१;
५. कारणम्-क१; कारणं समबलत्वे सत्यपि-मु
६. पाके फलोन्मुखत्वे- क१; अपाके फलानुन्मुखत्वे- मु
७. अविरुद्धं-क१;
८. तं प्रत्येव ऐश्वरी शक्तिः उपसर्पति-मु अपसर्पति-क१;
९. स्वविनाशकशक्तिनिपातहेतुत्वेऽपि दीक्षाहेतुहेतुभूतेश्वरानुग्रहे- मु स्वविनाशकशक्तिनिपातनभूतेश्वरानुग्रहे- क१;
१०. परं प्रकृतम्- क१; परमप्रकृतम्- मु
११. पदोक्तिश्रुतापि ] ज२; पदोक्तश्रुतापि- ज१;
१२. अन्यार्थपदत्वानर्हतयात्र ] ज१; अन्यार्थपदत्वार्हतयात्र- ज२

"समे कर्मणि संजाते कालान्तरवशात् ततः[१]" इत्यत्र भगवता रामकण्ठेन कालपाकवशादिति कृत्वा मलपरिणत्यर्थतया व्याख्याय समे कर्मणीत्यत्र न हृष्यत्युपकारेण नापकारेण[२] कुप्यति।

यः समः सर्वभूतेषु[३] जीवन्मुक्तः स उच्यते। इति स्वपरकृतस्वकर्मफललक्षणोपकारककर्मणि सम इत्यर्थानन्तरमावाह्य[४] व्याख्यातम्। मृगेन्द्रेऽपि "कर्मव्यक्तिद्वयं समम्" इत्यत्रापि तथा व्याख्यातम्। कर्मसाम्यं न कारणमित्यत्र हेतुं दर्शयति। यतः[५] यस्मात् कारणात् कर्मसमत्वेऽपि केषांचित् कर्माणां साम्येऽपि तदन्येषां तु कर्माणामपाके परमेशाज्ञा शिवशक्तिः किमनुग्राहिका पतति नेत्याह। विरुद्धेत्यादि विरुद्धा तिरोधायिनी मोक्षप्रतिबन्धिनी अन्यप्रदा मुक्तितरसभोगसाकल्यदात्री पुनरथ प्रलयकैवल्यदात्री स्थिता। अस्य पुरोक्तस्य कर्मणोऽत्र जात्येकवचनम्। साम्ये भोगदानकालसमत्वे तदितरेऽपि च समस्तकर्मणि पक्वे तं तत्कर्मिणं कर्मणामपाके[६] प्रत्येवैश्वरीशक्तिस्तिरोधानकर्त्री तच्छिदे तत्समस्तकर्मच्छेदाय विज्ञानकैवल्यदानाय च उपसर्पति उपयाति संकल्पयति। नहि मुक्तये। हे मुनिपुङ्गवाः।

**( व्याख्या )** कर्मसाम्यस्य प्रतिपादितमनुग्रहरूपाहेतुत्वं कर्मविशेषे तत्साम्यरूपणपूर्वकं[७] दृढयन् मलपाकस्यैवानुग्रहहेतुत्वमुपपादयति–

**( वृत्तिः )** ततोऽनुग्रहे कारणतत्वेन कर्मसाम्यं नेष्टम्। तदेव भूयो विविच्य दर्शयितुं मायापटले परीक्षितावशिष्टं कर्मस्वरूपं निरूपयति –

**कर्मेह त्रिविधं दृष्टादृष्टजन्मोपभोग्यकम्।**
**तथाऽनियतकालोपभोग्यं[८] चेति समासतः।।२७।।**

**( वृत्तिः )** लक्षणोक्त्याऽर्थः सुगमनीयः।

तत्र दृष्टभोग्यं कर्म दर्शयति –

**आयुर्योगो गलुच्यादिसिद्धो मन्त्रप्रभावतः।**
**तज्जन्मन्येव फलदो दृष्टभोग्यं तदुच्यते।।[९] २८।।**

---

१. ततः ] ज२; तदा– ज१;

२. नापकारेण ] ज२; न पाकारेण– ज१;

३. सर्वभूतेषु ] ज२; सर्वत्र भूतेषु– ज१;

४. स्वपरकृतस्वकर्मफललक्षणोपकारककर्मणि सम इत्यर्थानन्तरमावाह्य] ज२; श्रुतप्राक् तस्वकर्मफललक्षणोपकारावकारकर्मणि समत्यर्थानन्तरमावाक्य– ज१

५. यतः ] ज२; ततः– ज१;

६. तत्कर्मिणं कर्मणामपाके ] ज२; तत् कर्मणि– ज१;

७. कर्मविशेषे तत्साम्यनिरूपणपूर्वकं ] मु कर्मविशेषतत्साम्यरूपेणपूर्वकं– क१;

८. तथाऽनियतकालोपभोग्यं ] ज१; तथा नियतकालोपभोग्यं– ज२

९. अयं श्लोकः पूर्णतया ज२ कोशे नास्ति।

**( वृत्तिः )** आयुर्वर्धनकरो योग आयुर्योगः स तु गलुच्यादिसिद्धः अमृतवल्ल्या-द्यौषधबलेनाभ्यस्तः। जडस्य स्वतः प्रवृत्तिशून्यत्वान्मन्त्रप्रभावतः तदुद्दिश्य जप्तध्यातदेवतामहिम्ना[१] तज्जन्मन्येव फलदः शतायुः पुरुष इति श्रुतिनियतिमतिक्रम्य स्वेच्छाकालीनतद्देहस्थितिकारकः तत् कर्म दृष्टभोग्यमुच्यते।

अदृष्टभोग्यं दर्शयति -

**स्वाराज्यावीचिभोग्यौ यौ देहान्ते पुण्यपापयोः।**
**अदृष्टं वेदनीयं तत् कर्मोक्तं शिवदर्शने।।२९।।**

**( वृत्तिः )** देहिनः[२] शरीरपाते पुण्यपापयोः फलरूपौ स्वाराज्यावीचिभोग्यौ स्वर्गराज्यावीचिनरकलक्षणभोग्यौ यौ तत्संबन्धि तत्पुण्यपापरूपं कर्म शिवदर्शने शिवशास्त्रे अदृष्टं वेदनीयं भोग्यमुक्तम्।

अनियतभोग्यं दर्शयति -

**अश्वमेधो द्विजवधः कृतकालेन भोगदः[३]।**
**तयोः समुच्चयायोगात्[४] एकस्तु प्रबलः पुरा।।३०।।**
**अन्योऽनियतकालः स्याद्यावन्मध्येऽपि कर्मणाम्[५]।**

**( वृत्तिः )** अश्वमेधः केनचित् कृतः कालेन पाकेन भोगदः तस्य स्वर्गप्राप्तिलक्षणभोगं दातुमुद्युक्तः तेन द्विजवधोऽपि कृतस्तदानीं कालेन भोगदः नरकप्राप्तिलक्षणभोगं दातुमुद्युक्तः। तयोः समुच्चयायोगात्। समकालभोगदानायोगात्[६]। तत्र प्रबलस्तु एकः पुरा प्रथमं नियतिव्यवहितनियन्तृशक्तिप्रेरितो[७] भोगं ददाति।

अन्यस्तदितरः कर्माणां तदितरेषां[८] मध्येऽपि यावत् प्रबलः पुरा भोगं ददाति तावदनियतकालः स्यात् अविद्यमानो नियतकालः समभोगदानकालो यस्य स तथोक्तः।

समबलत्वे किमित्यत आह -

---

१. जप्तध्यातदेवतामहिम्ना ] ज२; जप्तध्यानदेवतामहिम्ना-ज१;

२. देहिनः] ज२; देहान्ते- ज१;

३. कृतकालेन भोगदः ] ज१; कृतः कालेन भोगतः- ज२

४. समुच्चयायोगात् ] ज२; समुच्चययोगात्- ज१;

५. अन्यो नियतकालः स्याद्यावन्मध्येऽपि कर्मणाम् ] ज३; अन्योनियतकालस्याद्यवन्मध्येऽपि कर्मणाम्-ज१; अन्योनियतकालस्य . . . . - ज२

६. समकालभोगदानायोगात् ] ज२,ज३; समकालभोगदानेनायोगात्- ज१;

७. नियतिव्यवहितनियन्तृशक्तिप्रेरितो ] ज३;अनीयतिव्यवहितनियन्तृशक्तिप्रेरितो- ज१; नियतिव्यवहितनियन्तृशक्ति . . . . - ज२

८. कर्माणां तदितरेषां ] ज२; कर्मान्तदितरेषां- ज१;

**द्वयोरैहिकयोस्तुल्यफलयोः सम्भवे सति॥३१॥**
**क्लैब्याक्लैब्यात्मनोस्तत्र पतिता शक्तिरैश्वरी।**
**कर्मान्तरं समुच्चित्य बलादन्यतरस्य तु॥३२॥**
**तदा तद्बलवद्भोग्यमन्यत् कालान्तरे भवेत्।**

**(वृत्तिः)** ऐहिकयोरन्यस्मिन् लोके भवफलसम्बन्धिनोः[1] तुल्यफलयोः समबलस्व-कार्ययोः क्लैब्याक्लैव्यात्मनोः नपुंसकत्वपुंस्त्वस्वकार्यस्वरूपयोर्विरुद्धकर्मणोः सम्भवे पाकेन फलजननौन्मुख्ये[2] सति तत्रोभयत्र पतिता संक्लृप्तिमती ऐश्वरी शिवसम्बन्धिनी शक्तिः। तत्रान्यतरस्य एकस्य सजातीयं कर्मान्तरं बलात् ब्रह्मणापि दुस्तरस्वसंकल्पलक्षणार्थक्रियया समुच्चित्य संयोज्य सहायीकृत्य तदा बलवत्तत् कर्म भोग्यं विधत्ते अनियतमन्यत् नपुंसकत्वं वा[3] कालान्तरे भोग्यं भवेत्।

पराऽधोलोकप्राप्तिफलयोः समत्वे द्विपुरुषाकृष्टकामिन्यादौ राजक्रूरशक्तिवत्तत्र पतिता शिवतिरोधानशक्तिरेव तद्द्वयं विनाश्य पक्वं[4] विरोधिलक्षणविलक्षितं कर्मान्तरं भोग्यं करोतीत्याह –

**तथाऽमुष्मिकयोरश्वमेधद्विजवधात्मनोः ॥३३॥**
**युगपत् सम्भवे शक्तिर्द्वयोरपि विनाशिनी।**
**अन्यत् कर्म सम्भोग्यं[5] विधत्ते पुरुषस्य सा॥३४॥**

**(वृत्तिः)** द्विपुरुषाकृष्टकामिन्यां राजाज्ञेव विरुद्धद्विकर्मविनाशिनी पक्वा विरुद्धान्यकर्मफलदात्री द्विकर्माकृष्टपुरुषे पतन्ती असतीव वर्तिनीं नियतिं पुनः संचोदयन्ति पुरुषं समुद्धृत्य कर्मान्तरफले नियमयति। अश्वमेधब्रह्महत्तिलक्षणसमबलकर्मसाम्यस्यापि तिरोधशक्त्या स्वनाशफले चरितार्थत्वात् कथं स्वचरितमुक्तिलक्षणफलं तत्साम्यम्। अमुष्मिन् भवावामुष्मिकौ तयोरामुष्मिकयोः। सुबोधः श्लोकार्थः।

प्रबलप्रतिबद्धा नियतकालयोः समत्वे स्वगतिं दर्शयति –

**तत्रानियतयोः सद्यः सम्भवे परिपक्वयोः।**
**विरुद्धयोश्च सा शक्तिस्तन्नाशेनान्यभोगदा॥३५॥**

**(वृत्तिः)** तयोर्नाशस्तन्नाशस्तेन तन्नाशेनान्येत्यनुषङ्गः। सुचरितव्यः श्लोकार्थः। उपलक्षणं चैतत् सजातीयत्वेऽपि स्वर्गब्रह्मलोकस्वफलयोः रौरवावीचीस्वफलयोरपि

---

१. भवफलसम्बन्धिनोः ] ज१; भवसम्बन्धिनोः–ज२
२. फलजननौन्मुख्ये ] ज२; फलजननं न मुख्ये– ज१;
३. नपुंसकत्वं वा ] ज१; नपुंसकत्वं पुंस्त्वं वा– ज२
४. विनाश्य पक्वं ] ज१; विनाश्यापक्वं– ज२
५. अन्यत् कर्म सम्भोग्यं ] ज२; अन्यत् कर्मसमं भोग्यं– ज१;

साम्येऽपि विरुद्धत्वादश्वमेधब्रह्महत्योरिव विनाशिनीति। ननु पश्चादनुष्ठितस्य पूर्वानुष्ठितेन समत्वं कथं स्यात्। तदयुक्तम्। कृष्यादिषु तथाविधस्य वेगेन पाकेन समफलदानदर्शनात्। नन्वीश्वरशक्तिरविरुद्धत्वेऽपि किमिति न पतति। तदयुक्तम्। यथा ह्यनन्तसुशिक्षितोऽप्यर्जुनादिधनुर्धरो न सदैव शत्रुतो विनिर्गतं शराद्यायुधजातं स्वशरैश्छिनत्ति। अपि तु यदा स्वशरीरोपघातायायुष्यकर्मविरोधेन तदुपस्थितं भवति तस्मिन्नेव काले विरुद्धत्वादेव छिनत्ति।

तथा विरोधे भगवान् स्वशक्तिं प्रयुङ्क्त इति सर्वकर्मसमगतिं दर्शयति –

**यदाऽन्यत्कर्म सर्वं च समं तस्य विनाशिनी।**
**तदा विज्ञानकैवल्यं पुंमः स्यात् कर्मनाशतः।।३६।।**

**( वृत्तिः )** समीभूतकर्मान्यत्सर्वं कर्म च समं तस्य समस्तकर्मणः शिवशक्तिः रोधकरी विनाशिनी भवति। तदा ततः कर्मनाशतो हेतोः पुंसो विज्ञानकैवल्यं स्यात् न मुक्तिः।

इत्थं कर्मसाम्यस्य अनुग्रहशक्तिपातहेतुत्वं निषिध्य मलपाकस्येत्युपसंहरति –

**कर्मनाशान्मलस्यापि विपाके सहकारिणः।**
**पतत्युन्मीलिनी शक्तिस्तदनुग्रहरूपिणी।।३७।।**

**( वृत्तिः )** ननु विकर्मिणां विज्ञानकेवलिनां नामिश्रं परिणमत इति न्यायेन कथं मलस्य पाकः। सत्यम्।

विज्ञानयोगसन्यासैर्भोगाद्वा कर्मणः क्षये।
तत्कर्मायत्तदेहादेः क्षयात्तद्वोक्तृताक्षयः।

मलोऽपि पक्व एषोऽस्मात् सहकारिवशाद्द्विवजाः।। इत्युक्तं विस्मृतं किम्। स्मर्यतामित्याह सेति। सहकारिणः कर्मनाशादपि कर्मस्वफलसूक्ष्मदेहादिद्वारा स्ववासनां मले कृत्वा प्रयाति प्रलयमिति श्रुतेः। मले स्वफलद्वारा स्वक्षयात् पूर्वं स्वनिहतस्ववासनकर्मक्षयादपि मलस्य पाके अपिशब्दात् प्रलयाणूनां कर्मास्तित्वेऽपि पौर्विकसकलावस्थाभुक्तभोगस्वनिहितवासनाबलात्। सकलानां च साक्षात्[१] कर्मफलभोगमिश्रत्वात् पाके तीव्रतरादिलक्षणे उन्मीलनी मलपरिणतिमत्याश्चिच्छक्तेः शिवपदावलोकनफलवती। यद्वा अचिदनुग्रहविमुखी चिदनुग्रहोन्मुखी अत एव[२] तदनुग्रहरूपिणी। तच्छिन्मुक्तिव्यक्तिलक्षणस्वकार्यवती शक्तिः। तीव्रतरपाकादिमलधर्मानुवर्तनात् क्लृप्ततीव्रतरादिमती पतति संसारभीतिर्मुक्त्यासक्तिश्चास्य जायतामिति संकल्पयति[३]। कैश्चित् कर्मनाशाद्धेतोः पततीति व्याख्यातम्। सर्वबन्धक्षयकरी सती पतति न तदर्थमात्रं शक्तिः पततीति सहकारिण इति पदस्य वैयर्थ्यादपि तदसदिति स्फुरति। तत्र सकलानामपि क्वचिदत्युत्कटमलपरिपाकवशात् समस्ते कर्मणि पक्वे पतति तत्र पतनमात्रात्

१. च साक्षात् ] ज१; ज२ कोशे नास्ति।
२. चिदनुग्रहोन्मुखी अत एव ] ज१; चिदनुग्रहत एव– ज२
३. जायतामिति संकल्पयति ] ज१;जायता . . . . – ज२

कर्मनाशेन तद्वासनामवलम्ब्य शरीरस्थितिदीक्षादिकं प्रवर्तते। अत एव सर्वबन्धक्षयरूपिण्यां सद्योनिर्वाणदीक्षायां तस्यामपि शरीरं संस्कारवशाच्चक्रभ्रमवत् कियन्तं कालं तिष्ठतीति मतङ्गे अशुद्धविद्यातत्त्वपटले तदिदं प्रपञ्चितम्। क्वचिन्मलपाकमान्द्यात् कर्मण्यपरिपक्वेऽपि पतति। ननु अपरिपक्वस्य कथं नाशः। सत्यम्। मन्त्रसंस्कारात् पाकं प्राप्य विनश्यति। तदुक्तं–

नन्वपक्वानि कर्माणि भुज्यन्ते युगपत् कथम्।
अपक्वान्यपि कर्माणि मन्त्रशक्तिप्रभावतः।।
अकालपुष्पप्रसवन्यायात् प्राप्नोति पक्वताम्।
अनेन देहेन युगपत् भुङ्क्ते प्राकाम्यवान्। इति। किरणेपि –
अनेकभविकं कर्म दग्धं बीजमिवाणुभिः।
भविष्यदपि सङ्क्द्धं येनेदं तद्धि भोगतः। इति।।

**( व्याख्या )** दृष्टं चादृष्टं च दृष्टादृष्टे द्वन्द्वान्ते श्रूयमाणो जन्मशब्दः प्रत्येकमभिसंबध्यते। तयोरुपभोग्यकं स्वार्थे कः ऐहिकफलप्रदं[1] चेत्यर्थः। तथा तद्वदेवानियतकालोपभोग्यं चेति। नियतश्चासौ कालश्च नियतकालः। तस्मिन् उपभोग्यं तन्न भवतीत्यनियतकालोपभोग्यं चकार उक्तकर्मद्वयसमुच्चयार्थः। इति अनेन प्रकारेण समासतः संक्षेपात् त्रिप्रकारम्[2]। तत्राद्यमुदाहरति आयुर्योग इति। गलूची[3] अमृतवल्ली आदिपदेन दूर्वादिकं[4] गृह्यते। तत् सिद्धः तद्धविष्क इत्यर्थः। आयुर्योगः आयुषो योगः योजनं येन सः तादृशः कर्मविशेषः मन्त्रप्रभावतः मन्त्रसामर्थ्यात् तज्जन्मन्येव यस्मिन् जन्मनि आयुर्योगादिकर्मविशेषः क्रियते तस्मिन्नेव जन्मनि फलप्रदः तथैव चोदनादिति भावः। तत् आयुर्योगादिरूपदृष्टभोग्यम्[5] ऐहिकफलमिति कथ्यते। तदिति नपुंसकलिङ्गनिर्देशो[6] विधेयापेक्षया द्रष्टव्यः। अदृष्टोपभोग्यं कर्माह– स्वाराज्येति। पुण्यं च पाप्म च पुण्यपाप्म तेन पुण्यपाप्मना समाहारद्वन्द्वः तस्यैकत्वादेकवचनम्[7]। कर्मभ्यां देहान्ते क्रमेण पूर्वदेहनाशे सत्यनन्तरदेहे स्वर्गदेहे नरकदेहे च जायमानौ स्वाराज्यावीचिभोगौ स्वर्गराज्यं स्वाराज्यम् अवीचिः नरकविशेषः उभयत्र यौ भोगौ तयोः संबन्धि कर्म तदुभयसाधनं कर्मद्वयमित्यर्थः। अदृष्टमामुष्मिकमित्यर्थः। अनियतकालोपभोग्यं तृतीयं कर्मापि द्विविधम्[8] आमुष्मिकमैहिकं चेति। तत्रामुष्मिकं दर्शयति अश्वमेध इत्यादिना। कृतकालेन शास्त्रक्लृप्तकालेन

१. ऐहिकफलप्रदं] क१; ऐहिकफलप्रदमामुष्मिकफलप्रदं– मु
२. त्रिप्रकारम्] क१; त्रिविधं त्रिप्रकारकम्–मु
३. गलूची] क१;गलूचिः– मु
४. दूर्वादिकं] मु अपूर्वादिकं– क१;
५. आयुर्योगादिरूपदृष्टभोग्यम्] क१; आयुर्योगादिरूपं दृष्टभोग्यम्– मु
६. नपुंसकलिङ्गनिर्देशो] क१; नपुंसकनिर्देशो– मु
७. समाहारद्वन्द्वः तस्यैकत्वादेकवचनम्]मु; समाहारे द्वन्द्वः तस्य चौकवचनम्–क१;
८. द्विविधम्] मु द्वितीयम्– क१;

तयोः नियतकालयोः[१] एकत्र पुरुषे युगपत् प्राप्तौ विरुद्धत्वेन युगपद्भोजकत्वायोगात्[२]। तयोर्मध्ये सहकार्यन्तरसम्पत्त्या प्रबल एक अश्वमेधादिः पुरा प्रथमं भोगद इत्यनुषङ्गः[३]। अन्यो द्विजवधादिः। कर्मणां त्रिविधकर्मणां मध्ये यावद्यावता अनियतकालः स्यान्नियतकालात् प्रच्यवमानः[४] स्यात् सहकारिसम्पत्त्यभावेन दुर्बलत्वादिति भावः। ऐहिकमनियतकालोपभोग्यं कर्म प्रदर्शयति द्वयोरिति। क्लैब्याक्लैब्यात्मनोः नपुंसकत्वपुंस्त्वप्रदयोः विरुद्धबलयोः[५] इत्यर्थः तुल्यबलयोः[६] तुल्यकाले एककाले फलप्रदयोः एहिकयोः एतद्देहमात्रभोग्ययोः द्वयोः कर्मणोरेकस्मिन् पुरुषे सम्भवे मेलने सति तत्र तदेत्यर्थः। ऐश्वरी ईश्वरसंबन्धिनी शक्तिः पतिता[७]। अभिमुखीभूता सती अन्यतरस्य क्लैब्याक्लैब्यात्मनोरन्यतरस्यानुकूलकर्मान्तर-सद्भावे तत् समुच्चित्य सहायीकृत्य बलात् बलवत् नपुंसकत्वादिप्रापकं[८] कर्म तदा भोग्यं करोतीति शेषः। अन्यद्[९] दुर्बलं कर्म पुंस्त्वादि प्रापकं[१०] कालान्तरे क्लृप्तकालात् अन्यस्मिन् काले[११] भोग्यं भवेत्। तदेवानियतकालोपभोग्यं कर्मेति भावः। एवं त्रिविधं कर्म निरूप्य तत्रादावामुष्मिककर्मसाम्यं निरूपयति तथाऽऽमुष्मिकयोरिति। आमुष्मिकयोः[१२] लोकान्तरफलप्रदयोरश्वमेधद्विजवधात्मनोः युगपत् सम्भवे[१३] एकदा फलदानायोन्मुखत्वे विरुद्धयोः समुच्चयायोगात् अन्यतरस्य बलवत्वसम्पादककर्मान्तराभावाच्च। पतिता ऐश्वरी शक्तिरश्वमेधद्विजवधात्मनोरुभयोरपि विनाशिनी विनाशयित्री किमन्यत् करोतीत्यत आह अन्यदिति[१४]। सा ऐश्वरी शक्तिः पुरुषस्यान्यत् नाशितादन्यत् असमविरुद्धं[१५] कर्म भोग्यं भोगयोग्यं विधत्ते। अनियतकर्मसाम्यमाह तत्रेति। तत्र त्रिविधकर्मणि निर्धारणे सप्तमी अनियतयोरनियतकालोपभोग्ययोः परिपक्वयोः फलोन्मुखयोः विरुद्धयोः विरुद्धफलयोः अत एव एककाले भोक्तुमशक्ययोः कर्मणोः सद्यः तस्मिन् काले सम्भवे सान्निध्ये सति सा परमेश्वरी शक्तिः तन्नाशेन तयोः कर्मणोः नाशेनान्यभोग्यदा अन्यस्याविरुद्धकर्मणो

१. नियतकालयोः] मु नियतत्वकालयोः- क१;
२. युगपद्भोजकत्वायोगात्] मु; युगपद्भोजनत्वायोगात्-क१;
३. भोगद इत्यनुषङ्गः] मु भोगत इत्यर्थः- क१;
४. प्रच्यवमानः] मु प्राप्यावमानः- क१;
५. नपुंसकत्वपुंस्त्वप्रदयोः विरुद्धफलयोः] मु नपुंसकत्वप्रदयोः विरुद्धबलयोः- क१;
६. तुल्यबलयोः] मु तुल्यफलयोः- क१;
७. पतिता] मु पतति-क१;
८. बलवत् नपुंसकत्वादिप्रापकं] मु बलवन्तं पुंसकत्वादिप्रापकं- क१;
९. अन्यद्] मु अन्यस्तु-क१;
१०. पुंस्त्वादिप्रापकं] मु पुंस्त्वादि- क१;
११. अन्यस्मिन् काले] मु अन्यस्मिन्- क१;
१२. आमुष्मिकयोः] क१; तथा आमुष्मिकयोः-मु
१३. युगपत् सम्भवे] मु युगपत्यसम्भवे- क१;
१४. अन्यदिति] मु सेति-क१;
१५. असमम् अविरुद्धं] मु असमविरुद्धं- क१;

भोगदा। एवमैहिककर्मसाम्येऽपि बलवत्वसाधकसहकार्यन्तराभावेन शक्तिपातेन तयोर्नाशः अविरुद्धकर्मान्तरभोगश्चेति द्रष्टव्यम्। ननु सर्वकर्मसाम्ये किं भवतीत्यत आह यदेति। यस्मिन् समये समीभूतकर्मभ्याम् अन्यत् सर्वं कर्म समं परस्परविरुद्धं तुल्यबलं[१] फलोन्मुखं च तदा तस्य सर्वस्यापि कर्मणः विनाशिनी नाशयित्री भवतीत्यर्थः।

ननु मलमायाकर्मयुक्तस्य सकलस्य समस्तकर्मविलये मलमायायुक्तत्वेन चतुर्थीयं पशोरवस्था स्यात्। तथा च सकलप्रलयाकलविज्ञानकलभेदेन त्रैविध्यकथनमनुपपन्नमित्यत आह तदेति। तदानीमपि पुंसः सकलस्य कैवल्यं विज्ञानकेवलावस्थैव स्यात् भवेत् न त्ववस्थान्तरम्। तत्र हेतुमाह कर्मनाशत इति। सर्वकर्मणां नाशतः नाशात् हेतोरित्यर्थः। अयं भावः सर्वकर्मणां क्षये तदायत्तमायायाश्च परिक्षयादित्युक्तन्यायेन कर्माधीनकलादियोगस्यापि[२] अभावात् विज्ञानकैवल्यमेव भवतीति न त्रैविध्यानुपपत्तिरिति। शक्तिपातस्य कर्मनाशहेतुत्वे श्रुतिरपि अस्ति प्रमाणम्। एवं रत्नत्रयेपि उक्तम्।

यथा मधूच्छिष्टमृदोरनपेक्षः क्षणेन च।
द्रवताशुष्कताहेतुरविकारोऽपि भास्करः।
तथा समासमात्मीयपुण्यापुण्याख्यकर्मणाम्।
अणूनामविकारोऽपि बन्धमोक्षकरः शिवः।
परस्परविरोधेन निवारितविपाकयोः।
कर्मणोः सन्निपातेन शैवी शक्तिः पतत्यणौ[३]।

एवमियता प्रबन्धेन समत्वं कर्मणां नात्र निमित्तं तदनुग्रह इत्येतत् सूत्रार्थं[४] प्रतिपाद्य परिपाको मलस्यैव निमित्तं तदनुग्रहे इत्येतत्सूत्रार्थं निरूपयति कर्मनाशादिति। समस्तकर्मणां नाशात् हेतोः सहकारिणः कर्मसहकारिणः कर्मणां[५] स्वकार्ये जनयितव्ये तुषकम्बुकादिवदुपकारकस्य। तदुक्तं स्वायम्भुवे–

अथानादिमलः पुंसां पशुत्वं परिकीर्तितम्।
तुषकम्बुकवत् ज्ञेयं माया बीजाङ्कुरस्य तु।इति।

तादृशस्य मलस्यापि। अपिशब्दः कर्मसमुच्चयार्थः। विपाके बदरफलादाविवावस्था–विशेषे सम्पन्ने[६] तदा अनुग्रहरूपिणी दीक्षादिहेतुभूता अत एवोन्मीलिनी ज्ञानक्रियाशक्त्युद्बोधिका शक्तिः पतति। अनुग्रहशक्तेः पतनं नाम नाधोदेशगमनं विभोः शक्तेः[७] तदसम्भवात्। किन्तु

---

१. तुल्यबलं] मु तुल्यफलं– क१;
२. कर्माधीनकलादियोगस्यापि] मु कर्माधीनकलादियोगस्य– क१;
३. पतत्यणौ] मु पतत्यसौ–क१;
४. सूत्रार्थं प्रतिपाद्य परिपाको मलस्यैव निमित्तं तदनुग्रहे इत्येतत्सूत्रार्थं] मु सूत्रार्थं– क१;
५. कर्मणां] क१; कर्मणा– मु
६. बदरफलादाविवावस्थाविशेषे सम्पन्ने] मु बदरफलादाविवस्थाविशेषापन्ने– क१;
७. शक्तेः] क१; चिछक्तेः– मु

स्वाच्छादकापरिपक्वमलकर्मबन्धयोः[१] परिपाके सति व्यक्तायाः तस्या अनुग्रहौन्मुख्यम्। तदुक्तम्–

व्यापिनी तु पराशक्तिः पतितेत्युच्यते कथम्।
ऊर्ध्वादधोगतिः पातो मूर्तस्यासर्वगस्य च।
सत्यं सा व्यापिनी नित्या सहजा शिववत् स्थिता।
किन्त्वियं मलकर्मादिपाशबद्धेषु संवृता।
पक्वपाशेषु सुव्यक्ता पतितेत्युपचर्यते। इति।

एवं चानुग्रहरूपशक्तिपाते मलपरिपाको हेतुः सर्वकर्मसाम्यं तु स्वविनाशमात्रहेतुः न शक्तिपाते[२] इति विवेकः। एतदुक्तमधस्तात्। तदैव[३] शक्तिपातेन नाश एव तयोर्भवेत्। इति। एवकारेणात्र पक्वमलस्यैव शक्तिपातविषयत्वमिति सूचितम्[४] तादृशशक्तिपातविषयस्यैवा–नुग्रहपात्रत्वे च श्रुतिः प्रमाणमस्ति।

एवं शक्तिपातस्यानुग्रहरूपदीक्षाहेतुत्वात् तस्य चाचार्येणापरिज्ञातस्य दीक्षाप्रदाने हेतुत्वासम्भवात्[५] तदनुमितिप्रयोजकीभूतां कार्यपरम्परामाह तस्यां पतितमात्रायमित्यारभ्य एवं संसारतो भीतमित्यन्तेन।

**( वृत्तिः )** सकलानां शक्तिपतनानुपदाज्जातं दर्शयति –

**तस्यां पतितमात्रायां मलस्याधोनियामिका।**
**शक्तिः[६] निवर्तते तस्यां निवृत्तायां महात्मनः।।३८।।**
**वैराग्यं जायते क्षिप्रं संसाराद्दुःखसागरात्।**

**( व्याख्या )** तस्यामनुग्रहात्मिकायां शिवशक्तौ पतितमात्रायामभिमुखीभूतायां मात्रपदात्[७] सहकार्यान्तरनैरपेक्ष्येण कार्योत्पत्तिरुच्यते। मलस्याणवस्याधोनियामिका विषयेषु दोषदर्शनप्रतिबन्धेन प्रवर्तिका शक्तिः निवर्तते। तस्यां मलशक्तौ निवृत्तायां महात्मनः विषयेषु दोषदर्शिनः दुःखसागरात् संसारात् विरक्तिर्जायते।

तस्य अनित्यसातिशयसुखदुःखमयसंसारसागरात्[८] विरक्तस्य महात्मनः नित्यनिरतिशय–सुखैकतानमोक्षोपाये जिज्ञासा जायत इत्याह–

---

१. स्वाच्छादकापरिपक्वमलकर्मबन्धयोः] मु स्वाच्छादिका परिपक्वमलकर्मबन्धयोः– क१;
२. स्वविनाशमात्रहेतुः न शक्तिपाते] मु स्वविनाशमात्रहेतुशक्तिपात– क१;
३. तदैव] मु तदेव– क१;
४. शक्तिपातविषयत्वमिति सूचितम्।] मु शक्तिपातविषयत्वे– क१;
५. हेतुत्वासम्भवात्] मु हेतुकत्वासम्भवात्– क१;
६. शक्तिः ] मु ; शक्तिं– ज१, ज२
७. मात्रपदात् ] क१; मात्रपदाच्च– मु
८. अनित्यसातिशयसुखदुःखमयसंसारसागरात् ] क१; अनित्यसातिशयसुखदुःखरूपसंसारसागरात्– मु

**दिदृक्षा जायते शम्भोः पादपंकजयोरपि।।३९।।**
**कदा द्रक्ष्यामि देवेशं मोक्ष्येऽहं बन्धतः कदा।**
**को वा दर्शयिता शंभोरिति संजायते मतिः।।४०।।**

**(व्याख्या)** दिदृक्षा साक्षात्कारेच्छा देवेशम् अखण्डसच्चिदानन्दस्वरूपं[1] परमशिवं बन्धतः पाशत्रयात् पाशपञ्चकाद्वा शम्भोः निरतिशयसुखप्रदस्य इयं च कर्मणि षष्ठी को वा परमकारुणिक आचार्यः दर्शयिता दर्शनोपायोपदेष्टा इति च मतिः संजायते। अत्र च को वा दर्शयितेत्याद्युक्तप्रकारेण गुरुमन्विच्छतः स्वशरीरनिवेदनपर्यन्तं विनयं कर्तुकामस्य मुमुक्षोरुपसदनार्हो गुरुः जन्मवयोलक्षणवृत्तज्ञानविशिष्टश्चातुर्वर्णिकः आचार्याभिषेकवांश्च भवेत्[2]। तत्र जन्मवैशिष्ट्यं प्रति सुप्रभेदे–

मातृतः पितृतः शुद्धाः शुद्धभावा जितेन्द्रिया। इति।

वयोवैशिष्ट्ये तु कर्मजातिविद्यावयांसि मान्यानि परबलीयांसि इति गौतमादि-सामान्यशास्त्रं प्रमाणमिति द्रष्टव्यम्। लक्षणवैशिष्ट्ये सुप्रभेदे सर्वावयव-संपूर्णः सर्वलक्षणसंयुत इति। द्विशतिकालोत्तरे तु लक्षणहीनस्य वर्जनीयत्वप्रतिपादनमुखेन लक्षणवैशिष्ट्यस्यावश्यकत्वमावेदितम्–

अतिह्रस्वानतिदीर्घान् कुनखान् कुटिलेक्षणान्।
शिपिविष्टान् व्रणोपेतान्[3] चक्षुर्भ्रूश्मश्रुपिङ्गलान्।
ईदृशान् वर्जयित्वा तु सर्वकर्मबहिष्कृतान्। इति।

स्कन्दकालोत्तरे तु–

अन्धो मूकस्तु बधिरः पङ्गुर्व्यङ्गिर्विहस्तकः।
विकर्णो विकृतास्यश्च विकृताङ्गोऽतिवामनः।
संन्यासी पतितो नग्नः षण्डो न्यूनाधिकाङ्गुलिः।
त्वग्दोषी च दुराचारी वामाचारपरायणः।

नाभिषेकविधौ योग्याः इत्यादिना[4] लक्षणवैशिष्ट्यस्य गुरुत्वप्रयोजकत्वं सूचितम्। वृत्तवैशिष्ट्यविषये सुप्रभेदे–

परोपकारनिरतो जपपूजादितत्परः।
अमोघवचनः शान्तो वेदवेदार्थपारगः।
अग्निमान्नीतिमांश्चैव गुर्वाज्ञापरिपालकः।

---

१. अखण्डासच्चिदानन्दस्वरूपं] मु अखण्डानन्दसच्चिदानन्दात्मकस्वरूपं- क१;
२. आचार्याभिषेकवांश्च भवेत्] मु आचार्याभिषेकवान्-क१;
३. व्रणोपेतान्-मु घृणोपेतान्- क१;
४. इत्यादिना] क१; इत्यादिना लक्षणरहितानामभिषेकानर्हत्वकीर्तनद्वारेण-मु

गृहस्थो देशिकः श्रेष्ठः इति।

अचिन्त्यविश्वसादाख्ये च–

गुरुरात्मा भवेत् तस्य लोकालोकनियामकः।
एतेषां देशिकानां च लक्षणं शृणु सुव्रत।
अहिंसः सत्यवादी च विश्वजीवदयापरः।
क्षमावान् शान्तचित्तश्च निग्रहानुग्रहे क्षमः।
सदाचारयुतो दक्षो जपध्यानपरायणः।
विज्ञानदीक्षासंयुक्तो गुरुभक्तिविशारदः।
डम्भमानविनिर्मुक्तः[१] क्षुद्रकर्मविवर्जितः।
शिष्याणां गुणदोषेषु विज्ञानी च जितेन्द्रियः।
निर्ममो निरहंकारोऽनृशंसो निर्विकल्पकः। इति।

द्विशतिकालोत्तरे तु दुर्वृत्तानां वर्जनीयत्वकथनमुखेन वृत्तवैशिष्ट्यस्यावश्यकत्वमुक्तम्। यथा–

वर्ज्यमानानतो ज्ञात्वा वर्जयेत्तान् प्रयत्नतः।
नास्तिकान् मत्सरान् रौद्रान् बधिरान् मृतजीविकान्[२]।
भिषक्छास्त्रोपयोगांश्च[३] तथा रोगोपजीविकान्[४]।
पिशुनान् क्रूरकर्मज्ञान् चपलान् पारदारिकान्।
संन्यासान् मुक्तकान् रागान् कृसुच्छास्त्रजीविकान्[५]।
परापवादशीलांश्च क्रूरान्[६] कपालिकान्। इति।

ज्ञानवैशिष्ट्येऽपि वायवीये–

शिवशास्त्रसमायुक्ताः पशुशास्त्रपराङ्मुखाः। इति। द्विशतिकालोत्तरे तु–

क्रियापादे च निपुणाश्चर्यापादानुवर्तकाः।
योगपादकृताभ्यासाः ज्ञानपादानुरञ्जकाः।

एतांश्च गुणसमायुक्तान् गृह्णीयुस्तान् विचक्षणाः। अचिन्त्यविश्वसादाख्ये–

शिवानुभूतिसंयुक्तः संशयच्छिदसंशयः। इति।

---

१. डम्भमानविनिर्मुक्तः ] क१; डम्भमायाविनिर्मुक्तः –मु
२. मृतजीविकान् ]क१;वृतजीविकान्–मु
३. भिषक्छास्त्रोपयोगांश्च ] क१; भिषक्छास्त्रोपभोगांश्च –मु
४. रोगोपजीविकान् ]क१;रोगोपजीवकान्–मु
५. संन्यासान् मुक्तकान् रागान् कृसुच्छास्त्रजीविकान्–क१;संन्यासिमूकान् व्यङ्गांश्च कुसङ्गान् शस्त्रजीवकान् ]मु
६. क्रूरान् ] क१;निर्दयांश्च –मु

यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते।
यस्यावलोकनाद्यैश्च परानन्दोऽभिजायते।

गुरुं तमेव वृणुयात्। इति। चातुर्वर्णिकत्वविषये देविकालोत्तरे–

आचार्यः सर्ववर्णानां चातुर्वर्णो गुरुर्भवेत् इति। ननु वर्णानां ब्राह्मणो गुरुरिति श्रुतिपर्यालोचनया ब्राह्मणस्यैव गुरुत्वं प्रतीयते। किं च याजकत्वाध्यापकत्वे ब्राह्मणस्यैव कर्मणी इति तस्यैव गुरुत्वं युक्तम्। न तु क्षत्रियादेः। न च याजकत्वमध्यापकत्वं चान्तरेण प्रकारान्तरेण गुरुत्वमस्ति। अतो देविकालोत्तरवचनमपि अनुलोमाद्यपेक्षया चातुर्वर्णिकस्य गरीयस्त्वमात्रप्रतिपादनपरमेव न तु क्षत्रियादिगुरुत्वप्रतिपादनपरमिति[१] चेन्न। त्रीणि कर्माणि जीविकेति पदस्वारस्यात् जीवनार्थतया[२] क्षत्रियादौ तयोरभावेऽपि अनुग्रहार्थतया तयोरुपपत्तेः। अपि चापदि ब्राह्मणस्यापि आपत्कल्पो ब्राह्मणस्य अब्राह्मणात् विद्योपयोग इत्यादौ क्षत्रियादेरध्यापकत्वस्मरणात्। श्रूयते च बृहदारण्यश्रुतावपि। अजातशत्रुकेकययोः क्षत्रिययोः बालाकिनं[३] प्राचीनशालादींश्च मुनीन् प्रति विद्योपदेष्टृत्वम्। अत आचार्यः सर्ववर्णानां चातुर्वर्ण्यो गुरुर्भवेदिति देविकालोत्तरादिवचनानुसारेणोक्तस्मृत्यनुरोधेन वर्णानां ब्राह्मणो गुरुरित्येतत् ब्राह्मणस्य च सर्वोत्तमत्वप्रतिपादनपरं नत्वितरेषां गुरुत्वव्यवच्छेदनपरम्। तदुक्तं सूतसंहितायाम्–

आचार्यो नाम वेदान्तविचारेणाप्तवेदनः।
तमप्यनेकधा विद्धि श्रद्धया पुरुषोत्तम।
उत्तमो मध्यमस्तद्वदधमश्चाम्बुजेक्षण।
उत्तमो ब्राह्मणः प्रोक्तो मध्यमः क्षत्रियस्तथा।

अधमो वैश्य इत्युक्तः सर्वशास्त्रार्थवेदिभिः। इति। नन्वेवमपि आचार्यो नाम वेदान्तविचारेणाप्तवेदन इत्यादिसूतसंहितावचनपर्यालोचनया शूद्रस्य गुरुत्वम् उपपद्यते। तस्योपनयनसंस्काराभावेन वेदे अनधिकारात् भगवता बादरायाणेनापि शुगस्य तदनादर्शश्रवणात् सूच्यते हि इत्यत्र शूद्रस्य ब्रह्मविद्यायामनधिकारप्रतिपादनाच्च। किं च तत्रैव शूद्राणां च तथा स्त्रीणां गुरुत्वं न कदाचन इति कण्ठरवेण शूद्रस्य गुरुत्वनिषेधाच्च न च तद्वचनं[४] गतं शूद्रस्य शूद्रत्वं द्विजत्वं ब्राह्मणस्येत्यादिस्कन्दकालोत्तरवचनानुसारेण शूद्रत्वादिनाशहेतुतया निर्णीतशिवसंस्कारेण अदग्धशूद्रत्वासच्छूद्रविषयमिति[५] वाच्यम्। न हि तद्वचनं शिवसंस्कारस्य सर्वात्मना ब्राह्मणत्वशूद्रत्वादिनाशहेतुत्वपरम्। तथा सति विश्वामित्रादेरिव पूर्ववर्णधर्माननुष्ठानप्रसङ्गात्[६]। न चेष्टाप्रतिः। तथा सति

१. क्षत्रियादिगुरुत्वप्रतिपादनपरमिति] मु क्षत्रियादिगुरुत्वप्रतिपादकपरमिति–क१;
२. जीवनार्थतया –मु न जीवनार्थतया–क१;
३. बालाकिनं ] मु बालाकीन्– क१;
४. न च तद्वचनं ]मु तद्वचनं– क१;
५. अदग्धशूद्रत्वासच्छूद्रविषयमिति ] मु दग्धशूद्रत्वात् शूद्रविषयमिति– क१;
६. पूर्ववर्णधर्माननुष्ठानप्रसङ्गात् ]मु पूर्ववर्णधर्मानुष्ठानप्रसङ्गात्–क१;

यस्मिन् वर्णे स्थितो देही प्राप्तो दीक्षां शिवात्मिकाम्।
तत्रैव संस्थितो दीक्षां शिवधर्मं च पालयेत्। इति।
[१]इति वर्णाश्रमाचारं मनसापि न लङ्घयेत्। इति च।

वैदिकीं च पुरा कृत्वा पश्चाच्छैवीं समाचरेत्। इत्याद्यनेकवचनव्याकोपप्रसङ्गेन दीक्षितस्य ब्राह्मणत्वाद्यभावे उत्तमो ब्राह्मणः प्रोक्त इत्युत्तमादिव्यवस्थापकवचनव्याहतिप्रसङ्गेन च। त्यजेदेकं कुलस्यार्थ इति न्यायेन तस्यैव वचनस्यासंस्कृतापेक्षाया संस्कृतस्य प्रसङ्गेन[२] वैशिष्ट्यमात्रप्रतिपादनपरत्वौचित्यात्। किं च दीक्षितत्वस्य ब्राह्मणादिसाधारणत्वेन[३] दीक्षितशूद्रस्यापि गुरुत्वप्रसङ्गेन निषेधः स्यात्। गुरुत्वं न कदाचनेति पदस्वारस्येन च शूद्राणां च तथेति वचनस्य दीक्षितशूद्रे प्रसङ्गसम्भवेन तद्विषयत्वौचित्यात्[४] इति। अतः चातुर्वर्णो गुरुर्भवेदिति देवीकालोत्तरवचनं सामान्यतया शूद्रे निषेधदर्शनेन तदतिरिक्तवर्णाश्रमविषयकम्[५] उत्सर्गस्यापवादपरिहारेण प्रवृत्तेरिति चेत्। अत्रोच्यते।

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः शुद्धकुलोद्भवाः।
आचार्याः ते तु[६] विज्ञेया नान्येषां तु कदाचन।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः शुद्धास्तु साधकाः।
स्ववर्णादानुपूर्व्येण आचार्यास्तु षडानन। इति।
शिवशास्त्रसमायुक्ताः पशुशास्त्रपराङ्मुखाः।
ब्राह्मणादिचतुर्वर्णाः आचार्यास्तु प्रकीर्तिताः।
पाषाणः शिवसंस्कारात् भुक्तिमुक्तिप्रदो भवेत्।

पाषाणः शिवतां याति शूद्रस्तु न कथं भवेत्। इति सुप्रभेदद्विशतिकालोत्तरवायवीयस्कन्दकालोत्तरवचनैः गुरुत्वप्रतिपादनात् अस्त्येव शूद्रस्यापि गुरुत्वम्। एवं च स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।

इति भारतमाख्यानं कृपया मुनिना कृतम्।
श्रावयेत् चतुरो वर्णानितिहासपुराणकम्।

इत्यादिभारतवचनात् विदुरधर्मव्याधादीनामपि ब्रह्मविद्याधिकारदर्शनात् अस्यार्थस्यापशूद्राधिकरणे शंकराचार्यैरपि व्युत्पादितत्वात् शूद्राणामपि वेदेतरपुराणेतिहासादिब्रह्म-

---

१. यो यस्मिन्नाश्रमे तिष्ठन् प्राप्तो दीक्षां शिवात्मिकाम्।
स तस्मिन्नेव संतिष्ठन् शिवधर्मं च पालयेत्। इति। इत्ययं श्लोकः मु कोशे अधिकतयात्र दृश्यते।

२. प्रसङ्गेन] क१; मु कोशे नास्ति।

३. दीक्षितत्वस्य ब्राह्मणादिसाधारणत्वेन ] मु दीक्षितब्राह्मणादिसाधारणत्वेन- क१;

४. तद्विषयत्वौचित्यात् ] मु तद्विषयस्यौचित्यात्- क१;

५. तदतिरिक्तवर्णाश्रमविषयकम् ] मु तदतिरिक्तवर्णाश्रममुत्पादकम्- क१;

६. ते तु- क१; तेषु-मु

विद्यायामधिकारित्वोपपत्तेः। आचार्यो नाम वेदान्तविचारेणाप्तवेदनः इत्यादिसूतसंहितावचनं त्रैवर्णिकविषयं वेदान्तपदं वा शिवप्रतिपादकवेदागमपरतया व्याख्येयम्। नन्वेवमपि एकस्मिन् विषये विधिनिषेधयोर्दर्शनेन षोडशिग्रहणाग्रहणन्यायेनाविकल्पः स्यात्। न च वाच्यं वस्तुनि गुरुत्वे कथं विकल्पः स्यादिति। शूद्रो गुरुः न गुरुरित्येतस्य शूद्रं गुरुं[1] वृणुयात् न वृणुयाद्वेति[2] शिष्यक्रियामादाय वा शूद्रं दीक्षयेन्न वेति क्रियाकल्पनया वा विकल्पोपपत्तेरिति चेन्न। परमेश्वरप्रणीतागमापेक्षया सूतसंहितादिपुराणवचनस्य दुर्बलत्वेन विकल्पापादकत्वाभावात्। तुल्यबलयोर्हि विरोधे विकल्पो भवति। तदुक्तं गौतमेन तुल्यबलविरोधे विकल्प इति। अत्र तु विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति विरोधाधिकरणन्यायेन स्वतः सर्वज्ञशिवप्रणीतागमेन ईश्वरानुग्रहलब्धविज्ञानकर्तृकपुराणवचनानां बाध्यत्वमेव। अथवा स्त्रीशूद्रविषयं तद्वचनं शूद्रस्तु न कथं भवेदिति शूद्रे विधिदर्शनेन[3] स्त्रीमात्रे गुरुत्वनिषेधकमस्तु। दृश्यते हि अनेकविषयनिषेधशास्त्रस्यैकदेशविधिदर्शनेन तदितरविषयत्वम्। यथा–

अश्वालम्भं गवालम्भं संन्यासं पलपैत्तृकम्।
देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्। इत्यस्य
यावद्वर्णाश्रमाचारो यावद्वेदस्य सन्ततिः।
तावन्न्यासाग्निहोत्रे तु कर्तव्ये तु कलावपि।

इत्यादिविधिदर्शनेन। अथवा ब्राह्मणाद्युक्तगुरुसम्भवे तस्यागुरुत्वप्रतिपादकं वा तदस्तु। यद्वा असच्छूद्रविषयमस्तु शूद्राः शुद्धकुलोद्भवा इति सुप्रभेदवचने आचार्याभिषेकेऽपि शुद्धकुलोद्भवत्वलक्षणविशेषोपादानात्। एवं च कदाचनपदस्वारस्यमपि। तस्य दीक्षायामेवानधिकारेणाभिषेकाधिकारस्य कदाप्यसम्भवात्। अथवा शिवसंस्कारेण युक्तः शूद्रस्तु न कथं भवेदिति विशेषणोपादानेन तद्वचनमसंस्कृतशूद्रविषयमस्तु। एवं चतुर्णामपि वर्णानां गुरुत्वे सिद्धे अयमत्र विशेषः। ब्राह्मणादयो वर्णाः वर्णानुपूर्व्येण गुरवो भवन्ति। तदुक्तं द्विशतिकालोत्तरे–

स्ववर्णादानुपूर्व्येण आचार्यास्तु षडानन। इति। सूतसंहितायामपि–

अधमोच्युत [4] वैश्यस्य शूद्रस्यापि गुरुर्भवेत्।
मध्यमो मध्यमस्यापि तथा वैश्यस्य केशव।
शूद्रस्यापि गुरुः प्रोक्तः शुश्रूषोरात्मवेदिभिः।
उत्तमो ब्राह्मणस्यापि क्षत्रियस्य तथैव च।
विशां शूद्रस्य शुश्रूषोर्गुरुरित्युच्यते मया। इति।

---

१. शूद्रं गुरुं ] मु शूद्रगुरुं– क१;
२. वृणुयाद्वेति ] मु वृणुयाच्चेति– क१;
३. शूद्रे विधिदर्शनेन ] मु शूद्रविधिदर्शनेन– क१;
४. अधमोच्युत ] मु अथमोच्यते च– क१;

एवं चोक्तरीत्या ब्राह्मणाद्यनुलोमैः सह ब्राह्मणादिदशानां गुरुः क्षत्रियः क्षत्रियादिनवानां वैश्यः वैश्यादीनामष्टानां शूद्रः शूद्रादिसप्तानां गुरुरिति द्रष्टव्यम्। एतच्च मध्यमोत्तमयोः सम्भवे तदसम्भवे उपरिवर्णस्य ज्ञानोत्कर्षे उत्तमवर्णं प्रति स्वाव्यवहितावरवर्णोऽपि[१] गुरुर्भवत्येव। बालाकिब्राह्मणस्य प्राचीनशालादीनामपि षण्णां मुनीनामजातशत्रोः केकयस्य च क्षत्रिययोः गुरुत्वप्रतिपादकबृहदारण्यकमूलकात्।

वैश्यस्यापि तथा राज्ञो विद्योत्कर्षबलेन च।

गुरुत्वं केचिदिच्छन्ति स्वोत्तमं प्रति केशव। इति सूतसंहितावचनात्। एवं च तुल्यन्यायतया शूद्रस्यापि वैश्यं प्रत्युत्तमासम्भवे स्वस्य ज्ञानोत्कर्षे च गुरुत्वमिति द्रष्टव्यम्। अन्ये तु तस्मात् शूद्रमुखाद्वाक्यं न श्रोतव्यं द्विजातिभिः। इति स्मृतिसारसमुदायादिवचनानुसारेण वैश्यं प्रति गुरुत्वं नास्ति शूद्रस्य। गुरुत्वप्रतिपादकवचनं तु शूद्रादिसप्तानां गुरुत्वेनापि चरितार्थमिति च वदन्ति। एवं चत्वारोऽपि आश्रमा गुरवः। तदुक्तं स्कन्दकालोत्तरे–

शिखायज्ञोपवीती च जटाधारी च मुण्डितः[२]।
वज्ररोमाभिषिक्तश्च आचार्यः स इति स्मृतः।।[३] इति।

अत्र शिखायज्ञोपवीतीत्यादिशब्दैर्यथाक्रमं गृहस्थवानप्रस्थसंन्यासिनैष्ठिका उच्यन्ते।

ननु तत्रैव शैवे

संन्यासी पतितो नग्नः षण्डो न्यूनाधिकोऽङ्गुलिः।

नाभिषेकविधौ योग्याः कथिता वै षडानन। इति संन्यासिनः अभिषेकयोग्यतानिषेधात्। तथा ज्ञानरत्नावल्याम्–

द्वावेवाश्रमिणौ शैवे गृहस्थब्रह्मचारिणौ।

लोकानुग्रहकर्तारौ परिव्राट्तापसौ न हि। इति आचार्याभिषेकप्रयुक्तलोकानुग्रहरूपदीक्षा–कर्तृत्वनिषेधाच्च द्वयोरेवाचार्यत्वमुचितं न तु चतुर्णामाश्रमाणामिति। शिखायज्ञोपवीतीत्यादिवचनं तु वैदिकाश्रमपरमस्तु। शिखायज्ञोपवीतादिधर्माणां च मुण्डजटिलशिखाजटाश्चेति स्मृत्यनुसारेण चतुर्विधब्रह्मचारिमात्रविषयत्वं वाऽस्तु। अत एव आचार्यः स इत्येकवचनमपि संगच्छत इति। नैवम्।

उत्तमः पञ्चधा प्रोक्तः गुरुर्ब्रह्मात्मवेदिभिः।

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः। इति चतुर्णामपि आश्रमाणामविशेषेण सूतसंहितायां गुरुत्वश्रवणात्। अचिन्त्यविश्वसादाख्ये–

---

१. स्वाव्यवहितावरवर्णोऽपि] मु स्वाव्यवहितापरवर्णोऽपि- क१;

२. मुण्डितः] मु मुण्डगःक१;

३. अत्र शिखायज्ञोपवीतीत्यादिशब्दैर्यथाक्रमं गृहस्थवानप्रस्थसंन्यासिनैष्ठिका उच्यन्ते। इति 'मु' कोशे वर्तते।

आचार्यौ द्वौ समाख्यातौ विरक्तः प्रथमो भवेत्।
भौतिकस्तु द्वितीयः स्यात् प्रथमौ तु विशेषकौ।

आजन्मब्रह्मचारी च यतिश्च तदनन्तरम्। इति यतेरपि विशिष्याचार्यत्वस्य श्रवणाच्च। अन्यत्रापि संन्यासाश्रममत्यन्तमुत्तमं हि मतं भवेत्। नैष्ठिको नैष्ठिकान्।

इत्यादिना संन्यासनैष्ठिकयोराचार्यत्वप्रतिपादनाच्च। संन्यासी पतितो नग्न इत्यादि संन्यासिन आचार्याभिषेकनिषेधः श्रूयत इति यदुक्तं तन्न। तस्य क्रियावदभिषेकयोग्यतानिषेधपरत्वात् अत एवाचिन्त्यविश्वसादाख्ये क्रियावदभिषेकनिषेधपूर्वकं ज्ञानवदभिषेकविधानं श्रूयते।

यतीनामनपेक्ष्यैव शिवाग्निविधिरीरितः।
तस्माद्यतेश्च कर्तव्यं शैवमार्गे विशेषतः।
आचार्याणां च मध्ये वै यतीनां किंचिदन्तरम्।
परमहंसयतीनां च तपस्संन्यासिनश्च ये।
अनयोरग्निकार्येषु योग्यत्वं न विधीयते।

होमं विना तयोरेवमभिषेको विधीयते। इति। यदप्युक्तं ज्ञानरत्नावलीवचनेन लोकानुग्रहरूपदीक्षाकर्तृत्वं[1] वानप्रस्थसंन्यासिनोः निषिध्यत इति तदपि उक्तवचनानुसारेण क्रियावद्दीक्षानिषेधपरम्। दीक्षायाश्चानेकप्रकारत्वमग्रे वक्ष्यते। अत एव–

संन्यासिमूकान् व्यङ्गांश्च कुसंगान् शस्त्रजीवकान्।

वर्ज्यमानानतो ज्ञात्वा वर्जयेत्तान् प्रयत्नतः। इति द्विशतिकालोत्तरवचनमपि क्रियावद्दीक्षायामेव संन्यासिनो वर्जनीयत्वपरम्। यदपि शिखायज्ञोपवीती चेत्येतद्वचनं नानाधर्मयुक्तब्रह्मचारिमात्रपरमित्युक्तं तदपि न[2] उक्तवचनैः युक्त्या च सर्वाश्रमाणां गुरुत्वे प्रतिपादिते तत्परतयैव समञ्जस्येनोपपत्तौ अवस्थाविशेषविशिष्टब्रह्मचारिमात्रपरत्वकल्पनायां मानाभावात्[3]। एवं चैकवचनमपि जातौ प्रत्येकान्वयि वा द्रष्टव्यम्। एवं च वर्णवदाश्रमाणामपि संन्यासिनमारभ्यानुपूर्व्येण गुरुत्वं द्रष्टव्यम्। तदुक्तं सूतसंहितायाम्–

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः।
अतिवर्णाश्रमी तेऽपि क्रमात् श्रेष्ठा[4] विचक्षणाः।

अश्रेष्ठानां हरे श्रेष्ठगुरवः[5] परिकीर्तिताः। इति। क्रमात् अवरोहक्रमादित्यर्थः। तत्रापि स्वसमानोत्तमयोरसम्भवे अपराश्रमिणश्च ज्ञानोत्कर्षे[6] उत्तमं प्रति गुरुत्वं नाव्यवहितं प्रत्येव किं तु व्यवहितं प्रत्यपि। तदुक्तं सूतसंहितायाम्–

---

१. लोकानुग्रहरूपदीक्षाकर्तृत्वं] मु लोकानुग्रहरूपदीक्षाकर्तृकं–क१;

२. तदपि न]मु तदपि–क१;

३. मानाभावात्]मु कल्पाभावात्–क१;

४. श्रेष्ठाः] मु तेषां– क१;

५. अश्रेष्ठानां हरे श्रेष्ठा गुरवः] मु अश्रेष्ठान् नाहरेत् श्रेष्ठगुरवः– क१;

६. ज्ञानोत्कर्षे] क१; ज्ञानोत्कर्षे व्युत्क्रमेणापि गुरुत्वम्। अयमत्र विशेषः अवराश्रमिणः ज्ञानोत्कर्षे– मु

ब्रह्मचारी गृहस्थस्य वनस्थस्य यतेरपि।
विद्योत्कर्षबलेनैव गुरुर्भवति नान्यथा।

एवं सर्वेषामाश्रमिणां गुरुत्वाविशेषेऽपि भुक्तिपूर्वकं मुक्तिसाधने कर्मणि गृहस्थभौतिकयोरेव गुरुत्वं केवलमुक्तिसाधने कर्मणि इतरयोरिति व्यवस्थयोक्तम्। सुप्रभेदे-

गृहस्थो देशिकः श्रेष्ठो भुक्तिमुक्तिप्रसिद्धये।

भौतिकोऽपि तथैव स्यात् नैष्ठिको मोक्षदो वरः[1]। इति। अत्र श्रेष्ठो वर[2] इति पदोपादानात् भुक्तिमुक्तिसाधनेऽपि कर्मणि विरक्तस्य सर्वथा न गुरुत्वनिषेध इति द्रष्टव्यम्। अतिवर्णाश्रमी तु सर्वेषां गुरुरेव न कस्यापि शिष्यः सर्वापेक्षया ज्ञानोत्कर्षशालित्वात्। तदुक्तं सूतसंहितायाम्-

अतिवर्णाश्रमी प्रोक्तो गुरुः सर्वाधिकारिणाम्।
न कस्यापि भवेच्छिष्यो यथाहं पुरुषोत्तम।
अतिवर्णाश्रमी साक्षात् गुरूणां गुरुरुच्यते।
तत्समानोऽधिकश्चास्मिन् लोकेऽस्त्येव न संशयः। इति।

तस्य लक्षणमपि तत्रैवोक्तम्-

यः शरीरेन्द्रियादिभ्यो विभिन्नं सर्वसाक्षिणम्।
परमार्थैकविज्ञानसुखात्मानं स्वयं प्रभुम्।
परतत्त्वं विजानाति सोऽतिवर्णाश्रमी भवेत्।
यो वेदोक्तमहावाक्यश्रवणेनैव केशव।
आत्मानमीश्वरं वेद सोऽतिवर्णाश्रमी भवेत्।
योऽवस्थात्रयनिर्मुक्तम् अवस्थात्रयसाक्षिणम्[3]।
महादेवं विजानाति सोऽतिवर्णाश्रमी भवेत्।
वर्णाश्रमादयो देहे मायया परिकीर्तिताः।
नात्मनो बोधरूपस्य मम ते सन्ति सर्वदा।
इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत्।
यस्य वर्णाश्रमाचारो गलितः स्वात्मदर्शनात्।
स वर्णानाश्रमान् सर्वानतीत्य स्वात्मनि स्थितः।
योऽतीत्य स्वाश्रमान् धर्मानात्मन्येव स्थितः पुमान्।
सोऽतिवर्णाश्रमी प्रोक्तः सर्ववेदार्थवेदिभिः। इति।

---

१. वरः]मु परः-क१;
२. श्रेष्ठः वरः] मु श्रेष्ठपर- क१;
३. अवस्थात्रयसाक्षिणं]मु अवस्थासाक्षिणं सदा-क१;

अस्मिंश्चात्यन्तलक्षणापेक्षानिर्बन्धोऽपि न कर्तव्य इत्युक्तं देविकालोत्तरे–

सर्वलक्षणहीनोऽपि ज्ञानवान्[१] गुरुरिष्यते इति। अत्र तावत् दीक्षा द्विविधा निरधिकरणा साधिकरणा चेति। निरधिकरणा च द्विविधा। अधिकारपदप्रापिका तदप्रापिका चेति।

तत्र निरधिकरणदीक्षायामाद्यां तावदाह–

**एवं संसारतो भीतमनुगृह्णाति चेश्वरः।**

**( व्याख्या )** ईश्वरः। एवं पूर्वोक्तप्रकारेण संसारतो भीतं संसारतः जननमरणपरम्परारूपात् भीतं त्रस्तं तद्योग्यतानुसारेण तस्यानुग्राह्यस्य योग्यता मलपाकविशेषः[२]।

**( वृत्तिः )** तस्यां शिवरागसंयुतशिवशक्तौ पतितमात्रायां अधोनियामिका संसारस्थित्यच्युतिकरी। न तु चिच्छक्तितिरस्कर्त्री दीक्षया सेति वक्ष्यमाणत्वान्मलस्य शक्तिः मलस्योपोद्बलिनी तादृशी भगवतः शक्तिश्च निवर्तते। असतीव तिष्ठति। तस्यां निवृत्तायां संसारासक्तिकररागस्याप्यसत इव वर्तनात् महात्मनः शक्तिपातपवित्रितस्य वैराग्येत्यनुषज्येश्वर इत्यन्तार्थः सुकरत्वात् सुकर्तव्यः।

**( वृत्तिः )** कथमनुग्रह्णातीत्यत आह –

**तद्योग्यतानुसारेण करुणागर्भया दृशा।।४१।।**

**( व्याख्या )** तदनुसारेण तदनुरोधेन करुणागर्भया करुणा दया तद्वत्या दृशा चिच्छक्त्या करणभूतया अनुगृह्णाति पाशनिवृत्तिपूर्वकं शिवत्वमभिव्यनक्तीत्यर्थः।

निरधिकरणदीक्षायां साधिकारदीक्षां द्वितीयामाह–

**पुनाति साधिकारेण यं वापि परमेश्वरः।**
**तयानुग्रहरूपिण्या शक्तेर्गतिनिरोधिका।।४२।।**
**मलस्य क्षीयते शक्तिः सा दीक्षा शाम्भवी क्रिया।**

**( व्याख्या )** परमेश्वरः यं वापि यं कंचनाधिकारिणं अनुग्रहरूपिण्या अनुग्रहं रूपयितुं सम्पादयितुं शीलमस्या अस्तीति अनुग्रहरूपिणी तया चिच्छक्त्या साधिकारेण अधिकारेण सहितः[३] साधिकारः सृष्ट्याद्यधिकारी:[४] तेन प्रकारेण भावप्रधानो[५] निर्देशः अधिकारसाहित्येनेत्यर्थः। पुनाति अनुगृह्णातीत्यर्थः। तस्येत्यध्याहारः। तस्यानुगृहीतस्य चिच्छक्तेः गतिनिरोधिका गतिः प्रसरणं तस्या निरोधिका आच्छादिका मलस्य शक्तिः क्षीयते निवर्तते। ननु दीक्षया मलनिवृतिः

---

१. सर्वलक्षणहीनोऽपि ज्ञानवान्]मु सर्वलक्षणहीनो विज्ञानवान्–क१;

२. मलपाकविशेषः] क१; मलपरिपाकविशेषः–मु

३. अधिकारेण सहितः] मु साधिकारेण अधिकारे सहितः– क१;

४. सृष्ट्याद्यधिकारी]मु सृष्ट्याद्यधिकारः–क१;

५. भावप्रधानो] मु तावत् प्रधानो– क१;

तत्र तत्र श्रूयते। वक्ष्यते च दीक्षैव मोचयेत्[1] पाशान् इति। इह च शक्त्या मलनिवृत्तिः कथ्यते। कथमिदमित्यत आह सा दीक्षेति। सा चिच्छक्तिरेव दीक्षा शाम्भवी शम्भुसम्बन्धिनी। नन्वेवमपि द्रव्यस्य मलस्य चक्षुःपटलादिवत्[2] क्रियया निवृत्तिः वाच्या कथं तस्य चिच्छक्त्या निवृत्तिरित्यत आह क्रियेति। एकैव चिच्छक्तिः ज्ञेयापेक्षया ज्ञानरूपा कार्यापेक्षया क्रियारूपा च भवतीति भावः।

**( वृत्तिः )** परमेश्वरो गुर्वधिकरणः शिवः करुणागर्भया घृणाश्रयभूतया[3] दृशा दृष्ट्या तद्योग्यतानुसारेण वैराग्याद्यनुरूपेण दृशाऽवलोकनानन्तरकल्पितेन साधिकारेण गुरुशुश्रूषाधिकारेण सह वर्तनेन न हि दीक्षाव्याख्याप्रतिष्ठामात्राधिकारेण सह वर्तनेनेति यं वापीत्युत्तरत्र उक्तिविरोधात् यं वापि वर्णाश्रमेण निकृष्टमपि पुनाति शुध्यति।

तदुक्तं मतङ्गे –

सर्वत्रानुग्राहकः प्रोक्तः पत्युर्धर्मो निवारितः[4]।
ब्रह्मादिस्थावरान्तस्य भूतवर्गस्य कृत्स्नशः।।
निरपेक्ष्य करोत्याशु अणोरात्मसमं बलम्। इति।

व्योमव्यापिस्तवेऽपि–

जातिनियमेन नैतत्[5] मुक्तिसुखं पूर्णतां ददात्यपि तु।
सर्वेभ्यो भूतेभ्य सुखप्रदो यो नमोस्तु तस्मै ते। इति।

**( वृत्तिः )** दीक्षा संज्ञितेयमित्याह –

तया अनुग्रहरूपिण्या चिद्दृष्ट्यवलोकनादिरूपया शक्तेरात्मनश्चिच्छक्तेर्गतेः सर्वविषयीकृतेर्निरोधिका तिरस्कर्त्री गतिनिरोधिका। मलस्यानन्तपुरुषशक्त्याद्यावृत्तिरूपशक्तीनां[6] मध्ये चिदनुग्रहरूपशिवशक्तिपातपवित्रितस्य संबन्धिनी शक्तिः क्षीयते। ननु मलस्यावारकत्वरूपधर्मस्याग्नेरूर्ध्वज्वलनात्मकस्येव सहजत्वात् तन्निवृत्त्या मलस्यापि क्षये ह्येकमोक्षे सर्वमोक्षप्रसङ्गः। तन्न। कालिकादिभिरनैकान्तकत्वात्। कालिकाकम्बुकसम्बन्धिन्यास्ताम्रतण्डुलावृतिलक्षणशक्तेः विषयसम्बन्धिन्याःशक्तेश्च[7] क्षयान्न कालिकादीनां क्षयः मन्त्रदीक्षात्मना मलस्य शक्तेरावारकत्वस्वभावस्याग्नेः शक्तेः दाहकस्वभावस्येव[8] क्षयो निवृत्तिलक्षणान्यथाभावः क्रियते। ततस्तदानीं रूपान्तरपरिणतिर्भविष्यतीति न स्वस्वरूपाभावः।

---

१. दीक्षैव मोचयेत्] मु दीक्षयैव मोक्षयेत्– क१;
२. द्रव्यस्य मलस्य चक्षुः पटलादिवत्] मु; मलस्य पटलादिवत्– क१;
३. घृणाश्रयभूतया ] ज२; घृणाश्रया गर्भया– ज१;
४. पत्युर्धर्मो निवारितः ] ज२;पत्युद्धमोन्निवारितः– ज१
५. नैतत् ] ज२; न युक्तं– ज१;
६. मलस्यानन्तपुरुषशक्त्याद्यवृत्तिरूपशक्तीनां ] ज१; मलस्यानन्तपुरुषशक्त्याप्रतिरूपशक्तीनां– ज२
७. विषसम्बन्धिन्याः शक्तेश्च ] ज२; विषयसम्बन्धिन्नाशक्तेश्च– ज१;
८. दाहकस्वभावस्येव ] ज१; दाहकत्वस्वभावस्येव– ज२

मलशक्तेरावारकत्वलक्षणस्वभावान्निवृत्तिलक्षणस्वभावान्तरपरिणते स्वरूपत्वेऽपि आमयाद्विश्लिष्टः पुरुष इतीव शक्तिसंरोधादुभयत्र विभुत्वेन देशान्तरनयनासम्भवेऽपि मलाद्विश्लिष्टः स इति कथ्यते। यद्येवं पुरुषस्यावार्यत्वलक्षणनिवृत्तिलक्षणस्वभावात् स्वभावान्तरपरिणतिरस्तीति जडत्वाविनाभूतविकारी स्यात्। तन्न कालिकार्थनिवृत्त्या न ताम्रस्य कश्चिद्विकारो दृश्यते यथा तथा पुरुषस्थानीयस्य विषयस्य शक्तौ निवृत्तायां न कदाचित् वर्णाकृत्यादिस्वरूपनाशो दृश्यते। यथा तथा कतकवृक्षस्य फलं मेद्यजादिसहजकलुषयुक्त[१] एव जलकलुषशक्तेः[२] संरोधं विदधल्लक्ष्यते। न तु[३] जलात् किमपि स्वभावं जलेऽन्यस्मात् स्वभावान्तरं जलास्वभावमादायापत्यान्यत्र क्षिपेत्। कालुष्यमात्रमेव तेषां[४] क्षीयते। यथा तथा चक्षुःपटलनिवृत्याञ्जनसेवादिना पुनस्तच्चक्षुः शक्त्युत्तम्भकरतद्वासनानिवृत्या च स्वभावनामस्वशक्तिविकृतिविकलितसदभिव्यक्तिं विना न स्वभावान्तरापातनेन कश्चिद्विकारो दृश्यते। यथा तथात्मनि मलसन्निधानकृतत्वात्[५] आवार्यत्वस्य सहजस्वभावत्वाभावात् तन्निवृत्तिद्वारा सहजस्वसर्वज्ञत्वात्मशिवत्वविकृतिविकलितसदभिव्यक्तिकरीति न वक्ष्यमाणदीक्षा विकारणी। तदुक्तं भोगकारिकासु –

स्वरूपव्यक्तिलाभाच्च न विकारो न नाशिता। इति।

ननु मलापेक्षमपि तदावार्यत्वपशुत्वापरोक्तिमदकर्तृत्वापृथक्भूताज्ञत्वस्याति सा मलस्याति-शुद्धशिवत्वलक्षणसहजस्वभावेन सहैकात्मवर्तित्वं विरुद्धत्वान्नोपपद्यते। तथाऽऽक्षिप्तं च भगवता मतङ्गेन –

शिवत्वमतिशुद्धं स्यात् पशुत्वमतिसामलम्।
अस्माद्विरोधादेकत्वं भगवन् गम्यते कथम्।।

इति सहजस्वभावस्य निवर्तयितुमशक्यत्वान्नहि शिवत्वनिवर्तनेनाज्ञत्वस्य वृत्तित्वम्। यदि पुनः शिवत्वमज्ञानेन सह विद्यमानं तर्हि तत्राकिञ्चित्कर एव मलः यतो मलस्य शिवत्वविघटनमेव किञ्चित्करत्वन्नेतरदुपलभ्यते। अथ शिवत्वनिवर्तनेन मलः किञ्चित्कर इत्युच्यते। तदयुक्तम्। सहजस्वभावविघटनत्वादात्मनोऽप्यभावः प्रसज्यते। अत्रोच्यते यथाग्नेर्विरुद्धत्वमपि तोयं शीतलक्षणसहजस्वभावमग्निना संयुक्तमेव स्वविरुद्धं दाहलक्षणं कार्यं करोति तथा मलेन विरुद्धेन संयुक्तं तच्छिवत्वं स्वविरुद्धमर्थविषयाज्ञानक्रियालक्षणकार्यं स्वसन्निविष्टतया करोतीति न कदाचित् कथञ्चित् कस्यचित् सहजस्य स्वभावस्यात्र भावः वस्त्वभावप्रसङ्ग इति। तदुक्तं मतङ्गे –

---

१. मेद्यजादिसहजकलुषयुक्त ] ज२; मेघजादिसहजकन्दुष्वभुक्त– ज१;

२. जलकलुषशक्तेः ] ज२; जले प्रक्षिप्तकलुषशक्तेः– ज१

३. न तु ] ज२; ननु– ज१;

४. तेषां ] ज२; तेन– ज१;

५. मलसन्निधानकृतत्वात् ] ज२; मलसन्निधानाकृतत्वात्– ज१;

विरुद्धमग्निना तोयं युक्तं दहति तत्क्षणात्।
अस्तित्वान्मुनिशार्दूल विरोधोऽत्र न युज्यते।।

तदुक्तं च सर्वज्ञानोत्तरे –

ताम्रस्यैव तु हेमत्वं अन्तर्लीनं यथा स्थितम्।
अन्तर्लीनं तथा ज्ञेयं शिवत्वं पुद्गलस्य तु।। इति।

ननु यथा शीतलक्षणस्वभावं तोयमग्निना संयुक्तं स्वविरुद्धं शीतलक्षणं कार्यं करोति। तथा सर्वार्थज्ञानक्रियालक्षणस्वभावं शिवत्वं[१] मलेन संयुक्तं तद्विपरीतम् अज्ञत्वाकर्तृत्वार्थ-क्रियात्माऽज्ञानक्रियालक्षणं[२] स्वविरुद्धं कार्यं करोतीत्युक्ते सति न विषमः स दृष्टान्तः यदि दाहलक्षणमित्युक्तं[३] तर्हि दार्ष्टान्तिकेऽप्यज्ञानमित्युक्ते स विषम इत्यावारकलक्षणं कार्यं करोतीति वक्तव्यम्। सत्यम्। यथा शीतस्वभावं जलमग्निसम्बन्धात् स्वविरुद्धाशीतलक्षणकार्यकरं भूत्वाऽग्नेः दाह्यलक्षणे[४] शरीरादिवस्तुनि तदा स्वदाहलक्षणकार्यं कर्तुमवकाशं ददातीत्युपचारात् दाहलक्षणं कार्यं करोतीत्युच्यते। तथा सर्वार्थदृक्क्रियालक्षणस्वभावं शिवत्वं मलसम्बन्धात् स्वविरुद्धाज्ञानक्रियालक्षणकार्यकरं भूत्वा मलस्य आवार्यलक्षणात्मवस्तुनि[५] स्वावृतिलक्षणं कार्यं कर्तुमवकासं ददातीत्युपचारात्तदावृतिलक्षणकार्यं करोतीत्युच्यतामिति न विषमः स दृष्टान्तः। सर्वज्ञत्वसर्वकर्तृत्वलक्षणं शिवत्वं स्वतः स्वात्मनि तद्विपरीतलक्षणं शिवत्वात्यन्ताभावलक्षणमशिवत्वमज्ञत्वाकर्तृत्वलक्षणं मलविषयोपहितममले विषये[६] विद्यमानमिति भिन्नविषयत्वान्न शिवत्वपशुत्वयोः सहानवस्थानलक्षणो[७] विरोधः। भवतामपि सांख्यच्छायावलम्बिनां यदि शुद्धः पुरुषः कथं तस्य विपरीतप्रतिपत्तिरविद्या। अथ स्वात्मनि शुद्धत्वं विषये तु विपरीतप्रतिपत्तिरविद्येति भिन्नविषयत्वेनात्र विरोधः प्रतिह्रियते भवद्भिर्यदुक्तं सर्वमालम्बने भ्रान्तं न स्वात्मनि कथंचन। इति तदितरत्रापि समानम्। नैकत्र पर्यनुयोगः। उभयत्र दोषपरिहारसमत्वात् नैकः पर्यनुयोक्तव्यः। अलमनेन विस्तरभीरुत्वात् प्रकृतप्रसक्तानुप्रसक्तातिप्रसृतप्रसङ्गेन। प्रकृतमनुसरामः। सा शाम्भवी शिवशक्त्यात्मिका क्रिया सर्वानुग्रहार्थं शाम्भव्यादिभेदभिन्ना दीक्षा दानक्षपणधर्मत्वाद् दीक्षा संज्ञिता।

---

१. शीतलक्षणस्वभावं तोयमग्निना संयुक्तं स्वविरुद्धं शीतलक्षणं कार्यं करोति। तथा सर्वार्थज्ञानक्रियालक्षणस्वभावं शिवत्वं ] ज२; शीतलक्षणस्वभावं शिवेनत्वं–ज१;

२. अज्ञत्वाकर्तृत्वार्थक्रियात्माऽज्ञानक्रियालक्षणं] ज२; अज्ञत्वात् कर्तृत्वार्थक्रियात्मा ज्ञानक्रिया-लक्षणं–ज१;

३. दाहलक्षणमित्युक्तं ] ज२; दाहज्ञानलक्षणमित्युक्तं– ज१;

४. दाह्यलक्षणे ] ज२,ज३; दाहस्य लक्षणे– ज१;

५. आवार्यलक्षणात्मवस्तुनि– ज१; आवारकलक्षणात्मवस्तुनि– ज२

६. विषये ] ज२,ज३; विषये व– ज१;

७. सहानवस्थानलक्षणो ] ज३; सहानवस्थालक्षणो– ज१;सह . . . . लक्षणो– ज२

**(व्याख्या)** को वा दर्शयिता शम्भोरित्यनेन गुरूपसर्पणमर्थादुक्तम्। अनुग्रहार्थतया तत्रोपसन्नेन प्रथमं कर्तव्यसारम्[1] आह–

**(वृत्तिः)** गुरुशिष्यसम्बन्धेन विनाऽनुग्रहो न जाघटीतीति सम्बन्धोऽपि शिवेन विना न जाघटितीत्याह –

**अनुग्राह्यस्य विनये तथानुग्राहकस्य च।।४३।।**
**कारुण्ये स शिवः कर्ता तयोर्योगः सुदुर्लभः।**

**(व्याख्या)** तत्र प्रथममनुग्राह्येण शिष्येण गुरुकृपा पर्यवसायी विनयः कर्तव्य इत्यर्थः। ननु[2] गुरुमूर्तिं भूतावेशन्यायेनाधिष्ठाय शिवस्य अनुग्राहकत्वपक्षे शिष्यस्य तादृशविनयः किमर्थः गुरुकृपा वा किमर्था तस्याननुग्राहकत्वात्।[3] इत्याशंक्याह। विनये कारुण्ये च सत्येव स शिवोऽनुग्रहकर्तेत्यर्थः। तथा च तयोः शिवानुग्रहनिमित्तत्वात् न कैवल्यमिति भावः। यत्र मते गुरौ विशिष्टगुणकथनस्य दृष्टार्थत्वात् यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते[4]।

इति वचनात् भ्रमरकीटन्यायेन सम्पन्नशोभाशिवभावे गुरुरेवानुग्राहकः। तत्र न वैफल्यशंकापीति बोध्यम्[5]। तयोर्विनयकारुण्ययोः योगः सुदुर्लभ इति निश्रेयसहेतुभूतशिवानुग्रहे तस्य चरमनिमित्तत्वात् इति भावः।

**(वृत्तिः)** तत्रानुग्राह्यस्य व्यञ्जनीयशिवत्वशिष्यस्य विशिष्टनयो विनयः गुरुसपर्यात्मकः तस्मिन् विनये प्रेरको भूत्वा गुरुणा तदनुग्राह्यलक्षणसम्बन्धं करोति। अनुग्राहकस्य तच्छिवत्वव्यञ्जकगुरोः करुणैव कारुण्यं चतुर्वर्णादित्वात् ष्यङ्प्रत्ययः तस्मिन् कारुण्ये चशब्दादनुग्रहेच्छायामपि प्रेरको भूत्वा शिष्येण तदनुग्राहकलक्षणसम्बन्धं करोति।

अन्यथा शिवप्रेरणं विना तयोर्योगः सम्बन्धः अनुग्राह्यानुग्राहकलक्षणः सुदुर्लभः। दुःखेनाऽपि लब्धुमशक्यः।

**(व्याख्या)** उपसृतेन गुरुणापि शिष्यस्याधिकारनिश्चयार्थं पूर्वोक्ततल्लिङ्गपरीक्षा कर्तव्येत्याह–

**(वृत्तिः)** उपसंहरति –

---

१. कर्तव्यसारम्] मु कर्तव्यतासारम्- क१;

२. ननु] मु न तु- क१;

३. अनुग्राहकत्वपक्षे शिष्यस्य तादृशविनयः किमर्थः गुरुकृपा वा किमर्था तस्याननुग्राहकत्वात्] मु अनुग्राहकत्वात्- क१;

४. यस्यावलोकनेनैव परानन्दोऽभिजायते।
गुरुं तमेव वृणुयान्नेतरं मतिमान्नरः। इत्यधिकोऽयं श्लोकः 'मु' कोशे वर्तते।

५. बोध्यम्] क१;बोद्धव्यम्-मु

**एतैः लक्ष्मैः[1] अविच्छिन्नैः शक्तिपातो महात्मभिः ।। ४४ ।।**

**अनुमेयो न दीक्षैषा शक्तिपातापवित्रितैः ।**

**अन्यैः श्रुत्यादिसंसिद्धाः शिवधर्माश्च देशिकैः ।।४५ ।।**

**शिष्याणां शक्तिपातार्थं परीक्ष्याः शिवशासने ।**

**( व्याख्या )** एतैः पूर्वोक्तवैराग्यमुक्त्यौत्सुक्यादिभिः लक्ष्यैः लिङ्गैः लक्ष्मैरिति पाठे छान्दसमकारान्तत्वम् । तात्कालिकवैराग्यादिशंकानिवृत्त्यर्थं[2] द्वादशमासं षाण्मासं वा यथोचितवैराग्यादिपरीक्षणं कर्तव्यमित्याह अविच्छिन्नैरिति । द्वादशमासं षण्मासं वा अनुगतैः तथा चैवं परीक्षितैः लिङ्गैः अव्यभिचारिभिः अधिकारोऽनुमेय इत्यर्थः । ननु भूतावेशन्यायेन शिवस्यैवानुग्राहकत्वपक्षे गुरुणाधिकारनिश्चयाय किमर्थं लिङ्गपरीक्षा कर्तव्येत्याशंक्यापरीक्षणं निषेधयति न दीक्षेति । शक्तिपातापवित्रितैः शक्तिपातः अपवित्रितः[3] लिङ्गपरीक्षामुखेनाशोधितः यैस्तैः देशिकैः दीक्षैषा न कार्येत्यर्थः । एवं श्रुत्या देहपातस्तथा कम्पः परमानन्दहर्षणे ।

देहे[4] रोमाञ्च इत्येतत् शक्तिपातस्य लक्षणम् । इति ।

तथा–

येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये ।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ ।
भक्तिश्च शिवभक्तेषु श्रद्धा तच्छासके वियौ ।
बुद्धिरुत्पद्यते तस्माद्विवेकेनात्मवर्तिना ।
विवेकिनो विरक्तस्य जिज्ञासा चोपजायते ।

इत्याद्यागमेन च तल्लिङ्गत्वेन सिद्धानामपि पूर्ववत् षण्मासादिपरीक्षा कर्तव्येत्याह अन्यैरिति । शिवशासने शिवशास्त्रे ।

**( वृत्तिः )** एतैर्लक्ष्मैरविच्छिन्नैः पुरोक्तवैराग्यादिभिश्चिह्नैः संवत्सरान्तमभग्नैः शक्तीत्यनुषज्य सुकरत्वादितरपदार्थः सुकरणीयः । शक्तिपातज्ञानार्थमित्यध्याहार्यम् । दीक्षालाभसमीपकाले मतङ्गभरद्वाजादिभिः क्रियमाणत्वात् श्रुत्यादिसंसिद्धशिवधर्माणामपि परीक्ष्यत्वमसंशयम् । अनियतकालीनो मलपरिपाको भोगहेतुकः तदविनाभूतः शक्तिपातःतदविनाभूता दीक्षा[5] तदविनाभूता मुक्तिरिति भावः ।

---

१. लक्ष्मैः] क१ ; लक्ष्यैः–मु

२. तात्कालिकवैराग्यादिशंकानिवृत्त्यर्थं] क१ ; तत्र तात्कालिकवैराग्यादिशंकानिवृत्त्यर्थं– मु

३. शक्तिपातापवित्रितैः शक्तिपातः अपवित्रितः] मु शक्तिपातापवित्रिताः– क१ ;

४. देहे] क१ ;स्वेदो– मु

५. तदविनाभूतः शक्तिपातःतदविनाभूता दीक्षा ] ज३ ; तदविनाभूतः शक्तिः शक्तिपातःतदविनाभूता दीक्षा– ज१ ;तदविनाभूत . . . . तदविनाभूता दीक्षा– ज२

**( व्याख्या )** तत्रापि पूर्ववत् वैयर्थ्यमाशंक्य अपरीक्षणं निन्दति[1] अभक्तमिति–

**( वृत्तिः )** अपरिणतमले कृतदीक्षा व्यर्थेत्याह –

**अभक्तमद्विजं क्रूरं निर्भयं वा क्रियाच्युतम्।।४६।।**
**दीक्षा मदाज्ञा हन्त्येषा इत्याज्ञा पारमेश्वरी।**

**( व्याख्या )** अत्र दीक्षयेद्यदीति शेषः। अत्र यद्यपि द्विजत्वस्य शक्तिनिपातस्येव शिवभक्तादेरिव वा अधिकारनिमित्तत्वं[2] नोक्तं तथापि निषेधव्याजेन तस्यापि आधिकारनिमित्तत्वमाह अद्विजमिति[3]। अनेन द्विजस्याधिकारित्वं प्रतीयते। ननु ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः शुद्धकुलोद्भवाः इत्याद्यागमवचनेनाचार्याभिषेकोक्तिसामर्थ्यात् शूद्रस्यापि अधिकारित्वं प्रतीयते। अतो द्विजस्य निषेधोऽनुपपन्नः। न च श्रीमत्पराख्ये

दीक्षा कार्या हि सर्वेषां तच्छक्तिविधियोगिनाम्[4]।

त्रयाणामपि वर्णानां न तु शूद्रान्त्यजातिषु। इति निषेधादुपपन्न इति वाच्यम्।

अमद्यपास्तु ये शूद्राः शौचाचारक्रियादराः।

शिवभक्ताश्च ये तेषां दीक्षा कार्यान्यथा न हि। इति तत्रैव पूर्वप्रतिषिद्धशूद्रदीक्षाधिकारस्य पुनरमद्यपा इत्यादिना विशिष्टशूद्रे प्रतिप्रसवात्। तथा सूतसंहितायाम्–

अपरासूत्तमाज्जाता अनुलोमा इति स्मृताः। इति। तथा–

नृपायां ब्राह्मणाज्जातः सवर्ण इति कीर्तितः।
वैश्यायां ब्राह्मणाज्जातो निषादो[5] वेदवित्तमाः।

शूद्रायां ब्राह्मणाज्जातो द्विजाः पारशवः स्मृतः[6]

वैश्यायां क्षत्रियाज्जातो माहिष्योऽम्बष्ठसंज्ञितः।
शूद्रायां क्षत्रियाज्जातो दौष्यन्दाख्यो[7] भवेत् द्विजाः।

शूद्रायां वैश्यतो जातः उग्र इत्युच्यते बुधैः।

---

१. अपरीक्षणं निन्दति– मु परीक्षणं निर्दिशति– क१;
२. शिवभक्त्यादेरिव वा अधिकारनिमित्तत्वं नोक्तं– मु शिवभक्तादेरिव अधिकारित्वं तन्निमित्तत्वं वा– क१;
३. आधिकारनिमित्तत्वमाह अद्विजमिति–मु आधिकारित्वमाह द्विजमिति–क१;
४. तच्छक्तिविधियोगिनाम्–मु तच्छक्तिविधियोजना–क१;
५. निषादो–क१;त्वम्बष्ठः–मु
६. द्विजाः पारशवः स्मृतः– मु . . . . .– क१;
७. दौष्यन्दाख्यो] क१; दौष्यन्ताख्यो– मु

इत्यादि वचनोक्तानां सवर्णाम्बष्ठपारशवमाहिष्यदौष्यन्दोग्राख्यानां[१] षण्णामपि अनुलोमानां जातिनिर्णयपटले दीक्षायामधिकारित्वमुच्यते। अतोऽप्ययं निषेधोऽनुपपन्न इति चेन्मैवम्। अत्रत्य द्विजशब्दस्य शूद्रानुलोमद्विजातीनामपि उपलक्षकत्वात्। यदा विप्रायां क्षत्रियाज्जातः सूत इत्युच्यते[२] बुधैः। इत्यादिवचनोक्तस्य प्रतिलोमस्याप्यधिकारः। तदा तस्यापि उपलक्षणम्। विशेषदीक्षादिषु समयेन विचारयेदित्यादिवचनेन प्रतिलोमान्तरालकव्रात्यादीनामपि उत्तमास्ववराज्जातः प्रतिलोम इति स्मृतः। इत्यादिवचनप्रतिपादितानां तत्राधिकारात्[३] । ननु सूतसंहितायाम्–

वेदमार्गपरिभ्रष्टः प्रायश्चित्ते भयं गतः।

वेदेतरागमं गत्वा तदुक्तं धर्ममाचरेत्। इति। तथा पराशरपुराणे–

श्रुतिभ्रष्टः स्मृतिप्रोक्तप्रायश्चित्ते भयं गतः[४]।

क्रमेण श्रुतिविध्यर्थं[५] मनुष्यस्तन्त्रमाश्रयेत्। इति श्रूयते। आभ्यां वचनाभ्यं च प्रायश्चित्ते भयं गतः इत्यादि शब्दानुसारेण ब्रह्महत्त्यादिमहापातकैः वैदिककर्मण्यनधिकृतानां तान्त्रिककर्मण्यधिकार इति प्रतीयते। अतोऽस्या अपि तावत् भ्रष्टाधिकारिकत्वम्। अपि च कूर्मपुराणे–

सर्वे संप्राप्य देवेशं शंकरं विष्णुमेव च।
अस्तुवन् लौकिकैःस्तोत्रैरुच्छिष्टा इव सर्वगौ।
देवदेवौ महादेवौ भक्तानामर्तिनाशनौ।
का नो वृत्तिर्महादेवौ पापान्नः[६] त्रातुमर्हथः।
तदा पार्श्वस्थितं विष्णुं संप्रेक्ष्य वृषभध्वजः।
किमेतेषां भवेत् कार्यं प्राह पुण्यैषिणामिति।
ततः स भगवान् विष्णुः शरण्यो भक्तवत्सलः।
गोपतिं प्राह विप्रेन्द्रान् आलोक्य प्रणतान् हरिः।
न वेदबाह्यपुरुषे धर्मलेशोऽपि शंकर।
संगच्छते यतो धर्मो वेदो देव हि निर्बभौ।
तथापि भक्तवात्सल्यात् रक्षणीया महेश्वर।
आवाभ्यां सर्व एवैते विप्रा वै नात्र संशयः।
तस्माद्वै वेदबाह्यानां रक्षणार्थं यथायथम्।

---

१. सवर्णाम्बष्ठपारशवमाहिष्यदौष्यन्तोग्राख्यानां] मु सवर्णनिषादपारशवमाहिष्यदौष्यन्दोग्राख्यानां– क१;
२. इत्युच्यते] मु इत्यभिधीयते– क१;
३. तत्राधिकारात्] क१;अधिकारात्–मु
४. स्मृतिप्रोक्तप्रायश्चित्ते भयं गतः] क१; स्मृतिप्रोक्तप्रायश्चित्तेष्वनुन्मुखः– मु
५. श्रुतिविध्यर्थं] क१; श्रुतिसंध्यर्थं– मु
६. पापान्नः] मु भवन्तं न– क१;

मोहनानि च शास्त्राणि करिष्यावो वृषध्वज।
एवं सम्वोधितो रुद्रो माधवेन मुरारिणा।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः।
सृष्ट्वा तानूचतुर्देवौ कुर्वाणास्तन्त्रचोदितम्।इति।

नान्यथा निष्कृतिर्वः इति च श्रूयते। अत्र च दुर्वासोदधीचिगौतमकण्वभृगूपमन्युभिः षड्भिः मुनिभिः ब्रह्मणा च वैदिककर्मणि अनधिकारित्वेन शप्ताः मुनयः पृच्छकाः सर्वशब्देनोच्यन्ते। गोपतिः परमेश्वरः। तथा च गौतमादिषण्मुनिशापवशात् वैदिककर्मानधिकाराणामत एवः[1] श्रेयःप्राप्त्युपायहीनानामृषीणामर्थे तन्त्रकरणं[2] प्रतीयते। अतः तेषामेव शापदग्धवैदिककर्मानधिकाराणां तान्त्रिककर्माधिकारः। अत एव च पूर्वोक्तवचनद्वयं बुद्धाद्यागमविषयं न तु शैवागमविषयमिति परास्तम्। एवं संबोधितो रुद्र इत्यादिवचनेन कूर्मपुराणस्थेन शैवागमस्यापि विषयीकरणात्। ननु स्मृतिप्रोक्त प्रायश्चित्ते[3] भयं गत इति नान्यथा निष्कृतिर्हि व इत्यादिवचनेषु[4] पदस्वारस्यात् तेषां स्मार्तप्रायश्चित्तेषु अधिकृतानामेव सतामसमर्थानां लघुप्रायश्चित्तान्तरोपदेशपराणि न तु भ्रष्टाधिकारपराणि[5] अधिकारपरत्वेऽपि वा[6] तधिकारमात्रपराणि चेत्[7] तथापि श्रुतिपथगलितानां मानुषाणां तु तन्त्रं गुरुगुरुरखिलेशः सर्ववित् प्राह शम्भुः श्रुतिपथनिरतानां तत्र नैवास्ति किञ्चित् हितकरमिह सर्वं पुष्कलम्। सत्यमुक्तम् इत्यादिवचनैः[8] वैदिकाधिकारिणां तन्त्रे अधिकारनिषेधाच्च। अपि च सूतसंहितायां स्त्रीशूद्रद्विजबन्धूनामिति वचनेन भ्रष्टानामेवाधिकारप्रतिपादनात्। तस्मात् उक्तपुराणेषु ब्रह्महत्यादिभिः ब्राह्मणशापैर्वा वैदिककर्मभ्रष्टानामेव द्विजातीनां[9] तन्त्राधिकारश्रवणात् तदनुरोधैः आगमेषु ब्राह्मणान् क्षत्रियान् वैश्यानिति तथात्र द्विजम्[10] इत्यादिवचनेषु सामान्यतः श्रुतस्य[11]

---

१. वैदिककर्मानधिकाराणामत एव]मु वैदिककर्मानधिकाराणामधिकारः-क१;

२. तन्त्रकरणं] मु तान्त्रं करणं- क१;

३. स्मृतिप्रोक्तप्रायश्चित्ते]मु स्मृतिप्रोक्तप्रायश्चित्तेषु अनु प्रायश्चित्ते-क१;

४. इत्यादिवचनेषु] मु इत्यादिवचनेन- क१;

५. भ्रष्टाधिकारपराणि] मु भ्रष्टानामधिकारपराणि- क१;

६. अधिकारपरत्वेऽपि वा] मु अधिकारप्रापणपरत्वेन- क१;

७. तधिकारमात्रपराणि चेत्] क१; तधिकारमात्रपराणि नेतराधिकारव्यवच्छेदपराणीति चेत्- मु

८. प्राह शम्भुः।
श्रुतिपथनिरतानां तत्र नैवास्ति किंचित्
हितकरमिह सर्वं पुष्कलं सत्यमुक्तम्। इत्यादिवचनैः] मु
श्रुतिपथगलितानां वासनाया अभावात्। प्रत्युत श्रुतिपथनिरतानां तत्र नैवास्ति किञ्चित् हितकरमिह सर्वं पुष्कलम्। सत्यमुक्तम् इत्युत्तरार्थेन- क१;श्रुतिपथगलितानां मानुषाणां तु तन्त्रं गुरुगुरुरखिलेशः सर्ववित्

९. वैदिककर्मभ्रष्टानामेव द्विजातीनां] मु वैदिककर्मभ्रष्टानामेव- क१;

१०. तथात्र द्विजम्] क१; तथात्राद्विजम्- मु

११. सामान्यतः श्रुतस्य] मु सामान्यश्रुतस्य- क१;

ब्राह्मणादिशब्दस्य छागपशुन्यायेन वैदिकभ्रष्टब्राह्मणादिविशेषपरत्वं कल्प्यते[१]। यथा सामान्यतः श्रुतस्यापि[२] ब्राह्मणवाक्यस्थपशुशब्दस्य मन्त्रकाण्डस्थितछागशब्दानुसारेण छागरूपपशुविशेषपरत्वम्। यथावा

यथा वह्निर्महादीप्तः काष्ठमावृत्य निर्दहेत्।

तथा शुभाशुभं कर्म ज्ञानाग्निर्दहति क्षणात्। इति शिवज्ञानागमवचने सामान्येन श्रुतस्यापि कर्मशब्दस्य प्रारब्धकर्मणां भोगादेव[३] क्षयो न ज्ञानवह्निना। इति विशेषनिषेधकरसुप्रभेदवचनानुसारेण प्रारब्धरूपकर्मविशेषपरत्वमिति। अत्रोच्यते– उक्तपुराणवचनमार्षं वाक्यमागमश्च शिववाक्यम्। न चार्षवाक्येन शिववाक्यस्य बाधो युक्तः संकोचस्यापि एकदेशबाधकत्वात्। तदुक्तं सर्वज्ञानोत्तरे–

न पुंभिरार्षं वाक्यं नार्षैर्वाक्यैश्च दैविकम्।
न दैवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मना।
न शैवं वैष्णवेनापि बाध्यते तु कदाचन। इति।

न चात्र विष्णुवाक्येन शिववाक्यस्य अबाध्यत्वमुक्तं[४] न त्वार्षेणेति वाच्यम्। यदा विष्णुवाक्येनाबाध्यत्वमुक्तं तदा ततोऽपि त्रिचतुरकक्ष्यान्तरितार्षवाक्याबाध्यत्वस्य कैमुतिकन्यायसिद्धत्वात्। किं च श्रुतिभ्रष्ट इति वाक्यं वेदाननुसारिबौद्धकापालाद्यागमविषयमेव तत्रैव वेदभ्रष्टाधिकारत्वसम्भवात्। न तु वेदानुसारिसिद्धान्तशिवागमविषयमपि। तत्र तदसम्भवात्। तथा हि

यस्मिन् वर्णे स्थितो दीक्षां प्राप्तो देही शिवात्मिकाम्।
तत्रैव संस्थितो दीक्षां शिवधर्मं च पालयेत्। इति।
यो यस्मिन्नाश्रमे तिष्ठन् प्राप्तो दीक्षां शिवात्मिकाम्।
स तस्मिन्नेव संतिष्ठन् शिवधर्मं च पालयेत्।
इति वर्णाश्रमाचारात् मनसापि न लंघयेत्।इति।

वैदिकीं तु पुरा कृत्वा[५] पश्चात् शैवीं[६] समाचारेत्। इत्यादिभिः बहुभिः आगमवचनैः शैवाश्रमिण एव श्रुतिस्मृतिचोदितवर्णाश्रमाचारोऽवश्यं कर्तव्यः तत्रापि शैवाचारात् पूर्वमेव कर्तव्य इति प्रतिपाद्यते। शैवागमस्य भ्रष्टाधिकारित्वे वैदिकेष्वपि

---

१. कल्प्यते]मु कथ्यतेक१;
२. सामान्यतः श्रुतस्यापि] मु सामान्यश्रुतस्यापि– क१;
३. भोगादेव] क१; भोगात्–मु
४. अबाध्यत्वमुक्तं] मु बाध्यत्वमुक्तं– क१;
५. पुरा कृत्वा] क१;पुरस्कृत्य– मु
६. पश्चात् शैवीं] क१;शैवीं वृत्तिं– मु

वेदभ्रष्टाधिकारित्वमुक्तं स्यादिति स्ववचनव्याहतिः। उक्तानि वा[१] वचनानि पीड्येरन्। तस्मात् कामिकादिवेदानुसारिशैवागमेषु वेदभ्रष्टानां श्रौत इवाधिकारसम्भवात्। वेदाननुसारिषु बौद्धवामपाशुपतादिषु तेषामधिकारसम्भवात् तद्विषयाण्येव वेदभ्रष्टानां तन्त्राधिकारप्रतिपादकानि श्रुतिभ्रष्ट इत्यादीनि वचनानि[२]। अपि च भ्रष्टानां तन्त्राधिकारप्रतिपादकवचनेषु क्वचित् वेदमार्गपरिभ्रष्ट इत्यादि[३] वेदेतरेति स्फुटमागमस्य विशेषः अपि च भ्रष्टानां तन्त्राधिकारात् एतत्[४] वेदाननुसारिवामादितन्त्रविषयाण्येव। न चेदं यथाश्रुतागमस्वरूपकथनपरमिति[५] वाच्यम्। वेदशब्दस्य वेदानुसार्यर्थकत्वेन[६] विशेषणत्वे सम्भवति स्वरूपकथनपरतया व्याख्यानस्यासंगतत्वात्। तथा च वेदानुसारिकामिकादीतरागमं वामादिकं गत्वेति अस्यार्थः। तथा चैतद्वचनानुसारेण यत्रापि श्रुतिभ्रष्ट इत्यादिवचनान्तरेषु वेदेतरेत्यागमविशेषणं नास्ति तत्रापि विशेषिततद्वचनगतश्रुतिभ्रष्टत्वादिविशेषणसाम्येन तदैकार्थ्यप्रत्यभिज्ञानात् आगमतन्त्रादिशब्दैः वेदाननुसार्यागम एवोच्यत इति तान्यपि अवैदिकागमविषयाण्येवेति। किं च तद्विषयत्वेऽपि श्रुतिभ्रष्ट इत्यादीनि भ्रष्टानां न तन्त्राधिकारप्रतिपादनपराणि किन्तु बह्वायाससाध्यस्मार्तद्वादशवार्षिकमरणान्तकप्रायश्चित्तेषु[७] उद्वेजितस्य लघुप्रायश्चित्तान्तरोप-देशपराण्येव।

धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणान्तिकम्।
प्रायश्चित्तं मनुष्याणां पापिष्ठानां सुदारुणम्।
भयं दुर्बलचित्तानां मरणे जायते भृशं।

तेषामेवाभिरक्षार्थं खल्हं तन्त्रमुक्तवान्। इति साम्बपुराणे तन्त्रस्य स्पष्टं लघुप्रायश्चित्तार्थकत्वप्रतिपादनात् श्रुतिपथगलितानामित्यत्र श्रुतिभ्रष्टाधिकारपरत्वशङ्कैव[८] नास्ति। श्रुतिपथगालितशब्दस्य तदर्थकत्वाप्रसिद्धेः। किन्तु एतत्प्रतियोगिपरश्रुतिपथ-निरतानामित्युत्तरवाक्यानुसारेण श्रुतिपथनिरतप्रतियोगी श्रुतिपथगलितशब्दार्थः[९] स्वीकर्तव्यः।

---

१. समुत्पूय] क१; मु कोशे नास्ति
२. प्रत्युक्तोक्तयुक्त्या न भ्रष्टाधिकारित्वमेव शैवागमानाम्] क१; मु कोशे नास्ति
३. वेदमार्गपरिभ्रष्ट इत्यादि] क१; वेदमार्गपरिभ्रष्टः प्रायश्चित्तेष्वनुन्मुखः। वेदेतरागमं गत्वा तदुक्तं धर्ममाचरेत्। इत्यादौ–मु
४. विशेषः। अपिच भ्रष्टानां तन्त्राधिकारात् एतत्] क१; विशेषणात् भ्रष्टानां तन्त्राधिकारवचनानि– मु
५. यथाश्रुतागमस्वरूपकथनपरमिति] क१; आगमस्वरूपकथनपरमिति– मु
६. वेदानुसार्यर्थकत्वेन] मु वेदानुसारार्थकत्वेन– क१;
७. बह्वायाससाध्यस्मार्तद्वादशवार्षिकमरणान्तकप्रायश्चित्तेषु] मु बह्वायाससाध्यस्मार्तद्वादशवार्षिकमरणान्ति-कप्रायश्चित्तेषु– क१;
८. श्रुतिभ्रष्टाधिकारपरत्वशङ्कैव] मु भ्रष्टाधिकारपरत्वशङ्कैव– क१;
९. श्रुतिपथनिरतप्रतियोगी श्रुतिपथगलितशब्दार्थः] मु श्रुतिपथनिरतप्रतियोगिकश्रुतिपथगलितशब्दार्थः– क१;

स चानभिरतिरेव[१]। अनभिरतिश्च तत्र गुरूपायत्वादिना जन्मान्तरवासनाराहित्येन वा कर्मविशेषेण वा भवति। यथा वैदिकेष्वेवं केषांचित् स्मार्तेष्विव पौराणिकेष्विव च साध्ये ज्योतिष्टोमादौ न रतिः। एवं चोक्तयुक्त्यैव स्त्रीशूद्रद्विजबन्धूनामित्यादिकमपि वामादिविषयमेव। तस्मादभ्रष्टानां दशानां[२] चातुर्वर्णिकानामनुलोमानां च सिद्धान्तशैवदीक्षायामधिकार इति स्थितम्। अथवा निर्वाणदीक्षायामित्यभिप्रायेणैवाद्विजमित्यादिवचनम्। तत्र हि विशेषदीक्षया दीक्षितानां पुत्रकाणामेवाधिकारः। तत्र शूद्रादीनामपि द्विजत्वमस्त्येव। तस्यां दीक्षायां वागीश्वर्यादियोजनया[३] तेषां द्विजत्वसंपादनात् अतो यथाश्रुतेनैवोपपत्तिः। क्रूरं हिंसकं निर्भयमैहिकामुष्मिकोभयविधभयरहितं क्रियाच्युतं सदाचारहीनं तेन तत्प्रतियोगिनामधिकारिविशेषणत्वं सूचितम्। अत्रत्यवाशब्देनाभक्त्यादीनां परस्परनिरपेक्षणादेव[४] अनधिकारित्वसम्पादकत्वकथनादेतत्प्रतिपादितानां समुदितानामेवाधिकारिविशेषणत्वं सूचितम्। मदाज्ञा सदाशिवाज्ञारूपा एषा अनधिकारिणि क्रियमाणा दीक्षा हन्ति एतादृशं गुरुं शिष्यं चेति शेषः। इति शब्दः सदाशिववचनानुवादः। आज्ञा पारमेश्वरीति पदद्वयं श्रीकण्ठवचनम्। पारमेश्वरी परमेश्वरसम्बन्धिनी।

**(वृत्तिः)** क्रूरं दयारहितं निर्भयं शिवशास्त्रनिषिद्धकरणे भयरहितम् अभक्तं शिवागमतद्विधिश्रद्धापूर्वं शिवभक्तभक्तिरहितम्। भक्तिश्च योग्यतावेशलक्षणज्ञानविशेषः। तदुक्तम् –

अन्योऽपि योग्यतावेशलक्षणाप्यत्र निष्ठता।
भक्तित्वेन समाख्यातो विज्ञानावयवोऽप्यथ।। इति।

अद्विजं विशेषदीक्षायामदत्तशुद्धद्विजत्वं तदेतद्द्विवजत्वहीनः। ब्राह्मणोऽपि तदेतच्छुद्धद्विजं प्रति विप्रादयोऽपि[५] शूद्राः स्युरिति कामिकश्रुतेः। शूद्र इति तं दीक्षयित्वा गुरुः स्वात्मनः पुनर्दीक्षां समाचरेदिति। पुनः कामिकश्रुतेः[६]

असच्छूद्रस्यापि तत्र दत्तशुद्धद्विजत्वश्रुतेः। तदुक्तं स्कन्दकालोत्तरे –

दहेद्वै शूद्रजातिं तु अनलेन तु षण्मुख।
सच्छूद्रत्वं योजयित्वा क्रिया वै षोडशं कुरु।
साक्षाद्विप्रत्वमापन्ने पश्चाद्दीक्षां कुरुष्वथ।।इति।

---

१. चानभिरतिरेव] क१; तत्राभिरतिरहित एव–मु
२. दशानां] मु सप्तानां– क१;
३. वागीश्वर्यादियोजनया] मु वागीश्वर्यादियोजनतया– क१;
४. परस्परनिरपेक्षणादेव] क१; परस्परनिरपेक्षणमेव– मु
५. विप्रादयोऽपि ] ज२; शुद्धविप्रादयोऽपि– ज१;
६. कामिकश्रुतेः ] ज१; कामिकश्रुत्या– ज२

क्रियाच्युतं तदनन्तरकर्तव्यक्रियाभ्यो गलितं मदाज्ञा मदीयशक्तिरूपा दीक्षा आचार्यैर्लोभाज्ञानादिभिः कृता हन्ति शूद्राणामुपनयनादिवदनधिकारित्वात् निष्फला भवतीति यावत्। इति इत्थं पारमेश्वरी परमशिवसम्बन्धिनी आज्ञाशक्तिस्तच्छिववद-नसमुत्थोक्त्युपबृंहिता निर्गता मम गुर्वनन्ताग्र इत्याशयः। ननु पुरैतद्विलक्षणं दृष्ट्वा यं शक्तिपातपवित्रित इति निश्चित्य कृतदीक्षे पुरुषे[1] पुनः समयोल्लङ्घनाद्यात्मकः तिरोभावो[2] न भवेत्। दृश्यते चासौ ततो नानुग्रहहेतुः शक्तिपातः। सत्यम्। सा शक्तिः पक्वात्मनि पतन्ती सती मलक्षयकरात्मावलोकनं[3] कृत्वा विद्युद्वत् स्वव्यापारान्निवर्तते। कृतस्य पुनः करणासम्भवादिति न्यायसिद्ध एवायमर्थः। दृष्टमपि समयोल्लङ्घनादिमोक्षप्राप्तिरसंशय-मस्ति। तथाहि सम्यग्दीक्षितोऽपि कदाचिद् दैवान्मानुष्याद् वा प्रतिबलात् सर्वात्मा सर्वात्मना वा तिरोहितः कृतप्रायश्चित्तो मोक्षं याति भूयो कृतप्रायश्चित्तसमयातिक्रमफलं तत्प्रायश्चित्तलक्षणं दीक्षाफलविघ्नभूतं काम्यरूपफलमिवात्रैव "समयोल्लङ्घनात् प्रोक्तं क्रव्यादत्वं शतं समाः" इति उक्तप्रकारेण भुक्त्वा[4] "प्रायश्चित्तविशुद्धस्य गतिः शुद्धा प्रकीर्तिता" इति श्रुतेर्दीक्षितस्य दीक्षादिपूर्वशास्त्रादिसंस्कारकनिहितबुद्ध्यधिकरणसंस्कारसमुत्थायाः पाशनिवृत्तिपूर्व-शिवत्वाभिव्यक्तिलक्षणपुरुषाधिकरणसंस्कारहेतुभूतायाः मन्त्रानुध्यानाद्यच्युतिकर-बुद्ध्यधिकरणवासनायाः योगात्। दीक्षा शिवयोगपदपठितशिवोऽहम्भावात्मसंस्कारक-समुत्थः संस्कारस्तु यः स तु शिवत्वाभिव्यक्तिलक्षण इति वैदिकसांख्ययोगसंस्कारादिरिव न शरीरचित्ताद्यधिकरणः किन्तु चैतन्याधिकरण इति चैतन्याधिकरणदीक्षाफलं मोक्षं स तिरोहितो लभते। ततस्तु दीक्षा स्वलक्षणसहिता स्वफलं न व्यभिचरतीति न किञ्चिदसमञ्जसम्। शक्तेः प्रत्यवायहेतुता वा किमिति नाशंकनीयम्। मन्दत्वोपचारेणेति मन्तव्यत्वात्। अनुग्रहशक्तिरेव तिरोभावात्मना तावति गच्छतीति शिवशास्त्रविदः।

**( व्याख्या )** पूर्वोक्तानुग्रहरूपाया दीक्षाया मुक्तिरूपफलमाह–

**( वृत्तिः )** सांख्यानामिव केवलं ज्ञानेन वा पातञ्जलानामिव केवलं योगेन वा वेदान्तवादिनामिव केवलं संन्यासेन वा जैमिनीयानामिव पौरुषक्रियया वा स्वाभाविकमुक्तिरित्याशंकायामाह –

**दीक्षैव मोचयेत् पाशान् शिवत्वं च ददात्यणोः।।४७।।**

**( व्याख्या )** पाशान् मलमायाकर्मलक्षणान् बहुवचनसामर्थ्यात् मोचयेत्। अत्र मलस्य मोचनं नाम न मलनाशः। तस्यैकत्वेन तन्नाशे एकमुक्तौ सर्वमुक्तिप्रसङ्गात्। किन्त्वावारकतच्छक्तेर्विनाशः। न च तत्रापि दोषतादवस्थ्यं प्रतिपुरुषं तत्रावारकशक्तिभेदाङ्गीकारात्। तदुक्तं मृगेन्द्रे–

---

१. कृतदीक्षे पुरुषे ] ज१; कृतदीक्षः पुरुषः– ज२

२. तिरोभावो ] ज२; तिरोभावेन– ज१;

३. मलक्षयकरात्मावलोकनं ] ज१; मलक्षयकरात्मकावलोकनं ] ज२,ज३;

४. उक्तप्रकारेण भुक्त्वा ] ज३;उक्तप्रकारेण भूत्वा– ज१; उक्तप्रकारो भुक्त्वा– ज२

तदेकं सर्वभूतानामनादि निबिडं महत्।

प्रत्यात्मस्थस्वकालान्तापायिशक्तिसमूहवत्।इति।नन्वेवमपि[१] मलशक्तेर्नाशो नाम न सर्वात्मना निवृत्तिः शक्तिनाशे शक्तिमतोऽपि नाशप्रसङ्गात् इति चेत्। सत्यम्, किन्तु मलशक्तिविरोध[२] इवेत्यवगन्तव्यम्। तदुक्तं किरणे द्वितीयपटले मलविश्लेषानुपपत्तिप्रश्नोत्तरत्वेन–

उपायात् शक्तिसंरोधो यते तत्र तथा मले।

यथाग्नेर्दाहिका शक्तिः मन्त्रेणातिनिरुध्यते।

तथा तच्छक्तिसंरोधात् वियुक्तेत्यपि कथ्यते[३]। इति। किं च शिवत्वं अनवच्छिन्नाभिव्यक्तज्ञानक्रियाशक्तिमत्वरूपं ददाति। अत्र दानशब्दार्थस्त्वव्यवहितोत्तरग्रन्थे स्वेनैव वक्ष्यते। अत्र एवकारेण परमाभिमतं ज्ञानं निवर्त्यते। अत्र मलोपादानं मुक्तौ अभिव्यक्तज्ञानायावेन[४] पाषाणतुल्यतया मुक्तेः पुरुषानपेक्षितत्वनिवृत्त्यर्थम्। तेन मुक्तौ ये ज्ञानाभावं वदन्ति ते निराकृताः। न च मलनिवृत्तेरपि सुखदुःखाभावान्यतरत्वाभावेन स्वतोऽपुरुषार्थत्वमिति वाच्यम्। मलस्य दुःखसाधनत्वेन तन्निवृत्तेरप्यहिकण्टकादिपरिहारस्येव प्रायश्चित्तादिना पापनिर्हरणस्येव वा स्वतः पुरुषार्थत्वात्। मलिनावृत्तावपि कर्मसत्वे देहाद्यारम्भकस्यावश्यकत्वात् तन्निवृत्तिरपि अपेक्षितेति तदर्थं कर्मोपादानम्। अनेन ये मलविदारणमभ्युपगम्य कर्मनाशने उपेक्षां कुर्वन्ति ते पराकृताः। मायोपादानं च ज्ञानक्रियाशक्तेरपसारितेऽपि मले वायुविक्षिप्तदीपवन्मायेयेन कलादिना[५] विक्षेपकेण मन्दप्रकाशत्वनिवृत्त्यर्थम्। अनेन मायोपादानेन ये मुक्तौ शरीरमभ्युपगम्य गाणपत्यादिसालोक्यादिमुक्तिमभ्युपगच्छन्ति ते पराकृताः। शरीरस्य भावकार्यत्वेन नाशे पुनः संसारप्रसङ्गात्। ननु मलस्य परिपक्वत्वात् स्वत एव विनाशोऽस्तु दृष्टत्वात् पाशरूपकलयैव वा निवृत्तिरस्त्विति चेन्न। परिपक्वत्वेऽपि तस्याचेतनस्य चेतनव्यापारं विना स्वतो निवृत्त्यसम्भवात्। तदुक्तम्–

न पुंसां मोचने शक्तिः पाशानामपि विद्यते।

रज्ज्वादि न स्वयं बद्धं विमुञ्चद् दृश्यते यतः।इति।कलायाश्च संकुचितमलनिवर्तकत्वदर्शनेऽपि असंकुचितमलनिवर्तकत्वादृष्टेः। अन्यथा यत्नं विना सर्वेषां मुक्तिप्रसङ्गः। तदुक्तं–

स्वाकाररञ्जितां पाशाः पाशवृत्त्यनुरागिणीम्।

क्रमान्वितां विनाशार्थां व्याहतामल्पगोचराम्।

तयोर्व्यक्तिं प्रकुर्वन्ति निःसंज्ञत्वात् भवेरिताः।

---

१. नन्वेवमपि] मु नन्वत्र– क१;

२. मलशक्तिनिरोधः] मु मलभाव– क१;

३. कथ्यते] मु शुध्यते–क१;

४. अभिव्यक्तज्ञानाभावेन] मु अभिव्यक्तं ज्ञानाभावे– क१;

५. कलादिना] मु कालादिना– क१;

शक्नुवन्ति न मोक्षाख्यां येनास्याः सा विलक्षणा। इति। दीक्षा च प्रथमं द्विधा निरधिकरणा साधिकरणा चेति। निरधिकरणा च द्विविधा साधिकारा निराधिकारा चेति पूर्वत्रोक्तैव[१]। इयं चोभयविधा निर्वाणदीक्षैव। साधिकरणा च दीक्षा त्रिविधैव। केवलसमयदीक्षा विशेषदीक्षा निर्वाणदीक्षा चेति। त्रिविधापि दीक्षा पुनः द्विविधा होत्री अहोत्री च। होत्री नाम होमसंयुक्ता अहोत्री तद्रहिता। केवलसमयदीक्षा तु यस्याः पाशच्छेदादिकं नास्ति रुद्रपदयोगश्च सैव। सैवेश्वरपदे नियोजनयुता विशेषदीक्षा। निर्वाणदीक्षा तु यस्याः पाशच्छेदादिकं परतत्त्वे नियोजनं च सैव। तदुक्तं सुप्रभेदे-

यत्र रुद्रपदे योगो योगो यत्रेश्वरपदे।
शिखाच्छेदो न यत्रास्ति सा दीक्षा सामयी द्विधा।
यत्र पाशशिखाच्छेदो योगः शिवपदे भवेत्।

निर्वाणदीक्षाख्या तु सा इत्यादि। अत्र पाशच्छेदरहितत्वमनुस्यूतं धर्ममादाय विशेषदीक्षाया अपि सामयित्वेन निर्देशः। रुद्रपदेश्वरपदयोजनभेदमादाय द्विधेति भेदनिर्देशो द्रष्टव्यः। निरुक्ता केवलसमयदीक्षा विशेषदीक्षा च स्वतन्त्रतत्तत्पदप्राप्तिरूपसाधनत्वात् प्रधानभूते निर्वाणदीक्षार्थे अप्रधानभूते समयविशेषदीक्षेत्वन्ये। तत्र समयदीक्षायां प्रतिलोमादिसर्वेषामपि अधिकारः। तदुक्तं समयेन विचारयेत् इति। यस्य मन्दतरशक्तिपातः तस्योक्ताधिकारं मन्दतरभक्त्यादिचिह्नेन ज्ञात्वा तदधिकारोचितां केवलसमयदीक्षां कृत्वा रुद्रपदे च संयोज्य तदुचितान् तस्यावश्यकर्तव्यान्[२] शिवालयशिवभक्तपरिचर्यादिधर्मान् शिक्षयित्वा[३] आचार्योऽनुगृह्णाति। एतद्दीक्षया संस्कृतः समयीत्यभिधीयते। विशेषदीक्षा तु[४] योग्यायोग्यभेदेन द्विविधा। आगमाध्ययनार्थज्ञानानुष्ठानलिङ्गपीठार्चनादियोग्यतां[५] वाऽऽपाद्येश्वरपदप्राप्तिसाधनत्वात्। तदुक्तं-

एवं समयदीक्षायां विशिष्टायां विशेषतः।

वह्निहोमागमज्ञाने योग्यः संजायते शिशुः। इति। विशिष्टायां समयदीक्षायामिति समयदीक्षाविशेषभूतायां विशेषदीक्षायामित्यर्थः। एवं[६] समयदीक्षायां भवेद्योग्यः शिवार्चने। इति

---

१. पूर्वत्रोक्तैव] क१;सा द्विधा पूर्वत्रोक्तैव-मु
२. संयोज्य तदुचितान् तस्यावश्यकर्तव्यान्- मु संयोजनस्यावश्यकर्तव्यतया- क१;
३. शिवालयशिवभक्तपरिचर्यादिधर्मान् शिक्षयित्वा- मु शिवालयशिवभक्तपरिचारादिधर्मदीक्षापुरःसरम्- क१;
४. तु] क१; तु पूर्वोक्ताधिकारैव। सा च- मु
५. आगमाध्ययनार्थज्ञानानुष्ठानलिङ्गपीठार्चनादियोग्यतां] क१; आगमाध्ययनार्थज्ञानानुष्ठानलिङ्गपीठार्चन योगयोग्यतां वाऽऽपाद्य केवललिङ्गपीठार्चनादियोग्यतां- मु
६. एवं] क१;इत्थं- मु

च। तथा च[1] अनुपनीतानां वेदाध्ययने यथा नाधिकारः[2] एवं शिवदीक्षारहितस्यापि आगमाध्ययने तदर्थानुष्ठाने चानधिकार इत्युक्तं भवति। दीक्षां विना अध्ययने दोषश्च सुप्रभेदे श्रूयते–

शुद्धशैवमिदं तन्त्रं न देयं न प्रकाशयेत्।

दीक्षितस्य च धीरस्य शिवभक्तिपरस्य च।

श्रावणीयं न चान्यत्र कथनं हि प्रशस्यते। इति। एवं च यस्य मन्दशक्तिपातः तस्याधिकारं[3] मन्दया भक्त्या ज्ञात्वा सामान्यदीक्षापुरःसरं तदधिकारोचितां विशेषदीक्षां[4] कृत्वा पूर्वोक्तधर्मान् शिक्षयित्वा उपदिशति। एतद्दीक्षाया संस्कृतश्च पुत्रक इत्युच्यते। इयं च पूर्वोक्तदीक्षाद्वयी नित्यमात्राधिकारित्वात् निरधिकारेत्युच्यते। यस्य तु तीव्रस्तीव्रतरो वा शक्तिनिपातः तस्य तदधिकारं तीव्रतीव्रतर मुक्षादिभिर्ज्ञात्वा निर्वाणदीक्षाङ्गभूते[5] साधिकारे समयविशेषदीक्षे कृत्वा निर्वाणदीक्षां करोति। निर्वाणदीक्षा च द्विविधा सद्योनिर्वाणदा असद्यो निर्वाणदा। तत्र सद्योनिर्वाणदा सा यत्र प्रारब्धकर्मणोऽपि नाशः। ननु प्रारब्धं भोगतो नश्येदित्यादिना प्रारब्धस्य भोगैकनाश्यत्वश्रवणात् कथं दीक्षया नाश इति चेत्। सत्यम्। क्षीराक्तैराम्रपर्णैश्च ज्वरं सद्यो विनाशयेदिति न्यायेन तत्र तीव्रवेगाभिधानयोः प्रारब्धयोः भोगैकनाश्यत्वेऽपि मन्दसुप्तयोः दीक्षयापि नाश्यत्वाभ्युपगमात्। अत्र च सद्योनिर्णदादीक्षाविधायकवचनमेव प्रमाणम्। एवं च यत्रात्यन्ताभिज्ञेन गुरूणा शिष्यगतं तीव्रतरं शक्तिनिपातं तादृशमलपाकं च तदसाधारणचिह्नैः ज्ञात्वा प्रारब्धस्यापि सुप्तस्य मन्दस्य वा नाशाय दीक्षा क्रियते सा सद्योनिर्वाणदा। असद्योनिर्वाणदापि द्विविधा देहपातमात्रेण निर्वाणदा कालान्तरे निर्वाणदा चेति। तत्राद्या तु शिवधर्मिणीत्युच्यते। तल्लक्षणं तु

धर्माधर्मात्मकं कर्म प्रागागामिविचित्रकम्।

संचिन्त्य शोध्यते यत्र सैवोक्ता शिवधर्मिणी। इति कथितम्। इयमेव नैष्ठिकीत्युच्यते। द्वितीया लोकधर्मिणी तल्लक्षणं तु अधर्ममात्रे संशुद्धे द्वितीया लोकधर्मिणी। इति। इयमेव भौतिकीत्यपि उच्यते। उभयविधापि पुनः सबीजनिर्बिजभेदेन द्विधा। तत्र समयाचारेण संयुक्ता सबीजा असमर्थानां समयाचारशोधनेन तद्रहिता निर्बीजा। तदुक्तं

समयाचारसंयुक्ता सबीजा जायते नृणाम्।

निर्बीजा ह्यसमर्थानां समयाचारवर्जिता। इति। उक्ता चासद्योनिर्वाणदा सबीजनिर्बीजरूपेण द्विविधा भिन्ना। पुनश्चाक्षुष्यादिभेदेन सप्तविधा। तदुक्तं–

---

१. तथा च] मु एवम्– क१;

२. नाधिकारः] मु नाधिकारित्वम्– क१;

३. तस्याधिकारं] क१; तस्योक्ताधिकारं– मु

४. तदधिकारोचितां विशेषदीक्षां] मु विशेषदीक्षां– क१;

५. निर्वाणदीक्षाङ्गभूते– मु तदङ्गभूते– क१;

चाक्षुषी स्पार्शनी दीक्षा वाचिकी मानसी तथा।

शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा। इति। तत्र चक्षुषी नाम–

चक्षुर्निमील्य यत्तत्वं ध्यात्वा शिष्यः समीक्ष्यते।
पाशबन्धविमोक्षाय दीक्षेयं चाक्षुषी भवेत्।

स्पार्शनी तु –

निधाय दक्षिणे हस्ते शिवं ब्रह्माङ्गसंयुतम्।
संस्पृशेत् शिष्यमूर्धादि स्पर्शदीक्षा भवेदियम्।

वाग्दीक्षा च–

तत्त्वे चित्तं समास्थाय बृह्मितान्तरचेतसा।
उच्चरेत् संहितामन्त्रान् वाग्दीक्षेयं प्रकीर्तिता।

मानसी तु–

मानसं विधिमश्रित्य मानसीत्यभिधीयते।

शास्त्री च–

शास्त्रस्य संप्रदानेन शास्त्रदीक्षा समीरिता।

योगदीक्षा च–

योगेन योगदीक्षा स्यात् शिवतत्त्वे सा[१] व्यवस्थिता।

हौत्रीच–

रजः कुण्डवती हौत्रीत्यादिना प्रदर्शिता।
हौत्र्यपि द्विविधा ज्ञानवती क्रियावती चेति।

तत्र ज्ञानवती–

विनेज्यानलकर्मादि मनोव्यापारमात्रतः।

दीक्षा ज्ञानवती प्रोक्ता सम्यक् तत्त्वावबोधिका। इति प्रदर्शिता।

क्रियावती तु–

इज्यानलवती या तु क्रियाकौशलसम्भवा।

क्रियावत्त्यथ साऽनेका इत्यादिना प्रदर्शिता द्रष्टव्या। दीक्षा चागमिक-नित्याद्यधिकारागमश्रवणाधिकारान्यतरनिर्वर्तनसमर्था शिवव्यापारात्मिका शक्तिः। आगमश्रवणाधिकार इति पदपरित्यागे[२] निर्वाणदीक्षायामव्याप्तिः स्यात्। अत

---

१. शिवतत्त्वे] मु शिवत्वे सा- क१;

२. पदपरित्यागे] मु पदपरित्यागेन- क१;

उक्तमागमश्रवणेति। तावत्युक्ते समयविशेषदीक्षयोरव्याप्तिः[1] अत उक्तमागामिकेत्यादि। एतावत्युक्ते अनुलोमत्वचातुर्वर्णिकत्वादौ उक्ताधिकारनिर्वर्तनसमर्थेऽतिव्यापिः स्यात्। अत उक्तं शिवव्यापारात्मिकेत्यादि[2]। शिवव्यापारात्मिका शक्तिः दीक्षेत्युक्ते शिवकर्तृकसृष्ट्यादावतिव्याप्तिः स्यात् तदर्थमुक्तमागमिकेत्यादि। एवं च

आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः।

भगवाननुगृह्णाति स एव सकलानपि।

अत्रैव[3] दीक्षा मदाज्ञेति दीक्षायाः शिवशक्त्यात्मकत्वश्रुतेः नासम्भवः। आज्ञाशब्दश्च शक्तिपर्यायः। तथा चोक्तं[4] शिवज्ञानबोधे-

करोति संसृतिं पुंसामाज्ञया समवेतया। इति। अत एव च यजनहवनादिषु देशिकव्यापारेषु अव्याप्तिः निरस्ता। शिवशक्तेरेव दीक्षात्वाभ्युपगमेन तेषामलक्ष्यत्वात् तेषु दीक्षेति व्यपदेशश्च दीक्षाविभाजकोपाधित्वेन गौणः। तेषां शिवशक्त्यात्मकदीक्षाविभाजकोपाधित्वं[5]

चाक्षुषी स्पार्शनी दीक्षा वाचिकी मानसी तथा।

शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा। इत्यादिना प्रदर्शितम्। अत एव स्पर्शवतीत्यादिव्यवहारः शास्त्रेषु आञ्जस्येन उपपद्यते। स्पर्शक्रियादेरेव दीक्षात्वे तदाञ्जस्याभावात्। एवमुक्तलक्षणदीक्षा च षडध्वशुद्धिपूर्विकेति "विचित्रपुरमालाभिः खचितानि महान्ति च"। इत्यादिना सूचितम्। विस्तरभयात् अनुक्ता। अध्ववर्गो[6] निरूप्यते। तत्राध्वानो नाम कलातत्त्वभुवनवर्णपदमन्त्रात्मान इति षड्विधाः। षड्विधाध्वसद्भावे च श्रुतिः प्रमाणमस्ति। एषां चाध्वव्यपदेशनिमित्तम्।

त्यक्त्वैकमेकं संप्राप्य कलादिष्वजरामरम्।

पदमासाद्यते पुंभिः अध्वानः स्युः कलादयः[7]। इति। कलादिषु क्रमेणैकैकं विहायान्यदन्यत् प्राप्य मुक्तिप्राप्तेः अध्वसादृश्यं रत्नत्रये कथितम्। तत्र कलाः निवृत्तिप्रतिष्ठाविद्याशान्ति-शान्त्यतीताभिधानाः पञ्च। अत्र निवृत्तिकलापदप्रवृत्तिनिमित्तमपि -

तत्प्रलीनाणुसंघस्य संकल्पो विनिवर्तते।

अनासाद्य फलं तेन निवृत्तिरभिधीयते। इति रत्नत्रयोक्तं द्रष्टव्यम्। तत्र निवृत्तिकलायां पार्थिवतत्त्वमेकं तत्र भुवनान्यष्टोत्तरशतम्। तथाहि ब्रह्माण्डकटाहः शतकोटियोजनविस्तारः

१. समयविशेषदीक्षयोरव्याप्तिः] मु समयदीक्षायामव्याप्तिः- क१;
२. शिवव्यापारात्मिकेत्यादि] मु शिवव्यापारात्मिका शक्तिः-क१;
३. अत्रैव] मु तत्रैतत्- क१;
४. चोक्तं] मु च- क१;
५. शिवशक्त्यात्मकदीक्षाविभाजकोपाधित्वं च] मु दीक्षा शिवशक्त्यात्मकविभाजकोपाधित्वं- क१;
६. सूचितम्। विस्तरभयात् अनुक्ता। अध्ववर्गो] क१; सूचितो विस्तरभयादनुक्तोऽध्ववर्गोऽत्र- मु
७. अध्वानः स्युः कलादयः] क१;अतोऽध्वानः कलादयः-मु

तत्रायःकटाहदलस्थौल्यं कोटियोजनमितम्। तदुपरि कल्पान्तसूर्यकोटिसमानतेजसः स्वसमानतेजोभिरनेकै रुद्रैः परिवृतस्य सर्वसंहारकारकस्य कालाग्निरुद्रस्य कनकमयं सदनं कोटियोजनमितम्। तस्य कालाग्निरुद्रस्य ऊर्ध्वप्रवृत्ताः ज्वालाः दशकोटिपरिमिताः तद्धूमस्तु पञ्चकोटिमितः। तदुक्तम्–

कपालमर्बुदं स्थौल्यात् ब्रह्मणोऽण्डस्य योजनैः।
तस्यान्तः काञ्चनं धाम कालाग्नेस्तावदेवहि।
यत्रान्तकालतीक्ष्णांशुकोटितेजाः तथाविधैः।
रुद्रैरास्ते वृतो देवः कालाग्निरिति विश्रुतः।
सर्वाध्ववर्तिभूतानां[१] यस्मिन् उद्वृत्ततेजसि।
भयम् उत्पद्यते[२] शक्त्या संहन्त्र्या चोदिते[३] प्रभोः।
तस्य स्वभावतो ज्वालाः प्रवृत्ता दशकोटयः।

योजनानां तदर्धेन धूमः सान्द्रः सुदारुणः। इति। तदुपरि प्रत्येकं नवतिलक्षपरिमिताः प्रत्येकलक्षपरिमितद्वात्रिंशदन्तरालयुक्ताः नरकविस्ताररूपाः त्रयस्त्रिंशत् पुटाः। एते च पापकृतां यातनायै अनन्तेशेन निर्मिताः। नरकमहानरकनरकराजनरकराजेश्वराख्यया चतुष्प्रकाराः। तेषु रौरवध्वान्तशीतोष्णसन्तापाब्जमहाब्जकालसूत्रसंज्ञाः प्रथमाः। सूच्यास्य कालखड्गसुक्षुर–धाराम्बरीषतप्तांगारमहादाहसन्तापनामानो द्वितीयाः। लाक्षाप्रलेपमांसादनिच्छ्वासनसोच्छ्वास युग्मार्द्रशाल्मलीलोहप्रदीप्तक्षुत्पिपाकक्रिमिनिचयाभिधानास्तृतीयाः– मु[४]।

कृमीणां निचयश्चेति राजानः परिकीर्तिताः।
लोहस्तम्भोऽथ विण्मूत्रस्तथा वैतरणी नदी।
तामिस्त्रश्चान्धतामिस्त्रः कुंभीपाकः सरौरवः[५]।
तृतीयः– वीच्याख्याश्चतुर्थः। तदुक्तम्[६]
ततः पुरा त्रयस्त्रिंशद्दशलक्षोनकोटिकाः।
तदन्तराणि च द्वात्रिंशत् लाक्षिकानि दुरात्मनाम्।
स्थानानि यातनाहेतोः निर्मितान्यूर्ध्ववेधसा।
तानि ते नामभिर्वक्ष्ये द्विजमुख्य निबोध मे।
रौरवध्वान्तशीतोष्णसन्तापाब्जा महाम्बुजाः।

---

१. सर्वाध्ववर्तिभूतानां] मु सर्वाध्ववृत्तिभूतानां– क१;

२. उत्पद्यते] मु उत्पाद्यते–क१;

३. संहन्त्र्या चोदिते] मु संहर्ता चोदितं– क१;

४. लाक्षाप्रलेपमांसादनिच्छ्वासनसोच्छ्वासयुग्मार्द्रशाल्मलीलोहप्रदीप्तक्षुत्पिपासकाः– क१;

५. 'कृमीणां निचयश्चेति राजानः . . . कुंभीपाकः सरौरवः' इतीमे श्लोकाः मु कोशे युग्मादिशाल्मिली लोहप्रदीप्तश्रुत्पिपासकाः इति श्लोकार्धस्यानन्तरं पठ्यन्ते।

६. अत्र स्थाने महापदानुगोऽवीची द्विजराजेश्वरा इति। इत्ययं श्लोकार्धः मु कोशे दृश्यते।

कालसूत्राष्टमा ह्येते नरका इति विश्रुताः।
सूच्यास्य कालखड्गाख्याः क्षुराधाराम्बरीषकाः।
तप्ताङ्गारमहादाहसन्तापाश्चेति ये मुने।
भवन्त्यष्टौ च बीभत्सा महाशब्दपदानुगाः।
लाक्षाः प्रलेपमांसादानिद्धासनसोच्छ्वसाः।
युग्मादिशाल्मिलीलोहप्रदीप्तश्रुत्पिपासकाः ।
क्रमणि निचयश्चेति राजानः परिकीर्त्तिताः।
लोहस्तम्भोऽथ विण्मूत्रस्तथा वैतरणी नदी।
तामिस्त्रा सान्धतामिस्त्रः कुम्भीपाकः सरौरवः।
महापादानुगोवीचिराजराजेश्वरा इति।

आहत्य सान्तरालानां पुटानां त्रिंशत् कोट्यो लक्षद्वयं च प्रमाणम्। तदुक्तम्-

एषां पुटानां नरकैः सार्धं योजनसंख्यया।
भवन्ति कोटयस्त्रिंशत् द्वे च लक्षे द्विजोत्तम। इति।

तदुपरि त्रिंशत्सहस्रयोजनानि निरालम्बप्रदेशाः। तदूर्ध्वं तु नवलक्षप्रमाणम् उपरितनार्धेन काञ्चनी अधस्तनार्धेन अयोमृण्मयी[1] भूमिः तस्या अधस्तने पुटे प्रलयार्कसन्निभः परशुहस्तो भयंकरः अभितः तथाविधैः बहुभिः परिवृतः कूश्माण्डाख्यो द्वात्रिंशत् नरकस्वामीनः आस्ते। तदुक्तम्-

त्रयस्त्रिंशत् सहस्राणि त्यक्त्वोर्ध्वं[2] नवलक्षकी।
भवत्ययोमय्यर्धेन पूर्वेणार्धेन काञ्चनी।
योऽप्यधस्तात् पुटस्तस्य मृदर्धश्चार्धमायसम्।
तत्र द्वात्रिंशतोऽमीषां निरयाणां पतिः स्थितः।
कूश्माण्ड इति विख्यातः प्रलयार्कानलद्युतिः।
करालवदनः क्रुद्धो वृत्तकोटरलोचनः।
टङ्कपाणिस्तथाभूतैः भूतैः भूयोभिरावृतः। इति।

तदूर्ध्वं भूमिसप्तकसहितं पातालसप्तकम्। तत्रादितः आरभ्य षट् पातालानि प्रत्येकं सहस्रयोजनपरिमितभूमिकानि स्वयं च नवसहस्रयोजनप्रमाणानि सप्तमं त्वष्टाशीतिलक्षाधिकद्विकोटिपरिमितभूमिकम्। स्वयं च दशसहस्रपरिमितं तत्राद्यास्याध्याभासनाम्नः पातालस्य शंकुश्रुतिकुटिलविकटाभिधानाः दैत्येन्द्रनागराजराक्षसेश्वराधिपतयः परतालाख्यस्य द्वितीयस्य प्रह्लादवासुकिलोहिताक्षा अधिपतयः। तृतीयस्य नितलाख्यस्य शिशुपालकंबलयमाख्या अधिपतयः चतुर्थस्य गभस्तिनाम्नः कर्कन्धुककार्कोटकविकटाननसंज्ञाः स्वामिनः पञ्चमस्य

१. अयोमृण्मयी] मु अघोमयी- क१;
२. त्यक्त्वोर्ध्वं] क१;त्यक्त्वाभूः-मु

महातलसंज्ञस्य हिरण्याक्षकालाङ्गकरालनामानो नायकाः। षष्ठस्य रसातलसंज्ञकस्य बृहद्ध्रोगदुद्रर्शभीमनिर्ह्लादनामानः स्वामिनः। सप्तमस्य पातालाख्यस्य बलितक्षकपिङ्गलाक्षा अध्यक्षाः अस्मिन्नेव च पाताले सहस्त्रयोजनप्रमाणके काञ्चनसदने दैत्यनागराक्षसयक्षसाराङ्गनाभिः ललितपदैः गानैः अभिष्टूयमानो हाटकेश्वरस्तिष्ठति। तदुक्तम्–

आयाश्क्मपुराद्[1] ऊर्ध्वं अष्टमीयं वसुन्धरा।
सहस्राः षट्परा साष्टाशीतिलक्षत्रिकोटिकी[2]।
वसत्यो नवसाहस्रा परादश सहस्रकी।
तदासां सप्तकं सद्भिः ख्यातं पातालसप्तकम्।
तन्नामतोऽधिपतित उच्यामानं निबोध मे।
आभासं परतालाख्यं नितलं च गभस्तिमत्।
महातलरसालं च पातालं सप्तमं मुने।
सप्तस्वेतेषु दैत्येन्द्रभजङ्गक्षणदाचराः।
सप्त सप्त समाख्यातास्तानप्यथ निबोध मे।
दैत्यः शंकुतिः पूर्वाः प्रह्लादः शिशुपालकः।
कर्कन्धुको हिरण्याक्षो बृहद्ध्रोगो बलिस्तथा।
काद्रवेयाः कुटिलको वासुकिः कम्बलस्तथा।
कार्कोटकोऽथ कालाङ्गो दुर्दशस्तक्षकस्तथा।
विकटो लोहिताक्षश्च यमाख्यो विकटाननः।
करालो भीमनिर्ह्लादः पिङ्गलश्चेति राक्षसाः।
तेषामुपरि निःशेषपातालाधिपतीश्वरः।
साहस्रे काञ्चने धाममण्डले हाटकः स्थितः।
यं स्तुवन्ति प्रियप्राप्त्यै यतायति विभूषणैः।

दैत्ययक्षसुराधीशललना ललितैः पदैः। इति। श्रीमन्मतङ्गे तु त्रुट्यादियोजनान्त–स्वरूपनिरूपणपूर्वकं कालाग्न्यादिभुवनस्थितिः संक्षेपेणोक्ता–

अथाध्वपरिसंख्यानं वर्णयिष्ये यथाक्रमम्।
पार्थिवाणुचतुष्केण[3] त्रुटिरेवाभिधीयते।
लिक्षात्रुटिचतुष्केण[4] द्वे ईक्षे कुण्डिका[5] भवेत्।

---

१. आयाश्क्मपुराद्] क१; आयाश्क्मपुटाद्–मु

२. साष्टाशीतिलक्षत्रिकोटिकी] क१; साष्टाशीतिलक्षद्विकोटिकी– मु

३. पार्थिवाणुचतुष्केण] मु पार्थिवानां चतुष्केण– क१;

४. लिक्षात्रुटिचतुष्केण] मु ईक्षात्रिटिचतुष्केण– क१;

५. ईक्षे कुण्डिका] क१; लिंक्षे कर्णिका– मु

कर्णिकानां चतुष्केण सिद्धार्थश्चाभिधीयते।
यवाष्टकेन विज्ञेयः अङ्गुलं मुनिसप्तम।
अङ्गुलानि चतुर्विंशत् हस्तमित्यभिधीयते।
चतुर्हस्तो धनुर्ज्ञेयः शास्त्रेऽस्मिन् पारमेश्वरे।
धन्वन्तरसहस्रेण व्याघाटः समुदाहृतः।
व्याघाटानां चतुष्केण क्रोश इत्यभिधीयते।
क्रोशानां च चतुष्केण योजनं परिकीर्तितम्।
ब्रह्मणोऽण्डकटाहस्य कोटिस्थौल्येन कीर्तिता।
कालानलपुरं कोटिस्तज्ज्वालादशकोट्यः।
तमशेषनिरालम्बं योजनानां प्रमाणतः।
कोटयः पञ्च तस्योर्ध्वं नरकाः संप्रकीर्तिताः।
एकलक्षोच्छ्रयाः सर्वे द्वात्रिंशदपि सुव्रत।
लक्षणान्नवतिर्ज्ञेया एकैकस्य यदन्तरम्।
त्यक्त्वा त्रिंशत्सहस्राणि योजनानां तथोपरि।
कूश्माण्डभुवनं रम्यं रुद्रस्यामिततेजसः।
नवलक्षसमुच्छ्रायः तस्मात् पातालसप्तकम्।
नवयोजनसहस्राण्युच्छ्रयाणि पुराणि च।
सहस्रान्तरितानि स्युर्यावद्भूपृष्ठमार्गतः।
कालाग्नेः भूतलं यावत् सर्वमेकत्र पिण्डितम्।
योजनानां तु पञ्चाशत् कोटयोऽध्वा प्रतिष्ठितः। इति। प्रतिष्ठितः कीर्तितः।

द्वादशलक्षन्यूनकोटित्रयपरिमितोच्छ्रायतिर्यक्शतकोटिविस्तीर्णायाः अस्याः भूमेः लक्षयोजनपरिवृतेन क्षारसागरेण परिवृतं तावद्योजनमितं जम्बूद्वीपं नाभिस्थानीयम्। अस्य च मध्ये अभिभूतादित्यांशुमण्डलः सुरसिद्धनिषेवितः सौवर्णः पृथिव्यां षोडशसहस्रयोजनानि प्रविष्टः। तदूर्ध्वं चतुरधिकाशीतिसहस्रयोजनोच्छ्रायः शिरसि द्वात्रिंशत्सहस्रयोजनविस्तारः। मूले तदर्धपरिमितविस्तारो मश्स्तिष्ठति। तस्य च भूमेरूर्ध्वं पञ्चविंशतिसहस्राणि योजनानि त्यक्त्वा त्रिसहस्रयोजनप्रमाणोच्छ्राया दशसहस्रयोजनविस्तीर्णा कटाहाकृतिः नेमिर्निर्गता। तदूर्ध्वमपि तावत् सहस्रयोजनानि विहाय पूर्वनेमिसमानोच्छ्राया चतुर्दशसहस्रयोजनविस्तारा द्वितीया नेमिर्विनिर्गता। ततोऽप्युपरि तावद्योजनानि त्यक्त्वोच्छ्रायतः पूर्वनेमिसमाना अष्टादशसहस्रयोजनविस्तारा चक्रवाटाभिधाना तृतीया नेमिः। तदुक्तं–

जम्बूद्वीपं क्षितेर्नाभिस्तद्वृत्तं लक्षयोजनम्।
क्षाराब्धिना परिवृतं परिवृत्तेन तावता।
तस्य मध्ये स्थितः शैलराजराजो हिरण्मयः।

तिरस्कृतांशुमज्ज्योतिर्मेरुः सुरनिषेवितः।
सषोडशसहस्राणि क्षितौ विष्टो महीतलात्।
तदूनमुन्नतोलक्षं मूले षोडश विस्मृतः।
त्रिषु पादान्तरेष्वस्य चतुर्वृत्तेषु पर्वसु।
नेमयः कटकाकारा निर्गता दीप्तिमत्तराः।
एकादशसहस्रा स्यान्मनुसाहस्रकी परा।
नेमिर्यामस्तकोपान्ते लोकपालसमाश्रयः।

चक्रवाटेति तामाहुः सर्वरत्नप्रभावतीम्। इति। अस्याः चक्रवाटाख्यनेमेः पूर्वभागे बहुविधमाणिक्यप्रकटप्रभापटलपरिष्कृता काञ्चनमयीभूमिः सुरसिद्धसाध्यनिषेवितेन्द्रस्य अमरावत्यभिधाननगरी पूर्वदक्षिणदिग्भागे तु रक्तपीतमणिबहुला स्वर्णमयप्राकारगोपुरोपेता वह्नेस्तेजोवती नाम नगरी। पूर्वदक्षिणदुग्भागे तु लोहमयप्राकारवेष्टिता कालपाशप्रेतव्याधिमाय ीदिनिषेविता संयमिनीसंज्ञा यमस्य पुरी। दक्षिणपश्चिमदिग्भागे तु इन्द्रनीलकिरणजालालंकृता कृष्णाख्या निरृतेर्नगरी। पश्चिमभागे शुद्धस्फटिकोपलविरचिता शरदभ्रनिभसदनसहस्रोपशोभिता नक्रग्राहादियादोगणनिषेविता शुद्धवतीनाम वरुणस्य पुरी। पश्चिमोत्तरदिग्भागे धवलपीतध्वजावलीसमाकुला बलाढ्यभूतनिषेविता विचित्रा मणिकिरणालंकृता गन्धवतीसंज्ञा वायोर्नगरी। उत्तरदिग्भागे मौक्तिकचन्द्रकान्तादिनिर्मिता हिमाद्रिसमनाकारैः गृहैर्मण्डिता महादेयाह्वया सोमस्य पुरि। उत्तरपूर्वभागे समस्तरत्नपरिष्कृता ईशाननाथस्य यशोवतीनाम नगरी। तदुक्तम्–

नानारत्नप्रभाजालमण्डलालंकृता[१] हरेः।
सिद्धसाध्यमरुज्जुष्टा रुक्मभूरमरावती।
रत्नपीतमणिप्रायहेमप्राकारगोपुरा ।
वह्नेः तेजोवती वह्नितुल्यभूतनिषेविता।
मृत्योः संयमिनी तुंगलोहप्राकारमण्डला।
कालपाशपितृव्याधिप्रेतमारीनिषेविता ।
कृष्णा दैत्यपतेः मर्त्योधामवद्दैत्यसेविता।
नीलरत्नप्रभाजालवितानवरभूषणा। शुद्धवत्यम्बुनाथस्य स्फटिकोपलनिर्मिता।
पाण्डराभ्रोपमैर्याद:सेविता भाति धामभिः।
वायोर्गन्धवती श्वेता पीतध्वजसमाकुला।
बलवद्भूतसंजुष्टा सर्वरत्नविनिर्मिता।
महोदया चन्द्रमसः श्वेता मुक्तादिनिर्मिता।

---

१. नानारत्नप्रभाजालमण्डलालंकृता] क१; नानारत्नप्रभाजालालंकृता सा पुरी– मु

दिव्यसंघस्तुता भाति पुरैः[१] हेमगिरिप्रभैः।
ज्वलल्ललाटदृग्दग्धस्मरस्येशस्य शोभिता।

पुरी यशोवती सर्वरत्नजा रुद्रसेविता। इति। तदुक्तं श्रीमन्मृगेन्द्रे-

पूर्वेणेन्द्रस्य विख्याता पुरी नाम्नाऽमरावती।
अग्नेस्तेजोवती नाम्ना दिश्याग्नेय्यां व्यवस्थिता।
याम्यायां तु यमस्योक्ता नाम्ना संयमिनी पुरी।
रक्षोधिपस्य नैरृत्यां पुरी कृष्णवतीरिता।
शुद्धवत्यथ वारुण्यां पुरी ज्ञेया प्रकीर्तिता।
वायोर्गन्धवती नाम वायव्यां संस्थिता पुरी।
महोदयाप्युत्तरतः कुबेरस्य शुभा पुरी।
सुखावहा तथैशान्यामीशानस्य पुरी शुभा। इति।

एतानि पुराणि नवसहस्रयोजनविस्ताराणि भूमौ स्वर्ग इति विद्वद्भिर्वर्ण्यन्ते। तदुक्तं-

इति सर्वर्तुसुखदाश्चक्रवाटार्धविस्तृताः।
पुर्योऽष्टावनिलोद्धूतपारिजातरजाश्णाः ।
वेधसा निर्मिता लोकपालचक्रानुवर्तिनाम्।
भूतये स्वर्ग इत्येता गीयन्ते कविभिः क्षितौ। इति।

तन्मध्ये च समस्तसुरमुनिगणसेव्यमाना ब्रह्मणो मनोवती नाम नगरी। तदुक्तं-

चतुर्दशसहस्राणि योजनानां स्वयम्भुवः।
मध्ये मनोवती नाम पुरी लोकेशवन्दिता।
या चकारारुणानुच्चौर्वियन्मार्गान् महाश्रिया।
यस्यां सकरुणा नित्या वियद्गङ्गा महच्छ्रिया।
सावित्र्या स्पर्धमानेव स्वर्गकामादिवर्धिनी।
तस्यामुपासते देवा मुनयश्च महौजसः।
महायोगीश्वराः सिद्ध्यै नित्यमावृत्य वेधसम्।।

तस्याश्च मनोवत्या रजतरूपे कूटे लक्ष्म्या सह विष्णुरास्ते। तदुक्तं किरणे-

कृष्णस्य रजतं शृङ्गम् इति। तस्याश्च मनोवत्याः ईशानदिग्भागे ज्योतिष्काख्ये मेरुशृङ्गे ब्रह्मादिभिः देवैः अनेकसहस्ररुद्रैः नन्दिमहाकालादिभिर्गणैश्च परिवृतः उमया सह भगवानास्ते। तदुक्तं-

तदीशभागे तस्याद्रेः शृङ्गमादित्यसन्निभम्।
यत्तज्ज्योतिष्कमित्याहुः सदा पशुपतेः प्रियम्।

---

१. पुरैः] क१;ग्रहैः- मु

तस्य सानुषु हैमेषु रत्नचित्रेषु संस्थिताः।
स्कन्दनन्दिमहाकालगणेशादिगणा वराः।
मूर्ध्नि देवादिदेवस्य स्थानं त्रिपुरविद्विषः।
रुद्रायुतगणैर्जुष्टं ब्रह्माद्यैश्च सुरोत्तमैः। इति। श्रीमन्मतङ्गेपि–
निवासो निर्मितो धात्रा तन्मध्ये ब्रह्मणः सभा।
पूर्वोत्तरे च दिग्भागे ज्यातिष्कशिखरोत्तमे।
तत्राहं मुनिशादूल लोकानुग्रहकारणात्।
कृताधिवासास्तत्रापि रुद्रा ऋषभवाहनाः।

नैके त्रिशूलिनस्त्र्यक्षाः स्फुरच्चन्द्रार्धशेखराः। इति। एवंविधस्य मश्महीधरस्य दक्षिणभागे नवयोजनसहस्रान्तरालाः निषधहेमकूटहिमाचलाख्याः पर्वता व्यवस्थिताः। उदग्भागे तु नीलश्वेतशृङ्गवत्संज्ञाः षडप्येते द्विसहस्रविस्तारा अयुतोच्छ्रयाः पूर्वापरजलधिपर्यन्ताः पूर्वदेशे तु सहस्रयोजनपरिणाहः चतुर्विंशत्सहस्रायामः दक्षिणोत्तरः नवसहस्रान्तरः माल्यवदाख्यो गिरिः। पश्चिमे देशे तु उक्ताकारो गन्धमादनाभिधानः स्थितः। तदुक्तं–

मेरोः अधस्य[१] अन्ये दिक्षु ये भूसुरा स्थिताः।
तच्छिष्टानि नवद्वीपवर्षाण्यस्मिन्निबोध मे।
निषधो हेमकूटश्च हिमवांश्चाचलोत्तमः।
मेरोः दक्षिणतो नीलः श्वेतशृङ्गीति वामतः।
सहस्रद्वयविष्कम्भा दशोत्सेधा नवान्तराः।
प्रागायताः सुपर्वाणः सागरा हितकोटयः।
तदर्धेनोक्तविष्कम्भौ माल्यवद्गन्धमादनौ।
याम्योत्तरौ प्राक्प्रतीच्योः मश्तः तावदन्तरौ। इति।

तत्र निषधगन्धमादननीलमाल्यवताम् अन्तरालमिलावृतं वर्षं माल्यवतः प्रागब्धेः पश्चात् भद्राश्वं नाम वर्षम्। गन्धमादनस्य पश्चादब्धेः पूर्वं केतुमालं नाम वर्षं निषधहेमकूटयोः मध्यं हरिवर्षं हेमकूटहिमवतोरन्तरालं नीलश्वेतयोः मध्यं रम्यवर्षम्। श्वेतशृङ्गिणोः मध्ये हिरण्मयं वर्षं श्वेतस्योत्तरम् उत्तरकुरुवर्षम्। तदुक्तं–

पश्चान्माल्यवतः प्राच्यां गन्धमादनशैलतः।
इलावृतं नीलगिरेर्याम्यतो निषधादुदक्।
भद्राश्वं माल्यवत्प्राच्यां वर्षं भद्रजनाकुलम्।
सुकेतनं केतुमालं प्रतीच्यां गन्धमादनात्।
निषधात् हरिवर्षं यद्याम्यतो हेमकूटतः।

---

१. मेरोः अधस्य]क१; मेरोर्धरस्य–मु

नाम्ना किंपुरुषं ख्यातं भारतं हिमवद्गिरेः।
रम्यकाख्यमुदङ्नीलात् हिरण्यं श्वेतपर्वतात्।
यदुत्तरं शृङ्गवतः कुरुवर्षं तदुच्यते।इति।

श्रीमन्मतङ्गेऽपि–

इलावृतस्यैकदेशे सहस्राणि नवोदिताः।
सहस्रं माल्यवान् तस्माद्योजनानां प्रविस्तरम्।
द्वात्रिंशति सहस्राणि भद्राश्वं वर्षकं मुने।
पूर्ववत् पश्चिमेनापि मेरोरर्धं प्रतिष्ठितम्।
इलावृतस्यापि तथा माल्यवान् गन्धमादनः। वर्षं हि केतुमालाख्यं भद्राश्वमिव सांस्थितम्।
मेरोरिलावृतस्यापि दक्षिणेन तु पूर्ववत्।
निषधस्याचलेन्द्रस्य विस्तारो मुनिसत्तम।
योजनानां सहस्रे द्वे तस्माच्च हरिवर्षकम्।
योजनानां सहस्राणि भद्राश्वं वर्षकं मुने।
पूर्ववत् पश्चिमेनापि मेरोरर्धं प्रतिष्ठितम्।
हेमकूटोऽचलस्तस्मात् सहस्रद्वयविस्तृतः।
ततः किंपुरुषं नाम विज्ञेयं हरिवर्षवत्।
हिमवत्पर्वतेन्द्रस्य विस्तारो हेमकूटवत्।
भारतस्यापि विस्तारो यथा किंपुरुषस्य तु।
उत्तरेणापि शैलेन्द्रं मेर्वर्धं पूर्ववन्मतम्।
तथैवेलावृतस्यापि प्रमाणं कीर्तितं मुने।
नीलो निषधवत् ज्ञेयः पर्वभिः पर्वतश्चितः।
तस्योत्तरेण रम्याख्यं सहस्रनवसम्मितम्।
तस्याश्च क्षितिभृच्छ्वेतः सहस्रद्वयविस्तृतः।
हिरण्यस्यापि विस्तारः सहस्राणि नवोदितः।
शृङ्गवानपि विस्तारः श्वेतवत् पर्वतोत्तमः।
उदक् संस्थं शृङ्गवतः किंपुरुषमिति स्थितम्।

तद्धि भारतवत् ज्ञेयम्। इति। एतस्यैव मेरोः प्रागादिषु चतसृषु दिक्षु स्थैर्यार्थं स्थापिताः धवलपीतनीलारुणप्रभाः पञ्चाशत्सहस्रयोजनोन्नताः मन्दरगन्धमादनविपुलसुपार्श्वाभिधाना विष्कम्भभूधराः स्थिताः। तदुक्तं–

विष्कम्भशैलाश्चत्वारो मेरोः स्थैर्याय वेधसा।
लक्षार्धोन्नतयः कॢप्तास्तेषां पूर्वेण मन्दरः।
श्वेतो हरिद्राचूर्णाभो याम्यतो गन्धमादनः।

प्रतीच्यां विपुलो नीलः सुपार्श्वः सौम्यतोऽरुणः। इति। एतेषु सहस्रयोजनोच्छ्रायाः कदम्बजम्ब्वश्वत्थन्यग्रोधाः कल्पशाखिनः क्रमेण व्यवस्थिताः। तेषां मध्ये माहात्म्यातिशयेन जम्बूः द्वीपकेतुरभूत्। तैनेवेदं जम्बूद्वीपमिति व्यपदिश्यते। तस्यैव फलरसैः समुद्भूताः स्वजलाप्लवनपानादिना पक्षिमृगादीनां काञ्चनरूपप्रदा नदी तद्भूतलमपि काञ्चनीकृत्य मश्मूलप्रदेशं प्रविशति। तदुक्तं–सहस्रयोजनोच्छ्रायाः तेषु कल्पद्रुमाः स्थिताः।

कदम्बजम्ब्वावश्वत्थन्यग्रोधौ चोत्तरान्तिकाः।
जम्बूफलरसोद्भूतमश्ं पर्येत्य निम्नगाः।
विश्वेशमूलमेवास्य कनकीकृत्य तां महीम्।
तां पीत्वा पक्षिसर्पाख्यमृगशाखामृगादयः।
बभूवुः काञ्चना ये च सत्वास्तस्यां कृताप्लवाः।
द्वीपकेतुरभूत् जम्बूः कल्पशाखिषु सत्स्वपि।

प्रभावातिशयात् ख्यातं जम्बूद्वीपमिदं ततः। इति। तत्र मन्दरस्य विष्कम्भात् रोधश्चैत्ररथाभिधानम् उद्यानमरुणोदकसंज्ञकं च सरः। तदुक्तं–

प्राच्यां विष्कम्भशैलस्य मूले चौत्ररथं वनम्।
सराश्णोदकं नाम तत्र हेमाब्जमण्डितम्।

गन्धमादनमूले नन्दनं नामोद्यानम्। तत्र मानसाख्यं सरः। तदुक्तं–

गन्धमादनमूले तु सुरसिद्धाप्सरसोवृतम्।

नन्दनं मानसं तत्र सरो मानसतस्करम्। इति। विपुलमूले वैभ्राजं नामोपवनम्। तत्र सितोदाभिधानं च सरः। तदुक्तं–

वैभ्राजं वैपुले मूले सितोदश्च ह्रदोत्तमः।

देवैर्निषेव्यते छन्नः कमलैरंशुमत्प्रभैः। इति। सुपार्श्वमूले तु धृतिमन्नामोद्यानं भद्रकाभिधानं सरः। तदुक्तं–

सौपार्श्वे धृतिमन्नाम काननं भद्रको ह्रदः।
सौगन्धिकाम्बुजच्छन्नः सेव्यते पितृभिः सदा।

तत्रेलावृतवर्षवासिनो जनाः त्रयोदशसहस्रवर्षायुषो जम्बुरसाहाराः। मेरुप्रभापटलेनैवोपलब्धार्थाः। तदुक्तं– त्रयोदशसहस्रायुः जम्बूफलरसाशनः।

मेर्वा लोकोपलब्धार्थो जनः सुत्वगिलावृतः। इति। केतुमालवर्तिनस्तु नीलोत्पलकान्तयः पनसरसास्वादिनो दिव्यदेहा बलशालिनोऽयुतायुषः। तदुक्तं–

वर्षायुतायुर्नीलाब्जद्युतिः पनससारभुक्।

केतुमाले जनो दिव्यदेहबन्धः सुखी बली। इति। भद्राश्वनिलयास्तु चन्द्रकान्तयो नीलाब्जभोजनाः। क्लेशादिरहिता अयुतायुषः। तदुक्तं–

चन्द्रबिम्बद्युतिर्नीलाब्जाशनो भद्रभाग्जनः।

दशवर्षसहस्रायुः दुःखशोकभयोज्झितः। इति। कुरुवर्षवर्तिजनस्तु प्रियङ्गुपुष्पवत् गौरप्रायप्रभः स्वेच्छाविरचितवृक्षफलाशनः। कन्याकुमारयुग्मप्रसूतिस्त्रिंशत्सहस्रायुः।तदुक्तं–

त्रिंशदब्दसहस्रायुः कामवृक्षफलाशनः।

युग्मप्रसूतिः कुरुषु श्यामपुष्पद्युतिर्जनः। एतत्कुरुवर्षसामीप्येन वायुसोमदिशोः क्षाराब्धौ पञ्चचत्वारिंशत्सहस्रयोजनान्यावृत्य स्थितौ चन्द्रभद्राकराभिधानौ द्वीपौ। चन्द्रद्वीपे चन्द्ररुग्जनः भद्राकरे रक्ताब्जच्छविः। उभावपि फलमूलाहारौ त्रयोदशवर्षसहस्रायुषौ च। एतदपि उक्तं–

भूतवेदसहस्रौ द्वावेकदिक्सन्धिलक्षितौ।
सोमवाय्वाशयोः सिद्धमुनिचारणसेवितौ।
चन्द्रभद्राकरौ द्वीपौ चन्द्ररक्ताब्जरुग्जनौ।
ऐलावृतं तयोरायुः फलं मूलं च भोजनम्।

अन्तर्भावः कुरुष्वब्धौ सान्निध्यात् कीर्तितौ ततः। इति। हिरण्यवद्वर्षवासिनः चन्द्रद्युतेः लिकुचफलाहारस्यार्धाधिकद्वादशवर्षसहस्राण्यायुः। तदुक्तं–

अध्यर्धानि सहस्राणि द्वादशायुः हिरण्यवत्[1]। इति। रम्यकवर्षे नीलोत्पलत्विषः न्यग्नोधफलभोजनस्य द्वादशवर्षसहस्रमायुः। तदुक्तं–

नीलनीरजरम्यस्य रम्यके द्वादश स्थितिः।

जनस्याब्दसहस्राणि न्यग्रोध फलमश्नतः। इति। हरिवर्षे रजतप्रभः इक्षुभोजनो जनो द्वादशसहस्रायुः। तदुक्तं– रजतद्युतिरिक्ष्वादस्तावदायुर्हरौ जनः। इति। किंपुरुषवासी प्लक्षाशी स्वर्णवर्णः दशसहस्रायुः। इदमप्युक्तं– रौक्मः किंपुरुषे प्लक्षभोजनोऽब्दायुतस्थितिः। इति। एवमिलावृतादिष्वष्टसु वर्षेषु वर्तमानानां कृतादियुगपरिवृत्तावपि नावस्थाभेदः। भारतवर्षे तु तत्तद्युगानुरूपप्रज्ञायुः बलापत्यधनाः दुःखत्रयार्ताः कृष्टाकृष्टोत्पन्नाहाराः। अयमेकोऽत्र महान् गुणः यदिह कर्माण्यार्ज्यन्ते अन्येषु फलभोगेन तेषां विनाश इति। एतदप्युक्तं–

इति किंपुरुषादीनि वर्षाण्युक्तानि तानि ते।
न तेष्ववस्थाभेदोऽस्ति विवर्तिषु कृतादिषु।
युगानुरूपप्रज्ञायुः तेजोबलधनप्रजः।
कृष्टाकृष्टाशनो दुःखत्रयार्तो भारतो जनः।
गुण एको यदुद्युक्तो नेष्टं किञ्चित् न साधयेत्।
सर्वासां फलभूमीनां कर्मभूः कारणं यतः।
कर्मभूमिरियं ब्रह्मन् फलभूमिरितः परा।

---

१. हिरण्यवत्–मु हिरण्मये–क१;

इह यत् क्रियते कर्म तत् परत्रोपभुज्यते। इति। अस्मिन्नेव भारतवर्षे इन्द्रद्वीपाद्याः कुमारिकान्ताः नवद्वीपाः सन्ति। तदुक्तं–

नवाब्धिस्रोतसि द्वीपाः नव चात्रार्धकस्थले।
इन्द्रद्वीपप्रभृतयो नामतस्तान्निबोध मे।
इन्द्रद्वीपः कशश्श्च ताम्रपर्णो गभस्तिमान्।
नागद्वीपश्चान्द्रमसो गान्धर्वो वारुणस्तथा।
कुमारिकाख्यो नवमो नानापर्वतनिम्नगाः।

नानाजातिजनाकीर्णा भारताख्याः प्रकीर्तिताः। अत्रार्धकस्थल इति। अर्धं कं येषां तानि अर्धकानि स्थलानि यस्मिन्नित्यर्थः। अत्र जम्बूद्वीपनाथस्य मनुवंशजस्याग्नीध्रनृपतेः भरतादयः पुत्रा नव नववर्षाणां भारतादिव्यपदेशहेतवः। तदुक्तं–

आग्नीध्रो नाम नृपतिः जम्बुनाथो मनोः कुले।

तज्जातनृपसंज्ञाभिः कथ्यन्ते भारतादयः। इति। इत्थं क्षारसागरावृतो जम्बूद्वीपो निरूपितः। सोऽपि सागरः द्विलक्षविस्तृतेन शाकद्वीपेनावृतः। तस्य च शाकाख्यो वृक्षः तत्संज्ञाहेतुः। तदुक्तं–

शाके शाकद्रुमस्तुङ्गः शाकसंज्ञानिबन्धनम्।
सोऽपि द्वीपः स्वप्रमाणेन क्षीराब्धिनाऽऽवृतः।

स च चतुर्लक्षविस्तृतेन कुशद्वीपेनावृतः तस्य च कुशसंज्ञानिबन्धनं ब्रह्मयजनसमये संजातः सौवर्णः कुशः। तदुक्तं–

कुशोऽभूत् काञ्चनः कौशे स्वयं भुवि यियक्षिति।

सोऽपि द्वीपः स्वप्रमाणेन दध्यब्धिना परिवृतः। स तु अष्टलक्षविस्तृतेन क्रौञ्चद्वीपेनावृतः। अस्य च संज्ञाहेतुः पुरा सौवर्णकन्दरे क्राञ्चनाम्नि पर्वते क्रौञ्चनामा दैत्यः कुमारेण निहत उपलक्षणीभूतः। एतदपि उक्तं–

क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे।
स्कन्देन युध्वा सुचिरं चित्रमायी सुमायिना।
स शैलस्तस्य दैत्यस्य ख्यातश्चित्रेण कर्मणा।

केतुतामगमत्तस्य नाम्ना क्रौञ्चं तदुच्यते। इति। अयं च द्वीपः स्वप्रमाणेन सर्पिःसागरेणावृतः। स तु षोडशलक्षविस्तारेण शाल्मलीद्वीपेनावृतः। तस्य च शाल्मल्याख्यानिमित्तं सहस्रयोजनोन्नतः शाल्मलीवृक्षः। तदुक्तं–

शाल्मले शाल्मलीवृक्षो हैमः साहस्रिकोऽर्कभाः।

प्रियोऽमराणां तत् केतुः स तदाख्यानिबन्धनम्। अयं द्वीपः स्वसमानप्रमाणेनेक्ष्वब्धिनावृतः। सोऽपि द्वात्रिंशल्लक्षविस्तृतेन गोमेदद्वीपेनावृतः। अस्य च संज्ञानिबन्धनं गोपतिनाम्नो

मनुवंशजस्य गोसवाख्ययज्ञकरणाय प्रवृत्तस्य राज्ञः उचथ्यवंशेषु स्वयाजकेषु ऐन्द्रीयज्ञार्थं गतेषु सत्सु भृगून गुरुत्वेन वृतवतः। पुनः समागतेन तद्वृत्तान्तं ज्ञातवता उचथ्यवंश्येन गौतमेन शप्तस्य क्षयं गतस्य यज्ञवाटगतानां तत्कोपाग्निनैव निर्दग्धानां गवां महीसमाच्छादकं मेदः। तदुक्तं–

गोमेदे गोपतिर्मान राजाऽभूद्गोसवोद्यतः।
याज्योऽभूदग्निकल्पा नामौचथ्यानां मनोः कुले।
स तेषु हरियज्ञाय प्रवृत्तेषु भृगून् गुरून्।
वव्रे तं गौतमः कोपादशपत् सोऽगमत् क्षयम्।
यज्ञवाटेऽस्य ता गावो दग्धाः कोपाग्निना मुनेः।

तन्मेदसा मही च्छन्ना गोमेदः स ततोऽभवत्। इति। सोऽपि स्वप्रमाणेन सुराब्धिनाऽऽवृतः। स तु चतुष्षष्टिलक्षविस्तारेण पुष्करद्वीपेनाऽऽवृतः। अस्य तदाख्याहेतुः हेमपद्मा पुष्करिण्याख्या सरित्। तदुक्तं–

नदी पुष्करणीनाम हेमपुष्करमण्डिता।

तथा पुष्करद्वीपः ख्यापितः सुरसेवितः। इति। सोऽपि स्वप्रमाणेन स्वादूदकाब्धिना समावृतः। एतेषु शाकादिषु षट्सु द्वीपेषु युगपरिवृत्तावपि समावस्थाः क्षीराद्याहाराः। दशवर्षसहस्रायुषो जनाः। तदुक्तं–

यथा किंपुरुषाद्येषु कृतावस्थः सदा जनः।
शाकद्वीपादिषु तथा क्षीरादिकृतभोजनः।
हेमेन्दुहिमनीलाब्जसस्यकः स्फटिकद्युतिः।

दशवर्षसहस्रायुः नष्टदुःखैककण्टकः। एवं जम्बूद्वीपमध्यमारभ्य स्वादूदकपर्यन्तं निष्पन्ना योजनसंख्या कोटिद्वयं त्रिपञ्चाशल्लक्षाणि पञ्चाशत्सहस्राणि च। तदुक्तं–

सप्तमादुदधेरर्वाग् द्वे कोटी सत्रिकं दलम्।

पञ्चाशच्च सहस्राणि कण्ठाद्धेमाद्रिगर्भतः। इति। एवं स्वादूदकसागरोऽपि विविधमणिमण्डितया कनकमय्या देवानां विहाराय विधिना विरचितया दशकोटिविस्तृतया मह्या परिवृतम्। तदुक्तं–

[१]लोकालोको बहिस्तस्या लोकालोकनियामकः।
योजनायुतविष्कम्भस्तुङ्गशृङ्गपरिच्छदः ।
तस्य शृङ्गेषु तीक्ष्णांशोर्भासश्चन्द्रातपोपमाः।
न तापयन्ति वैकृष्ट्याद्धामान्याशाभृतां मुदे।इति।

---

१. अस्यानन्तरमयं ग्रन्थभागः मु कोशे लभ्यते।

लोकालोकोऽपि चत्वारिंशत्सहस्राधिकैकोनविंशतिलक्षसहितपञ्चत्रिंशत्कोटिविस्तारेण सूचिभेद्येनान्धतमसेनावृतः। तदुक्तं–

तमःपरस्तान्निबिडं लक्षाण्येकोनविंशतिः।
चत्वारिंशत्सहस्राणि पञ्चत्रिंशच्च कोटयः।इति।

तदपि सप्तविंशतिलक्षाधिककोटिविस्तारेण गर्भोदनाम्ना वार्धिना परिवृतम्। तदुक्तं–

सप्तविंशतिलक्षाणि कोटिश्चैका समुद्रराट्। इति।

सोऽपि कोटिविस्तृतेनाण्डकटाहेनावृतः। तदुक्तं–

हैमं कटाहकं कोटिर्गर्भोदात्तु समन्ततः। इति।

एवं जम्बूद्वीपमध्यमारभ्योत्तरेण पञ्चाशत्कोटिः। तथा समन्ततः। तदुक्तं–गर्भादिति समन्ततः। इति।

इत्थं शतकोटिविस्तृता भूमिर्निरूपिता। एवंविधस्य भूमण्डलस्योर्ध्वं आध्रुवं भुवर्लोकः। स च पञ्चदशलक्षोच्छ्रायः। तदुपरि च पञ्चाशीतिलक्षोन्नतः स्वर्लोकः। तस्योपरि मरीच्यादिमुनिगणसमाश्रयो द्विकोट्युच्छ्रायो महर्लोकः। तस्योपरि पितॄणां जह्नुमुख्यानां मुनीनां च निवासभूतोऽष्टकोटिपरिमितोत्सेधो जनलोकः। ततः परं सनकादिसमाश्रयो द्वादशकोट्युच्छ्रायस्तपोलोकः। तदुपरि विग्रहवत्या सावित्र्या शरीरिभिश्च वेदादिभिः सहितो ब्रह्माश्रयः सत्यलोकः षोडशकोट्युच्छ्रायः। ततः परस्ताविष्णोर्निवासः कोटिचतुष्टयोत्सेधः। तदुपरि त्रिपुरवैरिणः षट्कोटिपरिमितोच्छ्रायं स्थानम्। तदनु कोटिपरिणाहः कटाहः। इत्थं ब्रह्माण्डपिण्डः सर्वतः शतकोटियोजनविस्तारः। तदुक्तं–

तिथिलक्षो भुवर्लोको ध्रुवप्रान्तो महीतलात्।
तदूनकोटिः स्वर्लोकः स्वर्गवासिसमाश्रयः।
महो द्विकोटिर्यत्रास्ते मरीच्यादिमुनिव्रजः।
जनोऽष्टकोट्यवच्छिन्नः पितृजह्नुजनाश्रयः।
तपोऽर्ककोटिर्यत्रास्ते महायोगी सनन्दनः।
ऋभुः सनत्कुमारश्च सनकश्च महातपाः।
ततः सत्यधियः स्थानं सत्यलोकः स्वयम्भुवः।
कामातिशयसम्पन्नः कोटयो नव सप्त च।
सावित्री मूर्तिमत्यास्ते यत्र वेदाश्च सानुगाः।
ततश्च तस्त्रषः षट्चेति मधुत्रिपुरविद्विषोः।
स्थाने ज्योतिष्मती चित्रे कोटिरण्डकटाहकः।
शतकोटिप्रविस्तीर्ण इति ब्रह्माण्डगोलकः।
भूयसा तुल्य एवायं सर्वस्त्रोतःसु मानतः। इति।

अस्यैव च ब्रह्माण्डस्यान्तर्वर्तीनि कालाग्निकूश्माण्डहाटकब्राह्मवैष्णवरौद्राभिधानानि षड् भुवनानि। बहिस्तु प्राग्दिग्भागपालकस्य शतक्रतोः नियन्तृत्वेन कपालीशः अजः बुध्नः वज्रदेहः प्रमर्दनः विभूतिः अव्ययः शास्ता पिनाकी त्रिदाशाधिपः इत्येवमभिधाना अनेकैरनुचरैः परिवृता दश रुद्राः स्थिताः। एतेषां भुवनान्यप्येतन्नामधेयानि। एवं सर्वत्राधिपतिनामकान्येव भुवनानि ज्ञातव्यानि। पूर्वदक्षिणायामग्नेः नियन्तृत्वेन अग्निरुद्रः हुताशनः पिङ्गलः खादकः हरः ज्वलनः दहनः बभ्रुः भस्मान्तकः क्षयान्तकः इत्येवंसंज्ञका दश रुद्राः स्थिताः। दक्षिणायां यमस्य नियन्तृत्वेन याम्यः मृत्युः हरः धाता विधाता कर्ता संयोक्ता वियोक्ता धर्मः धर्मपतिः इत्यभिधाना दश रुद्राः स्थिताः। दक्षिणपश्चिमायां निरृतेर्नियन्तारः निरृतिः मारणः हन्ता क्रूरदृष्टिःभयानकः ऊर्ध्वकेशः[1] विरूपाक्षः धूम्रः लोहितः दंष्ट्रः इत्येवंनामानो दश रुद्राः स्थिताः। पश्चिमायां दिशि वरुणस्य नियन्तारः बलः अतिबलः पाशहस्तः महाबलः श्वेतः जयभद्रः दीर्घबाहुः जलान्तकः मेघनादः सुनादः इत्येवंसंज्ञका दशरुद्राः। पश्चिमोत्तरदिग्भागे वायोर्नियन्तारः शीघ्रः लघुः वायुवेगः सूक्ष्मः तीक्ष्णः क्षयान्तकः पञ्चान्तकः पञ्चशिखः कपर्दीमेघवाहनः इत्येवं नामानो रुद्राः। उत्तरस्यां दिशि सोमकुबेरयोः नियन्तृतया स्थिताः निधीशः रुपवान् धन्यः सौम्यदेहः जटाधरः लक्ष्मीधरः रत्नधृक्[2] श्रीधरः प्रसादः प्रकामदः इत्येवमाह्वया रुद्राः। पूर्वोत्तरभागे ईशस्य नियन्तृतया वर्तमानाः विद्याधिपः ईशः सर्वज्ञः ज्ञानभुक् वेदपारगः सुरेशः सर्वज्ञः[3] ज्येष्ठः भूतपालः बलप्रियः[4] इत्येवमाख्या दशरुद्राः। अधोभागे हरेर्नियन्तृत्वेन स्थिताः वृषः वृषधरः अनन्तः क्रोधनः मारुताशनः ग्रसनः उदुंबरः ईशः फणीन्द्रः वज्रदंष्ट्री इत्येवमभिधानाः। ऊर्ध्वं ब्रह्मणो नियन्तारः शम्भुः विभुः गणाध्यक्षः त्र्यक्षः त्रिदशेश्वरः संवाहः विवाहः नभः लिप्सुः त्रिलोचनः इत्येवंनामानो दशरुद्राः। सर्वोपरि वीरभद्रो भद्रकाली च। एवं पार्थिवतत्त्वे भुवनान्यष्टोत्तरशतानि। तदुक्तं–

कालाग्नेयं च कूश्माण्डं हाटकं ब्राह्मवैष्णवे।
शैवं च भुवनान्यन्तर्ब्रह्माण्डस्य स्थितानि षट्।
कपालीशस्त्वजो बुध्नो वज्रदेहः प्रमर्दनः।
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः।
अग्निरुद्रो हुताशश्च पिङ्गलः खादको हरः।
ज्वलनो दहनो बभ्रुः भस्मान्तकक्षयान्तकौ।
याम्यो मृत्युर्हरो धाता विधाता कतृसंज्ञकः।
संयोक्ता च वियोक्ता च धर्मो धर्मपतिस्तथा।
निरृतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः।

१. ऊर्ध्वशेफः]क१;ऊर्ध्वकेशः–मु
२. रत्नधृक्]क१;रत्नधरः–मु
३. सर्वज्ञः] क१;शर्वः– मु
४. बलप्रियः] क१; बलिप्रियः– मु

ऊर्ध्वशेफो विरूपाक्षो धूम्रो लोहितदंष्ट्रिणौ।
बलश्चातिबलश्चैव पाशहस्तो महाबलः।
श्वेतोऽथ जयभद्रश्च दीर्घबाहुर्जलान्तकः।
मेघनादः सुनादश्च दशमः परिकीर्तितः।
शीघ्रो लघुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षयान्तकः।
पञ्चान्तकः पञ्चशिखः कपर्दी मेधवाहनः।
निधीशो रूपवान् धन्यः सौम्यदेहो जटाधरः।
लक्ष्मीधृग् रत्नधृक् श्रीधृक् प्रसादश्च प्रकामदः।
विद्याधिपेशौ सर्वज्ञो ज्ञानभुग्वेदपारगः।
सुरेशशर्वौ ज्येष्ठश्च भूतपालो बलिप्रियः।
वृषो वृषधरोऽनन्तः क्रोधनो मारुताशनः।
ग्रसनोदुम्बरेशाश्च फणीन्द्रो वज्रदंष्ट्रिणौ।
शम्भुर्विभुर्गणाध्यक्षः त्र्यक्षस्त्रिदशेश्वरः।
संवाहश्च विवाहश्च नभोलिप्सुस्त्रिलोचनः।
वीरभ्रद्रो भद्रकाली सर्वोर्ध्वे भुवनद्वयम्।
कपालीशादयः प्राच्यामग्निरुद्रादयोऽनले।
याम्याद्या दक्षिणे भागे निरृत्याद्यास्तु नैरृते।
बलाद्या वारुणे भागे शीघ्राद्या वायुगोचरे।
उत्तरे च निधीशाद्या ईशे विद्याधिपादयः।
वृषादयस्त्वधोभागे शम्भुमुख्या नभोगताः।
भुवनानां शतं चाष्टाधिकमेवं तु विन्यसेत्।

एते च तैत्तिरीयादिशाखायां रुद्रप्रश्नसमाप्तौ तत्तद्दिग्वर्तिनो रुद्राः दश दश संख्यानपूर्वकं नमस्कारपूर्वकं संग्रहेण सूचिताः। एतच्च ब्रह्माण्डमण्डलं कपालयुगलमेलनात्मकम्। अधःसंकुचितरूपतया तामसम्। उपरि वक्त्रभागे ईषद्विवृतरूपतया राजसम्। तयोर्मेलनरूपमध्यभागे अतिविस्तृतया सात्त्विकम्। तदुक्तं श्रीमन्मतङ्गे–

यदधस्तात् कपालं स्यात् तामसं परिकीर्तितम्।
राजसं स्यादधोवक्त्रं तयोर्योगस्तु सात्त्विकम्।

कुतोऽवसीयते यस्मात् विकासः सत्त्वमुच्यते। एतच्च पार्थिवमण्डलं चतुरश्रं वज्रलाञ्छितं पीतवर्णम्। अकारलकारावस्य बीजे। इडापिङ्गलाख्यो नाड्यौ। वायू प्राणापानौ। इन्द्रिये घ्राणोपस्थौ। विषयो गन्धः। गन्धादिशब्दान्तं गुणपञ्चकम्। स्थानं पादहृद्ग्रन्थी। जाग्रदवस्था। लकारः शोध्यः। शोधको हृदयमन्त्रः। अन्तः देवयोनिषट्कं देवयोन्यष्टकं चात्रैवावस्थितम्। अस्य लयः प्रकृतौ। भोगो बुद्धौ। ब्रह्मा च कारणम्। तदुक्तं–

पार्थिवं मण्डलं पीतं वज्राङ्कं चतुरश्रकम्।
बीजेऽकरलकाराख्ये नाड्यौ चेडा च पिङ्गला।
प्राणापानावुभौ वायू घ्राणोपस्थे तथेन्द्रिये।
गन्धस्तु विषयः प्रोक्तो गन्धादिगुणपञ्चकम्।
स्थानं स्यात् पादहृद्ग्रन्थी ह्यवस्था जाग्रदेव च।
शोध्यो लकार एवात्र शोधको हृदयः स्मृतः।
अत्रैवान्तर्गता ज्ञेया योनयोऽपि चतुर्दश।
प्रथमाः षड् देवानामष्टान्या देवयोनयः।
मृगः पक्षी च पशवश्चतुर्थास्तु सरीसृपाः।
स्थावरं पञ्चमं सर्वं योनिः षष्ठी तु मानुषी।
पैशाचं राक्षसं याक्षं गान्धर्वं चौन्द्रमेव च।
सौम्यं प्राजेश्वरं ब्राह्ममष्टमं परिकीर्तितम्।
अष्टानां पार्थिवं तत्त्वमधिकारास्पदं मतम्।

लयस्तु प्रकृतौ बुद्धौ भोगो ब्रह्मा च कारणम्। इति। अत्र पञ्चाशत्सु वर्णेषु वर्णः क्षकारः। एकाशीतिपदेष्वष्टाविंशति पदानि। एकादशसु मन्त्रेषु मन्त्रौ हृदयसद्योजातौ। तदुक्तं–

पृथिवीतत्त्वं क्षवर्णं च मन्त्रौ हृदयसद्यकौ।
नमोद्वयं च प्रणतिः षडक्षरमतः परम्।
अस्तुतास्तुत इत्येवं ततश्चानर्चितार्चिता।
ब्रह्मविष्ण्वादिकं पश्चात् सर्वसान्निध्यकादिकम्।
सर्वभूतसुखादिं च भवोद्भवपदं तथा।
भवयुग्मं तथा शर्वयुग्मं च प्रथमद्वयम्।
मुञ्च मुञ्च पदं योगाधिपतेश्च पदं भवेत्।
महातेजःपदं सद्भावेश्वरेति कीर्तितम्।

महादेवपदं पश्चात् पदान्यष्टौ च विशंतिः। एतत् सर्वं संग्रहेण रत्नत्रयेऽपि उक्तम्।

निवृत्तौ पार्थिवं तत्त्वं पुराण्यष्टोत्तरं शतम्।
तेषु कालानलादीनामन्तराण्यस्य षड्बहिः।
प्राच्यादिषु दशस्वेवमाशास्वेकैकशो दश।
रुद्राणां शतसंख्यानां वीरभद्रस्य चोपरि।
भद्रकाल्याश्च भुवने क्षकारोऽर्णेषु कीर्तितः।
एकाशीतिपदा देवी प्रतिसर्गपदक्रमात्।
अष्टाविंशतिसंख्यैस्तु पदैरत्र प्रतिष्ठिता।
एकाशीतिपदा देवी व्योमव्याप्यादिलक्षणा।

मन्त्रावजातहृदयौ तत्र सा तु परा कला।
भुवनादीनभिव्याप्य कलापञ्चसु[1] वर्तते।
पीतैषा चतुरश्रा च कठिना वज्रलाञ्छिता।
ध्यातव्योद्यदनेकार्चिर्मांसला हृदयाम्बुजे।

ब्रह्मात्र कारणं मन्त्रः सद्योजातोऽधिदेवता। इति। प्रतिष्ठाकलायां प्रतिष्ठापदस्य प्रवृत्तिनिमित्तमुक्तं रत्नत्रये-

तत्प्रलीनाणुसंघस्य संकल्पोऽर्थप्रसिद्धये।

प्रतिष्ठितो यतस्तेन प्रतिष्ठानाम सा कला। अस्यां तु प्रतिष्ठाकलायां जलादीनि प्रकृत्यन्तानि त्रयोविंशतितत्त्वानि। तेषु चाप्तत्त्वं पार्थिवतत्त्वापेक्षया दशगुणप्रमाणमेवं यावत् प्रधानं पूर्वपूर्वतत्त्वापेक्षया दशगुणप्रमाणानि तत्त्वानि। अमरेशादीनि श्रीकण्ठान्तानि भुवनानि षट्पञ्चाशत् हकारादयः टकारान्ताः वर्णास्त्रयोविंशतिः। महेश्वराद्यरूप्यन्तानि पदान्येकविंशतिः। शिरोवामदेवौ द्वौ मन्त्रौ शुक्लो वर्णः मण्डलं तु अर्धचन्द्राकारं रसो विषयः रसादिशब्दान्तं गुणचतुष्टयम्। विष्णुः कारणम्। तदुक्तं-

प्रतिष्ठायां तु चत्वारि कलायामवनिं विना।
भूतानि पञ्च तन्मात्राः पञ्चकर्मेन्द्रियाणि च।
पञ्च बुद्धीन्द्रियाण्यासन् मनोऽहंकारबुद्धयः।
अव्यक्तमपि वर्णाश्च हादिटान्ता विलोमतः।
त्रयोविंशतिराम्नाताः षट्पञ्चाशत् पुराणि च।
जलतेजोऽनिलाकाशबुद्ध्यव्यक्तेष्वहंकृतौ।
अष्टावष्टौ पदान्येकविंशतिरत्र संख्यया।
शिरो वामश्च मन्त्रौ द्वौ विष्णुः कारणमुच्यते।
सा तु शुक्लार्धचन्द्राभा नीलोत्पलदलाङ्किता।
ध्यातव्या गलपद्मान्तः बहुला लोकशालिनी।

वामदेवो ह्यधिष्ठाता वाच्यो मन्त्रात्मको मतः। इति। अन्यत्राप्युक्तम्-

त्रयोविंशतितत्त्वानि तथाप्तेजोमरुद्वियत्।
गन्धरूपरसस्पर्शशब्दोपस्थाश्च पायु च।
पादौ पाणी च वाङ्नासाजिह्वाचक्षुस्त्वचः श्रुतिः।
मनोऽहंकारबुद्धी च प्रकृतिश्च ततः परम्।
तत्त्वानि कथितान्येवं हादिटान्ता विलोमतः।
त्रयोविंशतिवर्णास्तु शिरो वामस्तथैव च।

---

१. कलापञ्चसु]क१;पञ्च पञ्चसु-मु

अमरेशः प्रभासश्च नैमिशः पुष्करौषधिः।
दण्डी मुण्डी तथा भारभूतिश्च लकुलीश्वरः।
हरिश्चन्द्रश्च श्रीशैलो जप्येशाम्रातकेश्वरौ।
मध्यमेशो महाकालः केदारो भैरवस्तथा।
गया चैव कुरुक्षेत्रं नाखलो नखलस्तथा।
विमलेशोऽट्टहासश्च महेन्द्रो भीमकेश्वरः।
वस्त्रापदो रुद्रकोटिरविमुक्तो महालयः।
गोकर्णो भद्रकर्णश्च स्वर्णाक्षस्थाणुरित्यपि।
छगलण्डो द्विरण्डश्च माकोटो मण्डलेश्वरः।
कालाञ्जरः शंकुकर्णः स्थूलेश्वरतलेश्वरौ।
पैशाचं राक्षसं याक्षं गान्धर्वं चौन्द्रमेव च।
सौम्यं चैव तथा ज्ञेयं प्राजेशं ब्राह्ममेव च।
अकृतं च कृतं चैव भैरवं ब्राह्मवैष्णवे।
कौमारं च तथा सौमं श्रैकण्ठं परमं तथा।
अमरेशादि चाप्तत्वे हरिश्चन्द्रादि तेजसि।
गयादि वायुतत्त्वे च व्योम्नि वस्त्रापदादि च।
छगलण्डाद्यहंकारे पैशाचाद्यं मतौ स्थितम्।
प्रकृतावकृताद्येवं षट् पञ्चाशत् पुराणि च।
महेश्वराद्यरूप्यन्ताः पदानामेकविंशतिः।
महेश्वरपदं चाद्यं परमार्थन् द्वितीयकम्।
ततः शर्वापदं चोक्तं शिवपदमतः परम्।
निधनो भवसंज्ञं च निधनाख्यपदं तथा।
अनिधनपदं चैव ओं स्वःपदमतः परम्।
ओं भुवः पदमन्यच्च ओं भूः पदमतः परम्।
चतुर्धूनिपदं चान्यत् तथा नानापदं ततः।
अनादेश्च पदं चान्यदभस्मेति पदं तथा।
अधूमपदमन्यच्चानग्नीतिपदं ततः।
अरूपपदमन्यच्च ज्योतिर्ज्योतिस्तथैव च।
तेजस्तेजःपदं प्रोक्तं प्रथम प्रथमेति च।
अरूपिन् पदयुग्मं च पदान्येकं च विंशतिः।
विषयस्तु रसो ज्ञेयश्चत्वारस्तु गुणा मताः।
रसादिशब्दपर्यन्ताः शुभ्रं वर्णमिति स्मृतम्।
अर्धचन्द्रसमाकारमण्डलं पंकजाङ्किकम्।

शोधकश्च शिरोमन्त्रः शोध्यो लान्तस्तथैव च।
उवौ बीजे च नाड्यौ द्वे गान्धारी च सुषुम्नगा।
वायू समानोदानौ च रसनापायुरिन्द्रिये।
स्वप्नोऽवस्था च वं बीजं कारणेशश्च केशवः। इति।

अत ऊर्ध्वं विद्याह्वया कला। तत्र च विद्यापदप्रवृत्तिनिमित्तमुक्तं रत्नत्रये–

तत्प्रलीनाणुसंघस्य संकल्पोऽशेषगोचरः।

सर्वार्थद्योतको येन तेन विद्येति गीयते। इतित्। अस्यां च पुरुषादीनि मायान्तानि पूर्वपूर्वापेक्षया उत्तरोत्तरं शतगुणप्रमाणानि सप्ततत्त्वानि। तेषु च भुवनानि सप्तविंशतिः। तत्र पुरुषतत्त्वे वामः भीमः उग्रः भवः ईशानः एकवीर इत्येवाभिधानाः षड् रुद्राः अवस्थिताः। रागतत्त्वे प्रचण्डः उमापतिः अजः अनन्तः एकशिख इत्येवमाह्वयाः पञ्चरुद्राः। नियतौ क्रोधश्चण्डः संवर्तः ज्योतिः शूर[1] इत्येवं संज्ञाः पञ्चरुद्राः। विद्यातत्त्वे पञ्चान्तकः एकवीर इत्येवंनामानौ रुद्रौ। कलातत्त्वे शिखेदः महातेजा इति द्वौ रुद्रघ काले वामदेवः भव इति द्वौ रुद्रौ। मायायामुद्भवः एकपिङ्गलः एकेक्षणः ईशानः अङ्गुष्ठमात्र इत्येवमाख्याः पञ्चरुद्राः। वर्णाः ञादयो घान्ताः सप्त। पदानि व्यापिन्यादिध्यानाहारायान्तानि विंशतिः। मन्त्रौ शिखाघोरौ द्वौ। वर्णः शोणः। मण्डलं त्रिकोणम्। विषयो रूपम्। गुणाः रुपादिशब्दान्तास्त्रयः। कारणं रुद्रः। तदुक्तं–

कलया विद्यया व्याप्तः पुरुषश्चादिमो भवेत्।
रागो नियतिविद्ये च कलाकालश्च मोहिनी।
वामो भीमस्तथोग्रश्च भवेशानैकवीरकाः।
प्रचण्डोमापती चाजोऽनन्तश्चैकशिखस्तथा।
क्रोधेशश्चण्डसंवर्तौ ज्योतिः शूलेश्वरस्तथा।
पञ्चान्तकैकवीरौ च शिखेदश्च महाद्युतिः।
वामदेवो भवश्चैव उद्भवोऽप्येकपिङ्गलः।
एकेक्षणस्तथेशानः तथैवाङ्गुष्ठमात्रकः।
षट् पञ्च पञ्चकञ्चैव युग्मयुग्मद्वयं तथा।
पञ्चकं पुरुषादौ तु मायान्ते च पुराणि हि।
ञकारादिघकारान्ता वर्णाः सप्त विलोमतः।
पदानि विंशतिर्व्यापिन्व्यापिन्निति पदं भवेत्।
व्योमन् व्योमन् पदं पश्चात् ईप्सितः स्यादचेतनः।
पारमेशः परायेति पदं चैव पुनर्भवेत्।
ज्योतीरूपायसंज्ञं च सर्वयोगाद्यमेव च।

---

१. शूर]क१;शूलेश्वरः–मु

पदं चानिधनायेति पदं गोप्ते प्रकीर्तितम्।
गुह्यातिगुह्याय पदं पदं स्यादों नमो नमः।
पदं ब्रह्माणि पश्चात्र विद्यादीनि क्रमेण च।
शिवायेति पदं सर्वप्रभेवेति पदं पुनः।
शिवायेति पदं पश्चात् ओं नमश्च पदं भवेत्।
ध्यानाहारपदं चैव पदान्येवं तु विंशतिः।
रूपन्तु विषयः प्रोक्तः गुणा रूपादयस्त्रयः।
वर्णं तु शोणवर्णं स्यात् त्रिकोणं मण्डलं भवेत्।
मरौ बीजे तथा नाड्यौ पूषा स्याद्धस्तिजिह्विका।
व्याननागौ तथा वायू इन्द्रिये पाणिचक्षुषी।
अवस्थाऽत्र सुषुप्तिः स्याद्रुद्रो देवस्तु कारणम्। अन्यत्रापि उक्तम्–
विद्यायां सप्त पुरुषो रागो नियतिसंयुतः[१]।
विद्याकला च कालश्च माया तत्त्वानि तत्र तु।
वामादिभुवनानां च विज्ञेयाः सप्तविंशतिः।
ञादयोऽत्र घकारान्ता वर्णाः सप्त विलोमतः।
पदानि विंशतिः मन्त्रौ शिखाघोरौ व्यवस्थितौ।
रुद्रोऽत्र कारणं मन्त्रो बहुरूपोऽधिदेवता।
सा तु स्फुरदनेकार्चिस्त्रिकोणा स्वस्तिकाङ्किता।

ध्यातव्या तालुवर्त्मान्तः[२] नीलाञ्जनसमद्युतिः। इति। अतः परं शान्तिकला। शान्तिपदप्रवृत्तिनिमित्तं च रत्नत्रये कथितं यथा–

तत्प्रलीनाणुसंधस्य द्वेषरागाद्यभावतः।

संकल्पस्य निवृत्तत्वाच्छान्तिरेषा निरुच्यते। इति। अस्यां च विद्येश्वरसदाशिवाख्यानि पूर्वपूर्वापेक्षयोत्तरोत्तरसहस्रगुणप्रमाणानि त्रीणि तत्त्वानि। तत्र भुवनान्यष्टादश। तत्र विद्यातत्त्वे वामा ज्येष्ठा रौद्री काली कलविकरणी बलविकरणी बलप्रमथनी सर्वभूतदमनी मनोन्मनीति नव भुवनानि। ईश्वरतत्त्वे अनन्तः सूक्ष्मः शिवोत्तमः एकनेत्रः एकरुद्रः त्रिमूर्तिः श्रीकण्ठः शिखण्डी इत्येवमष्टौ भुवनानि। सदाशिवतत्त्वे सदाशिवाख्यमेकं भुवनमित्येवमष्टादश भुवनानि। गादयः कान्ता वर्णास्त्रयः। पदान्येकादश। तानि च नित्यं योगिन इत्यादीनि व्योमव्यापिन इत्यन्तानि। तत्पुरुषकवचनौ द्वौ मन्त्रौ। कृष्णो वर्णः। मण्डलं षट्कोणम्। विषयः स्पर्शः। स्पर्शशब्दौ गुणौ। कारणमीश्वरः। तदुक्तं–

---

१. नियतिसंयुतः]क१; नियतिरेव च–मु

२. तालुवर्त्मान्तः–मु तालुवक्त्रान्तं–क१;

शान्तौ तु त्रीणि तत्त्वानि विद्येश्वरसदाशिवाः।
गखकाश्च त्रयो वर्णाः मन्त्रौ वक्त्रतनुच्छदौ।
वामामुख्यपुराण्यष्टादशैव परिसंख्यया।
वामा ज्येष्ठा तथा रौद्री काली विकरिणी तथा।
बलविकरणी चैव बलप्रमथिनीत्यपि।
सर्वभूतदमन्येवं मनोन्मन्यपरं भवेत्।
पुराणि नव विद्यामनन्तः सूक्ष्मसंज्ञकः।
शिवोत्तमैकनेत्रौ च एकरुद्रस्त्रिमूर्तिकः।
श्रीकण्ठश्च शिखण्डी चेत्येवमीशपुराष्टकम्।
सादाख्यं भुवनं तस्मिन् पुराण्यष्टादशैव तु।
एकादशपदन्यासं नित्यं योगिन इत्यपि।
योगपीठमथान्यत् स्याच्छाश्वताय पदं पुनः।
ध्रुवायेति पदं चैव नाश्रितायपदं पुनः।
अनाथायपदं प्रोक्तमनन्तायपदं पुनः।
शिवायेति पदं सर्वव्यापिने च पदं पुनः।
व्योमरूपायेति पदं व्योमव्यापिन इत्यपि।
इन्द्रिये त्वक्पदावस्यां स्पर्शस्तु विषयो मतः।
गुणौ स्पर्शनिनादौ द्वावेकः कारणमीश्वरः।
तुर्यावस्थेति शान्तिस्थं भावयेत् भुवनादिकम्। इति। अन्यत्रापि–
शान्तौ तु त्रीणि तत्त्वानि दशाष्टौ भुवनानि च।
कथितान्यत्र वर्णास्तु गदिकान्तास्त्रयो मताः।
पदान्येकादशात्रासन् मन्त्रौ वक्त्रतनुच्छदौ।
भुवनादीनभिव्याप्य पञ्च षड्बिन्दुलाञ्छिता।
षट्कोणोदितकल्पान्तसहस्रकिरणद्युतिः ।
ध्यातव्या सा पराशक्तिर्भ्रूमध्यकमलोदरे।
ईश्वरः कारणं तत्र मन्त्रस्तत्पुरुषाह्वयः।

तदधिष्ठायको ज्ञेयः तत्पुरुषोऽधिदेवता। इति। तदुपरि शान्त्यतीतकला। शान्त्यतीतपदप्रवृत्तिनिमित्तं च शान्तिमतीत्य वर्तमानत्वं द्रष्टव्यम्। तत्र च पूर्वपूर्वापेक्षया लक्षणगुणप्रमाणे शक्तिशिवत्वे द्वे। भुवनानि पञ्चदश। अत्र शक्तितत्त्वे निवृत्तिप्रतिष्ठाविद्या शान्तिशान्त्यतीताख्यानि पञ्च। इन्धिका दीपिका रोचिका मोचिका ऊर्ध्वगामिनी व्यापिनी व्योमरूपा अनन्ता अनाथा अनाश्रिता इति दश। वर्णा विसर्जनीयाद्या अकारान्ताः षोडश। पदमेकम्। मन्त्राः शिवास्त्रेशानास्त्रयः। वर्णः श्वेतः। मण्डलं वृत्तम्। विषयः शब्दः। गुणः शब्दः। कारणं सदाशिवः। तदुक्तं–

शान्त्यतीतकलायां तु तत्त्वे शक्तिशिवाह्वये।
वर्णाः षोडशका मन्त्रा अस्त्रेशानशिवास्त्रयः[१]।
ओमित्येकं पदं ज्ञेयं पुराणि दश पञ्च च।
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिश्च नाभसी।
पुराणि बैन्दवानीह पञ्च प्रोक्तान्यतः परम्।
इन्धिका दीपिका चैव रोचिका मोचिका तथा।
ऊर्ध्वगा चेति नादोत्थभुवनानि ततः परम्।
व्यापिनी व्योमरूपा च अनन्ता च ततः परम्।
अनाथा च ततः प्रोक्ताऽनाश्रिता पञ्चमी तथा।
भुवनानि तु शाक्तानि पञ्चैव कथितानि च।
कुहूश्च शंखिनी नाड्यौ देवदत्तधनञ्जयौ।
मारुतौ वचनश्रोत्रे इन्द्रिये विषयो रवः।
शब्दो गुणो ह्यवस्था तु तुर्यातीताऽत्र पञ्चमी।
बीजे नादहकारौ द्वौ स्यात् स्थानं मस्तकं तथा।
हेतुः सदाशिवो देव इति तत्त्वादिसंचयः।

संचिन्त्य शान्त्यतीतस्थं विदध्यात् ताडनादिकम्। इति। अन्यत्रापि उक्तं-

शान्त्यतीतेति सम्प्रोक्ता पञ्चमी तु परा कला।
शिवतत्त्वात्मकं तत्र पुराणि दश पञ्च च।
वर्णा विसर्गपूर्वा ये षोडश स्वरसंज्ञकाः।
ओमित्याद्यं पदं मन्त्राः शिवास्त्रेशानशब्दिताः।
सा शान्त्यतीता पञ्चाध्वगर्भिणी परमा कला।
चिन्तनीया महाकाशस्वरूपा मूर्धपङ्कजे।
ईशानो मन्त्रराडेनमधितिष्ठति कारणम्।

देवः सदाशिवस्तत्र कलाध्वेति प्रकीर्तितः। इति। एवं षडध्वानोऽपि व्याख्याताः। एषु चाध्वसु प्रमाणत्वेन श्रुतिरपि सुदर्शनाचार्यैः

अध्वानमध्वपतिमध्वनि तारतम्यं श्रेष्ठोऽध्वपारगमनं च तवाभिधत्ते[२]।

मन्त्रोऽध्वनामिति महेश्वर गृह्यकारः पित्रा कुमारमुपनीय यमाह वाक्यम्।

इत्येतत् वाक्यविषयतयोपन्यस्ता। एतेषु चाध्वसु कलावर्णपदमन्त्ररूपाश्चत्वारोऽध्वानः शुद्धाः एव। तत्त्वभुवनात्मकावध्वानौ तु शुद्धामिश्राशुद्धभेदेन त्रिविधौ। तत्र विद्यादीनि

---

१. अस्त्रेशानशिवास्त्रयः-मु अस्त्रेशानशिवाह्वयाः-क१;

२. तवाभिधत्ते]क१,मु;फलं ब्रवीति-मुद्रितः पाठः।

शिवतत्त्वान्तानि तद्गतभुवनानि च सुखमात्रानुषक्ततया शुद्धानीति व्यपदिश्यन्ते। पुरुषादीनि मायान्तानि तत्त्वानि तद्वर्तिभुवनानि च तुल्यवृत्तिकसुखदुखमिश्रतया मिश्राणीत्युच्यते। पृथिव्यादीनि प्रकृत्यन्तानि तत्त्वानि तन्निष्ठानि भुवनानि च दुःखबहुलतया अशुद्धानीति व्यपदिश्यन्ते। क्वचिच्छुद्धाशुद्धभेदेन द्विधा व्यपदेशस्तु दुःखानुषङ्गराहित्यदुःखानुषङ्गाभ्यां द्रष्टव्यः। ननु क्वचिदागमान्तरे षट्त्रिंशदधिकद्विशतसंख्याकानि भुवनानि श्रूयन्ते। तथाहि–महदन्तेषु भुवनानि पूर्ववत् गुणेऽप्यकृतादीन्यष्टौ पूर्ववदेव भुवनानि। तन्मस्तके तु वामादीनि त्रयोदश भुवनानि। तथा श्रीमन्मृगेन्द्रे–

वामदेवभवानन्तभीमोमापत्यजेश्वराः ।
सर्वशानेश्वरावेकवीरैकशिवसंज्ञितौ ।
उग्रः प्रचण्डदृक् चेशो गुणानां मूर्ध्नि संस्थिताः।
तपसा गुरुणोपास्य क्रोधादीन् गुरुतां गताः।

स्वाधिकारविधौ तीक्ष्णा रुद्रा सर्वार्थदृक्क्रियाः। इति। तत्रैव प्रधानाधिपतीनां भुवनाष्टकम्। तदुक्तं तत्रैव–

तेभ्यो दशगुणश्रीकान् प्रधानाधिपतीन् शृणु।
क्रोधेशश्चण्डसंवर्तज्योतिःपिङ्गलशूरकाः ।
पञ्चान्तकैकवीरौ च शिखेद इति ते स्मृताः।

प्रधाने पुरुषे च नास्ति भुवनम्। सर्वेन्द्रियाख्यं भुवनं रागतत्त्वे नियन्तृसंज्ञं भुवनं नियतितत्त्वे कलनशक्तिमद्भुवनं कालतत्त्वे। रागविद्यागर्भकलातत्त्वे भुवनाष्टकम्। एतदपि उक्तं श्रीमन्मृगेन्द्रे–

सर्वेन्द्रियः सर्वतनुः सर्वान्तःकरणाश्रयः।
पुरुषे नियतौ नियन्ता काले कलनशक्तिमान्।
एकपिङ्गेक्षणेशानांगुष्ठमात्राश्च भास्वराः।

परमेशोपमा रागविद्यागर्भकलापदे। इति। अत्र पुरुष इत्येतन्मृगेन्द्र एव अन्यत्रोक्तार्थपरतया व्यख्यातम्। मायाधिपतिभुवनाष्टकमपि कलाया एव मस्तके। तदपि श्रीमन्मृगेन्द्रे–

अनन्तस्त्रिकलो गोप्ता क्षेमेशो ब्रह्मणः पति।।
ध्रुवतेजोधिपौ रुद्रौ गहनेशश्च विश्वराट्।

मायाधिकारिणो रुद्रा मण्डलाधिपतीश्वराः। इति। इत्थमशुद्धेऽध्वनि चतुरधिकशतद्वयसंख्याकानि भुवनानि शुद्धविद्यातत्त्वे सप्तकोटिमन्त्रेश्वरीणां भृगुणीप्रभृतीनां सप्तविद्याराज्ञीनां तावत्संख्यानि भुवनानि। विद्याधिपस्यापि भुवनं तत्रैव। तदुक्तं श्रीमन्मृगेन्द्रे–

भृगुणी ब्रह्मवेताली स्थाणुमत्यम्बिका परा।

रूपिणी नन्दिनी बाला सप्त सप्तार्बुदेश्वराः।
विद्याराज्ञ्यः समाख्याता विद्यायां रुद्रसंस्तुताः।

तासामुपरि दीप्तश्रीर्देवो विद्याधिपः स्थितः। इति। ईश्वरतत्त्वे पूर्ववदेव भुवनान्यष्टौ। सदाशिवेप्येकम्। शक्तितत्त्वे निवृत्त्यादिभुवनचतुष्टयम्। शिवतत्त्वे तु शान्त्यतीताख्यमेकं भुवनम्। तन्मस्तके इन्धिकादीन्यनाश्रितान्तानि भुवनानि दश। एवं शुद्धाध्वनि द्वात्रिंशद्भुवनानि। एवं सुप्रभेदादौ कालाग्न्यादिभुवनोच्छ्रायादिष्वपि वैषम्यं श्रूयते इति संहितानां परस्परविरोध इति चेन्न। कल्पभेदेन प्रामाण्योपपत्तेः। ननु तथापि दीक्षायां कथं शुद्धिः कथनीयेति चेत् शृणु। तत्तत्संहितानुसारिभिः तत्तदुक्तक्रमेणैव शुद्धिः कर्तव्येति सर्वमवदातम्। शुद्धिश्च दीक्षायामुक्तरूपपञ्चाध्वगर्भासु कलासु संयोजनसंजननभोगभोजनपाशच्छेदादिना कर्तव्या। सा च शोधनीयानां नानारूपा। तत्र तावन्मायीयस्य स्थूलशरीरादेः शुद्धिः सर्वात्मना विच्छेदः। पुर्यष्टकदेहस्य तु मायापर्यन्तं भोगप्रदानसामर्थ्यमात्रविच्छेदः। तदुपरि तु सर्वात्मना विच्छेदः। कर्मणां तु भोगेन सर्वधा विच्छेदः। एवमाणवस्याप्यशुद्धाध्वनि न सर्वात्मना विच्छेदः। अपि तु तत्तद्भोगप्रदकर्मसहकारित्वविच्छेदः। इत्थं शुद्धाध्वन्यपि कुण्डलिनीकार्यस्याधिकारमलस्य शुद्धकर्मणश्च विच्छेदः। रोधशक्तेरपि आणवगताच्छादनशक्तिसहकारित्वविच्छेदः शुद्धिः तथा तेषामेव पुनः प्रसवयोग्यता विच्छेदश्चेति। नन्वेवमेकस्य दीक्षासमये कलादिशोधने कृते अन्यस्यापि देहाद्युत्पत्तिर्न स्यात् स्थालिस्थानीयासु कलासु वह्निस्थानीयेन मन्त्रादिना बीजस्थानीयप्ररोहणशक्तेः विनाशितत्वेन शोधितासु कलासु देहाद्युत्पत्तेरनुपपत्तेरिति चेन्न। असाधारणस्य कार्यस्य साधारणेष्वपि तत्तद्भोगानुकूल्यप्रयोजकसंबन्धस्य च प्ररोहणशाक्तिवधेऽपि अन्यस्य देहाद्युत्पत्तावविराधोदिति सर्वं समञ्जसम्। अध्वशुद्धिपूर्वकं दीक्षायां निरूपितायां दीक्षितधर्मा अलौकिकश्रेयःसाधनीभूता निरूप्यन्ते। त्रिपुण्ड्रोद्धूलनरुद्राक्षधारणादिकं च दीक्षितस्य नित्यधर्माः न केवलं दीक्षितस्यैव। अपि तु ब्राह्मणमात्रस्य अथर्वशिरःश्वेताश्वतरतैत्तरीयकैवल्याद्युपनिषन्मूलकैः स्मृतिपुराणेतिहासादिभिः नित्यशब्दसदाशब्दफलानुत्कीर्तनाऽत यागचोदनाऽकरणे दोषकीर्तनवीप्सावचनवर्णाश्रमधर्मत्वकीर्तनादिभिः तथैव प्रतिपादितत्वात्। तथाहि पराशरे–

ब्राह्मणो विधिनोत्पाद्य स्त्रिपुण्ड्रं भस्मनैव तु।
ललाटे धारयेन्नित्यं तिर्यग्भस्मावकुण्ठनम्। इति।

स्कान्दे–

त्रिपुण्ड्रं धारयेन्नित्यं गृहस्थाश्रममाश्रितः।
धारयेद्भिक्षुको नित्यं इति जाबालिकी श्रुतिः।
पराशरोपपुराणे च सदाशब्दः।
आदिब्राह्मणभूतेन त्रिपुण्ड्रं भस्मना धृतम्।
यतोऽत एव विप्रस्तु त्रिपुण्ड्रं धारयेत् सदा।

तथैव स्कान्दे धारयेद्ब्राह्मणः सदा। इति।

अत्यागविधौ स्कान्दे–

त्रिपुण्ड्रं धारयेत् भक्त्या मनसापि न लङ्घयेत्। इति।

तथा पराशरोपपुराणे –

भस्मना वेदसिद्धेन त्रिपुण्ड्रं देहकुण्ठनम्।
रुद्रालिङ्गार्चनं चापि मोहतो वापि न त्यजेत्।

तथा त्यागे दोषकीर्तिनं स्कान्दे–

श्रुत्या विधीयते यस्मात् तत्त्यागी पतितो भवेत्।

तथा पराशरोपपुराणे–

भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
विना वेदोदिताचारः स्मार्तश्चानर्थकारणम्।

तथा पराशरोपपुराणे वर्णाश्रमधर्मतया संकीर्तनम्–

ब्राह्मणानामयं धर्मो त्रिपुण्ड्रस्य तु धारणम्।
मन्त्रध्यानादिसंयुक्तं नैवं वर्णान्तरस्य तु।
वर्णधर्मतया प्राज्ञाः प्रवदन्ति महर्षयः।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।

आश्रमाणां च सर्वेषां धर्मत्वेनाहुरास्तिकाः। अत्रैव फलानुकीर्तनमपि वचनद्वये द्रष्टव्यम्। तथा बोधायने– स्मृतिभास्करे च प्रायश्चित्तरूपनैमित्तिकत्वमपि।

मध्यमानामिकाङ्गुष्ठैः ललाटे यत् त्रिपुण्ड्रकम्।
तत् त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम्। इति।

वासिष्ठलैङ्गे मोक्षसाधनज्ञानसाधनत्वमप्युक्तम्–

बहुनोक्तेन किं भस्मधारणं मोक्षसाधनम्।
भस्मना नित्ययुक्तस्य ज्ञानमुत्पद्यतेऽचिरात्। इति।

सूतसंहितायां च–

उद्धूलनं त्रिपुण्ड्रं च ज्ञानाङ्गत्वेन केवलम्।

आमनन्ति मुनिश्रेष्ठाः श्वेताश्वतरशाखिनः। इति।। स्मृतिरत्नावल्यां महापातकप्रायश्चित्तत्वेन श्रूयते। तत्तिपुण्ड्रं भवेच्छस्तं महापातकनाशनम्। इति।

धर्मसारसुधानिधौ–

यस्त्रिपुण्ड्रं सदा कुर्यात् मन्त्रपूतेन भस्मना।
वेदोक्तेन विधानेन शिवसायुज्यमाप्नुयात्। इति।

स्मृतिसारसमुच्चये–

अशुचिर्वाप्यनाचारो मनसा पापमाचरन्।
शुचिरेव भवेन्नित्यं त्रिपुण्ड्रस्य तु धारणात्।

नारदीयस्मृतौ–

त्रिपुण्ड्रं परमं पुण्यं ब्रह्मविष्णुशिवात्मकम्।
ये घोरा राक्षसाः प्रेता ये चान्ये क्षुद्रजन्तवः।
त्रिपुण्ड्रधारिणं दृष्ट्वा पलायन्ते न संशयः।

मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा।
भस्मच्छन्नो भस्मशय्याशयानो रुद्रध्यायी मुच्यते सर्वपापैः।

कौर्मे–

स्रष्टा सृष्टिच्छलेनाह त्रिपुण्ड्रस्य प्रशस्तताम्।
ससर्ज स ललाटं हि तिर्यङ्नोर्ध्वं न वर्तुलम्।
तिर्यग्रेखाः प्रकाशन्ते ललाटे सर्वदेहिनाम्।
तथापि मानवा मूर्खा न कुर्वन्ति त्रिपुण्ड्रकम्।
न तद्ध्यानं न तद्दानं न तज्ज्ञानं न तत्तपः।
विना तिर्यक् त्रिपुण्ड्राङ्कं विप्रेण यदनुष्ठितम्।
वेदस्याध्यने शूद्रो नाधिकारी यथा भावेत्।
त्रिपुण्ड्रेण विना विप्रो नाधिकारी शिवार्चने।
न दानेन न यज्ञेन न तपाभिः सुदुष्करैः।
न तीर्थयात्रया पुण्यं यत् त्रिपुण्ड्रेण लभ्यते।
दानं यज्ञाश्च धर्माश्च तीर्थयात्राश्च नारद।
ध्यानं तपः त्रिपुण्ड्रस्य कलां नार्हन्ति षोडशीम्।

मात्स्ये–

किं यज्ञैः किमनेकतीर्थगमनैः किं वेदपाठश्रमैः
किं घोरैर्विविधैस्तपोभिरमलैः किं देवताराधनैः।
किं ध्यानैः किमनेकदाननिकरैः किं सांख्ययोगभ्रमैः।
मोक्षार्थी सितभस्मनाऽतिनिपुणः कुर्यात् त्रिपुण्ड्रं बुधः।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रं चावकुण्ठनम्।
यस्य सिध्येत् प्रयत्नेन ब्राह्मण्यं तस्य पुष्कलम्।
वेदवेदान्तनिष्ठानां भस्मनैव त्रिपुण्ड्रकम्।
सम्यक् ज्ञानप्रदं शीघ्रं तस्य मुक्तिर्न संशयः।

लौगाक्षिस्मृतौ–

मध्यमानामिकाङ्गुष्ठैः ललाटे भस्मना कृतः।
स त्रिपुण्ड्रो भवेच्छस्तो महापातकनाशनः।
त्रिपुण्ड्रं धारयेद्यस्तु शिवप्रणतमानसः।
भूर्भुवस्वस्त्रयो लोका धृतास्तेन महात्मना।
त्रिपुण्ड्रधृग्विप्रवरो यो रुद्राक्षधरः शुचिः।
स हन्ति रोगदुरितव्याधिदुर्भिक्षतस्करान्।
प्राप्नोति परमं ब्रह्म यतो नावर्तते पुनः।
स पङ्क्तिपावनः श्राद्धे पूज्यो विप्रैः सुरैरपि।
श्राद्धे यज्ञे जपे होमे वैश्वदेवसुरार्चने।
धृतत्रिपुण्ड्रः पूतात्मा मृत्युं जयति मानवः।
त्रिपुण्ड्रं यस्त्वधृत्वा तु कुर्याद्यत् कर्म तद्वृथा। इति।

स्कान्दे सूतसंहितायाम्–

ललाटे चैव दोर्द्वन्द्वे तथैवोरसि बुद्धिमान्।
त्रिपुण्ड्रं धारयेन्नित्यं भुक्तिमुक्तिफलप्रदम्।
वर्णानामाश्रमाणां च मन्त्रतोऽमन्त्रतोऽपि वा।
त्रिपुण्ड्रोद्धूलनं प्रोक्तं जाबालैरादरेण तु।
उद्धूलनं त्रिपुण्ड्रं च ज्ञानाङ्गत्वेन सादरम्।
अमनन्ति मुनिश्रेष्ठाः श्वेताश्वतरशाखिनः।
अयमत्याश्रमो धर्मो यैः सदाऽऽचरितो मुदा।
तेषामेव च विज्ञानं संसारच्छेदकारणम्।
उद्धूलनं त्रिपुण्ड्रं च मायापाशनिवृत्तये।
आमनन्ति मुनिश्रेष्ठाः अथर्वशिरसि स्थिताः।
व्रतं पाशुपतं येन सम्यगाचरितं बुधाः।
तस्य ज्ञानं विजायेत तेन पाशविमोचनम्।
उद्धूलनं त्रिपुण्ड्रं च ज्ञानाङ्गत्वेन केवलम्।
आमनन्ति मुनिश्रेष्ठाः साक्षात् कैवल्यशाखिनः।
अतोऽपि पाशविच्छेदलाभाय ज्ञानसिद्धये।
उद्धूलनं त्रिपुण्ड्रं च मुमुक्षुः सम्यगाचरेत्।
सत्यादिभ्यः परा भूतिस्ततस्तिर्यक् त्रिपुण्ड्रकम्।
उद्धूलनं चाचरेदेव ममुक्षुर्ज्ञानसिद्धये।
भस्मनोद्धलनं चैव तथा तिर्यक् त्रिपुण्ड्रकम्।

प्रमादादपि मोक्षार्थी न त्यजेदिति हि श्रुतिः।
भस्मनोद्धूलनं चैव तथा तिर्यक् त्रिपुण्ड्रकम्।
महापातकनाशाय विधत्ते वैदिकी श्रुतिः।
भस्मनोद्धूलनं चैव तथा तिर्यक् त्रिपुण्ड्रकम्।
मङ्गलार्थं च सर्वेषां विधत्ते वैदिकी श्रुतिः।
भस्मनोद्धूलनं चैव तथा तिर्यक् त्रिपुण्ड्रकम्।
दानत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः।
भस्मनोद्धूलनं चैव तथा तिर्यक् त्रिपुण्ड्रकम्।
तपस्त्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः।
भस्मनोद्धूलनं चैव तथा तिर्यक् त्रिपुण्ड्रकम्।
यज्ञत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः।
भस्मनोद्धूलनं चैव तथा तिर्यक् त्रिपुण्ड्रकम्।
सर्वधर्मतया पुंसां विधत्ते वैदिकी श्रुतिः।
शिवेन विष्णुना चैव ब्रह्मणा वज्रिणा तथा।
देवताभिः धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना।
यक्षराक्षसगर्धर्वसिद्धविद्याधरादिभिः ।
मुनिभिश्च धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरपि च संकरैः।
अपभ्रंशैर्धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना।

एवमन्यान्यपि स्मृतीतिहासपुराणवचनान्युद्धूलनत्रिपुण्ड्रयोरवश्यकर्तव्यताप्रतिपादकानि द्रष्टव्यानि। एवं रुदाक्षधारणमपि नित्यसदाशब्दयोरकरणे दोषस्य च श्रवणात् नित्यमवगन्तव्यम्। तथा हि स्कान्दे नित्यशब्दः-

कण्ठे मूर्ध्नि उपवीते वा कण्ठे करयुगेऽथवा।
रुद्राक्षं धारयेन्नित्यं भक्त्या परमया युतः।
किमत्र बहुनाऽनेन वर्णनेन पुनः पुनः।
रुद्राक्षधारणं नित्यं तस्मादेवं प्रशस्यते।
वायवीये च सदाशब्दः श्रूयते।
नाभक्त्या धारयेदक्षं सदा भक्त्यैव धारयेत्। इति।

तथा स्कान्दे अकरणे दोषः-

प्रायश्चित्ते तथा श्राद्धे दीक्षाकाले विशेषतः।
अरुद्राक्षधरो भूत्वा यत् किञ्चित् कर्म वैदिकम्।
कुर्वन् विप्रस्तु मोहेन नरके पतति ध्रुवम्। इति।

तथा पराशरे–

पापिष्ठानां मनुष्याणां रुद्राक्षाणां च धारणे।
श्रद्धा न जायते साक्षात् वेदसिद्धे विमुक्तिदे।
बहूनां जन्मनामन्ते महादेवप्रसादतः।
रुद्राक्षधारणे श्रद्धा स्वभावेनैव जायते। इति।
तथा प्रायश्चित्तत्वमपि वासिष्ठलैङ्गे श्रूयते।
रुद्राक्षधारणाद्रुद्रो भवत्येव न संशयः।
पश्यन्नपि निषिद्धांश्च तथा शृण्वन्नपि स्मरन्।
जीवन्नपि तथा चाश्नन् प्रलपन्नपि सन्ततम्।
कुर्वन्नपि तथा गच्छन् विसृजन्नपि मानवः।
रुद्राक्षधारणादेव सर्वैः पापैर्न लिप्यते।
तथा ज्ञानसाधनत्वमपि तत्र तत्र पुराणे–
जाबालोपनिषत् साध्वी मम ज्ञानस्य सिद्धये।
प्रधानसाधनान्याह प्राणिनामादरेण तु।
अविमुक्तं मम क्षेत्रं मन्नामपरमं शुभम्।
शररुद्रीयसंज्ञं च तथा संन्यासमुत्तमम्।
भस्मनोद्धूलनं तद्वत् त्रिपुण्ड्रस्य च धारणम्।
रुद्राक्षधारणं साक्षात् शिवशब्दजपं तथा।
भस्मसम्पादनं ध्यानं ममैव परमस्य च।
एतान्याह प्रधान्यानि साधनानि प्रियेण तु।
एतत् सर्वं ममाख्यातं ममविज्ञानसिद्धये।
एषु धर्मेषु यः श्रद्धां नित्यं कुर्यात् द्विजोत्तमः।
अचिराल्लभते ज्ञानं संसारच्छेदकारणम्।
एषु धर्मेषु यो धर्मः विकलो यस्य धर्मिणः।
न तस्य ब्रह्मविज्ञानं जायते न हि संशयः।

तथा पाद्मे सर्वपापशोधकत्वेन रुद्राक्षधारणम्–

रुद्राक्षं शिरसा ह्येकं धार्यं रुद्रपदैः सह।
ध्वंसनं सर्वदुःखानां सर्वपापप्रणाशनम्।
तथा स्कान्दे रुद्राक्षधारणस्य फलं श्रूयते–
रुद्राक्षस्य फलं स्कन्द त्रिषु लोकेषु विश्रुतम्।
फलस्य दर्शनं पुण्यं स्पर्शात् कोटिगुणं भवेत्।
शतकोटिगुणं पुण्यं धारणाल्लभते नरः।

लक्षकोटिसहस्राणि लक्षकोटिशतानि च।
जपात्तु लभते पुण्यं नात्र कार्या विचारणा।
हस्ते चोरसि कण्ठे च कर्णयोर्मस्तके तथा।
रुद्राक्षं धारयेद्यस्तु स रुद्रो नात्र संशयः।
अवध्यः सर्वभूतानां रुद्रवद्विचरेद्भुवि।
सुराणामसुराणां च वन्दनीयो यथा शिवः।
रुद्राक्षधारी सततं वन्दनीयस्तथाऽमरैः।
उच्छिष्टो वापि कर्मस्थो युक्तो वा सर्वपातकैः।
मुच्यते सर्वपापेभ्यो रुद्राक्षस्य तु धारणात्।
कण्ठे रुद्राक्षमाबध्य श्वानो वा म्रियते यदि।
सोऽपि रुद्रत्वमाप्नोति किं पुनर्मानुषादयः।
जपध्यानविहीनोऽपि रुद्राक्षं यदि धारयेत्।
सर्वपापविनिर्मुक्तः स याति परमां गतिम्।
मृण्मयं वापि रुद्राक्षं कृत्वा यत्नेन धारयेत्।
कुलैकविंशमुद्धृत्य शिवलोके महीयते।
महासेन कुशग्रन्थिपुत्रजीवादयः परे।
रुद्राक्षस्य तु चैकस्य कलां नार्हन्ति षोडशीम्।
पुरुषाणां तु यथा विष्णुः ग्रहाणां तु यथा रविः
नदीनां तु यथा गङ्गा मुनीनां काश्यपो यथा।
उच्चौःश्रवा यथाऽश्वानां देवानामीश्वरो यथा।
देवीनां तु यथा गौरी तद्वत् श्रेष्ठमिदं भवेत्।
नातः परतरं स्तोत्रं नातः परतरं व्रतम्।
अक्षयेषु च दानेषु रुद्राक्षं तु विशिष्यते।
शिवभक्ताय दान्ताय दद्याद्रुद्राक्षमुत्तमम्।
तस्य पुण्यफलस्यान्तं न चाहं वक्तुमुत्सहे।
धृतरुद्राक्षकण्ठा ये ते पश्यन्त्यग्रतः शुभम्।
अपि दुष्कृतकर्माणस्ते यान्ति परमां गतिम्।
घृतरुद्राक्षकण्ठाय यस्त्वन्नं संप्रयच्छति।
त्रिसप्तकुलमुद्धृत्य रुद्रलोकं स गच्छति।
विभूतिर्यस्य फाले न नाङ्गे रुद्राक्षधारणम्।
न शम्भोर्भवने पूजा स विप्रः श्वपचायते।
खादन् मांसं पिबन् मद्यं संगच्छन्नन्त्यजामपि।

पातकेभ्यो विमुच्येत रुद्राक्षे शिरसि स्थिते।
सर्वयज्ञतपोदानवेदाभ्यासैश्च यत् फलम्।
तत् फलं लभते सद्यो रुद्राक्षस्य च धारणात्।

एवमन्यान्यपि पुराणादिवचनानि रुद्राक्षधारणनित्यत्वादौ द्रष्टव्यानि।

सर्ववर्णाश्रमाणाम् ऊर्ध्वपुण्ड्रं त्रिशूलवर्तुलचतुरश्रार्धचन्द्राकृतिपुण्ड्रान्तरं चक्राद्यङ्कनं च निषिध्यते निन्द्यते च। तथाहि पराशरोपपुराणे–

ऊर्ध्वपुण्ड्रं त्रिशूलं च वर्तुलं चतुरश्रकम्।
अर्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत्। इति।

तथा स्कान्दे सूतसंहितायाम्–

ऊर्ध्वपुण्ड्रं त्रिशूलं च वर्तुलं चतुरश्रकम्।
धारयन्ति ललाटे तु मनुष्याः पापकर्मिणः।
शङ्खचक्रगदापद्मवज्रं पाशाङ्कुशादिभिः।
अङ्किताश्च भवन्त्येव मनुष्याः पापकर्मिणः।
त्यजन्ति सकलं कर्म सदाविध्युक्तमास्तिकाः।
निषिद्धकर्म कुर्वन्ति मनुष्याः पापकर्मिणः।
त्यजन्ति वेदं वेदोक्तं तथा स्मृतिपुराणकम्।
वेदाङ्गानि च मोहेन मनुष्याः पापकर्मिणः।
पाञ्चरात्रे च कापाले पाषण्डेष्वपरेषु च।
दीक्षिताश्च भवन्त्येव मनुष्याः पापकर्मिणः।
वेदमार्गपरिभ्रंशं वेदबाह्यपरिग्रहम्।
कुर्वन्ति स्वात्ममोहेन मनुष्याः पापकर्मिणः।

तथा पराशरोपपुराणे–

जन्मना लब्धजातिस्तु वेदपन्थानमाश्रितः।
पुण्ड्रान्तरं भ्रमाद्वापि ललाटे नैव धारयेत्।
ख्यातिलाभादिसिद्ध्यर्थमपि विष्ण्वागमादिषु।
स्थितं पुण्ड्रान्तरं नैव धारयेद्वैदिको जनः।
तिर्यक् पुण्ड्रं परित्यज्य श्रौतं पुण्ड्रान्तरं भ्रमात्।
ललाटे धारयन्मर्त्यः पतत्येव न संशयः।
न दाहयेद्द्विजश्रेष्ठं न दहेत् चक्रपूर्वकैः।
अङ्कितो यः स्वदेशान्तं राजा शीघ्रं प्रवासयेत्।
अतीव पतितानां हि श्वपदाद्यङ्कनं नृणाम्।

अतीव तेन शुद्धानामङ्कं शुद्धं न चाङ्कयेत्।
अध्यापने चाध्ययने श्रौतस्मार्तेषु कर्मसु।
संभाषणे च संबन्धे नाधिकारी च लाञ्छितः।

मानवोपपुराणे चतुर्दशाध्याये शङ्खचक्राद्यङ्कननिषेधः-

आयुधैः शङ्खचक्राद्यैः न दहेच्च कदाचन।
मनुष्याणां चैव नाम्नैव न लिखेच्चोरसि भ्रमात्।
दग्धाङ्गश्चायुधैः दिव्यैः लिखितो नरनामतः।
श्रौतस्मार्तसमाचारे नाधिकारी कदाचन।
दग्धाङ्गा लिखिताङ्गाश्च न संभाष्या द्विजादिभिः।
न द्रष्टव्याश्च तान् राजा देशाच्छीघ्रं प्रवासेयत्। इति।

शातातपस्मृतौ-

अङ्केषु नाङ्कायेत् विप्रो देवतायुधलाञ्छनैः।
दहनात् लेखनाद्विप्रः पातित्यं याति तत्क्षणात्।

स्कान्दे यज्ञवैभवखण्डे-

वेदमार्गेषु निष्ठस्तु कुर्यात् तप्तायसेन वा।
स शूद्रवत् बहिष्कार्यः सर्वस्मात् द्विजकर्मणः।
यथा श्मशानगं काष्ठमनर्हं सर्वकर्मसु।
तथा चक्राङ्कितो विप्रः सर्वकर्मबहिष्कृतः। इति।

ब्राह्मपुराणे तप्तमुद्राङ्कनिषेधः-

तप्तमुद्रा त्वन्त्यजाय हरिणा निर्मिता पुरा।
गोपीचन्दनसंसिक्तफलकाप्यन्त्यजाय वै।
भूदेवस्तप्तमुद्रां च चिह्नं कृत्वा विमूढधीः।
इह जन्मनि शूद्रः स्यात् प्रेत्य च श्वा भविष्यति। इति।

बोधायनस्मृतावङ्कनिषेधः-

नाङ्कनं विग्रहे कुर्याद्वेदपन्थानमाश्रितः।
पुण्ड्रान्तरं भ्रमाद्वापि ललाटे नैव धारयेत्।
देवानां च मनुष्याणां तथाऽन्येषां च लाञ्छनम्।
न कुर्यात् मोहतो वापि यदि कुर्यात् पतत्यधः।
कस्यचित् लाञ्छितो मर्त्यो न साक्षी सर्वथा भवेत्।
श्रौतस्मार्तसदाचारे नाधिकारी च लाञ्छितः।
लाञ्छिताश्च न संभाष्याः न स्पृश्याश्च कदाचन।

न दर्शनीयास्तान् राजा देशाच्छीघ्रं प्रवासयेत्।
वेदोक्तेनैव मार्गेण भस्मनैव त्रिपुण्ड्रकम्।
धूलनं नाचरिष्यन्ति पाषण्डोपहता जनाः।
ऊर्ध्वपुण्ड्रं ललाटे तु वर्तुलं चार्धचन्द्रकम्।
धारयिष्यन्ति मोहेन पाषण्डोपहता जनाः।
शङ्खचक्रगदापद्मैरङ्कनं विग्रहे स्वके।
मोहेनैव करिष्यन्ति पाषण्डोपहता जनाः।
मनुष्याणां च नाम्ना तु तेषामाकारतोऽपि वा।
लाञ्छिताश्च भविष्यन्ति पाषण्डोपहता जनाः। इति।

तथा नारदीये –

तिर्यक् पुण्ड्रं परित्यज्य श्रौतं वर्णान्तरं सदा।
धारयेद्यदि मोहाद्वा पतत्येव न संशयः।
द्विजः सन्तप्तशङ्खादिलिङ्गाङ्किततनुं नरम्।
संभाष्य रौरवं याति यावदिन्द्राश्चतुर्दश।
चक्राङ्किततनुर्यत्र तत्र कोऽपि न संवसेत्।
यदि तिष्ठेन्महापापी सहस्रब्रह्महा भवेत्।
गङ्गास्नानरतो वापि चाश्वमेधरतोऽपि वा।
चक्राङ्किततनुं दृष्ट्वा रौरवं नरकं व्रजेत्।
चक्राङ्कितं तनुं दृष्ट्वा पश्येत् सूर्यं जपेन्नरः।
जपेच्च पौरुषं सूक्तमन्यथा रौरवं व्रजेत्।
ब्राह्मणस्य तनुर्ज्ञेया सर्वदेवसमाश्रया।
सा चेत् सन्तापिता राजन् किं वक्ष्यामि महैनसः। इति।

अत ऊर्ध्वपुण्ड्रादिकं तप्तशङ्खचक्रादिलाञ्छनं च पाञ्चरात्रागमेषु तामसाधिकारिणामेव विहितं न तु वैदिकधर्माश्रमिणाम्। तेषां वेदमूलकत्वाद्वेदमूलस्मृत्यादिमूलकत्वाच्च। अत ऊर्ध्वपुण्ड्रादिकं तप्तचक्रादिलाञ्छनं च पाञ्चरात्रागमेषु वैदिकैः सिद्धान्तशैवाश्रमिभिश्च न कर्तव्यम्। ननु वैदिकेष्वेव पाद्मादिपुराणेषु यथायथं पुण्ड्रान्तरनिषेधपूर्वकमूर्ध्वपुण्ड्रादिकं चक्राद्यङ्कनं च नित्यसदादिशब्दैः सर्वकर्माङ्गतया क्वचित् फलसाधनतया च विधीयते। तथाहि–

ब्राह्मणः क्षत्रियो वैश्यः शूद्रा नारी तथेतरः।
चक्राद्यैरङ्कयेत् गात्रमात्मनः परया मुदा।
शिखोपवीतवद्धार्यमूर्ध्वपुण्ड्रं द्विजन्मनाम्।
ऊर्ध्वपुण्ड्रं द्विजः कुर्यात् दण्डाकारं सुशोभनम्।

सान्तरालमृजुं सौम्यं सुपार्श्वं सुमनोहरम्।
यः करोत्यूर्ध्वपुण्ड्रं स मम लोके महीयते।
अमलान्यूर्ध्वपुण्ड्राणि सान्तरालानि यो नरः।
करोति विपुलं तत्र मन्दिरं मे करोति सः।
ऊर्ध्वपुण्ड्रस्य मध्ये तु विशालेऽतिमनोहरे।
लक्ष्म्या सार्धं समासीनो रमे नित्यमहं मुदा।
निरन्तरालं यः कुर्यात् ऊर्ध्वपुण्ड्रं द्विजाधमः।
स हि तत्र स्थितं विष्णुं श्रियं चैव व्यपोहति।
अच्छिद्रमूर्ध्वपुण्ड्रं तु यः करोति विमूढधीः।
स पर्यायेण तानेति नरकानेकविंशतिम्।
ऋजूनि स्फुटपार्श्वानि सान्तरालानि विन्यसेत्।
ऊर्ध्वपुण्ड्राणि दण्डाब्जदीपमत्स्यनिभानि च।
बहुना किं प्रलापेन हृद्यं सौम्यं सुदर्शनम्।
ऋजुं सुपार्श्वमूर्ध्वाग्रं कुर्यादत्यच्छमध्यमम्।
शिखोपवीतवद्धार्यमूर्ध्वपुण्ड्रं द्विजन्मनाम्।
विनाकृताश्चेद्विफलाः क्रियाः सर्वा महामुने।
तस्मात् सर्वेषु कार्येषु धार्यं विप्रस्य धीमतः।
रक्षाकरं दुर्ग्रहाणां संसारग्रहनाशनम्।
ऊर्ध्वपुण्ड्रात् परं नान्यः दृष्टं ज्ञातं श्रुतं मया।
धारयेदूर्ध्वपुण्ड्रांश्च विष्णोः प्रीतिकरांस्तथा।
जपहोमार्चनध्यानदानादिषु विशेषतः।
नश्यन्ति सकलाः क्लेशाः नराणां पापसम्भवाः।
अभीष्टान्यखिलानि स्युः ऊर्ध्वपुण्ड्रस्य धारणात्।
त्रयोदश द्वादश वा ह्यूर्ध्वपुण्ड्राणि धारयेत्।
एकं चत्वारि षट् चाष्टापि वाञ्छन्ति केचन।
प्रणवेन तथाव्यूहैः षडष्टद्वादशाक्षरैः।
पुण्यतीर्थोद्धृतश्वेतमृत्स्ना विरचितैः शुभैः।
ऊर्ध्वपुण्ड्रैः द्वादशभिः सोम्यैरावृतविग्रहम्।
स्वस्थानविधृताशेषपञ्चायुधविभूषितम् ।
गाधिसूनुं महात्मानं विश्वामित्रं तपोनिधिम्।
अभ्येत्य काश्यपो नाम कदाचिदृषिसत्तमः।
प्रणम्योपान्तिके तस्थौ शिरस्याधाय चाञ्जलिम्।
धृतोर्ध्वपुण्ड्रः सततं शस्तया श्वेतमृत्स्नया।

शङ्खचक्रादिभिः चिह्नैः स्वेषु स्थानेषु लाञ्छितम्।
एवं लक्षणसंयुक्तो यः स आचार्य उच्यते।
धृतोर्ध्वपुण्ड्रतिलकः सदा द्वादशनामभिः।
प्रशस्तोज्ज्वलवेषश्च शङ्खचक्रादिलाञ्छितः।

एवमादिगुणैर्युक्तः स्थिरधीः शिष्य उच्यते। इत्यादि। एवं च स्मृत्यधिकरणन्यायेन स्वमूलभूतवेदस्यापि अनुमानात् त्रिशूलात् ऊर्ध्वपुण्ड्रचकाङ्कनादेरपि वेदोक्तत्वात् वैदिकैः शैवाश्रमिभिश्च धार्यमेवेति चेन्न। उक्तप्रत्यक्षश्रुतिमूलस्मृतिपुराणादिभिः त्रिशूलोर्ध्वपुण्ड्रशङ्खलाञ्छनादेः निषिद्धत्वेन निषिद्धार्थकोक्तपाद्मादिवचनैः विरोधाधिकरणन्यायेन बौद्धाद्यागमैरिव श्रुत्यनुमानासम्भवात्। किंचोक्तपाद्मादिवचनानां पाञ्चरात्रतन्त्रैकार्थ्यप्रत्यभिज्ञानेन सम्भवन्मूलतया हेत्वधिकरणन्यायेन वैसर्जनीयं वासोऽध्वर्युः प्रतिगह्णातीति स्मृतिवन्न वेदमूलकत्वं कल्पनीयम्। अपि तु पाञ्चरात्रतन्त्रमूलकमेव। तन्त्रमूलकानामपि स्मृतिपुराणादीनां सम्भवात्। तदुक्तं स्कान्दे सूतसंहितायाम्–

तन्त्रावलम्बनेनैव पुराणानि च कानिचित्।

साक्षाद्वेदविरुद्धार्थं प्रवदन्ति क्वचित् क्वचित्। इति। एवं चोक्तन्यायेन तन्त्रमूलकत्वात् न वेदमूलकत्वमिति स्थितम्। ननु अज्ञानस्य ज्ञाननिवर्त्यत्वं लोकसिद्धं श्रुतिसिद्धं च मलस्याप्यज्ञानस्य कथं क्रियारूपदीक्षानिवर्त्यत्वमिति चेत्। अज्ञानं नाम ज्ञानाभावो वा भ्रान्तिर्वा। यद् ज्ञाननिवर्त्यं दृष्टं न तन्मलः। किन्तु चक्षुःपटलद्रव्यान्तरम्। न तद् ज्ञाननिवर्त्यं दृष्टम्। मलस्य ज्ञानाभावादिसाधारणाज्ञानत्वं च दुर्वचनमिति। इदं च सर्वं 'तच्च द्रव्यं यतः कर्म' इत्युत्तरग्रन्थे स्फुटम्। इदं च दीक्षायाः क्रियारूपत्वमभिप्रेत्योक्तं न दीक्षाया एव मोक्षहेतुत्वे तदनन्तरं नित्यनैमित्तिकक्रियाचर्याविधानं श्रोतव्यमेतदाप्तोक्त्या मन्तव्यं चोपपत्तिभिः इत्याद्यागमैः श्रवणादिविधानं चानर्थकं स्यादिति वाच्यम्। तेषामपि तस्याः फलोपकारिसहकारित्वात्। तदुक्तं श्रीमत्स्वायम्भुवे–

एवमेतान् शिवेनोक्तान् समयान् परिपालयेत्।

प्रपालनात् शिवं याति क्रव्यादत्यं ततोऽन्यथा। इति। तस्मात् सूष्ठूक्तं दीक्षैव मलनिवर्तिकेति। अन्ये तु ज्ञानमेव मलनिवर्तकं द्रव्यरूपस्यापि तस्यावारकत्वेन बाह्यतमोवत् प्रकाशं विना निवर्त्यत्वायोगात्। तदुक्तं स्कन्दकालोत्तरे–

आत्मविज्ञानमाश्रित्य विमलं सर्वतोमुखम्।
संसारार्णवमग्नानां भूतानां शरणार्थिनाम्।

नान्यः शरणदः कश्चिदात्मज्ञानादृते क्वचित्। इति। तथा शिवधर्मोत्तरे–

मोक्षार्थी पुरुषस्तस्मात् ज्ञानमेव सदाऽभ्यसेत्। तथा ज्ञानतिलकेऽपि–

ईदृग्भूतो दुराधर्षः संसारार्णोऽतिभीषणः।
तरन्ति ते महात्मानो येषां ज्ञानकरण्डकम्। इति।

न चैवं दीक्षायाः तद्धेतुत्ववचनवर्णाश्रमसदाचारादेव मुक्तिः न चान्यथा। इत्यादिकं च श्रौतस्मार्तानुष्ठानस्य तद्धेतुत्वप्रतिपादकं च ज्ञानं प्रधानं न तु कर्महीनं कर्म प्रधानं न तु बुद्धिहीनम्।

तस्मात् तयोरेव भवेत् प्रसिद्धिर्न ह्येकपक्षो विहगः प्रयाति। इत्यादिकं ज्ञानकर्मणोः समुच्चयवचनं च शास्त्रेषु च तदुक्तक्रियाचर्याणामपि तद्धेतुत्वप्रतिपादकत्ववचनं च पीड्येत इति वाच्यम्। तेषां साक्षात् मोक्षसाधनत्वनिषेधात् परम्परासाधनत्वपरत्वात्। ज्ञानस्य मोक्षहेतुत्वमुपक्रम्य ज्ञानतिलके–

ये पुनस्तीर्थयात्रादिदानस्नानजपादिभिः।
यज्ञाग्निहोत्रकर्तारः तटाकाराभकारकाः।
देवार्चनादिचर्याभिः पञ्चाग्नितपसि स्थिताः।
जपध्यानरताः केचित् ये शौचरता नराः।
मौनिनो दण्डधारिणो मृगचर्मावकुण्ठिताः।
एकदण्डधरा ये च त्यक्तयज्ञोपवीतिनः।
नित्यस्नायी शिखाच्छेदी द्वैताद्वैतव्यवस्थिताः।
भस्मस्नायी जटाधारी लिङ्गाराधनतत्पराः।
शैवाः पाशुपता ये च मन्त्रेणार्थविशेषतः।
महास्थिमुद्राङ्गाश्चैव महाकङ्कालधारिणः।
प्रेतावासरता नित्यं भस्मकुण्ठितविग्रहाः।

सौरधर्मेषु ये भक्ताः विशिष्टाः सुशिखास्तथा। इत्यारभ्य –

अज्ञानतिमिराक्रान्ताः कल्पकोटिशतैरपि।
अनेकैः पापसंघातैरनेकैः पुण्यसंचयैः।

बध्नन्ति सर्वदाऽऽत्मानं कोशागारकृमिर्यथा। इत्यादिना केवलानामुक्तानां सर्वेषां साक्षात् मोक्षहेतुत्वाभावः प्रतिपादिताः। न च पूर्वोक्तवचनेष्वप्येवकारश्रवणात् ज्ञानस्यैव साक्षात् हेतुत्वनिषेध इति वैपरीत्यमस्त्विति वाच्यम्। सर्वज्ञानोत्तरे–

न लिङ्गं नाश्रमाचारः परमात्मनि संस्थिते। इति।

देवीकालोत्तरे–

न ध्यानं न जपः पूजा न होमो नैव साधनम्।
अग्निकार्यादिकार्यं च नैव तस्य महेश्वरि।
नियमोऽपि न तस्यास्ति क्षेत्रे पीठे च सेवनम्।

नार्चनं पितृकार्यं च तीर्थयात्रा व्रतानि च। इत्यादिवचनेन ज्ञानोत्तरं ज्ञानिनः उक्तसर्वकर्मणां निषेधात्। ज्ञानोत्पत्तिनिमित्तं तु क्रियाचर्ये प्रकीर्तिते। इति सर्वज्ञानोत्तरवचनेन दीयते ज्ञानसद्भावः क्षीयते च मलत्रयमम्। इत्यादिना दीक्षाशब्दार्थनिर्वचनागमेन च दीक्षादीनां सर्वेषां ज्ञानद्वारा मोक्षहेतुत्वप्रतिपादनाच्च। तस्मात् ज्ञानमेव साक्षात् मलनिवर्तकं दीक्षादिकं तु तत्साधनमित्याहुः। ननु तथापि दीक्षया कर्मविमोचनं नोपपद्यते। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। इति स्मृत्या 'नाभुक्तं लयमेति च' इति मृगेन्द्रादिवचनेन च कर्मणां भोगैकनाश्यत्वप्रतिपादनात् दीक्षानन्तरं देहानुपलब्धिप्रसङ्गाच्चेति चेत्।

प्रारब्धं भोगतो नश्येत् सञ्चितं हन्ति दीक्षया।

इति व्यवस्थावचनानुसारेण तस्य भोगैकनाश्यत्वप्रतिपादनस्य वचनस्य तीव्रवेगप्रारब्ध-विषयत्वात् दीक्षया तद्विमोचनवचनस्य च तदितरविषयत्वात्। न चैवं व्यवस्थायां सौभर्यादेः कायव्यूहादिनाऽनेकदेहभोगेन कर्मक्षेपणवचनं विरुध्येतेति वाच्यम्। प्रारब्धकर्मणो विचित्रत्वेनानेकदेहभोग्यस्यापि एकप्रारब्धस्य सम्भवेन तत्कर्मणोऽपि प्रारब्धत्वात्। न चैवमपि ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन इति स्मृत्या –

यथा वह्निर्महादीप्तः शुष्कमार्द्रं च निर्दहेत्।
तथा शुभाशुभं कर्म ज्ञानाग्निर्दहति क्षणात्।

इत्याद्यागमवचनेन च कर्मणां ज्ञाननाश्यत्वप्रतिपादनविरोध इति वाच्यम्। ज्ञानस्यापि दीक्षासहकारित्वेनाविरोधादिति। शिवत्वोपादानं च मुक्तेः पाषाणतुल्यतानिवृत्त्यर्थम्।

ननु शैवमते शिवत्वस्य दानं नोपपद्यते तस्याणौ नित्यसिद्धत्वेनापूर्वस्यासम्पादनादित्याशंक्य गौणं तदित्याह दानं नामेति।

**दानं नाम स्वसत्तैव या सा ज्ञानक्रियात्मिका।**

**(व्याख्या)** या सा प्रसिद्धा ज्ञानक्रियात्मिका तस्य अभिव्यक्ततया स्वाधीनसत्तैव दानमित्यर्थः। नन्वत्र पाशुपताः शिवगुणस्य सर्वज्ञादेः मुक्तावराणौ संकान्तिमाहुः। कापालास्तु तस्य समावेशमाहुः। महाव्रतास्तु तदानीमेव तस्योत्पत्तिमाहुः। तत्र मते मुख्यं दानं सम्भवत्येव। तदुक्तमभियुक्तैः–

यथा कस्तूरिकामोदः पटादिषु तथात्मनि।
शिवस्य तद्गुणा मुक्तौ संक्रामः समुदीरितः[१]।
इति पाशुपता मुक्तिं स्वकीयां परमां विदुः।
निजाश्रयस्थितैरेव तदानीमैश्वरैः गुणैः।
स्वयमाविश्यते सिद्धः पुरुषस्तु ग्रहैरिव।

---

१. संक्रामः समुदीरितः] क१; संक्रामन्ति तदा स्वयम्–मु

इत्थं चैव तु कापालाः तत्साम्यं मुक्तिमूचिरे।
शिवतुल्यः पूर्वमेव समुत्पद्यत इत्यतः।

उत्पत्तिसमतापक्षो महाव्रतिभिरुच्यते इत्याशंक्याह-

**न तु स्थानान्तरादानादप्युत्पत्तिः कदाचन।।४८।।**

**( व्याख्या )** स्थानान्तरात् ईश्वरादानात्। पञ्चमी प्रथमार्था। तेन स्थानान्तरादानमित्यर्थः। स्थानान्तरादानमित्यनेन शिवत्वस्य संक्रान्तिसमावेशौ विवक्षितौ। तौ उत्पत्तिरपि न दानमित्यर्थः। अत्र पाशुपतास्तु कस्तूरिकागन्धस्य पटादाविव ईश्वरनिष्ठस्य सार्वज्ञ्यादेः जीवे संक्रान्त्या साम्यमभ्युपगच्छन्ति। उक्तं च तथा-

यथा कस्तूरिकामोदः पटादिषु तथात्मनि।
शिवस्य तद्गुणा मुक्तौ संक्रामः समुदीरितः[1]।

इति पाशुपता मुक्तिं स्वकीयां परमां विदुः। इति। तदयुक्तम्। तथाहि-किं स्वाश्रय-परित्यागेनाश्रयान्तरप्राप्तिः संक्रामः उत तदपरित्यागेन। नाद्यः। ज्ञानस्य गुणत्वेनान्यत्र संक्रमणायोगात्। गुणिनं विहाय गुणस्यापि अन्यत्र संक्रमणे गुणगुणिनोस्तादात्म्यभङ्गप्रसङ्गापत्तेः। उक्तं च-

त्यक्त्वा स्वगुणिनं यान्ति न च गुण्यन्तरं गुणाः।
गच्छतां च व्यवस्थेयं पदार्थानां विरुध्यते। इति।

ननु,

निन्दनात् द्विजसाधूनां पापानामथ सेवनात्।
पापं संक्रमते पुंसां स्वपुण्यमपयाति च।
क्षमावत्वादनुक्रोशात् पुण्यवद्भिः सह स्थितैः।

पुण्यं संक्रमते पुंसां पापं याति ततोऽन्यतः। इति स्मृत्यादौ पुण्यपापयोः संक्रमणं प्रतिपाद्यते। तथा आचार्यनिष्ठज्ञानस्य शिष्ये संक्रमणं श्रूयते स्वायम्भुवादौ-

अद्य संक्रमितो योऽयमधिकारो मया त्वयि।

स कर्तव्यस्त्वया तावद्यावत् स क्रमितोऽन्यतः। इति। एवं च पूर्वोक्तगुणत्वहेतोः व्यभिचार इति चेन्न। स्मृत्यादौ पुण्यपापयोः संक्रान्तिप्रतिपादकवचनस्य तज्जातीयोत्पत्तिपरत्वात्। ज्ञानसंक्रान्तिप्रतिपादकवचनस्यापि गुरुनियोगेन गुरुवत् व्याख्यानादौ स्वातन्त्र्यप्रतिपादनपरत्वात्। न च वर्त्यन्तरे दीपस्य संक्रान्तिदर्शनादिति वाच्यम्। पूर्वाश्रयेऽपि विद्यमानत्वदर्शनेन परिमाणतारतम्यदर्शनेन दीपान्तरस्यैव उत्पत्त्यभ्युपगमेन संक्रान्तेरनङ्गीकारात्। न च कस्तूरिकामोदादेः पटे संक्रान्तिः। तत्रापि कस्तूरिकावयवानामेवानुप्रवेशात्। न च द्रव्यस्य

---

१. संक्रामः समुदीरितः]क१;संक्रामन्ति तदा स्वयम्-मु

ह्रासापत्तिः। भोक्तुरदृष्टवशेनावयवान्तरोत्पत्तिस्वीकारात्। न च वह्निगतौष्ण्यस्य जले संक्रान्तिर्दृश्यते इति युक्तम्। तत्रापि अनुद्भूतरूपस्य वह्न्यन्तरस्यैव उत्पत्तिस्वीकारात्। न चानुद्भूतरूपवह्न्यन्तरकल्पनायां गौरवात् जलगतोष्णत्वज्ञानस्य बाधकं विना भ्रान्तित्वायोगाच्च तद्गतौष्णस्यैव संक्रमणमिति वाच्यम्। तथात्वे सौरालोकसंबद्धसिकतादौ तदौष्ण्यापेक्षया अधिकौष्ण्यस्य प्रतीतिर्न स्यात् अनुद्भूतरूपतेजोऽन्तरोत्पत्तिकल्पनायां चाधिक्यप्रतीतेः उपपन्नत्वात्। न च सिकतादेः बहुकालं सौरालोकसंबद्धत्वात् स्पर्शभेदेन[१] सौरालोकानाम् भिन्नत्वेन[२] तद्गतस्पर्शसमुदायाक्रान्त्या आधिक्यप्रतीतिः युज्यत इति वाच्यम्। एकस्मिन् वस्तुनि एकदैकदेशावच्छेदेनैकजातीयनानागुणसमवायस्य अनङ्गीकारात्। किं च विरोधिगुणसंक्रान्त्या जलनिष्ठशीतस्पर्शस्य नाशे कालान्तरे तदुपलम्भो न स्यात्। न च तत्काले शीतस्पर्श उत्पद्यत इति युक्तम्। तदुत्पादकत्वेनाभिमतावयवशीतस्पर्शस्यापि नाशाभ्युपगमात्। वाय्वादेश्च[३] तदुत्पादकत्वकल्पनायां कल्पनागौरवात्। न चानुद्भूतरूपवह्न्यन्तरोत्पत्तिपक्षे शीतस्पर्शस्य विनाशाभावेन[४] कथं तदनुपलम्भ इति वाच्यम्। तीव्रकटुकमरीचादिषु प्रक्षिप्तस्वल्प-मधुरद्रव्यगतमाधुर्याभिभववदभिभवसम्भवात्। एवं च जलगतत्वेनौष्ण्यप्रतीतिः भ्रान्तिरेव। न च विशेषदर्शने विद्यमाने कथं भ्रम इति वाच्यम्। प्रत्यक्षभ्रमे प्रत्यक्षग्राह्याभावज्ञानस्य प्रतिबन्धकत्वेन प्रकृते च तदभावेन पीतः शङ्ख इतिवदुपपत्तेः। किं चेश्वरज्ञानस्य मुक्तौ जीवे संक्रमणस्वीकारे ईश्वरे ज्ञानं न स्यात् तदीयज्ञानस्यान्यत्र संक्रान्तत्वात्। निरंशस्य ज्ञानस्यांशेन संक्रमणायोगाच्च। तस्मादाद्यः कल्पो न संगच्छते। द्वितायोऽपि न संगच्छते गुणस्य स्वाश्रयापरित्यागेनाश्रयान्तरसंक्रमणे पूर्वोक्ततादात्म्यभङ्गप्रसङ्गात्। न च सार्वज्ञ्यादि-गुणविशिष्टस्येश्वरैकदेशस्य कस्तूरिकादिद्रव्यैकदेशस्यैव संक्रान्तिः भविष्यतीति शक्यते वक्तुम्। ईश्वरस्यावयवानङ्गीकारात्। तस्मात् संक्रान्तिसाम्यपक्षो न युक्तः। कापालास्तु ईश्वरनिष्ठगुणस्य मुक्तेष्वावेशेन साम्यं वदन्ति। उक्तं च–

निजाश्रयस्थितैरेव तदनीमैश्वरैर्गुणैः।
स्वयमाविश्यते सिद्धः पुरुषस्तु ग्रहैरिव।

इत्थं चैव तु कापालास्तत्साम्यं मुक्तिमूचिरे। इति। तदपि असाधु। तथात्वे भूताविष्टस्येव स्वातन्त्र्याभावेनापुरुषार्थात्वप्रसङ्गात्। तत्र महाव्रतिनः संसारदशाव्यावृत्तशिवसाम्यान्यथानुप पत्त्या मोक्षकाले सार्वज्ञ्याद्युत्पत्तिं वदन्ति। उक्तं च–

शिवतुल्यः पूर्वमेव समुत्पद्यत इत्यतः।

---

१. स्पर्शभेदेन–मु कालभेदेन–क१;
२. भिन्नत्वेन–मु अभिन्नत्वेन–क१;
३. वाय्वावादेश्च–मु अवयवादेश्च–क१;
४. विनाशाभावेन–मु विनाशेन–क१;

उत्पत्तिसमतामोक्षो महाव्रतिभिरुच्यते। इति। तत्तावदयुक्तम्। सार्वज्ञ्यस्य जन्यत्वस्वीकारे विनाशित्वप्रसङ्गात्। आत्मनो जन्यधर्माश्रयत्वे विकारित्वप्रसङ्गाच्च। इदं चोपलक्षणं चार्वाकादिमतनिराकरणस्यापि। तथाहि- तत्र तावदात्महानिर्मोक्ष इति चार्वाकमतमप्ययुक्तम्। देहरूपस्यात्मनो मुक्तिदशायामभावेनाभुज्यमानत्वेनापुरुषार्थत्वात् नावेद्यः पुरुषार्थ इति न्यायात्। अपि च दुःखसाधनीभूतदेहविनाशे दुःखनिवृत्तिवत् तस्यैव सुखसाधनत्वेन सुखस्यापि हानिप्रसङ्गेन अनुद्देश्यत्वात्। नापि सांख्योक्तं प्रकृतितद्विकारोपधानविलये पुरुषस्य स्वरूपेणावस्थानं कैवल्यमिति युक्तम्। गुणतत्त्वोर्ध्वतत्त्ववर्तिकर्मणामभुक्तत्वेन मोक्षासम्भवात्। तदुक्तं परमोक्षनिरासकारिकायाम्-

गुणतत्त्वोर्ध्वभोग्यस्य कर्मणोऽनुपलब्धितः। कैवल्यमपि सांख्यानां नैव युक्तमसंक्षयात्। इति। अनुपलब्धितः अभुक्तादित्यर्थः। किं च सर्वोपाधिविगमे पुरुषस्य ज्ञानशून्यत्वेनोक्त-मुक्तेरननुभूयमानत्वेनापुरुषार्थत्वप्रसङ्गाच्च। नहि पुरुषस्य स्वयंप्रकाशत्वं तैः अङ्गीक्रियते। नापि बौद्धोक्तनिरुपप्लवचित्तसंततिरेव मोक्षः। ज्ञानहेतुशरीरादीनामभावेन मुक्तौ चित्तसन्ततेरसम्भवात् विषयोपरागाभावाच्च। न च विषयावच्छिन्नज्ञान एव शरीरादेर्हेतुत्वमिति वाच्यम्। लाघवेनानित्यज्ञानत्वावच्छिन्न एव शरीरादेर्हेतुत्वात् ज्ञानक्षणिकतायाः मूलकारेणैव निरासाच्च। नापि ज्ञानसन्ततिविच्छेदो मोक्ष इति बौद्धैकदेशमतं युक्तम्। चार्वाकपक्षोक्तदोषग्रस्तत्वात्। नापि सन्ततोर्ध्वगमनं मुक्तिरित्यार्हमतं युक्तम्। ऊर्ध्वगमनस्य सुखदुःखाभावान्यतरत्वाभावेनापुरुषार्थत्वात् आत्मनोऽणुमध्यमपरिमाणयोः निरस्तत्वेन व्यापकस्य गमनासम्भवाच्च। शरीरविशिष्टस्यैव गमनाङ्गीकारे च जन्यभावस्य नाशावश्यम्भावेन शरीरनाशे तत्प्रयुक्तोर्ध्वगमनाभावेन पुनः संसारित्वापातात्। नाप्यात्यन्तिकदुःखोच्छेदो मोक्षः। आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वम्। समानाधिकरणत्वं च समानदेशीयत्वं दुःखस्य तत्प्रागभावस्य वा विशेषणमिति नैयायिकमतमपि युक्तम्। आत्यन्ति-कदुःखाभावस्याननुभूयमानत्वेनापुरुषार्थत्वात्। न हि मुक्तिदशायां न्यायमते ज्ञानमस्ति तथात्वे ज्ञानस्यापि दुःखान्तर्भूतत्वेन तत्प्रागभावासमानकालीनरूपमुक्तिलक्षणस्यैवासम्भवप्रसङ्गात्। न च दुःखाभावस्य स्वरूपेण पुरुषार्थत्वं न तु ज्ञायमानतया। न हि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः। अपि तु दुःखं मे मा भूत् दुःखं मे नश्यत्विति। सुखादेरपि स्वरूपेणैव पुरुषार्थत्वं न तु ज्ञायमानतया ज्ञानं तु नान्तरीयकमिति वाच्यम्। अज्ञायमानस्य दुःखाभावस्य मूर्छादिस ाधारण्येनापुरुषार्थत्वात्। तदुक्तम्-

दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते।

न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः। इति। एतेनात्यन्तिकदुःखसाधनध्वंसो मुक्तिरिति तदेकदेशिमतमप्यपास्तम्। नाप्यात्यन्तिको दुःखानुत्पादो मोक्षः। आत्यन्तिकत्वं च प्रतियोग्यनुत्पादकत्वं तदपि समानाधिकरणतयावद्दुःखकारणध्वंससाहित्यम्। अतो न संसारदशायामतिव्याप्तिरिति प्राभाकरमतं युक्तम्। प्रतियोगिनः कदाचिदपि

अनुपपत्तावत्यन्ताभावत्वापत्त्या प्रागभावत्वानुपपत्तेः। प्रतियोगिनोऽप्रामाणिकत्वप्रसङ्गा-दवेद्यत्वेनापुरुषार्थत्वप्रसङ्गाच्च। नापि नित्यनिरतिशयसुखाभिव्यक्तिः मुक्तिरिति भाट्टमतमपि युक्तम्। अभिव्यक्तेर्जन्यत्वे विनाशित्वेन पुनः संसारित्वापत्तिः। नित्यत्वे संसारिदशायामपि मुक्तित्वप्रसङ्गात्। अनेनैव नित्यत्वमभिव्यक्तिविशेषणमिति निरस्तम्। नाप्यनिर्वचनीयाविद्यानिवृत्तिः मुक्तिरिति मायावादिमतं युक्तम्। अनिर्वचनीयाविद्यासद्भावे लक्षणप्रमाणयोरसम्भवात्। सम्भवे वा अनिर्वचनीयत्वक्षतेः। अविद्यानिवृत्तेः आत्मस्वरूपत्वे असाध्यत्वप्रसङ्गात्। संसारदशायामतिव्याप्तेश्चातिरिक्तत्वे अद्वैतहानेः। नापि पाञ्चरात्राणां कारणवैकुण्ठाख्यपरमपदप्राप्तिः मुक्तिरिति मतं युक्तम्। वैकुण्ठप्राप्तेरपि जन्यत्वे विनाशित्वेन पुनः संसारित्वापातात्। अजन्यत्वेऽसाध्यत्वेनापुरुषार्थत्वप्रसङ्गात्। अन्ये तु मृदन्वितघटादिदृष्टान्तेन कारणेश्वरक्षेत्रज्ञजडानां कार्यत्वे सति सदन्वितत्वेन सदुपादानत्वं वक्तव्यम्। सैव च महाप्रकृतिः महाविभूतिरिति चोच्यते। तत्रैव च जीवात्मनां विलयो मोक्ष इति वदन्ति। तन्न। आत्मनां नित्यत्वेन विलयायोगात्। आत्मनाशस्यावेद्यत्वेनापुरुषार्थत्वाच्च। प्रलये महाप्रकृतौ विलीनानामन्येषामिव मुक्तानामपि परावृत्तिप्रसङ्गात्। न च परावृत्तियोजकीभूता-विद्यावासनादिविरहेण न पुनरावृत्तिरिति वाच्यम्। अविभागावस्थाया एव प्रकृतित्वेना-विद्यादिवासनावशेन बद्धमुक्तादिविभागासम्भवेनावृत्त्यनावृत्त्योः व्यवस्थया कल्पयितु-मशक्यत्वात्। विभागाङ्गीकारे च तस्य विभागस्याविभागपूर्वकत्वनियमेन प्रकृत्यन्तर-कल्पनायामनवस्थापातादिति। केचित्तु मलनिवृत्तिमात्रमेव मोक्षः न च सर्वगोचरदृक्। क्रियाशक्त्यभिव्यक्तिरपीति वदन्ति। तदपि मन्ददृक्धक्रियाशक्तेरनभिव्यक्तौ मलनिवृत्तिमात्रस्यापुरुषार्थत्वात् आत्मत्वे सति मलसम्बन्धशून्यत्वेन तदभिव्यक्तेः आवश्यकत्वाच्च। विषयप्रवृत्तिनियमहेतोः तत्तदर्थसंबन्धकारणाधीनत्वस्याभावेन सर्वविषयत्वोपपत्तेश्च। अन्ये तु शिवादाधिक्यं मोक्षः परमेश्वरस्य लयमोगाधिकाराभ्युप गमेनाधिकारमलस्यावश्यकतया पशुत्वमनिवार्यमेव। मुक्तानां तु लयाद्यधिकाराभावेन सर्वमलोत्तीर्णत्वात् प्रकृष्टत्वम्। तदुक्तं– अनुग्रहतिरोभावौ द्वौ पाशौ तु सदाशिवे। इति च वदन्ति। तदसमञ्जसम्। दुःखहेतुबन्धस्यैव पशुत्वप्रयोजकत्वेन लयादीनां तद्धेतुत्वाभावेन परमेश्वरस्य पशुत्वाभावात्। पशुप्रतिपादकवचनस्याणुसदाशिवपरत्वात् आभिमानिकभेदकल्पनया शक्त्यन्तरप्रकाशनपरत्वाद्वा किंचिन्मुक्तस्य परमेश्वरादाधिक्ये ईश्वरानीश्वरत्वयोर्वैपरीत्यं प्रसज्येत। किं चान्यस्य मुक्तौ तस्य पूर्वमुक्तेश्वरापेक्षया आधिक्ये पूर्वमुक्तस्यानीश्वरत्वम् उत्तरस्येश्वरत्वमित्येवं प्रणाड्या ईश्वरत्वस्याव्यवस्थिततत्वं प्रसज्यते। मोक्षार्थिनां तु स्वस्वापेक्षया अधिकाशंकाया मुक्तौ प्रवृत्तिः न स्यात्। केचित् सिद्धान्तविदस्तु शिवसाम्यं मोक्षमित्यङ्गीकुर्वन्तो जीवगतमेव सार्वज्ज्यादिकं संसारदशायां मलाद्यवरुद्धं सदनभिव्यक्तं मलाद्यपगमे शिवस्येव प्रकाशत इत्यभिव्यक्त्या साम्यं वदन्ति–

यद्बोधानन्दरूपं त्रिमलविगमने व्यक्तमात्मस्वरूपं तत् सायुज्येन वाच्यम्। शिवसदृशवपुः शैवतन्त्रेऽपवर्ग इत्यभियुक्तोक्तेः। उक्तं च परमोक्षनिरासकारिकासु–

स्वमते वादिभिस्त्वेवं विमुक्तिः परिकल्पिता।
दृष्टा नैव हि मोहाद्यैः सदेश्वरसमानता।
समता च समुत्पत्तिः संक्रान्त्यावेशपक्षतः।

नाभिव्यक्तिः परागीता बद्धवाचामगोचरा। इति। न चाभिव्यक्तेः नित्यत्वानित्यत्वाभ्यां यथाक्रमं पुरुषकृत्यसाध्यत्वविनाशित्वाभ्यामपुरुषार्थत्वप्रसङ्गः। मलाद्यपगमस्यैवाभिव्यक्तित्वेन नित्यत्वेऽपि पुरुषयत्नसाध्यत्वोपपत्तेः। तदुक्तं मोक्षकारिकायाम्-

मलादिपाशविच्छक्तिः[१] सर्वज्ञानक्रियोद्भवः।
मोक्षः तत्कारणं शम्भुः स्वशक्तिः कारणं विभोः।
पश्वात्मा मोच्यमानत्वात् कर्म कारकम् इष्यते[२]।

नित्यमुक्ततया कर्तुः मोक्षाख्या कर्मगा कृतिः। इति। अत्र पाशविच्छित्तिः विवक्षिता। तेन विज्ञानकेवलानां मलमात्रनिवृत्तिः प्रलयकेवलानां मलकर्मणोः सकलानां मलकर्ममायानां निवृत्तिः मोक्ष इत्यर्थः। न च सर्वत्र मलरूपपाशविच्छेद एव मोक्षोऽस्त्विति वाच्यम्। कर्मादिसत्त्वे तद्विच्छेदस्यैवासम्भवेन कर्मादिनिवृत्तेरपि मुक्तावपेक्षितत्वात् मुक्तौ तिरोधानशक्तेः विद्यमानत्वेऽपि मलस्यापि अपसारितत्वात् भोगसाधनस्य कर्मणो नष्टत्वात् भोगार्थावारणस्य पुनरसम्भवाच्च मलादिक्षये सा न कार्यकरी। कुण्डलिन्या विशिष्टभोगजनकत्वेऽपि परममुक्तिप्रतिबन्धकत्वेन तन्निवृत्तिरपि आवश्यकीति बोद्धव्यम्। मोक्षे पुरुषः कर्ता ज्ञानं कारणमिति मतं निरसितुमुक्तं तत्कारणं शम्भुः स्वशक्तिः करणमिति। कारणं कर्तेत्यर्थः। स्वशक्तिव्यापाररूपा दीक्षेत्यर्थः। सांख्यमत इव नास्मन्मतेऽपि मोचकगतो मोक्ष इत्याह नित्यमुक्ततयेति। परमसिद्धान्तस्तु शिवतादात्म्यमेव मोक्षः। तदुक्तं सूतसंहितायाम्-

केनचित् साधनेनैव मुक्तः शिवसमो भवेत्।
इत्येवं केचिदिच्छन्ति वादिनो मुनिपुङ्गवाः।
वार्तामात्रमिदं प्रोक्तं सर्वथा न तदर्थवत्।
एकदेशेन वा जीवः किं वा सर्वात्मना समः।
एकदेशेन चेत् सर्वे शिवाः संसारवर्तिनः।
एकदेशेन सर्वेषामस्ति साम्यं शिवेन हि।
सर्वात्मना चेत् साम्येन सर्वथा शिव एव सः।
भेदकाकारशून्यत्वात् भेदभावाच्च वस्तुनः।

तस्मात् जीवः स्वतः साक्षात् शिवः सत्यादिलक्षणः। इति। श्रीमत्सर्वज्ञानोत्तरे च-

स्वस्मिन् परमशिवेन साकमैक्यज्ञानस्य मोक्षहेतुत्वोपवर्णनमप्यैक्यस्य मोक्षत्वे संगच्छते। न चारोपरूपमैक्यज्ञानं मोक्षसाधनमितिवक्तुं शक्यते।

---

१. मलादिपाशविच्छक्तिः-मु मलादिबन्धविच्छक्तिः-क१;

२. इष्यते-मु उच्यते-क१;

मिथ्यादर्शनसाध्यत्वं मोक्षस्येति सुदुर्घटम्। इति मिथ्याज्ञानस्य मोक्षहेतुत्वनिषेधात्। ऐक्यज्ञानस्य मोक्षहेतुत्वाप्रतिपादकवचनं च–

योऽसौ सर्वगतो देवः सर्वात्मा सर्वतोमुखः।
सर्वतत्त्वमयोऽचिन्त्यः सर्वस्योपरि संस्थितः।
सर्वतत्त्वव्यतीतश्च वाङ्मनोनामवर्जितः।
सोऽहमेवमुपासीत निर्विकल्पेन चेतसा।
यदेव निष्कलं ज्ञानं शाश्वतं ध्रुवमव्ययम्।
निर्विकल्पमनिर्देश्यं हेतुदृष्टान्तवर्जितम्।
अलिङ्गमक्षरं शान्तं विषयातीतगोचरम्।
अविभाव्यमसन्देहं तदहं नात्र संशयः।
अहमेव परो देवः सर्वमन्त्रमयः शिवः।
सर्वमन्त्रव्यतीतश्च सृष्टिसंहारवर्जितः।
मया व्याप्तमिदं सर्वं दृश्यादृश्यं चराचरम्।
अहमेव जगन्नाथः मत्तः सर्वं प्रवर्तते।
अनेकाकारसंभिन्नं विश्वं भुवनसंचयम्।
शिवाद्यवनिपर्यन्तं तत्सर्वं मयि संस्थितम्।
यच्च किञ्चित् जगत्यस्मिन् दृश्यते श्रूयतेऽपिवा।
बहिरन्तर्विभागेन तत् सर्वं व्यापितं मया।
अद्वैतभावनायुक्तः सर्वत्रात्मनि संस्थितः।
सर्वगं सर्वदेहस्थं पश्यते नात्र संशयः।
एवमेकात्मभावेन संस्थितस्य तु योगिनः।
सर्वज्ञत्वं प्रकल्प्येत विकल्परहितस्य च।
योऽसौ सर्वेषु शास्त्रेषु पठ्यते ह्यज ईश्वरः।
अकायो निर्गुणो ह्यात्मा सोऽहमस्मि न संशयः।
अविज्ञातः पशुः सो हि सृष्टिधर्मसमाश्रितः।
विज्ञातः शाश्वतः सिद्धः स शिवो नात्र संशयः।

तस्मादात्मा सदा वेद्यः सुविचार्य विचक्षणैः। इति। न च भेदप्रतिपादकसंहितान्तरवचन विरोधादभेद-प्रतिपादकानामर्थान्तरपरत्वमेव कल्पनीयमिति वाच्यम्। कर्मब्रह्मकाण्डयोरिव अधिकारिभेदेन संहिताद्वयस्यापि गौणार्थकल्पनां विनैव मुख्यार्थबोधकत्वसम्भवात्। अधिकारिविभेदेन च संहितानां प्रवृत्तिरुक्ता ज्ञानतिलके –

क्रौञ्चादिषु सुरैः सर्वैः महामायाविमोहितैः।
ऋषिभिश्चैव भोगार्थैः मोक्षमार्गपराङ्मुखैः।

पृष्टोऽहं तन्त्रमन्त्राणि तपश्चर्याव्रतानि च।
सिद्धान्तमन्त्रवादाश्च तेऽपि मन्त्रास्त्वनेकधा।
अनेकभेदभिन्नं तु द्वैता पार्वतिनन्दन।
तथा ह्यद्वैतमप्यन्ये द्वैताद्वैतं तथापरे।
पृच्छकानां वशेनैव प्रोक्तं शास्त्रमनेकधा।
साधनानि विचित्राणि मन्त्राणां मन्त्रजातयः।
यो यत् पृच्छति भावेन तस्य तत् कथयाम्यहम्।
किमन्यत् पृच्छमानस्य कथयामि षण्मुख।
मया विमोहिताः सर्वे चानेकैः शास्त्रसंग्रहैः। इति।

देविकालोत्तरेऽपि अभेदभावनाया एव मोक्षहेतुत्वमुक्तम्। यथा –

जलं जले क्षिप्तं क्षीरे क्षीरं घृते घृतम्।

अविशेषं भवेत्तद्वत् आत्मापि परमात्मनि। इति। रौरवेऽपि तादात्म्यमेव मुक्तिरित्युक्तम्।

यथा जलं जले क्षिप्तं क्षीरं क्षीरमिवार्पितम्।

तथैव ह्येकतां याति दीक्षामन्त्रेण मन्त्रवित्। इति। ननु सर्वज्ञत्वकिञ्चिज्ज्ञत्वरूपविरुद्धधर्माध्यवसायात् कथं जीवशिवयोरभेद इति चेन्न। किञ्चिज्ज्ञत्वस्यावरणकृतत्वेन स्वाभाविकत्वाभावात्। स्वाभाविकत्वे हि परं विरोधः। न चाभेदस्वीकारे जीवस्येव शिवस्याप्यावरणं किं न स्यादिति वाच्यम्। गुणगुणिनोरभेदेऽपि गुणस्य धर्मत्वं गुणिनश्च धर्मित्वमिति व्यवस्थावत् जीवशिवयोरावरणानावरणव्यवस्थोपपत्तेः। न चाभेदे जीवगतदुःखादिभाक्त्वं शिवस्य स्यादिति वक्तुं युक्तम्। आवरणप्रयुक्तत्वात् दुःखादिभाक्त्वस्य। अत एवावरणानावरणाभ्यामेव जीवशिवयोः सादिमुक्तत्वानादिमुक्तत्वे। किञ्च जीवः परमात्माभिन्नः आत्मत्वात् परमात्मवत् इत्यभेदसाधकानुमानमपि प्रमाणम्। न च जीवः परमात्मभिन्नः किञ्चिज्ज्ञत्वादित्यनेन सत्प्रतिपक्षता व्याप्तिग्रहस्थलाभावात्। न च व्यतिरेकेण शिव एव दृष्टान्तः। तथापि घटादौ सपक्षे अविद्यमानत्वेनासाधारण्यात्। नन्वेवमपि शिवतादात्म्यस्य सुखदुःखाभावयोः अन्यतरत्वाभावेन कथं पुरुषार्थत्वमिति चेन्न।

परमानन्दरूपं तु पश्यन्नानन्दभाक् भवेत्। इति।
नित्यत्वे निष्कलीभूते विन्दत्यात्मनि यत् सुखम्।
निर्विकल्पमचिन्त्यं च हेतुदृष्टान्तवर्जितम्।
तत् सुखं परमं प्रोक्तमात्यन्तिकमनूपमम्।
यदस्य विषयासंगं मनोवृत्तिं विवर्जयेत्।

यदायायत्तो मनोभावस्तदा तत् परमं सुखम्। इति सर्वज्ञानोत्तरवचनेन परमात्मनः सुखरूपप्रतिपादनात्। न च सुखस्य जन्यत्वनियमेन विनाशित्वं तद्धेतुभूतशरीरादिकं च

मुक्ते स्यादिति वाच्यम्। वैषयिकसुखस्यैव जन्यत्वस्वीकारात्। न सुखमात्रस्यैव जन्यत्वमेवं सति ज्ञानमात्रादेरपि जन्यत्वापत्तेः। प्रमाणबलात् नित्यज्ञानाभ्युपगमे सुखेऽपि तुल्यत्वात्। अत एव सुखभोक्तृत्वे संसारित्वं स्यादिति परास्तम्। अनित्यसुखभोक्तृत्वस्यैव संसारित्वप्रयोजकत्वात्। तस्मादखण्डचिदानन्दस्वरूपशिवतादात्म्यमेव मोक्ष इति स्थितम्। जीवन्मुक्तलक्षणं तु मायिकदेहादियुक्तत्वे सति निर्मलत्वम्। निर्मलत्वं च मलसंयोगध्वंसत्वम्। संयोगस्तु पुरुषं भिद्यत इति एकस्य संयोगस्य विनाशेऽपि अन्यस्याविनाशान्नैकमुक्तौ सर्वमुक्तिप्रसङ्गः। तदावरणशक्तीनां विनाशेन वा निर्मलत्वमिति केचित्। ननु ज्ञानाग्निः सर्वकर्मणि भस्मसात् कुरुतेऽर्जुनेत्यादितद्वचनात् सर्वकर्मनाशे तन्मूलभोगासम्भवेन तन्निष्पादकशरीरादि-सद्भावे प्रमाणाभावात् निवृत्तमलस्यानावृतज्ञानत्वेनाभिव्यक्तपरमानन्दत्वेन च तस्य शरीरादि सम्बन्धप्रयुक्तसुखदुःखानुभवविरोधाच्च कथं जीवन्मुक्तौ देहसम्बन्ध इति चेन्न। ज्ञानाग्निः सर्वकर्माणीत्यादिसामान्यतःप्रवृत्तवचनस्य प्रारब्धं भोगतो नश्येत् शेषं ज्ञानेन दह्यत इत्यादि विशेषवचनानुरोधेन प्रारब्धेतरकर्मविषयत्वात्। तथा च प्रारब्धभोगपर्यन्तं सशरीरत्वमेव जीवन्मुक्तौ। तदुक्तं स्कान्दे सूतसंहितायां मुक्तिखण्डे द्वितीयाध्याये–

यस्य मुक्तिरभिव्यक्ता स्वतःसिद्धान्तरूपिणी।

तस्य प्रारब्धकर्मान्तजीवन्मुक्तिः प्रकीर्त्यते। इदं च तत्त्वसंग्रहादौ विस्तरेण प्रतिपादितम्। जीवन्मुक्ति- दशायां भोक्तृत्वे जीवन्मुक्तस्य न संसारावस्थायामिव देह्याद्यभिमानपुरः सरमभिषङ्गादिजनितोऽध्यासात्मा भोगः। किन्तु असत्येवाभिषङ्गे प्रारब्धकर्मक्षयमात्राभिसन्धानेन संसारिभोगसदृशो भोग उत्पद्यते। एतादृशभोगश्च मलनिवृत्तावपि युज्यत इति कथं निवृत्तमलस्य भोग इत्यपि निरस्तम्। किञ्च आवरणावासनाद्यनुवृत्त्या दग्धपटन्यायेन शरीरादिसम्बन्धः प्रतिभामात्र इति न मुक्तिविरोधोऽपि। तदुक्तं स्कान्दे सूतसंहितायां मुक्तिखण्डे द्वितीयाध्याये–

स्वतः सिद्धात्मभूताया मुक्तेरज्ञानहानितः।
अभिव्यक्तिर्महाविष्णो मुक्तत्वं दग्धवस्त्रवत्।
प्रपञ्चस्य प्रतीतत्वात् जीवनं पुरुषोत्तम।
फलोपभोगात् प्रारब्धकर्मणः संक्षये हरे।

प्रतिभासो निवर्तेत प्रपञ्चस्य न संशयः। इति। तस्य च चिह्नानि हासक्रन्दनवल्गनानि। यद्यप्येतान्युन्मत्त-साधारणानि तथापि उन्मादादिहेतुकेभ्यः तेभ्यो विलक्षणानि तत्त्वज्ञानकारुण्यादिजनितान्येतानि चिह्नानिद्य तत्र शिवशास्त्रोक्तमार्गे विद्यमाने पशुशास्त्रोक्त-मार्गमाचरन्त्यज्ञानत इति ज्ञानं हासे जनकम्। अल्पस्य वैषयिकसुखस्याभिलाषेण महद्दुःखमनुभवत्ययं जनः कथमेतत् निराकरणीयमिति कारुण्यं क्रन्दने जनकम्। स्वात्मनः संसारसमुद्रादुत्तीर्णताज्ञानं वल्गने हेतुः। तदुक्तं तत्त्वसारे–

धृतिधैर्यसमायुक्तः सदानन्दसमावृतः।
हसते नृत्यते चैव क्रन्दते वल्गतेऽपि च।

कार्त्तिकेय उवाच –

हसनादि त्वया प्रोक्तं योगीन्द्राणां च चेष्टितम्।
तस्यार्थं नैव जानामि किमर्थं कुरुते प्रभो।

ईश्वर उवाच –

सुव्यक्तं दूषयित्वा तु विमार्गेण जनो रतः।
तं दृष्ट्वा हसते योगी अहो व्यामोहितं जगत्।
ज्ञात्वा भवस्यासद्भावं क्रीडन्ति भवमध्यतः।
क्रीडन्तोऽपि न लिप्यन्ते तेन नृत्यन्ति योगिनः।
रसलुब्धो यथा मत्स्यः लोहशक्तिं न पश्यति।
सुखलुब्धस्तथा लोको यमलोकं न पश्यति।
तत्त्वहीनो महदुःखं सहतेऽतीव दारुणम्।
तेनासौ क्रन्दते योगी दृष्ट्वा दुःखं जनस्य च।
अपारस्य समुद्रस्य पारं हि तरितं मया।
इति मत्वा च गर्वित्वा वल्गन्ते तेन योगिनः।इति।

**(वृत्तिः)** पूर्वार्धस्तु स्पष्टः। असद्योनिर्वाणदीक्षायामसर्वात्मना मलादिविच्छेद-शिवत्वाभिव्यक्त्यात्मकः आरब्धकार्यकर्म-भोगोपरोधेन भगवता योऽनुग्रहः कृतः सोऽपि तथैवोपदेशद्वारेण प्राचुर्याय कर्तव्यः ततस्तस्मिन् दीक्षया परिशिष्टे तावत्यपि मलविच्छेदादौ हेतुतया प्रत्यहम् क्रमेण[1] शिवत्वाभिव्यक्त्यर्थं च ज्ञानस्याप्यनुसन्धानद्वारा क्रिया-विनाभूतत्वात्। ज्ञानादय उपायाः शिवागमोक्तिविशिष्टाः परिकीर्तिताः न सर्वत्र[2] इति भावः। अविशिष्टज्ञानस्य[3] हेतुत्वं निराकरिष्यति च दीक्षया[4] स्वशिवत्वे दत्ते भगवान् न शिव एव स्यात्। यदाहुः –

निजाः शक्तीरनन्ताय प्रयच्छच्चेत् सदाशिवः।

द्राघिष्टं शक्तिदारिद्र्यं भद्रं सम्प्राप्नुयात्ततः।। इति। तदर्थमेतद्दानं नामेत्यादि। दानं नाम दानशब्दवाच्यमात्रया ज्ञानक्रियात्मिका सा स्वसत्तैव[5] विज्ञानकेवलादीनां क्रमेणैकद्वित्रिलक्षणसकलबन्धनिवृत्त्या स्वसत्तायाः सर्वज्ञत्वादिरूपायाः एवाभिव्यक्तिः पुंसां शिवाच्छिवत्वस्य दानमुपचारादुच्यते। ननु नर्ते प्रयोजनादिष्टं मुख्यशब्दार्थलङ्घनम्। सत्यम्। न सत्ता

१. क्रमेण ] ज२,ज३; आम्नायेन- ज१;

२. सर्वत्र ] ज२; सर्व- ज१;

३. अविशिष्टज्ञानस्य ] ज२; अवशिष्टज्ञानस्य- ज१;

४. दीक्षया ] ज१,ज३; दीक्षायाः- ज२

५. स्वसत्तैव ] सं० पाठः; स्वशक्तेव- ज१; स्वशक्तैव- ज२; स्वसक्तैव-ज३;

चार्थः सर्वदा आत्मना[1] स्वयमेव व्यज्यते। आवृतत्वात्। कालिकावृत–ताम्रसत्तावत् न तु पुरुषः स्वयमज्ञानान्निवर्तकः सिद्धः अन्धपटलाच्छन्नचक्षुःशक्तेरिव। अपि तु ततः सातिशयश्चक्षुर्वैद्य इवेति। इहापीश्वर[2] एव मोक्षकर्ता तदिदं पतिपटलेपि प्रपञ्चितम्। न तु ततस्तदानीमेव पाशुपतादीनामिव स्थानान्तरादानात् न शिवात् प्रतिग्रहात् न समुत्पत्तिवादिनामिवोत्पत्तिरपि। परमोक्षनिरासकारिकासु–

अथोत्पत्तावनित्यत्वमावेशे न स्वतन्त्रता।

नोदाहरणसद्भावो गुणसंक्रान्ति साधने इत्यादिभिः समुत्पत्तिसंक्रान्त्यावेशैक्यादि–निराकृतिः सविस्तरा तत एवावधार्या। वेदान्तैकदेशिभिः स्वीकृतविशिष्टाद्वैतच्छायानिपतद्भिः शिवागमोक्तिविरतिमद्भिः कैश्चिच्छिवतादात्म्यमेव मुक्तिरिति कृता हि विफलोक्तिः। तदुपलक्षणतया न निरूपचरितशिवैक्यं शिवतादात्म्यशब्दशब्दितम्। तस्य निराक्रियमाणत्वात्। न तु[3] शिवतादात्म्यशब्दशब्दितः शिवसंयोगः तदयुक्तम्। अमूर्तत्वात् परमोक्षनिरासकारिकासु। अत्रापि च –

अमूर्तस्य च संक्रान्तौ न लोका न परीक्षकाः।

जडे जडस्य संक्रान्तिर्युज्यते परिणामिनः।। इति श्रुतिः। मृगेन्द्रवृत्तौ च आमूर्तयोः संयोगो न संश्लेषार्थ इति व्याख्यातम्। ननु शिवतादात्म्यशब्दशब्दितः शिवसमवायः। तदयुक्तम्। समवायसम्बन्धिनोः पदार्थयोः तार्किकाणामिव न किलाधाराधेयत्वेनातद्रूपत्वम्[4]। किन्तु अपृथक्सिद्धतद्रूपत्वमेव। तदन्यथा वक्तुमशक्यमिति पाशपदार्थपरीक्षायां भगवान्निराकरिष्यति। अस्तु तथा ततः किमिति न वाच्यम्। समवायस्यातद्रूपत्वयोर–नुपलब्धस्य तद्रूपयोः सदास्तित्वात्। शिवः सर्वज्ञः पशुः किञ्चिज्ज्ञः न शिवः सुखदुःखानुभविता पशुः तदनु–भवितेत्यादिकमन्योन्यविद्धं प्रत्यक्षश्रुतिसिद्धं सर्वं विभज्यते। ननु शिवतादात्म्यशब्दशब्दितः[5] शिव–व्यञ्जकव्यङ्ग्यभावमेव। तदयुक्तम्। प्रमाणपटले निराक्रियमाणत्वात्। ननु शिवतादात्म्यशब्दशब्दितः शिवव्यापक–व्याप्यभावः। तदयुक्तम्। संसारदशायाम् आशिरोलक्षणे काये येयं संवित् चितेः सदेति मतङ्गश्रुतेः। धर्मिणि कलयैकदेशे चिद्धर्मव्यक्तित्वेनोपचारबीज तयोच्यमानः स इति नियामकमन्तरेण मुक्तौ तदुक्तौ शिवस्यापि शिवान्तर–व्याप्यत्वकघप्तिः सयुक्तिकेत्यनवस्था दुर्निवार्या। ननु शिवतादात्म्यशब्दशब्दिता शिवसमव्याप्तिः।

---

१. आत्मनां ] ज१; आत्मनां (शो.पू)– ज२; आत्मानं-(शो.पश्चात्)– ज२

२. सातिशयश्चक्षुर्वैद्य इवेति। इहापीश्वर ] ज१;सातिशयचक्षुर्वैद्य इच्छेति ईश्वर एव– ज२

३. ननु ] ज२;न तु– ज१;

४. किलाधाराधेयत्वेनातद्रूपत्वम् ] ज२; किलाधाराधेयत्वे नातद्रूपत्वम्– ज१;

५. शिवतादात्म्यशब्दशब्दितः ] ज२; शिवतादात्म्यशिवशब्दशब्दितः– ज१;

तदयुक्तम्। धर्ममात्रानुलिप्ततदुक्तिदुरुक्तेः समपदसहपठनं न जाघटीतीति[1] शिवसमव्याप्तिः शिवशक्तिसदृशपरषट्गुणमयपरशिवत्वपदपठितपरनिरतिशयमुक्तिसमरसीभावशिवसमर-सीभावाविनाभूतशक्तिसमरसीभावरूपस्वशक्ति सर्वथाभिव्यक्तिरित्यस्मद्दर्शनापातनात्। विशिष्य तत्र तादात्म्यशब्दं शब्दित्वा किंकृतमित्यपहासास्पदत्वात्[2]। ननु शिवतादात्म्यशब्दशब्दितं शिवसांकर्यं तदयुक्तं सर्वेषां निरुपचरितैक्यप्रसङ्गात् स वेदान्तवादी च विजयेत सर्वज्ञासर्वज्ञविभक्तिविभञ्जनाच्च। भगवता रामकण्ठेन तदेतदोषमापात्य सांकर्यं निराकृतम्। ननु शिवतादात्म्यशब्दशब्दितं

शिवविषयीकरणसम्बन्धलक्षणशिवसायुज्यम्। तदयुक्तम्। सर्वपदार्थसक्तामात्र-विषयीकरणात्। सर्वपदार्थसाधारणसायुज्यात्। शिवमात्रविपक्षाय चेदस्मद्दर्शनमस्तु। ननु शिवतादात्म्यशब्दशब्दितं न स्वतः शिवत्वमिति शिवाविर्भावत स्वस्मिन् शिवगुणाभिव्यक्तेः कुतश्चिदतिशयतः शिवत्वम्। तदयुक्तम्। तथात्वे शिवगुणसंक्रान्तिशिवावेशशिवाधिष्ठा तृत्वपरकीयत्रिपक्षच्छायायां पुनः संसारदशयां वा संनिपतेत्। अनियमनात् शिवस्या न स्वतः शिवत्वमित्यनवस्था च। स्वतोऽन्तर्लीनं शिवत्वदीक्षयाऽभिव्यज्यत इत्युक्तम्। सर्वज्ञानोत्तरे-

रससिद्धं यथा ताम्रं हेमत्वं प्रतिपद्यते।
तथात्मा ज्ञानसम्बन्धः शिवत्वं प्रतिपद्यते।। इति।

ततः शिवप्रतिबिम्बादिकं दुरापास्तमित्युपरम्यते। ननु शिव-तादात्म्यशब्दशब्दितं शिवसादृश्यमेव जातिरिति श्रुतेः। पुनः शिवजातिरिति पर्यवसितम्। यद्येवं शिवलक्षण-शिवशक्तिसदृशपरषड्गुणमयपरशिवत्वपदपठितपरनिरतिशयस्वलक्षणस्वशक्तिः सर्वधाभि-व्यक्तिरिति[3] अस्मद्दर्शनमेवेति सर्वं समञ्जसम्। शिवसायुज्यशिवलयशिवगतिशब्दानामपि तदर्थत्वात्। तदुक्तं चिन्त्यविश्वसादाख्ये -

सकले निष्कले चैव सर्वत्रैव समानता।
सायुज्यमिति तत् प्रोक्तं सारूप्यं मूर्तितुल्यता। इति।।

मृगेन्द्रे -

अधिकारस्तु साम्राज्यं भोगो ह्लादो निजः[4] परः।
पाशातीतो महान्नित्यो लयस्तत्तुल्ययोगिता। इति।।

---

१. जाघटीतीति ] ज१;जाघटीति- ज२

२. किंकृतमित्यपहासास्पदत्वात् ] ज२; किंकृतमित्यपरिहारसास्पदत्वात्- ज१;

३. शिवलक्षणशिवशक्तिसदृशपरषड्गुणमयपरशिवत्वपदपठितपरनिरतिशयस्वलक्षणस्वशक्तिः सर्वथाभिव्यक्तिरिति ] ज२; शिवलक्षणशिवशक्तिसदृशपरषड्गुणमयपरशिवत्वपदपठितपरनिरतिश यस्वलक्षणस्वशक्तिसर्वधाभिव्यक्तिरिति- ज१

४. निजः ] ज२; निजं- ज१;

निश्वासकारिकासु–

पशुभावाद्यदातीत्य पतिभावेन तिष्ठति।
तत्तस्य गमनं नाम सर्वगे गमनं कुतः।।
उन्मनत्वं शिवत्वं च प्रयातीत्युपचर्यते।
सम्बोधो[1] गमनं नाम सर्वगे गमनं कुतः। इति।।

शुद्धविद्यामारभ्य गुणकारादशाद्या स्युर्नादकोटेरधो मुने। इति मृगेन्द्रश्रुतितः सुसिद्धपरशि वत्वनिरोधनादकोट्यधस्थूलतरस्थूलसूक्ष्मतरोपाध्युपाघ्रातापरषड्गुणमयापरशिवत्वव्यक्तिरित्य–जानन्तः समस्तोपाधिगलनसमनन्तरं क्रियमाणतिरोधानशक्तिशुद्धिसमनन्तरं[2] व्यक्त्यन्तरस्व–विहतिक्षतिमती सर्वार्थज्ञानक्रियार्थक्रियाशक्तिरिति ज्ञानशक्तिभेदसर्वज्ञतादि–त्रिगुणक्रियाशक्तिभेदस्वतन्त्रतादित्रिगुणलक्षणस्वपरशिवत्वाभिव्यक्तिः खलु कर्तव्येति अविन्दन्तः। भोगो ह्लादो निजः पर। इति मृगेन्द्रादिश्रुतिसुसिद्धा सैव शिवत्वाभिव्यक्तिः शि वानन्दशिवभोगपरमसुखपरमाह्लादपरमरसपरमसमृद्धिपरमपरमपरिपूर्तिपदैः पठितेत्यबुध्यन्तः पुनः

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।

अनन्तशक्तिश्च निरामयात्मा विशुद्धदेहः स शिवत्वमेति। इति सर्वज्ञानोत्तरश्रुतिसु–संसिद्धमष्टगुणमयसर्वज्ञत्वसर्वकर्तृत्वमयं शिवत्वं नान्येयाकलयन्तः पुनः सर्वज्ञत्वसर्वकर्तृत्वे स्तः।

षाड्गुण्यशिवत्वे द्वे न स्तः पुनः षाड्गुण्यमस्ति शिवत्वं नास्तीति माता मे वन्ध्येतिवत् भ्रमन्तः पठन्तः परमुक्तौ पुनः सर्वार्थसत्तामात्रनिर्विकल्पज्ञानक्रियार्थक्रिय त्वात्। षाड्गुण्यमयतां शक्तेरलक्षयन्तः षाड्गुण्यं नादकोट्यधस्तनभुवनस्थित्यपरमुक्ति समुत्थं न परमुक्तौ तदिति विकुर्वन्तो ब्रुवन्तः सर्वार्थगलितज्ञानक्रियेच्छां स्वचिच्छक्तिं शिवे निमज्य स्वस्य न स्वतः शिवत्वमिति शिवनिमज्जनात् समुत्थातिशयतः स्वस्मिन् शिवमये सति शिवानन्दानुभवशिवभोग इति आवेशपक्षकोट्यन्तः प्रविशन्तः कथयन्ति केचित्। ते त्वाक्षेपं न क्षमन्त इत्युपेक्ष्योपरम्यते। कथयन्ति च ते पुनः। गुणाभिव्यक्तिर्न सुखाद्यन्यतमेति अतो न पुरुषार्थ इति तेऽस्माभिः संसारदशायां प्रथितं किं सुखमिति पृच्छन्तः किं ब्रूयुः। गत्वा दूरमपि सत्यम्, अगतेश्चिच्छक्तिव्यक्तभूमिभूतसत्त्वगुणाभिव्यक्तिरिति ब्रूयुः। अथ किमनेन स्वेष्टं सिद्ध्यति। अहो बत न सिद्ध्यति किं सिध्यति खल्वसर्वधा सर्वथा वा संसृतौ मुक्तौ च औपाधिकस्वाभाविकस्वासर्वार्थसर्वार्थसन्निपतदर्थक्रियाक–

---

१. सम्बोधो ] ज२; सम्बन्धो– ज१;

२. क्रियमाणतिरोधानशक्तिशुद्धिसमनन्तरं ] ज२; क्रियमाणे तिरोधानशक्तिशुद्धिसमनन्तरं– ज१;

स्वपशुत्वशिवत्वलक्षणस्वचिच्छक्तिलक्षणस्वगुणाभिव्यक्तिः सुखपदपठिता पुरुषार्थ इति तदयुक्तम्[1]। तदुक्तं भोगकारिकासु–

ईश्वरेच्छासमाविष्टजगद्बीजपरिच्युतेः ।
साधनैः साध्यते भोगो बुद्धिवृत्त्यनुरञ्जनम्।। इति।

किरणे –

सर्वज्ञः स शिवो यद्वत् किञ्चिज्ज्ञत्वविवर्जितः।
शिवत्वव्यक्तिसम्पूर्णः संसारी न पुनस्ततः।। इति।।

किरण एव परामृतसुखप्रदमित्यत्र शिवत्वाभिव्यक्तिरेव जातिनियमेन नैतन्मुक्तिसुखं पूर्णतां ददाति। अपितु सर्वेभ्यो भूतेभ्यः सुखप्रदो यो नमोऽस्तु तस्मै ते। इति व्योमव्यापिस्तवश्रुतेः।

पूर्णताशब्दशब्दितसुखमिति व्याख्यातम्। सैव स्वशिवत्वाभिव्यक्तिस्वशिवभोगस्व-शिवानन्दतयाऽनुभूयते। तदुक्तं कामिके –

निजानन्दमहाम्भोधौ यया मज्जेदनाकुलः।
सा मुक्तिः स तु निर्वाणस्तदेव परमं पदम्।।

इति। त्रिमलापगमे व्यक्तशिवसाम्यत्वलक्षणमात्मरूपं चिदानन्दमयं सायुज्यनामकम्। इति। अन्यत्र च – नात्मच्छेदोऽपवर्गो न च पशुशिवयोरैक्यमत्रोऽपवर्गो नाविद्याग्रासहानिर्न च गुणविलयो नापि पाषाणमुक्तिः।

यद्बोधानन्दरूपं त्रिमलविगमने व्यक्तमात्मस्वरूपम्।

तत् सायुज्येन वाच्यं शिवसदृशविभुः शैवतन्त्रेऽपवर्गः। इति। ननु मुक्ताः शिवतुल्यज्ञानक्रियाशक्तयः इत्युक्तम्। यदि क्रियाशक्तिः सर्वकार्यकर्त्री तदाऽनेकेश्वरवादः प्रसज्यते। यदि न सर्वकार्यकर्त्री तदा कुतः शिवः शक्तिसदृशीयं सत्यम्। तावत् सर्वकर्तृत्वं व्यक्तमस्त्येव। तदुक्तं मोक्षकारिकासु–

चिद्व्यक्त्या सर्वकर्तृत्वं सिद्धानामीश्वरो यथा।
अन्यथा कर्तृता न स्यादीश्वरस्यापि सिद्धवत्। इति।।

न ह्येकांशेन चिद्व्यक्तिः सयुक्तिका। तदुक्तं तत्रैव –

न कर्तृशक्तेश्चिद्व्यक्तिरेकांशेन सयुक्तिका।
कर्तृत्वस्य न चाभावः साधितत्वात्ततस्त्वसौ[2]। इति।।

व्यक्तापि यदि न कार्यकर्त्री तर्हि को विशेषः। तदुक्तं तत्रैव –

---

१. इति तदयुक्तम् ] ज२; इति– ज१;

२. साधितत्वात्ततस्त्वसौ ] ज३; सादितत्वात्ततस्त्वसौ– ज१; स . . . . स्त्वसौ– ज२

मुक्ते व्यक्ता पशौ नेति विशेषः कस्तयोर्यदि।

सर्वकार्याणि नो कुर्यात् सिद्धस्था सर्वकर्तृता। इति[1]। ज्ञेये कार्ये च स्वार्थक्रिया-प्रयोगभूमिप्राप्तिर्ज्ञानक्रियाशक्त्योः[2] व्यक्तिः। यदि क्रियाशक्तिः[3] कार्ये स्वार्थक्रियासंकोचवती तदा न सर्वथा व्यक्तिकृतीमती। तदुक्तं तत्रैव –

प्रवृत्तिः सर्वनिष्पत्तौ व्यक्तिर्नान्या तु तद्गता।
ज्ञानं सर्वप्रकाशाय प्रवृत्तं व्यक्तिमुच्यते।। इति।

तथापि मुक्ता स्वार्थनिष्ठा स्वरूपव्यक्तिप्रयोजनमात्रे विश्रान्तिमन्तः परार्थस्य[4] शिवकरणकरणीयनिर्वर्तनीयत्वात्। न पृथक्करणीयमुद्दिश्य प्रवृत्तिमन्तः। तदुक्तं मृगेन्द्रे –

न च सृष्टादि कुर्वन्ति स्वार्थनिष्ठा हि ते यतः। इति।

तथापि स्वकीयक्रियाशक्तेः स्वार्थक्रियाप्रयोगभूमिप्राप्तिव्यक्तिरित्यवर्जनीयत्वात्। जगत्सृष्ट्यर्थमिदमेवं भूतं भवत्विति शिवे संकर्ष्पमति सति स्वसंकल्पः समुत्थिष्ठते[5]। तथापि रागद्वेषादिविरतेस्तदा न पृथगाचरन्तो नवमिदमस्तु[6]

[7]पुराणमिदमस्त्विति शिवमतेरग्रप्रत्यग्रान्वग्रोन्नत्यवनतिभिदा भिन्नसचिह्नसमुत्थां स्वमतिमनेकेश्वरवादास्पदाम् अङ्कुरयन्ति। तदुक्तं –

तस्मिन् सृष्ट्यादिसंकल्पसमं तेषां तदा भवेत्।

नैव संकल्पवैषम्यं तेषां तद्धेत्वभावतः।। इति। तर्हि कथमुच्यते। यदा शिव इदमेवं भूतं भवत्विति संकल्पयति तदा अवर्जिनीयतया सह तथा भूतं भवत्विति समुत्थसंकल्परूपां शिवसंकल्पादनग्रात्यग्रानन्वग्रानुन्नत्यनवनतीमतीं शिवसंकल्पफलादपृथक्फलसिद्धिमतीं मतिं स्वासंकीर्णपरकीयमित्यनुसंधात्रीं शिवादपृथगाचरन्तोऽनुसरन्ति। अत एव शिवमते स्वमतेरनग्रानुन्नतिमत्वान्न पृथक् जगत्कर्तारः। तदुक्तं मोक्षकारिकासु –

रागद्वेषादिनिर्मुक्ताः सर्वगोचरबुद्धयः।
सिद्धाः तेऽतो न कामैस्तु[8] भेदवद्भिः समन्विताः।।

---

१. सर्वकर्तृता। इति ] ज३; सिद्धस्था सर्वकर्तृत्वेति- ज१; सि . . . . सर्वकर्तृतेति- ज२

२. स्वार्थक्रियाप्रयोगभूमिप्राप्तिर्ज्ञानक्रियाशक्त्योः ] ज२,ज३; स्वार्थक्रियाप्रयोगभूमिप्राप्तिज्ञानक्रियाशक त्यो- ज१;

३. यदि क्रियाशक्तिः ] ज१; . . . . शक्तिः- ज२

४. परार्थस्य ] ज२,ज३; परार्धस्य- ज१;

५. समुत्थिष्ठते ] ज२; समः समुक्तिषु ते- ज१;

६. नवमिदमस्तु ] ज१,ज३; नवमिति . . . . - ज२

७. पुराणमिदमस्त्विति . . . संकल्पयति तदा अवर्जिनीय'' पर्यन्तं ग्रन्थभागः ज२ कोशे नास्ति।

८. तेऽतो न कामैस्तु ] ज२; ते त्वोनकामयी स तु- ज१;

अविभिन्नाधिकारास्ते शिवेनोक्तास्तु सूरिभिः।
तेनेह सर्वकार्याणामुत्पत्तिर्न विरुध्यते। इति।।

तदुक्तं च सिद्धान्तदीपिकायाम्-

अवर्जनीयसंसिद्धं मुक्तानां कृत्यपञ्चकम्।
कृपया तु शिवस्यैव स्वार्थनिष्ठा हि ते यतः।।
न ते विश्वस्य कर्तारः कर्ता च शिव एव हि। इति।
सकले निष्कले चैव सर्वत्रैव सता न ता।।

सायुज्यमिति चिन्त्यविश्वसादाख्यश्रुतेः। मौक्तिकसर्वज्ञतादिगुणानपि निश्वासकारिकासु समर्थितः सोऽन्वर्थोऽनुविधत्त इति न विरुध्यते। अस्माभिः सुरचितसिद्धान्त-शिखामणौ तदिदं सविस्तरं तत एवावधार्यम्। अलमनुपासितगुरुभिः तपस्विजनमनःखेदविवादेन। प्रकृतमनुसरामः।

**( व्याख्या )** एवं सकलानां कर्मनाशात् मलस्यापि विपाके सहकारिणः।

पतत्युन्मीलनी शक्तिः तदानुग्रहरूपिणी। इति पूर्वोक्तशक्तिपातपवित्रितानां वैराग्यादिसंपन्नानां श्रुतिस्मृत्यादिबोधितवैदिकधर्मयुक्तानामधिकारिणां च साधिकरणदीक्षया शिवत्वाभिव्यक्तिमुक्त्वा प्रकृतमुपसंहरन् निरधिकरणदीक्षया 'पुनाति साधिकारेण यं वापि परमेश्वरः' इति संक्षेपेण उक्तान्तां पुनर्विस्तरेणाह-

**( वृत्तिः )** विज्ञानकेवलान् मलस्य तीव्रतरपाकात् परशिवसाम्यगतान् विहाय तीव्रादिपाकतारतम्यमपेक्ष्य शिवतत्त्वसदाशिवतत्त्वात्मकभोगतत्त्वे ईश्वरतत्त्वविद्या-तत्त्वात्मकाधिकारतत्त्वे च योजयतीत्याह –

**इच्छयैवानुगृह्यादौ शिवो विज्ञानकेवलान्।**
**मलपाकमपेक्ष्यैव कांश्चित् शुद्धाध्वगोचरे।।४९।।**
**योजयत्यधिकारेषु कृत्वा दृक्क्रिययोत्कटान्।**

**( व्याख्या )** आदौ सर्गाद्यकाले इच्छयैव संकल्पमात्रेण न तु साधिकरणत्वेन विज्ञानकेवलान् कांश्चित् तन्मध्ये कांश्चित् मलपाकमपेक्ष्य पक्वमलानपेक्ष्य अनुगृह्य सद्यो मोक्षं प्रापय्य। तदुक्तं मृगेन्द्रे-

यान् विमोचयति स्वापे शिवाः सद्यो भवन्ति ते।

संहृतौ वा समुद्भूतावणवः पतयोऽथ वा। इति। कांश्चित् मलपाकतारतम्यं चापेक्ष्य तदन्यथा विषमपदयोजयितुः वैषम्यापत्तेरिति भावः। दृक्क्रिया दृक् चासौ क्रिया च दृक्क्रिया न तु द्वन्द्वः एकवचनान्तत्वात्। समाहारद्वन्द्वे नपुंसकत्वप्रसङ्गात्। उत्ष्कटान् कृत्वा अतिशयितज्ञानक्रियाशक्तिकान् कृत्वेत्यर्थः। शुद्धाध्वगोचरे शुद्धाध्वविषये अधिकारे योजयतीत्यन्वयः।

उक्तमर्थं विषयव्यवस्थया विभजते–

**कांश्चित् भोगाह्वये तत्त्वे तत्त्वेऽन्यानीश्वराह्वये।।५०।।**
**अन्यान् विद्याह्वये तत्त्वे सर्वज्ञान् बलशालिनः।**

**( व्याख्या )** शुद्धाध्वन्यधिकृतानां मध्ये कांश्चित् बलशालिनः सर्वकर्तृनित्यर्थः। भोगाह्वये तत्त्वे सदाशिवतत्त्वे योजयतीत्यनुषङ्गः। कांश्चित् ईश्वरतत्त्वे योजयति। अन्यान् विद्यातत्त्वे योजयति।

एवं त्रितत्त्वेषु[१] योजनामुक्त्वा भोगतत्त्वे योजितानां प्रणवादीनां गुणभोगकृत्यान्याह–

**सदाशिवगुणोपेताः भोगाख्यं तत्त्वमाश्रिताः।।५१।।**
**मनोऽभिलषितान् भोगान् भुञ्जाना विविधानपि।**
**पतिकृत्याधिकारेषु प्रवृत्ताः पत्युरिच्छया।।५२।।**

**( व्याख्या )** ये भोगाख्यं तत्त्वमाश्रिताः ते सदाशिवस्य ये गुणाः सौन्दर्यलावण्यौदार्यादयः तैरुपेताः मनोभिलाषितान् मनसा प्रार्थितान् विविधान् विचित्रान् भोगान् भोज्यवस्तूनि भुञ्जानः। अत्र श्रुतिरपि प्रमाणम्। पतिकृत्याधिकारेषु पत्युर्यत् कृत्यं तदधिकारे तन्निर्वाहे आगमसंप्रदायप्रवर्तनरूपे पत्युः शिवस्येच्छया संकल्पेन न तु स्वातन्त्र्येण प्रवृत्ताः प्रणवादयः भवन्तीति शेषः।

ईश्वरतत्त्वे योजितानां गुणभोगानामादीन्याह –

**ये प्राप्तास्तत्त्वमैशानं विशेषेण क्रियाधिकाः।**
**अधिकारगुणोपेताः महान्तश्चक्रवर्तिनः।।५३।।**
**अष्टावनन्तसूक्ष्माद्याः यथापूर्वं गुणाधिकाः।**
**अतिसौन्दर्यलावण्या अक्षीणमनसः सदा।।५४।।**

**( व्याख्या )** ये विज्ञानकेवलाः ऐशानं तत्त्वमीश्वरतत्त्वं प्राप्ताः ते विशेषेणातिशयेन ज्ञानशक्त्यपेक्षया क्रियाधिकाः क्रियाशक्त्यधिकाः। तदुक्तं तत्त्वप्रकाशे–

न्यग्भवति यत्र शक्तिः ज्ञानाख्योद्रिक्ततां क्रिया भजते।

ईश्वरतत्त्वं तदिह प्रोक्तं सर्वार्थकर्तृ सदा। इति। अधिकारगुणोपेताः अधिकारस्येश्वरस्य गुणैः स्रष्टृत्वादिभिरुपेताः। महान्तः महामहिमाढ्याश्चक्रवर्तिनः महाचक्रप्रवर्तकाः। अनन्तसूक्ष्माद्याः अनन्तश्च सूक्ष्मश्च तावादी येषां ते अनन्ताः सूक्ष्मसहिताः।

शिवोत्तमैकनेत्रौ च एकरुद्रस्त्रिमूर्तिकः।

श्रीकण्ठश्च शिखण्डी चेत्येवमीश्वरपुराष्टकम्।

इत्यागमोक्ता अष्टौ द्रष्टव्याः। यथापूर्वं गुणाधिका यथापूर्वं पूर्वं पूर्वं गुणाधिकाः उत्तरोत्तरापेक्षया पूर्वः पूर्वो गुणाधिक इत्यर्थः। अतिसौन्दर्यलावण्याः अतिशयितं सौन्दर्यरूपं

---

१. त्रितत्त्वेषु] मु शिवतत्त्वेषु–क१;

लावण्यं कान्तिविशेषश्च येषां ते तथोक्ताः। अक्षीणमनसः भोगादिष्वप्रतिहतसंकल्पाः। चक्रवर्तिनः मायाचक्रप्रवर्तका भवन्तीति शेषः।

विद्यातत्त्वयोजितानां विज्ञानकेवलानां स्वरूपादिकमाह–

**विद्या विद्याह्वयं प्राप्ताः संख्यया सप्तकोटयः।**
**प्रशान्तकलुषाः सर्वे महात्मानोऽमितौजसः।।५५।।**

**( व्याख्या )** विद्याह्वयं तत्त्वं विद्यातत्त्वं विद्याः मन्त्राणवः। तदुक्तं तत्त्वप्रकाशे–

मन्त्रांश्च करोत्यपरांस्ते चोक्ताः कोटयः सप्त। इति। प्रशान्तकलुषाः पक्वमलाः अत एव महात्मानो अमितौजसश्च महात्मानः उत्कटक्रियाशक्तिकाः। तदुक्तं तत्त्वप्रकाशे–

न्यग्भवति तत्र शक्तिर्ज्ञानाख्योद्रकमश्नुते यत्र।

तत्तत्त्वं विद्याख्यं प्रकाशकं ज्ञानरूपत्वात्। इति। संख्यया सप्तकोटयः सप्तकोटिसंख्याकाः तत्तदधिकारप्रवृत्ता भवन्तीति शेषः।

**( वृत्तिः )** आदौ सृष्ट्यारम्भकाले इच्छया निरधिकरणस्वशक्त्या दृक्क्रिययोत्कटान् समभिव्यक्तशक्तियुक्तान् सदाशिवसमगुणेति अधिकारसमगुणेति चाध्याहार्यम्। पतिकृत्याधिकारेषु प्रणवादय इव मनोभिलषितभोगभुजोऽप्यनन्तादयः पत्युरिच्छया मायान्तरितपञ्चशिवकृत्येषु प्रवृत्ता। अत एव क्रिययाधिकाः मधुकोशपुटाकारेति[1] श्रुतेरनन्तस्रोतोरूपी मायामण्डलाधिकारित्वात्। सूक्ष्मादनन्तः शिवोत्तमात् सूक्ष्म एकनेत्राच्छिवोत्तमः।

एकरुद्रादेकनेत्रः त्रिमूर्तेरेकरुद्रः श्रीकण्ठात् त्रिमूर्तिः। शिखण्डिन श्रीकण्ठ इत्यधोऽधो कलाया न्यूनकर्तृत्वात्। यथापूर्वं प्रथममनतिक्रम्य गुणाधिकाः क्रियाशक्त्यधिकाः अक्षीणमनसः अप्रतिहतशक्तयः। विद्याः मन्त्राः। अत एव सर्वे त्रिप्रकारेण योजिताः। प्रशान्तकलुषाः। पाकपूर्वदीक्षया क्षपितमलाः। स्पष्टास्तदितर पदार्थाः। अनन्तो परमे तेषां महतां चक्रवर्तिनाः।

विहितं सर्वकतृत्वकारणं परमं पदम्। इति श्रुतेः। परमुक्तिरेषां महाप्रलयात् पूर्वमप्यस्ति।

**( व्याख्या )** ननु एतेषां नित्याधिकार एव किं, नेत्याह–

**( वृत्तिः )** किमस्तीत्याह –

**एतेषां यस्य वैराग्यमुपजातमहात्मनः।**
**किमेते नाधिकारेण श्रेयसः परिपन्थिना।।५६।।**
**इति तं परमेशानो मलपाकमपेक्ष्य सः।**
**स्वेच्छयैवानुगृह्णाति मुक्तिव्यक्त्यर्थया दृशा।।५७।।**

---

१. मधुकोशपुटाकारेति ] ज१ ;मधुकोशपुटा करोति–ज२

**( व्याख्या )** एतेषां तत्तत्तत्त्वे योजितानामणूनां मध्ये यस्य महात्मनो विवेकिनः वैराग्यमधिकारतद्भोगेभ्यो विरक्तिः उपजातं तस्य वैराग्यहेतुभूतानि दोषदर्शनान्याह किमेतेनेति। श्रेयसो मोक्षस्य परिपन्थिना प्रतिबन्धकेन एतेनाधिकारेण जगन्निर्माणादिना किं न किंचित् प्रयोजनमित्यर्थः। प्रत्युत परमप्रयोजनपरिपन्थीति भावः। इति वैराग्यमुपजायत इति संबन्धः। स अनुग्राहकत्वेन प्रसिद्धः परमेशानः शिवः तमधिकारात् विरक्तम्। नन्वनुग्रहस्य पूर्वमेव प्रवृत्तत्वात् किमनेन पुनरनुग्रहेणेत्यत आह मुक्तिव्यक्त्यर्थयेति। मुक्तिव्यक्त्यर्थया मुक्तिः पाशेभ्यो विमुक्तिः व्यक्तिः शिवत्वभिव्यक्तिश्च अर्थः प्रयोजनं यस्याः सा तया दृशा चिच्छक्त्या पूर्वानुग्रहस्याधिकारफलत्वादिति भावः। अत्र श्रुतिः प्रमाणम्।

**( वृत्तिः )** एतेषां प्रणवसुदीप्तकारणसुशिवेशसूक्ष्मकालदशेशाशुनां सदाशिवतत्त्व-वर्तिनां दशानां तदन्यतद्वर्तितदुपरिवर्तिसहितानामधिकारतत्त्वस्थपरमुक्तिगतावशिष्टमन्त्रा-नन्तादिमन्त्रेशानां च मध्ये यस्य महात्मनः श्रेयसः परमप्रयोजनरूपस्वातन्त्र्याभिव्यक्तेः परिपन्थिना विरोधिना एतेनाधिकारेण किं तां प्रति विफलप्राय इति वा यत् इति वैराग्यम् अधिकारोपरमत्वं जातं समुद्भूतं तदा स परमेश्वरस्तं महात्मानं न बलादधिकाराय पञ्चकृत्यलक्षणभोगलक्षणाय[1] निरुणद्धि। किन्तु मलपाकमपेक्ष्य मलस्य विद्यातत्त्वादधोऽत्यन्तविच्छिन्नत्वात् तद्वासनासमुत्थाधिकारमलक्षयौन्मुख्यं ज्ञात्वा स्वेच्छया निरधिकरणस्वशक्त्यैव मुक्तिव्यक्त्यर्थया दृशापाशात्यन्तविमुक्तिपरशिवत्वाभिव्यक्तिफलेन शक्तिकर्तव्यावलोकनेनानुगृह्णाति तादृशमुक्तिव्यक्तीकरोति।

**( व्याख्या )** नन्वधिकृतस्य मोक्षे तदधिकारस्यानिर्वाहप्रसङ्ग इत्यत आह–

**ततो मुक्त्यर्थमासन्नं कनिष्ठं तत्पदे विभुः।**
**नियुनक्त्यनुगृह्यान्यं तत्पदे नियुनक्त्यापि।।५८।।**

**( व्याख्या )** ततः तदनुग्रहादनन्तरं विभुः मुक्त्यर्थं मुक्तिः मोक्षः अर्थः प्रयोजनं यस्य तादृशमासन्नं कनिष्ठमव्यवहितमनुग्रह्य तत्पदे पूर्वमुक्तस्य पदे अनुगृह्य नियुनक्ति। ननु न्यूनपदे स्थितस्याप्यधिकपदे नियोगे सति न्यूनपदाधिकारस्य पूर्ववदेवानिर्वाहप्रसङ्ग इत्यत आह– अनुगृह्यान्यमिति। अन्यमासन्नं तत्कनिष्ठं तत्पदे न्यूनस्य पदे नियुनक्ति। अपिशब्दोऽनुक्तसमुच्चयार्थः।

**( वृत्तिः )** तदनुपदमेव भगवान् तत्पदे तदधिकारस्थाने आसन्नमव्यवहितं कनिष्ठं साक्षादित्यर्थः। ततस्तस्मात् कनिष्ठत्वनिबन्धनां मुक्त्यर्थं तावदनुग्रहतन्नाम्ना सह तत्सदृशगुणीकृत्वा नियुक्ति सम्बन्धयति। तत् पदेऽपि परमुक्तिं गताधिकारस्थानं गतपुराधिकारस्थानेऽपि अन्यं परमुक्तिगतं प्रति व्यवहितं तदधिकारस्थानं गतस्य साक्षात्[2]

---

१. पञ्चकृत्यलक्षणभोगलक्षणाय ] ज१; पञ्चकृत्यलक्षणभोगलक्षणया- ज२

२. तदधिकारस्थानं गतस्य साक्षात् ] ज३; तदधिकारस्थानागतस्य साक्षात्– ज१; तदधिकारस्थानगतसाक्षात्– ज२

कनिष्ठमनुगृह्य नियुनक्ति। तत्पदेऽपि तथेत्येवम् उत्कर्षक्रमेण प्रगम्य प्रणवादीनां मध्ये अनन्तादीनां मध्ये मन्त्रतदन्येषां मध्ये वा अन्त्यकनिष्ठपदे आगमोपदेशस्य पतिकृत्याधिकारस्य मायाचक्रस्याविच्छेदायाण्वन्तरं तदीशसमगुणाभिधानं[1] कृत्वा नियुनक्ति। शिखण्ड्यादेर्यदि वैराग्यमण्वन्तरमिति न हि कनिष्ठक्रमयोजना। विद्यास्त्वनुग्रहप्राप्त्यनुप्रदमेवात्यन्तपापाकुल ामिमां पितामहकृतां पिण्डसृष्टिमवलोक्यैव विरक्ताः। नात्रात्यन्तोपहतसर्गे वयं भोगपालन ात्मकमधिकारमीश्वराधिष्ठमपि कर्तुं क्षमा इति निरूपितास्तथा परमेश्वराज्ञावश्यं कर्तव्येति निश्चित्याचार्यान्तरप्रयोज्यतानपेक्षणनिरधिकरणशिवप्रेरणपूर्वं साक्षात्तत्कर्तृतयैव तत्करणतया च स्ववीर्येण स्वानुग्रहसमनन्तरानुग्रहीतव्यविज्ञानकेवलानां मलं परमुक्तौ मन्त्रेश्वरत्वे च योग्यप्रलयाकलानां मलकर्मणी ब्रह्मसृष्टिमेतां सकलसंज्ञितस्थूलशरीरसम्बन्धानामणूनां तत्कालमेव शक्तिपातेन संसृष्टां मलकर्मभ्यां सह विमोच्य तान् शिवान् कृत्वा तस्माद्व्यापारादुपरताः परां मुक्तिं प्रवेष्टुमीश्वरप्रसादापेक्षिण्यः सत्यः। परमेश्वरचोदितेनानन्तेनाधिकारार्थमेव धृताः ततस्ताभिरनन्तेशः पृष्टः हे भगवन् ! अत्यन्तकुत्सितोऽप्ययमधिकारोऽस्माभिः पाशच्छेदशिवत्वाभिव्यक्त्यात्मकत्वेन पशुनामेवेश्वरादिष्टत्वात् कृतोऽधुना मोक्षानुष्ठानप्रवृत्तास्तत् किमर्थं वयं धारिता इति। ततोऽनन्तेशः प्रत्युवाच – भवतीषु मध्याद्याः प्रकृष्टमलपरिपाकयुक्तत्वात् अधिकारोपरतास्ताः परमेश्वराज्ञयैव मोक्षं यान्तु। यास्तु तद्विपरीतत्वात् अधिकाराभिलाषिण्यस्ता महाप्रलयं यावत्तिष्ठन्त्विति। ततस्ताः सर्वभूतसुखप्रदो हि पतिः स कथमस्मदादीनाम् अनभिमते विषये प्रवर्तयति। न हीति संतुष्टाः परस्परं कस्याः कुत्र रतीति समामन्त्र्य यास्त्वधिकारकामिन्यस्ता गुर्वधिकरणशिवकरणीभूता। न तु पूर्वार्धस्येव स्वतोऽनुग्रहकर्तृता चेति सप्तकोटिसंख्यायाः सेनायाः अर्धेन स्थिताः परमुक्तिं गताः शिष्टाः सकलेष्वप्यनयोक्त्या निरधिकरणशिवानुग्रहयोग्याः सन्तीति गम्यताम्।

**( व्याख्या )** अत्र ज्ञानाश्रयः आत्मेति सर्ववादिनामविवादम्। स च कश्चिन्नास्ति प्रमाणाभावादिति वक्तुं प्रकृतासङ्गतिमाशंक्य प्रथमप्रघट्टकेनाक्षेपसङ्गतिमाहुः ऋषयः–

**( वृत्तिः )** आत्मा महाभूतात्मक इति चार्वाकाः। प्रतिक्षणं ध्वंसित्वेन विज्ञानसन्तानात्मक इति सौगताः। नित्यो व्यापकोऽज्ञो बुद्ध्यादिनवगुणक इति नैयायिकाः। स्वभावनिर्मलो निर्गुणो कर्ता चेति सांख्याः। स्वातन्त्र्यविघातकर्ममूलमोहाद्यष्टगुणकसंकोचिविकासधर्मीति दिगम्बराः। ब्रह्मेश्वराकार्या नित्या व्यापक इति क्रमेण परिणतवेदान्तविदः पाञ्चरात्राश्च एक एव परमात्मा तत्तद्विविधमनोपलक्षणोपाधिभेदेनानेकधा दृश्यत इति मायावादिनः। अज्ञः कर्ता चेति जैमिनीयाः इत्येवं वादिवदनसमविषमसमुत्थोक्तिभिरात्मतद्धर्मसक्ताः संशयालिङ्गिताः ऋषयस्तावत् चार्वाकदृशा चोदयन्ति –

**सत्यात्मनि च संसिद्धे प्राक् प्रोक्तं सकलं भवेत्।**
**तत्सद्भावे ततः शम्भो प्रमाणमभिधीयताम्।।५९।।**

---

१. तदीशसमगुणाभिधानं ] ज३; तदीशस्म– ज१; तदीश . . . .– ज२

**( व्याख्या )** आत्मनि ज्ञानाश्रये संसिद्धे प्राक् प्रोक्तमात्मत्रैविध्यादिकं सकलं सत्यम् भवेत्। अतः तद्भावे तत्र शम्भो प्रमाणमभिधीयतामित्यन्वयः।

**( वृत्तिः )** शम्भो हे भगवन् ! अत सातत्यगमन इति धातोः आत्यते[1] सान्तत्येन गम्यते ज्ञायत इत्यात्मेति दिक्कालानवच्छिन्नो नित्यो व्यापकश्चेति त्वयोक्तः। तत्त्वेन तस्मिन्नात्मनि संसिद्धे सति प्राक् प्रोक्तं विद्यादिपदभेदयोजनादिकं सकलं भवेत्। ततस्तत्सद्भावे प्रमाणमभिधीयताम्।

**( व्याख्या )** तत्र यद्यपि जानामीति प्रत्यक्षप्रमाणमस्ति तथापि तस्य विप्रतिपन्नं प्रत्युपन्यासानार्हत्वात् अनुमानमाह ईश्वरः–

**( वृत्तिः )** न तावत् प्रत्यक्षेण तत्सिद्धिः तस्य नित्यव्यापकस्वभावस्य शरीर-व्यतिरेकेणानुपलब्धेः। शरीराद्बहिरणुमात्रमप्यसंवेदनाच्च। नाप्यनुमानेन। अनुमेयत्वे देवदत्तादिवत् परत्वप्रसङ्गात्। यत् किञ्चित् स्वयं प्रकाशते स एवात्मा तत् प्रकाशस्तु परः स्वप्रकाशत्वतत्प्रकाश्यत्वाभ्यामेव स्वात्मपरात्मनोर्भेद इति विविक्ततया आत्मपरभावस्य प्रकाशमानस्यैव संकरोऽनवस्थानं च स्यात्। तदुक्तं–

आत्मा यदि भवेन्मेयस्तस्य माता भवेत् परः।

पर आत्मा तदानीं स्यात् स परो यस्तु मीयते।। इति। ततः कश्च तस्यानुमाता? ज्ञानं चेत् स एवात्मा अनुमातृत्वेन तदा संवेदनादिति किमन्येन। नाप्यागमेन तस्यास्मान् प्रत्यसिद्धेः। प्रत्यक्षानुमानविरुद्धार्थेन प्रवृत्तिस्तस्येति चेति भावः। ईश्वरः। तर्हि नास्तीति वात्मा कुतः प्रमाणाभावात्। संशय एव युक्तस्ततश्चार्वाकाणामपि प्रत्यक्षमेव प्रमाणं नानुमानादिरिति प्रमाणाप्रमाणचिन्ता न प्रत्यक्षनिश्चया महाभूतभेदव्यवस्था चेत्यवर्जनीयमनुमानं इति स्वदृशि स्वसंवेदनप्रत्यक्षसिद्धस्वात्मनि दर्शनेन मेयविसदृशपरात्मानुमातृतया परमात्मना-मनुमितेरितरदेहेषु[2] नैयायिकादिदृशा[3] वा मेयत्वाभ्युपगतेस्तत्रानुमितिरिति अनुमानं प्रवर्तयति–

**प्रवर्तमानो देहादिश्चेतनाधिष्ठितः सदा।**
**स्वतःप्रवृत्तिशून्यत्वात् जडत्वेन घटादिवत्।।६०।।**

**( व्याख्या )** प्रवर्तमानो देहादिश्चेतनाधिष्ठितो भवितुमर्हति। अत्रान्याधिष्ठितत्वमात्रं साध्यं चेतनग्रहणं तु पक्षधर्मताबललभ्यसाध्याभिप्रायेण। अन्यथेदानीं चेतनासिद्धौ तद्घटितसाध्यासिद्धिप्रसङ्गः। घटे दृष्टान्ते साध्यवैकल्यप्रसङ्गश्च। अत एव यस्तु प्रवर्तक इत्युपसंहारवाक्ये तथैवोपसंहृतम्। प्रवर्तमानत्वे सति स्वतः प्रवृत्तिशून्यत्वात् तत्र हेतुः जडत्वेनेति। यदा प्रवर्तते तदा तदेत्यर्थः।

---

१. आत्यते ] ज१;अत्यते- ज२

२. परात्मनामनुमितेरितरेतरदेहेषु ] ज२,ज३; परमात्मनामनुमितेरितरदेहेषु- ज१;

३. नैयायिकादिदृशा ] ज१; नैयायिकदृशा- ज२

**( व्याख्या )** अस्तु चेतनाधिष्ठितत्वमात्मसिद्धौ किमायातमित्यत आह–

**यस्तु प्रवर्तकः सोऽयमात्मेति परिपठ्यते।**

**( वृत्तिः )** प्रवर्तमानो गमनागमनादिलक्षणस्वार्थक्रियाकर्ता देहादिः। आदिशब्देन इन्द्रियादिकं गृह्यते। चेतनाधिष्ठितः प्रवृत्तिकरणकाले सदा चित्प्रेरितः प्रवर्तते। सेयं प्रतिज्ञा। जडत्वेन हेतुना सिद्धात् स्वतः प्रवृत्तिशून्यत्वात्। सोऽयं हेतुः। घटादिवत् यस्त्वित्यनुषज्य सुकरत्वात् श्लोकार्थः[1] सुकर्तव्यः। पारिशेष्यानुमानतोऽपि तत्सिद्धिः तदनु प्रयोगक्रमः। मृगेन्द्रे–

कार्यं क्षित्यादि कर्तेशस्तत्कर्तुर्नोपयुज्यते।
न स्वार्थमप्यचिद्भावान्नानर्थ्यं कर्तृगौरवात्।।
पारिशेष्यात् परार्थं तत् क्षेत्रज्ञः स परस्तयोः। इति।

**( व्याख्या )** अस्तु ज्ञानाश्रयः किंचिदात्मास्तु देहातिरिक्तो न भवतीति चार्वाकमतमाश्रित्य शंकन्ते–

**( वृत्तिः )** ऋषयो देहव्यतिरिक्तात्मसिद्धिं प्रति प्रयुक्तस्वतःप्रवृत्तिशून्यत्वलक्षणहेतोरसिद्धिं दर्शयन्ति –

**चैतन्यदर्शनाद्देहे नात्मचैतन्यसम्भवः।।६१।।**
**यद्यस्मिन् सति संदृष्टं तदिष्टं तस्य कारणम्।**

**( व्याख्या )** योऽहि ज्ञानाश्रयत्वेन प्रतीयते स आत्मेत्यविवादम्। तथा च देहे चैतन्यदर्शनं मनुष्योऽहं जानामीति ज्ञानाश्रयत्वस्य देहे दर्शनात् देह एवात्मा न तु तदतिरिक्त चैतन्याश्रयात्मसम्भव इत्यर्थः। किंचान्वयव्यतिरेकाभ्यामपि देहस्यैव चैतन्योपादानत्वे स एवात्मेत्याह यदिति। यस्मिन् मृत्पिण्डादौ सति यद्घटादिकं संदृष्टं तत् कारणमुपादानमिष्टम्। अस्य कारणमात्रसाधारणत्वेऽपि अभ्यर्हितत्वादुपादानस्य। एवं च देहे सति ज्ञानस्य दर्शनात् देह एव ज्ञानोपादानीभूत इत्यर्थः।

**( वृत्तिः )** देहे सति चैतन्यदर्शनादसति यदि तद्दर्शनात् स्वधर्मलक्षण–स्वकार्यचैतन्यविशिष्टकायः[2] पुरुषः सचेतनत्वात्। स्वतः प्रवृत्तः स परोपीऽति। स तु हि नात्मचैतन्यको भवेत्। आत्मलक्षणचैतन्यं यस्य स तथोक्तः स्वप्रवृत्तिहेतुतया स्वव्यतिरिक्तात्मलक्षणचैतन्यको न स्यादित्यर्थः। दृष्टान्तरूपं दर्शयन्ति। यदौष्ण्यादिकं यस्मिन् वह्न्यादिके सति

---

१. श्लोकार्धार्थः ] ज२, ज३; श्लो . . . . र्धार्थः– ज१;

२. स्वधर्मलक्षणस्वकार्यचैतन्यविशिष्टकायः,] ज१; स्वधर्मलक्षणस्वकार्यचैतन्यविशिष्टः कायः– ज२

संदृष्टं तदिदं वह्न्यादि तस्यौष्ण्यादेः कारणम्। ननु घटस्यापि[1] भूतात्मकत्वात् किमिति न स चैतन्यकारणम्।

**( व्याख्या )** ननु देहघटयोः भूतारब्धत्वाविशेषे देहस्य चैतन्योपादानत्वं घटस्य नेत्यसम्भव एकजातीयोपादानारब्धयोः विचित्रकार्यजनकत्वादृष्टेरित्याशंक्याह–

**( वृत्तिः )** तन्नेत्याहुः –

**कारणत्वाविशिष्टोऽत्र देहश्चैतन्यसाधकः।।६२।।**
**शरीरघटयोर्योगात्**

**( व्याख्या )** अत्र शरीरघटयोर्मध्ये देहः घटापेक्षया एकजातीयकारणकत्वेनाविशिष्टोपि योगात् विचित्रशक्तिसहकारियोगात् चैतन्यसाधकः। चैतन्यकारणं युक्तमित्यर्थः।

अत्रानुरूपदृष्टान्तमाह –

**सुरापूपाख्यकार्ययोः ।**
**कारणं गुलपिष्टादिरविशिष्टोऽपि दृश्यते।।६३।।**
**अपूपादसती पूर्वं मदशक्तिस्तदात्मनि।**

**( व्याख्या )** सुरापूपाख्ययोः कार्ययोः कारणं गुडपिष्टादिरविशिष्टः अपि यद्यपि तथापि अपूपादसती अजायमाना मदशक्तिः तदात्मनि सुरात्मानि सुरायामित्यर्थः। योगात् पूर्वं चासती योगाद्दृश्यत इति सम्बन्धः।

उपसंहरति–

**तस्माद्भूतात्मकादेव देहाच्चैतन्यसम्भवः।।६४।।**
**तच्चैतन्यमधिष्ठातुं किमन्येनात्मनेश्वर।**

**( व्याख्या )** तस्मात् यस्मात् एकोपादानकयोरपि विचित्रकार्यजनकत्वं तस्मादित्यर्थः। भूतात्मकादिति। ननु भूतानामात्मत्वे भोक्तृताप्रयोजकसंघातस्यानिरूपणात् प्रत्येकं स्वातन्त्र्येण भोक्तृत्वे योऽहं रूपमद्राक्षं सोऽहं स्पर्शं स्पृशमीति प्रत्यभिज्ञया रूपादीनां विषयाणां साधारणत्वेन वरगोष्ठीन्यायस्यानवतारात् तेषां विषयसन्निधाने कलहप्रसङ्ग इति चेत् कारणत्वाविशिष्ट इति कारणं गुडपिष्टादिरिति च पूर्वग्रन्थपर्यालोचनया भूतानि आत्मा प्रकृतिः यस्येति बहुव्रीह्यङ्गीकारात्। तथा च भूतात्मकात् भूतप्रकृतिकात् देहादेव चैतन्यसम्भव इत्यर्थः। एवं च देहस्यैव चेतनत्वेन तदधिष्ठातृत्वेनापि तदतिरिक्तात्मसिद्धिरित्याह तदिति। तच्चैतन्यं तत् पूर्वसाधितं चैतन्यं यस्य तद्देहमधिष्ठातुमन्येनात्मना किं प्रयोजनम्। अचेतनस्यैव स्वप्रवर्तकाधिष्ठानापेक्षणात् अन्यथाऽनवस्थानादिति भावः।

---

१. कारणम्। ननु घटस्यापि ] ज१, ज३; कारण . . . . घटस्यापि– ज२

**( वृत्तिः )** भूतात्मकत्वेप्यत्र शरीरघटयोर्मध्ये कारणत्वाविशिष्टः कारणत्वेन भूतात्मकत्वेन घटादविशिष्टोऽप्यपरिच्छिन्नोऽपि देहो योगात् तद्भावभावित्वलक्षणसम्बन्धात् चैतन्यसाधकः चित्कारणम्। यस्मादविशिष्टोऽपि कार्यविचित्रतयापरिच्छिन्नोऽपि गुलपिष्टादिः सुरापूपाख्यकार्ययोः कारणं दृश्यते। पूर्वं स्वकारणकारणगुलपिष्टादेरसती पुनरपि हि तत्कार्यरूपापूपादसती मदशक्तिः पीतसुरपुरुषमदहेतुभूता मदशक्तिः स्पन्दननिवर्तनादिस्वकार्यात्मना तत्पुरुषवशीकरणलक्षणधर्मः तदात्मनि तद्गुलपिष्टादिस्वकारणगुणान्वितायां सुरायां समुद्भूता दृश्यते। कार्यद्वाराऽनुमीयते। तस्मात् कारणात् भूतात्मकारणाद्देहादेव[१] चैतन्यसम्भवः। भूततत्कार्यघटाभ्यां सतः[२]चैतन्यस्य तदात्मदेहादव्यतिरिक्ततया समुत्पत्तिरिति निश्चितं फलितमाहुः। तदित्यादि तद्देहादव्यतिरिक्ततया समुत्पन्नचैतन्यमधिष्ठातृ[३]तद्देहप्रवृत्तिकर्तृ हे ईश्वर। स्थूलोऽहमित्यादेः शरीर एवाहंप्रत्ययस्य दृष्टत्वाच्च अहं शरीरीति प्रत्ययस्य राहोः शिर इतिवदौपचारिकत्वात् स्वतः प्रवृत्तिसिद्ध्या त्वदुक्तहेतोरसिद्धेरप्रामाणिकेनान्येन व्यतिरिक्तेनाश्वविषाणतुल्येनात्मना किं कार्यस्यान्यथासिद्धत्वात् कथंचित् सिद्धेऽपि किमपि प्रयोजनं नास्तीति भावः। अतः शरीरविनाशे दृष्टुरपि विनाशात् परलोकिनामभावात् परलोकासिद्धिरित्युक्तं

यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः।
भस्मीभूतस्य शान्तस्य पुनरागमनं कुतः।।इति।

**( व्याख्या )** अत्र परिहारान्तरं वक्तुं एकजातीयोपादानकार्ययोः विरुद्धकार्याजनकत्वं परिहारमाशंक्य यद्दूषितं तदनुक्तोपालम्भ इत्याह ईश्वरः–

**( वृत्तिः )** सिद्धान्तदृशा ईश्वरः प्रतिक्षिपति –

**केनोक्तं भिन्नकार्याणां वैचित्र्यं नेति शक्तिभिः।।६५।।**

**( व्याख्या )** एकजातीयोपादानकानां भिन्नकार्याणां वैचित्र्यं विचित्रकार्यजनकत्वं नेति केनोक्तं? न मया तथोक्तमित्यर्थः। तत् कुत इत्यत आह शक्तिभिरिति। यतो विचित्रशक्तिभिस्तदुपपद्यत इत्यर्थः।

हन्त तर्हि सिद्धं देहस्य चैतन्योपादानत्वमित्यत आह–

**विरुद्धात् कारणात् कार्यं विरुद्धं नोपजायते।**

१. शरीरघटयोर्मध्ये कारणत्वाविशिष्टः कारणत्वेन भूतात्मकत्वेन घटादविशिष्टोऽप्यपरिच्छिन्नोऽपि देहो योगात् तद्भावभावित्वलक्षणसम्बन्धात् चौतन्यसाधकः चित्कारणम्। यस्मादविशिष्टोऽपि कार्यविचित्रतयापरिच्छिन्नोऽपि गुलपिष्टादिः सुरापूपाख्यकार्ययोः कारणं दृश्यते। पूर्वं स्वकारणकारणगुलपिष्टादेरसती पुनरपि हि तत्कार्यरूपापूपादसती मदशक्तिः पीतसुरपुरुषमदहेतुभूता मदशक्तिः स्पन्दननिवर्तनादिस्वकार्यात्मना तत्पुरुषवशीकरणलक्षणधर्मः तदात्मनि तद्गुलपिष्टादि-स्वकारणगुणान्वितायां सुरायां समुद्भूता दृश्यते। कार्यद्वाराऽनुमीयते। तस्मात् कारणात् भूतात्मकारणात् देहादेव ] ज२,ज३; शरीरघटयोर्मध्ये– ज१

२. भूततत्कार्यघटाभ्यां सतः ] ज२, ज३;भूततत्कार्यघटाभ्यामसतः– ज१;

३. तद्देहादव्यतिरिक्ततया समुत्पन्नचौतन्यमधिष्ठातृ ] ज१, ज३;तद्देहादव्यतिरिक्तं चैतन्यमधिष्ठातृ– ज२

**( व्याख्या )** विरुद्धात् उपादेयेन भिन्नजातीयत्वात् कारणात् उपदानात् विरुद्धमुपादानेन भिन्नजातीयं कार्यं नोपजायते। तथा लोके दर्शनादिति भावः।

अस्तु। प्रकृते किमायातमित्यत आह–

**विरुद्धमपि चैतन्यं जडाद्देहात् कथं भवेत्।।६६।।**

**( व्याख्या )** अपिर्भिन्नक्रमः। चैतन्यमपि विरुद्धमुपादानेन देहेनासमानजातीयं जडाद्देहात् जडादित्युपादेयेन देहस्य भिन्नजातीयत्वप्रतिपादनाय। कथं भवेत् न कथमपीत्यर्थः।

**( वृत्तिः )** भिन्नकार्याणां कारणमेकमपि शक्तिभिः कारणगतवैचित्र्यजनकजन्यशक्तिः न वैचित्र्यमिति केनोक्तं केनोक्तं केनेत्यनेन तदुक्तिमतो भ्रान्तत्वसूचनापुरःसरं न सिद्धान्त-शास्त्रोपदेष्ट्रेति सूचितम्। तर्हि त्वद्दृशा किमुच्यत इत्यत आह। विरुद्धात् कारणाज्जलादेः विरुद्धं कार्यमौष्ण्यादिकं नोपजायते। इत्थं किल मदुक्तिः समुत्थेति भावः[१]। चैतन्यमपि जलं प्रत्यौष्ण्यमिव विरुद्धं जडाद्देहात्[२] तद्वत् कथं भवेत्। न कथंचिदपि स्यादित्यर्थः।

**( व्याख्या )** ननूपादानसमानस्वभावत्वमुपादेयद्रव्यस्यैव न तु गुणस्य तस्य विजातीयोपादानकत्वात्। चैतन्यं च गुण एवेत्यस्वरसान्मृतदेहेऽपि चैतन्यमापादयितुं पीठिकामाह–

**( वृत्तिः )** युक्त्यन्तरमुद्धृत्य निराकरोति –

**किन्तु यस्य तु यो धर्मः तन्नाशाद्धर्मनाशनम्।**

**( व्याख्या )** यस्य वस्तुनो यो धर्मः तन्नाशात्तु तस्य धर्मिणो नाशादेव तुशब्द एवकारार्थः। धर्मनाशनं धर्मस्य नाश इत्यर्थः। यथा घटनाशाद्रूपनाश इति भावः।

ननु तत्र घटे पाकेन विरोधिगुणप्रादुर्भावादपि रूपनाशो दृष्टः। तद्वत् प्रकृतेऽपि अस्तु किमुच्यते धर्मनाशादेवेत्याशंक्य तथात्वे प्रकृते दोषमाह–

**विरोधिगुणसद्भावादथ स्यादन्यथा द्विजाः।।६७।।**

**( व्याख्या )** हे द्विजाः। प्रकृते सत्यपि धर्मिणि विरोधिगुणसद्भावात् चैतन्यविरोधिनो गुणस्य जाड्यादेः प्रादुर्भावात् धर्मनाशनं चैतन्यनाशनं स्यात्। अथ भवेदिति तदा अन्यथा स्यात् चेतनस्वभावव्याहतिः स्यात्। एकस्य विरुद्धोभयरूपत्वासम्भवादिति भावः। तथा च जडाजडविभागो न स्यात्।

तर्हि प्रकृते धर्मिनाशादेव धर्मनाशोऽस्त्वित्यत आह–

**देहे सत्यपि चैतन्यं मृते किमपि नेष्यते।**

---

१. भावः ] ज१; ज२ कोशे नास्ति।

२. विरुद्धं जडाद्देहात् ] ज२, ज३; विरुद्धजडाद्देहात्– ज१;

**( व्याख्या )** धर्मिणि देहे सत्यपि मृते चैतन्यं किमिति नेष्यते। त्वयेति शेषः। धर्मनाशलक्षणस्य कारणस्याभावादिति भावः।

**( वृत्तिः )** हे द्विजाः। किंच इतोऽपि यस्य हिमाग्न्यादेः यो धर्मः शीतदाह-प्रकाशादिकः तन्नाशात्तद्धर्मक्षयाद्धर्मिनाशनम् असंशयं दृष्टम्। ननु ताम्रकालिका-दीनामावारकत्वादिलक्षणधर्मक्षयेऽपि न क्षयो दृष्टः। सत्यम्। तदर्थमेतत्। अथ यद्वा विरुद्धगुणयोः परस्परोपमर्दनेनैव स्वात्मलाभात् यथा कालिकाकम्बुकादिषु पुनरावारकत्वनिवृत्त्यादिलक्षणधर्मस्य आवारकत्वाद्युपमर्दनेनैव स्वात्मलाभः। तथा देहेऽप्यचिल्लक्षणगुणोपमर्दनेनैव चिल्लक्षणगुणस्य स्वात्मलाभः कथनीयः। ततः का हानिरिति न वाच्यम्। विरोधिगुणसद्भावात् तच्चिल्लक्षणविरुद्धगुणलाभात् तद्धर्मिदेहोऽन्यथा स्यात्। आवारकत्वनिवृत्तिलक्षणरूपान्तरपरिणतिमान् कालिकाकम्बुकादिरिव सर्वात्मना चिल्लक्षणरूपान्तर-परिणतिमान् भवेत्। न कदाचित् तथा दृश्यते। ननु धर्मनाशाद्धर्मिनाशनेऽस्माकं का क्षतिः नास्ति किं क्षतिरस्तीत्याह। मृते पञ्चतां गते देह तादृशि सत्यपि हिमस्य शीतमिवोक्तं चैतन्यं किमिति नेष्यते। कथं नाभ्युपगम्यते। न च तदानीमचिल्लक्षणगुणाविर्भूत्युपमर्दितं सच्चैतन्यं नोपलभ्यत इति वाच्यम्। तदचिल्लक्षणगुणाविर्भूतेर्जीवावस्थायामपि सत्वात्। ननु मृतशरीरेऽपि प्राणाद्यात्मकस्य वायो रूष्मरूपस्य तेजसोऽप्युपगमात्। जीवावस्थायामिव शरीरारम्भकभूतभूताभावात्। तदा न चेतनत्वमिति नानैकान्तिकत्वं कर्तुं शक्यम्। नैवम्। गतासवोऽपि हि केचन चलत्सन्धयः सोष्माणश्च कियन्तमपि कालमुपलभ्यन्ते। तत्सद्भावेऽपि न चित्सद्भाव इति। ननु परिणाम वैशिष्ट्यात् शवावस्थायामपि सूक्ष्मतरसंवेदनमस्ति तन्न दैहिकपरिणामवैशिष्ट्याच्चितस्तदनुविधायित्वं न जाघटीतीत्यनुपदमेव सयुक्तिकोक्तिर्विनिगम्यते। यदुक्तं च-देहे सति चिद्दृश्यते न ह्यसतीति। तदिदमयुक्तमस्मान् प्रत्यसिद्धेः। तदिदानीं ह्यालोकादिसन्निधौ सत् घटादिवत्तद्देहाभिव्यङ्ग्यतया तत्र चैतन्यं पुरा सदेव[1] सिद्ध्यति न तत्कार्यम्। इत्थं सर्वत्र व्यापकत्वे हि न चात्मनस्तत्र तत्रापि पुरा अभावः सम्भाव्यत इत्यालोकादिना घटादेरिव पुरा सत्त्वं सिद्धमेव। तदेतत्परीक्षा उत्तरत्रापि भविष्यति। ननु कुतोऽस्य घटवदैन्द्रियकानुपलब्धिः तदयुक्तम्। येन रूपेण तत्सिद्धं तेनैव रूपेण स्वसंवेदनात्मना तत्रात्माऽपि सम्भाव्यते। नत्वत्यन्तासिद्धेनेन्द्रियालम्बनेन इन्द्रियादिवदिन्द्रियानुपलभ्यस्वभावत्वात्[2]। अथ प्राक् समत्वमस्य कुतो निश्चितं संशय एव। सत्यम्। बालानां हिताहितस्मरणाविनाभाविना आकुञ्चनप्रसारणादिनानुमातव्यतया जन्मनः पूर्वमपि द्रष्टृसिद्धिः

**( व्याख्या )** ननु तर्हि मृतदेहे चैतन्यमस्त्वित्यत आह- यद्वावेति।

**( वृत्तिः )** ततः प्रत्युत –

---

१. सदेव ] ज२, ज३; तदेव- ज१;

२. इन्द्रियादिवदिन्द्रियानुपलभ्यस्वभावत्वात् ] ज१ ;यावदिन्द्रियानुपलभ्यस्वभावत्वात्-ज२

**यद्भावयदभावाभ्यां चेष्टाचेष्टे भजेत्तनुः।।६८।।**
**तच्चैतन्यमिति प्रोक्तं व्यतिरिक्तं तु देहतः।**

**(व्याख्या)** यस्य चैतन्यस्य भावेन यस्य चाभावेन तनुः यथाक्रमं चेष्टां तदभावं च भवेत्। लिट् सम्भावनायाम्। अन्वयव्यतिरेकाभ्यां चेष्टायां तद्धेतुत्वावधारणादिति भावः। तथा च चेष्टाभावेन लिङ्गेन मृतदेहे चैतन्याभावोऽनुमीयते इत्यर्थः। अत्र यद्भावेत्यंशग्रहणं चेष्टाग्रहणं च चेष्टाव्यतिरेकस्याप्रयोजकत्वशंकानिवृत्त्यर्थम्। इयता प्रबन्धेन प्रतिपादितमर्थमुपसंहरति व्यतिरिक्तं तु देहत इति। तस्मात् चैतन्यं देहत देहधर्मतः व्यतिरिक्तम्। तु शब्दोऽवधारणे। भिन्नमेवेत्यर्थः।

**(वृत्तिः)** तनुर्देहो यद्भावयदभावाभ्यां स्वान्तःकार्यकरणलक्षणव्यञ्जकयोग-वियोगाभ्यां स्वस्मिन् यच्छक्त्यभिव्यक्त्यनभिव्यक्तिभ्यां चेष्टाचेष्टे आकुञ्चन-प्रसारणभ्रमणगमनागमनादितदभावलक्षणे भजेत् वहेत्। तच्चैतन्यमात्मा स्वार्थे ष्यञ्त्विति[१] अयोगान्ययोगव्यवच्छेदेन देहतो व्यतिरिक्तमन्यदिति प्रोक्तम्।

**(व्याख्या)** एवमनुमानेनात्मनो देहभिन्नत्वं प्रसाध्य वक्ष्यमाणप्रत्यभिज्ञाऽर्थापत्तिभ्यां तत् प्रसाधयितुं तयोर्देहैक्येनान्यथासिद्धिं निराकुर्वन्नाह–

**(वृत्तिः)** यद्वह्न्युपचयापचयानुकुर्वदौष्ण्यमिव यौवनस्थाविरभोजनलङ्घनादिहेतुकदेह संबन्ध्युपचयापचयानुकुर्वद्विज्ञानमेव देहात्मकमिति स्वल्पकायानामपि महामतित्वदर्शनेऽपि पठतां तदनुकुर्वत्तद्बौद्धमित्यविन्दतां भवतामभिमतं तदिदमयुक्तमित्याह –

**किं तु बाल्ये च वार्धक्ये यौवने च विभेदतः।।६९।।**
**शरीरस्यानुसन्धानं कथं बाल्ये कृतस्य च।**

**(व्याख्या)** शरीरस्य बाल्ययौवनवार्धक्यावस्थासु परिणामभेदेन भेदतः भेदानुसन्धानं योऽहं बाल्ये पितरावन्वभूवं सोऽहं स्थाविरे प्रणप्तघ्ननुभवामीति बाल्याद्यवस्थात्रयेऽपि अनुसन्धातुरैक्यावगाहिप्रत्यभिज्ञा प्रत्यक्षं शरीरात्मवादे कथम्। न कथमुपपद्यत इत्यर्थः। एवं व्याख्याने ह्युत्तरत्राध्यक्ष बाधित इति अध्यक्षग्रहणमुपपद्यते। अपि च बाल्यानुभूतस्यार्थस्य स्थाविरे स्मरणप्रत्यभिज्ञाद्यनुपपत्तिरपि तत्र प्रमाणम्। अन्यानुभूते अन्यस्य स्मरणादृष्टेः। शरीरस्य चावस्थात्रयेऽपि भेदादित्यत आह बाल्ये कृतस्य च इति।

अत्रापि पूर्वोक्तसर्वस्यापि अनुषङ्गः। तथा च शरीरभेदात् बाल्येऽनुभूतस्यार्थस्य स्थाविरेऽनुसन्धानं स्मरणप्रत्यभिज्ञादिकं कथम्। न कथञ्चित् इत्यर्थः।

अत्रोपपादकासिद्धिमाशंक्याह–

**स तावदनुसंधत्ते प्राग्भुक्ता सेयमङ्गना।।७०।।**
**इति तस्माच्छरीरात्मवादोऽध्यक्षनिराकृतः।**

---

१. ष्यञ्त्विति ] ज३; ष्यन्त्रत्विति–ज१;ष्यत्विति–ज२

**( व्याख्या )** सः अभिलषितवस्तुदर्शनजनितदृढवासनाविशिष्टः स्थाविरः सा प्राग्भुक्तेत्यनुसंधत्ते प्रत्यभिज्ञां जानातीत्यर्थः। तावच्छब्दोऽत्रापि वादद्योतकः। तथा च स्मरणप्रत्यभिज्ञयोः सर्वजनसिद्धत्वात् नापह्नोतुं शक्यत इति भावः। इयता प्रबन्धेनोपपादितं शरीरस्य ज्ञानाश्रयत्वेन प्रसक्तमात्मत्वनिराकरणमुपसंहरति–

तस्माच्छरीरात्मवादोऽध्यक्षनिराकृतः। अत्राध्यक्षपदमुक्तानुमानार्थापत्त्योरपि उप-लक्षणम्।

ननु तर्हि स्थूलोऽहमित्याद्यहंप्रत्ययविषयत्वेन शरीरस्यैवात्मत्वमस्तु इत्यत आह–

**तस्मात् स्थूलोऽहमित्यादि ज्ञेयो राहोः शिरो यथा।।७१।।**

**( व्याख्या )** तस्मात् उक्तयुक्तेरुक्तप्रत्यभिज्ञायामहमर्थस्याप्यवस्थात्रयेऽपि एक्यानुसन्धानस्य समानत्वात् राहोः शिर इतिवत् स्थूलोऽहमित्यहमर्थस्य देहाभेदानुभवः। भेदे भासमाने जायमानत्वात् गौणत्वेन ज्ञेय इत्यर्थः। अत्र राहोः शिरो यथेत्यौपचारिकत्वमात्रे दृष्टान्तः। अत्रादिशब्देन कृशोऽहमित्यादेः ग्रहणम्।

किं च स्फुटं प्रत्यक्षमपि शरीरात्मभेदे प्रमाणमित्याह–

**किं च देहो ममेत्यादिप्रत्ययोऽस्त्येव पुष्कलः।**

**( व्याख्या )** आदिशब्देन श्रुत्यागमादिजनितशरीरात्मभेदप्रत्ययो गृह्यते। पुष्कलः उक्तयुक्त्याद्युपोद्बलितः। अतो विनिगमनाभावात् अस्यैव गौणत्वमस्त्विति न वैपरीत्यशंकावकाश इति भावः। अस्तु बाह्येन्द्रियाण्येवात्मा तेषामहंप्रत्ययविषयत्वात् ज्ञानाश्रयत्वात् शरीरात्मवादोक्तदोषाणामत्राभावाच्चेति लोकायतैकदेशिनः। तथाहि काणोऽहं बधिरोऽहमिति काणत्वादीन्द्रियधर्मसामानाधिकरण्येनाहंत्वमनुभूयते। तथा चान्धादेः चाक्षुषादि-ज्ञानाभावेनान्वयव्यतिरेकाभ्यां तेषां ज्ञानहेतुत्वे आवश्यके अपेक्षितत्वेनोत्पत्तिस्थितिप्रयोजकत्वेना-भ्यर्हितत्वेन च तेषामुपादानत्वमेव कल्प्यते। तथा च तेषां सात्त्विकत्वेन चैतन्योपादानत्वमुपपद्यत इति विरुद्धादित्यादिदूषणं नास्ति। तेषां बाल्ययौवनवार्धक्येषु एकत्वेन योऽहं बाल्ये पितरावन्वभूवं स एवाहं स्थाविरे प्रणप्तघ्ननुभवामीति प्रत्यभिज्ञारूपं प्राग्भुक्ता सेयमङ्गनेति बाल्यानुभूतस्य स्मरणप्रत्यभिज्ञानरूपं चानुसन्धानमुपपद्यते। अतः पूर्ववदेव स्थूलोऽहमित्यादिति प्रत्ययस्य गौणत्वम्। एवं चात्रापि भोक्तृताप्रयोजकसंघातस्यानिरूपणात् अन्धत्वस्य क्वचाज्ञानादर्शनाच्च प्रत्येकमेव भोक्तृत्वम्। रूपादयश्च विषयाः यथान्वयव्यतिरेकाभ्यां चक्षुरादीनां प्रत्येकमसाधारणा एव। न चैवं योऽहमद्राक्षं सोऽहं स्पृशामीति दृष्टिस्पर्शयोरैकाधिकरण्यानुभवविरोधः। एककार्ये विनियुक्तानामन्यकृतस्यापरकृतत्वव्यपदेशवत् उपचारत्वकल्पनात्। अतो वरगोष्ठीन्यायावतारात् न तेषां कलहप्रसङ्ग इति।

मनोबुद्ध्यहंकाराणामन्यतमस्यात्मत्वमित्याहंकारिकादयः आर्हतभेदाः वैशेषिकादयश्च। तथाहि। अहं संकल्पयामि अध्यवस्यामि संरभे इति संकल्पादितद्धर्मसामानाधिकरण्येनाहंत्वम्

अनुभूयते। किं च स्वप्ने अहं गजमुपलभे इत्यनुभवाश्रयोऽनुभूयते। तत्र बाह्येन्द्रियाणामुपरतत्वात् अवश्यकल्प्ये अनुभवोपादाने तदानीं सतां तेषामेवानुभवोपादानत्वं कल्प्यते। तदानीमहमर्थस्य साम्प्रतस्यानुभवात् बाह्येन्द्रियाणां तदानीमसत्वादव्यापृतत्वाद्वा अनात्मत्वम्। एतेषां च सर्वज्ञानकारणत्वेन सर्वानुभवितृत्वात् योऽहमद्राक्षं सोऽहं स्पृशामीत्यनुभवस्य न गौणविषयत्वं कल्प्यमिति। अतः पञ्च बाह्येन्द्रियाणां आत्मत्वे हि रूपादीनां साधारणत्वेन वरगोष्ठीन्यायानवतारात् रूपादिविषयसन्निधाने तेषामहमहमिकया प्रवृत्तानां चक्षुरादीनां कलहप्रसङ्गतादवस्थ्यम्। अत्र भोक्तुरेकत्वात् सात्त्विकाच्च शरीरात्मवादोक्तानुसन्धानात् अनुपपत्तिरपि नास्तीत्याहुः।

अपरे तु तदेकदेशिनः चित्तप्राणयोरन्यतरस्यात्मत्वमाहुः। तथाहि सुखमहमस्वाप्सं न किंचिदवेदिषमिति सुप्तोत्थितस्य ज्ञानं तच्च स्मृतिरूपमेव। इदं च स्वापादिकालीनानुभवं विना न संभवति स्वापादिकालीनानुभवस्य चोपादानापेक्षायामहंकारादीनां चक्षुरादीनां च श्रुत्यागमाद्यनुरोधेन तदानीमसत्वेनाव्यापृतत्वेन वा चित्तप्राणयोश्च तदा श्रुत्यागमादिसिद्धत्वेन तयोरेवानुभवोपादानत्वात् आत्मत्वम्। अत एव च तेषामनात्मत्वम्। एवं चैतेषामुक्तज्ञानान्वयव्यतिरेकौ करणविषयतयापि उपपद्यते। ननु सुप्तोत्थितस्य ज्ञानं स्मृतिरूपं चेत् सर्वमिदमुपपद्यते। तत्तु तात्कालीनसुखस्वापानुमितिरूपमेव ज्ञानमिति चेन्न तदानीमुत्थितस्य सुखस्वापानुमापकलिङ्गाभावात् प्रसन्नेन्द्रियत्वादेरन्यथापि उपपत्तेरित्याहुः।

**( वृत्तिः )** शरीरस्य बालाद्यवस्थासु विभेदतः विशेषेण भिदातः ज्ञानस्य तदनुकुर्वतोऽपि भिदास्तीति बाल्ये कृतस्य यौवनावस्थायां च शब्दात् यौवने कृतस्य वृद्धावस्थायां दृश्यमानमनुसन्धानं स्मरणमनुभवितुः अव्यतिरिक्तस्मर्त्रात्मना[१] विना देवदत्तानुभूतं पुत्रेणेव कथं भवेत्। कथंचिदपि न स्यादित्यर्थः। तदनुसन्धानाभिनयं दर्शयति। यस्मात् स लङ्घित-यौवनदशः तावत् क्रमेण सेयमङ्गना प्राग्भुक्ता मया पुरा समालिङ्गितेत्यनुसन्धत्ते प्रत्यभिजानाति। तस्मादयं शरीरात्मवादः अध्यक्षनिराकृतः तदेतत् प्रत्यभिज्ञानप्रत्यक्षनिरस्तः। तस्मात् प्रत्यक्षनिराकृतत्वात् स्थूलोऽहम् इत्यादिप्रत्ययः राहोः शिर इति यथा तथा ज्ञेयः। शिरोऽन्तरा राहुरनुपलब्धोऽपि यथा राह्वारोपणोक्तिस्तथाऽहमन्तरा स्थूलोऽनुपलब्धोऽपि स स्वसन्नि-विष्टस्वव्यतिरिक्तशरीरवर्तिस्थूलभावस्तस्मिन्नारोप्यते। किंच स्थूलोऽहमित्यादिप्रत्ययविरुद्धेन मम देह इत्यादिविवेकलक्षणः पुष्कलोऽतिप्रसिद्धः प्रत्ययोऽस्त्येव। ततः स्थूलोऽह-मित्यादिरविवेकेनेत्यत्र का विचारणेत्यर्थः। तदनेन भोग्यतयाऽन्तस्पर्शनेन शूलाद्यात्मना बहिश्च मृदुकर्कशादिभेदेन बुद्ध्याध्यवसितस्य शरीरस्यानुसन्धानद्वाराऽनुसन्धातुरात्मनस्तच्छ-रीराकारबुद्धिप्रकाशानुसन्धेयानुसन्धातृरूपम् अनुसन्धानस्वार्थक्रियं शरीराद्भिन्नं परसंवित्तिः शक्तिरित्युक्तम्। वेद्यत्वे स्वात्मनि क्रियाविरोधात्।

स्वप्रत्यग्ररूपस्वानुभूतिलक्षणानुसन्धातरि प्रतिभासमानं सदित्थं स्वसंवित्प्रत्यक्षसिद्धमेव। अत एव लोकायतान् प्रत्यनुमानस्य प्रामाण्यप्रदर्शनार्थमनुमानं प्रवर्तितम्। न तत्

---

१. अव्यतिरिक्तस्मर्त्रात्मना ] ज३; अव्यतिरिक्तसमात्मना-ज१ ;अव्यतिरिक्तस्मर्तात्मना-ज२

स्वसंवेदनप्रत्यक्षसाक्षात्कृतात्मसाधनायेत्यनुमाना-नुमेयत्वे ह्यात्मनः परत्वप्रसङ्ग इत्येतत् कुतर्ककुविकल्पो दूरापास्तः। तदुक्तं-

दृष्टस्य केन संवादो येन तस्यास्ति मानता। इति।

**( व्याख्या )** तदाशंक्य निराकरोति बुध्यादीनामिति-

**( वृत्तिः )** तदित्थं भोग्यत्वसिद्धेः शरीरस्याङ्गुल्यग्रेण स्वाग्रस्पर्शवन्न भोक्तृत्वसिद्धिः। नैयायिकादिभूमिकया बुद्ध्यादिष्वप्यात्मबुद्धिं त्यजन्त्वित्याह –

**बुध्यादीनां न चात्मत्वं यत्कार्यात् सिद्धिरात्मनः।।७२।।**
**तदन्यकार्यहेतुत्वात् तेषां सिद्धिर्यतः स्थिता।**

**( व्याख्या )** बुध्यादीनाम् आदिशब्देन बाह्येन्द्रियमनोऽहंकारप्राणानां ग्रहणम्। तेषामात्मत्ववादो नोपपद्यते। कुत इत्यत आह यत् कार्यादिति। आत्मनो यत् कार्यात् अचेतनदेहादिप्रवर्तनरूपात् पूर्वोक्तात् सिद्धिः। यतो यस्मात् तेषां बुध्यादीनां तदन्यकार्यहेतुत्वात् तस्मात् आत्मकार्यादन्यत् अध्यवसायादि पाशपटले वक्ष्यमाणं कार्यजातं तद्धेतुत्वात् सिद्धिः स्थिता निर्णीता। अतः कार्यभेदात् बुद्ध्यादीनां नात्मैक्यमिति भावः। किंचोक्तेषु आत्मपक्षेषु उत्तरेण पूर्वस्य दूषितत्वात् चित्तप्राणपक्ष एवावशिष्यते। तत्र तुर्यतुर्यातीतयोः तयोः विनाशे उत्थितस्य चित्तप्राणान्तरोत्पादे तस्य पूर्वजागरणकृतकर्मविशेषानुसन्धानानुपपत्तिः तयोर्व्यापारमात्रविलये च मरणानन्तरं पुनर्जातस्य पूर्वजन्मानुभूतेष्टसाधनस्मरणाद्यनुपपत्तिः। तत्रापि तयोरेवानुस्यूतौ प्रलये तयोर्विनाशे पूर्वसर्गकृतकर्मणो विनाशात् कृतहानिः। सर्गाद्यनन्तरमपूर्वतयोत्पन्नयोः तत्कर्मफलभोगे अकृताभ्यागमश्चेति दूषणं द्रष्टव्यम्। इदं च दूषणं सर्वपक्षेष्वपि समानमिति। वस्तुतस्तु तुर्यातीतावस्थायां चित्तप्राणयोः नानुवृत्तिरिति। पूर्वकृतकर्माविशेषानुसन्धातृत्वेनाति रिक्तक्षेत्रज्ञसिद्धिः। तथाहि अवस्था जाग्रदादयः पञ्च नेत्रादिस्थानभेदेन। तदुक्तम्-

जाग्रे नेत्रस्थितं विद्यात् कण्ठे स्वप्नं समादिशेत्।
सुषुप्तिर्हृदयस्थाना नाभिपद्मे तुरीयकम्।

तुर्यातीतं वस्तिपद्मे प्रवृत्तं सर्वदेहिनाम्। इति। तत्र जाग्रदवस्था श्रोत्रादीनां ज्ञानेन्द्रियाणां वागादीनं कर्मेन्द्रियाणां शब्दादिविषयकव्यापाराणां वचनादिव्यापाराणां प्राणादीनां नागादीनां च वायूनां मनोमुखानां पञ्चानां च समाहारात्मिका। ज्ञानेन्द्रियकर्मेन्द्रियविनाकृतानां पूर्वोक्तानामेव समाहारात्मिका स्वप्नावस्था। क्षेत्रज्ञप्राणयोः समाहारात्मिका तुर्यावस्था। क्षेत्रज्ञमात्रस्यावस्थानं तुर्यातीतावस्था। तदुक्तं-

श्रोत्रवाक्छब्दवचननागप्राणमनोमुखैः ।
जाग्रत् स्वप्नश्च शब्दादिपञ्चविंशतिभिः भवेत्।
क्षेत्रज्ञचित्तप्राणैस्तु सुषुप्तिश्चित्तवर्जितम्।

तुर्यं तुर्यातीतके स्यात् क्षेत्रज्ञः सर्ववर्जितः। इति। अत्र क्षेत्रज्ञशब्देन पुरुषत्वमभिधीयते। एतच्चाधोमुखमवस्थापञ्चकम् ऊर्ध्वमुखं त्ववस्थापञ्चकस्वरूपमेवम्। तत्र निर्मलजाग्रदवस्थानाम्

अशुद्धावस्थायां यदा स्वस्योपाधिपरित्यागेन तत्प्रेरकब्रह्मादिकारणपञ्चकत्यागेन च स्वात्मनि ज्ञानानन्दस्वरूपं शिवमेव पश्यति निवृत्तोपाधित्वेन स्वात्मानं च तदा भवति। इयं च हृत्स्थानिका। यदा तूपाधिविस्मरणेन निवृत्तोपाधित्वस्यापरिज्ञानेन स्वरूपेणैव स्वात्मदर्शनं तदा निर्मलस्वप्नावस्था। एषा च कण्ठस्थानिका। यदा च चक्षुषोऽपरिज्ञानेऽपि सूर्यादेः ज्ञेयत्वमात्रेणैव ग्राहकस्य स्वात्मनोऽपरिज्ञानेऽपि परमशिवस्य ज्ञेयत्वमात्रेण दर्शनं तदा निर्मलसुषुप्तिः। इयं च तालुस्थानिका। यदा ज्ञानक्रियोपरत्या परमशिवमात्रदर्शनं तदा निर्मलतुरीयम्। इदं च भ्रूमध्यस्थानकम्। यदा चाखण्डाकारसच्चिदानन्दपरिपूर्णपरमशिवतादात्म्येनैवावस्थानं तदा निर्मलतुर्यातीतम्। इदं च ब्रह्मरन्ध्रस्थानकम्। तदुक्तं–

बाह्यान्तःकरणैरणोः स्वविषयज्ञानं तु जाग्रत्तदा
स्वप्नोऽन्तःकरणस्थवृत्तिविषयज्ञानं सुषुप्तिः परा।
देहेत्विन्द्रियवृत्तिहीनमवचोग्राह्या मतिस्तुर्यकं देहाक्षोपरतौ स्वचिन्मतिरथातीतं शिवत्वोदयः। इति।

इदं च प्रसङ्गात् निरूपितम्। ननु देहादिप्रेरको नित्यश्चेतनोऽङ्गीकर्तव्य इति प्रघट्टकस्य पर्यवसन्नोऽर्थः। स च शिव एवास्तु न तदतिरिक्तः पशुरिति चेन्न। किंचिज्ज्ञत्वसर्वज्ञत्वभोक्तृत्वाभोक्तृत्वबन्धत्व- मुक्तत्वादिभिः तयोर्भेदस्य आवश्यकत्वात्। न च किंचिज्ज्ञत्वादिकमाध्यासिकमिति वाच्यम्। मायावस्तुत्वसाधनेन प्रपञ्चस्य वस्तुत्वसाधने चाध्यासस्य सर्वप्रमाणसंसिद्धं चिद्विविवर्तं कथं जगत्। इत्यादिना निरस्तत्वात्। उक्तं च शिवज्ञानबोधे–

प्रपञ्चशिवयोर्वेत्ता यः स आत्मा तयोः पृथक् इति।

**( वृत्तिः )** बुद्ध्यादीनां न चात्मत्वं ततो यतो यत् कार्यात् यत्स्वपरग्राहकत्वलक्षणकार्या- दात्मनः सिद्धिः स्थिता। तदन्यकार्य–हेतुत्वात् तत् स्वपरग्राहकत्वलक्षणकार्यव्यतिरिक्त- ग्राह्याध्यवसायादिदर्शनीयकार्यहेतुत्वात् तेषां बुद्ध्यादीनां सिद्धिः स्थिता निश्चिता।

**( व्याख्या )** ननु लाघवात् बुध्यादीनामेव देहप्रवर्तनादावपि हेतुत्वमास्तिवित्यत आह–

**अत्रापि तेषां हेतुत्वे विश्वमप्येकमिष्यताम्।।७३।।**

**( व्याख्या )** अत्रापि आत्मा साधारणकार्यत्वेन प्रसिद्धदेहप्रवर्तनादावपि तेषामेव बुद्ध्यादीनां हेतुत्वे विश्वे कालाद्यवनिपर्यन्तमपि जगदेकमिष्यतां एकं कलाद्यवन्यन्तं तत्त्वमेकमिष्यताम्। उक्तन्यायस्य तुल्यत्वात्। यदि च तत्र क्रियाशक्तेः क्रियाद्यंशाभिव्यक्तिरूपासाधारणव्यापारभेदात् कलादितत्त्वभेदः तदा प्रकृतेऽपि अचेतनप्रवर्तनादिव्यापारभेदादात्मनश्च भेदः सिध्यतीति भावः। व्यापारभेदात् तत्त्वभेदश्च सर्ववादिसम्मतः। यथा परेषामपि दिक्कालयोः परत्वापरत्वभेदेन भेदः। अन्यथा तयोरपि ऐक्यापत्तेः।

**( वृत्तिः )** अत्रापि स्वपरग्राहकत्वलक्षणकार्येऽपि तेषां हेतुत्वे कार्यभेदेन अनेकतत्त्वपरिकल्पना भग्नेति समस्तकार्यनिर्वहणमेकेनालमिति विचित्रस्वस्वकार्यान्यथानुपपत्त्या सिद्धं विश्वमपि

विचित्ररूपं कलादिक्षित्यन्तं वक्ष्यमाणमपि जगदेकमिष्यताम्। तदित्थं कर्तृकार्यस्यान्यथासिद्धत्वादिन्द्रियचैतनिका मनश्चैतनिका प्रमाणचैतनिकाश्चार्वाकभेदतद्दृष्ट्यनुवासिता दर्पणशस्त्रादिवन्दियषट्कस्य करणत्वसिद्धेः। कर्त्रा विना न प्रवृत्तिरिति वायोरचेतनत्वेनस्वतः प्रवृत्तिः पतिपटले[१] निरस्तेति अहंकारचैतनिकाहंकारग्राहकाध्यवसायकार्यान्तरात् सिद्ध्यतीति वक्ष्यमाणत्वात् बौद्धज्ञानचैतनिका बौद्धाः स्वसंवेदनस्थिररूपस्यात्मनः प्रकाशनात्तस्य पुनः पूर्वानुभूतस्मृत्यन्यथानुपपत्तिसिद्धिरस्तीति पादार्थिकास्तु निर्बुद्ध्यादिगुणतया सहजचित्गुणतयोत्तरत्रात्मसमुत्थर्तव्य इति परिणतवेदान्तिनः पाञ्चरात्राः। क्षपणकाश्चोत्तरत्रात्म व्यापकः समर्थितव्य इति। सांख्यास्त्वात्मनः समलपक्वअकर्तृत्वे स्त इति। जैमिनीयाः पुरुषत्वमौपाधिकमुत्तरत्र यथा भवति तथाऽऽविष्क्रियत इति पुनरत्र निरस्तप्राया इति।

**( व्याख्या )** इयता प्रबन्धेन देहादिव्यतिरिक्त आत्मा सिद्धः। इदानीमात्मगतबहुत्वमाक्षिपन्तस्तत्र प्रथममनुक्तोपालम्भशंकां निराकुर्वन्ति ऋषयः –

**( वृत्तिः )** ऋषयः कुतर्ककुविकल्पकुदृष्टित्वादैकात्मवादं ख्यातुमनुबध्नन्ति –

**आत्मानो बहवः प्रोक्ता बहुत्वं केन गम्यते।**

**( व्याख्या )** आत्मानः पशवः बहवः प्रोक्ताः। पशवः त्रिविधा ज्ञेया इत्यादिना बहुत्वमात्मानन्त्यं केन गम्यते। न केनापि प्रमाणेनेत्यर्थः।

अत एव सम्भावितं प्रमाणमाशंक्य निराकरोति–

**नाध्यक्षगम्यं तत्तावत् नानुमाविषयं ततः।।७४।।**
**भेदस्य मेयधर्मत्वान्माता मेयः कथं भवेत्।**

**( व्याख्या )** तदात्मनानात्वं तावत् अध्यक्षगम्यं न। अहं यज्ञदत्तो देवदत्ताद्भिन्न इति। नापि अनुमानविषयं छान्दसं नपुंसकत्वं द्रष्टव्यम्। तत्र हेतुमाह भेदस्य नानात्वस्य मेयधर्मत्वात् मेयधर्मत्वस्य आवश्यवाच्यत्वात्। ततः किं ? तत्राह माता मेयः कथं भवेत्। आत्मगतनानात्वस्य प्रमाणविषयत्वं वदता आत्मगतनानात्वग्रहणमात्मग्रहणं विना न सम्भवतीति तस्य मेयत्वं वाच्यम्। तथा च तद्ग्रहणे आत्मनोऽपि प्रमाणविषयतया कर्मत्वं वाच्यं तच्च न सम्भवति। प्रमातृप्रमेयसांकर्यप्रसङ्गेन प्रमातुः प्रमेयत्वासम्भवादिति भावः। अनुमित्यविषयत्वे हेत्वन्तरमप्याह तत इति। ततश्चेत्यर्थः। प्रत्यक्षाविषयत्वेन तन्मूलकव्याप्तिग्रहणासम्भवात् नानुमितिविषयमित्यर्थः। यद्वा न केवलं भेदे प्रमाणाभावः किन्तु विपरीते तदस्तीत्याह भेदस्य मेयधर्मत्वात् माता मेयः कथं भवेत्। इति।

भेदस्यानात्मवृत्तित्वं साध्यं नाध्यक्षगम्यमित्यत्र च हेतुः परमात्मनो प्रत्यक्षत्वादिति बहुभिरेवं द्रष्टव्यः। न चाप्रयोजकत्वं उक्तयुक्त्यात्मनो मेयत्वेन तद्गतभेदस्य ग्रहणासम्भवेन प्रामाणिकत्वात् तस्येति भावः।

---

१. पतिपटले ] ज३; पटले–ज१ ;प्रतिपटले–ज२

**( वृत्तिः )** आत्मानः सकलाकलभेदेन बहवः त्वया प्रोक्ताः आत्मनः स्वसंवेदनप्रत्यक्षसिद्धत्वं यद्यस्त्यपि तत् बहुत्वं केन प्रमाणेन गम्यते। तावत् क्रमतस्तन्नाध्यक्षगम्यं न प्रत्यक्षगोचरं स्वसंवेदने स्वेतरासंवेदनासम्भवात्। ततः व्याप्तेः प्रत्यक्षपूर्वत्वात् नानुमाविषयं न ह्यनुमानगोचरम्। अथ तद्गम्यं वस्तुभेदस्य परस्परं विसदृशलक्षणस्य मेयधर्मत्वात् मातृमानाभ्यां विभिन्नमेयवस्तुगुणत्वात्[१] मातरि तद्भेदसिद्ध्यर्थं मेयत्वमसंशयं वक्तव्यमिति स माता स्वात्मनि क्रियाविरोधात् मेयः कथं भवेत्। न कथंचिदपि स्यादिति भावः। सांकर्यानवस्थाप्रसङ्गाच्च। तदुक्तं–प्रकाशते संविदेका तदन्यस्तु प्रकाश्यते। प्रकाश्यं च भवेत् कर्म तच्च कर्त्रा विना कथम् इति। दर्शितं च चार्वाकमतोद्देशे।

**( व्याख्या )** अर्थापत्तिमाशंक्य निराकरोति–

**( वृत्तिः )** ननु यद्येवं न केवलं मातर्यभेदः सिद्ध्यति। किन्तु भेदस्य[२] मेयधर्मत्वादिति युष्मत्प्रयुक्तहेतोरपि मातृवन्मेयव्यतिरिक्तत्वतुल्यत्वात् भेदगुणकत्ववैधुर्ये मातृमानयोः सांकर्यं स्यादिति कथं मातुर्भिदातस्तन्मानसाधनं ततस्तन्मातुर्भिदातस्तन्मानसाधनान्यथानुपपत्त्या भेदः सिध्यति आत्मनि मातृमाननिष्ठत्वं मेयतो भेदस्य मायापटले मायापरीक्षातः सिद्धमुपरिष्टाच्च सिद्ध्यति च। तन्नेत्याहुः[३]।

**न हेतुसाधनाभावोऽप्यात्मभेदोपपादकः।।७५।।**

**( व्याख्या )** हेतुः पूर्वसूत्रे अनुमानत्वेनाभिमतः[४] स च सुखदुःखादिव्यवस्था तस्यात्मभेदं विना साधनाभावः साधनान्तरादनुपपत्तिः। सोऽपि आत्मभेदोपपादको न भवतीत्यर्थः[५]।

तत्र स्वरूपतो भेदः साध्यते उत यथाकथंचित्। द्वितीये औपाधिकभेदेन सिद्धसाधनमिति हृदि निधायाद्येऽन्यथोपपत्तिमाह–

**सोपाधिकात्मधर्मस्य भेदात् सोपाधिकान्तरे।**

**( व्याख्या )** एकस्यैवात्मनः तत्तद्देहान्तरादयो बहवः उपाधयः सुखदुःखादयश्च सोपाधिकधर्माः तथा च सोपाधिकात्मधर्मस्य उपाध्यन्तरदेहादियुक्तात्मधर्मस्य सुखादेः सोपाधिकान्तरे देहान्तररूपोपाधियुक्ते अत एवान्तरे भिन्ने भेदात् भेदादिभावसम्भवात्[६] तद्विरुद्धधर्मसम्भवाच्चेत्यर्थः।

---

१. अथ तद्गम्यं वस्तुभेदस्य परस्परं विसदृशलक्षणस्य मेयधर्मत्वात् मातृमानाभ्यां विभिन्नमेयवस्तु-गुणत्वात् ] ज१; . . . . वस्तुगुणत्वात्–ज२

२. तच्च कर्त्रा विना कथम् द्य इति। दर्शितं च चार्वाकमतोद्देशे। ननु यद्येवं न केवलं मातर्यभेदः सिद्ध्यति। किन्तु भेदस्य ] ज१; . . . . भेदस्य–ज२

३. मातृमाननिष्ठत्वं मेयतो भेदस्य मायापटले मायापरीक्षातः सिद्धमुपरिष्टाच्च सिद्ध्यति च तन्नेत्याहुः] ज१; . . . . यदाहुः–ज२

४. पूर्वसूत्रे अनुमानत्वेनाभिमतः]क१; पूर्वोक्तात्मभेदानुमापकत्वेनाभिमतः–मु

५. भवतीत्यर्थः]क१; सम्भवतीत्यर्थः–मु

६. भेदादिभावसम्भवात्]–क१; भेदादभावसम्भवात्–मु

**( वृत्तिः )** हेतुसाधनभावोऽपि मातुर्भेदतया मानसाधनान्यथानुपपत्तिरपि नात्मभेदोपपादकः। न हि स्वाभाविकात्मभेदसाधनं तर्हि तदनुपपत्तिः किं साधने पर्यवस्यतीत्यत आहुः।

सोपाधिकात्मधर्मस्य शरीराद्युपाध्युपहितात्मतदुपाधिकृतसुखादिधर्मस्य[1] तस्मिन्नात्मन्येव सोपाधिकान्तरे शरीरान्तराद्युपाध्युपहिते सति भेदात् तदौपाधिकात्मभेदसाधनोपक्षीणेति भावः।

तमेव दृष्टान्तेनोपपादयति–

**( वृत्तिः )** तदेवोदाहरन्ति –

**यथैकस्मिन् घटाकाशे रजोधूदिभिर्युते।।७६।।**
**न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः।**

**( व्याख्या )** यथा आकाशस्य स्वरूपतः एकत्वेऽपि घटकलशाद्युपाधिभेदेन भिन्नत्वेनैकस्मिन् घटाकाशे रजोधूमादिभिः युतेऽपि सर्वेऽपि घटान्तरोदञ्चनाद्यवच्छिन्ना आकाशा अपि न संप्रयुज्यन्ते न तदा नियमेन रजोधूमादिभिर्युता भवन्ति। असंप्रयुक्तग्रहणं विपरीतधर्मयुक्तत्वस्यापि उपलक्षणम्। तद्वदेकस्मिन् सुखादिभिः युते न सर्वेऽपि जीवाः सुखादिभिः युता अवश्यं भवितुमर्हन्तीत्यर्थः। अनेन तदभिमतानुमानस्यापि सामान्यव्याप्तौ घटाकाशादिषु व्यभिचारोऽपि सूचितः।

उपसंहरति–

**तस्मादेकात्मभावेऽस्मिन् परिहारोऽभिधीयताम्।।७७।।**

**( व्याख्या )** तस्मादात्मभेदे प्रमाणाभावात् एकात्मभावे प्रसक्ते इति शेषः।

**( वृत्तिः )** यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते।

तदन्ये सर्वे कलशोदञ्चनघटमठाकाशजलाद्युपाध्यन्तरोपहितास्तत्रस्थरजोधूमादिभिर्न संप्रयुज्यते। तद्वदुपाध्युपहितभिदाकाशवत्[2] एकस्मिन् शरीरोपाध्युपहितजीवे सुखादिभिर्युते सति शरीरान्तरदुःखसुखान्तराद्युपाध्युपहिता जीवान्तरास्तत्रस्थसुखादिभिर्न युज्यन्त इति परमात्मैकोपि सन् तत्तद्विविध[3] मनोलक्षणोपाध्युपहितभिदाकस्वभावान्तरानुविधायि यथावदवगतोभ्युदयाय भवन्ति। मनसां हि[4] संसारधर्मसुखदुःखादिभिर्योगः स तु हि सूर्य इवाम्भःप्रतिबिम्बभेदोपाधिभिरभिन्नोऽपि भिन्न इव प्रतिभाति। ततस्तत्र हि बन्धमोक्षभिदादिकं

१. तदनुपपत्तिः किं साधने पर्यवस्यतीत्यत आहुः। सोपाधिकात्मधर्मस्य शरीराद्युपाध्युपहितात्मतदुपाधिकृतसुखादिधर्मस्य ] ज१; तदनुप . . . . सुखादिधर्मस्य–ज२

२. तद्वदुपाध्युपहितभिदाकाशवत् ] ज२, ज३; तद्वदुपाध्युपहितभिदाकाराकाशवत्–ज१;

३. शरीरान्तरदुःखसुखान्तराद्युपाध्युपहिता जीवान्तरास्तत्रस्थसुखादिभिर्न युज्यन्त इति परमात्मैकोपि सन् तत्तद्विविध० ] ज३; शरीरान्तरदुःखसुखान्तराद्युपाध्युपहिता जीवान्तरास्तत्रस्थसुखादिभिर्न युज्यत० . . . . द्विविध०–ज१; शरीरान्तरसुखदुःखा . . . . तद्विविध०–ज२

४. मनसां हि ] ज२,ज३; ; मनसां–ज१

वस्तुतोऽस्तीति न व्यवह्रियते। ततश्च द्वैतप्रतिभासस्य द्विचन्द्रज्ञानवत्[1] भ्रान्तत्वं सुसिद्धमेव। तथा चाह तत्र भगवान् भर्तृहरिः–

यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः।
संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते।।
तथेदममृतं ब्रह्म निर्विकारमविद्यया।
कलुषितत्वमिवापन्नं भेदरूपे प्रवर्तते।। इति।

तस्मात्तदेव तस्मिन् वेदान्तविदभिमतेऽस्मिन्नेकात्मभावे परमानन्दाद्यनेकतदागम-गीतगुणस्वरूपे परमात्मैकसिद्धौ[2] परिहारो निरासोऽभिधीयतां क्रियताम्।

**( व्याख्या )** अत्र विरुद्धधर्माध्यासेनात्मबहुत्वं साधयन् पूर्वसूचितसुखादिवैचित्र्यस्य मानत्वसम्भवेऽपि विषयव्याप्त्यर्थं विरुद्धधर्मान्तरेण तत् साधयति ईश्वरः।

**( वृत्तिः )** ईश्वरस्तन्निरासरूपकथनं स्ववदनात् समुत्थापयति –

**आत्मानो बहवो जन्ममरणादिविभेदतः।**

**( व्याख्या )** जन्ममरणादयो जन्ममरणसुखदुःखादयः विभेदाः एकस्मिन् युगपत् विरुद्धाः ये ते जन्ममरणादिविभेदाः तत इत्यर्थः। तथा चेत्थमनुमानप्रयोगः। इदानीं जायमानो देवदत्तः इदानीं म्रियमाणयज्ञदत्तभिन्नः तन्निष्ठनाशविरुद्धजन्मत्वादिति। ततो न दृष्टान्तासम्भवादिदोषः श्रुतिः।

उदाहरणोपनयनिगमनान्याह। अथ वाऽप्रयोजकत्वं वाऽऽशंक्याह–

**जन्मनाशादयो धर्मा दृश्यन्ते भिन्नवस्तुषु।।७८।।**
**ततस्तु जन्मनाशाद्या आत्मनो भेदकाः स्थिताः।**

**( व्याख्या )** भिन्नवस्तुष्वेव युगपत् दृश्यन्ते नैकस्मिन् ततो भिन्नवस्तुष्वेव दृष्टत्वादित्यर्थः। स्थिताः निश्चिताः।

**( वृत्तिः )** आत्मनो बहुवचनोक्तिसाध्यफलं न व्यभिचरति। साधनमिति[3] कृत्वोक्ता बहवः। प्रतिज्ञा जन्ममरणादिविभेदतः।

---

१. ततस्तत्र हि बन्धमोक्षभिदादिकं वस्तुतोऽस्तीति न व्यवह्रियते। ततश्च द्वैतप्रतिभासस्य द्विचन्द्र-ज्ञानवत् ] ज१,ज३; ततस्तत्र . . . . वत्–ज२

२. तस्मात्तदेव तस्मिन् वेदान्तविदभिमतेऽस्मिन्नेकात्मभावे परमानन्दाद्यनेकतदागमगीतगुणस्वरूपे परमात्मैकसिद्धौ ] ज१, ज३; तस्मात्तदेतदात्मैकसिद्धौ–ज२

३. ततस्तु जन्मनाशाद्या आत्मनो भेदकाः स्थिताः।
आत्मनो बहुवचनोक्तिसाध्यफलं न व्यभिचरति। साधनमिति] ज१;ततस्तु जन्मनाश-निधनमिति–ज२

आदिशब्देन सुखदुःखेच्छादिकं गृह्यते। हेतुः भिन्नवस्तुषु जन्मनाशादयो दृश्यन्ते। यथा देहेन्द्रियादिष्वित्यध्याहृत्य दृष्टान्तोक्तिः। तथा चैतत् इत्युपनयमध्याहृत्य तत इत्यनुषज्य श्लोकार्धार्थः सुकरत्वात् सुकर्तव्यस्तन्निगमनम्।

**( व्याख्या )** चैतन्यनित्यत्वविरोधेन उक्तहेतोः स्वरूपासिद्धिमाशंक्य निराकरोति–

**( वृत्तिः )** दृष्टान्तीकृतदेहेन्द्रियादिषु दृश्यन्ते[1] जन्मनाशादयो न तदन्येष्वित्याशंक्य सहचैतन्यदर्शनात्। तदयुक्तमित्यत आह –

**न देहस्यैव जन्माद्याः देहाद्यैः सह चात्मनाम्।।७९।।**

**( व्याख्या )** एवकारेण आत्मनो जन्माद्या व्यावर्तन्ते तथा च देहस्यैव जन्माद्या नात्मन इत्येतत् न सम्भवतीत्यर्थः। तस्य स्वरूपतो जन्माभेवेऽपि देहविशिष्टस्य आत्मनो यथाप्रतीति जन्मास्तीत्याह देहाद्यैः सह चात्मनाम्। अत्राद्यशब्देन इन्द्रियादीनां ग्रहणम्।

किं च देहादेरेव जन्मादिकमिति वदन् वादी प्रष्टव्यः किं देहादिजन्मकाले चैतन्यमेव नास्ति। उत तस्य न जन्म। आद्ये बाधकमाह–

**देहादेर्यदि जन्मादि न स्यात् चैतन्यदर्शनम्।**
**तदहर्जातबालानामपि चैतन्यमिष्यते।।८०।।**

तत्रेष्टापत्तिमाशंक्याह जनिमात्रयुक्तबालानामपीत्यर्थः। जननान्तरक्षण एव चैतन्यं दृश्यत इत्यर्थः। अन्यथा जातस्य बालस्य स्वेष्टसाधनताज्ञानसाध्यस्तन्यपानादौ प्रवृत्तिः न स्यात्।

द्वितीय आह–

**चैतन्येनापि युक्तः सन् देहादिरुपजायते।**

देहादिश्चैतन्येनापि युक्तः सन् चैतन्येन सहैव जायते। विशिष्टचेतनोऽयं जात इति विशिष्टोत्पत्त्यनुभवात् आत्मनो जातकर्मादिविधानाच्चेति भावः।

उपसंहरति–

**जन्मादिभेदवन्तोऽतो देहाश्चिद्भेदसाधकाः।।८१।।**

**( व्याख्या )** अतः प्रमाणवत्वात् देहा देहवन्त आत्मानः मत्वर्थीयाच्प्रत्ययान्तो देहशब्दः। जन्मादयो भेदाः विरुद्धधर्माः तद्वन्तः अतश्चिद्भेदसाधका इत्यर्थः।

**( वृत्तिः )** सुबोध्यः सूत्रार्थः।

**( व्याख्या )** नन्वेवमप्यात्मन उत्पत्तिः न सम्भवति कृतहानाकृताभ्यागमप्रसङ्गेन तन्नित्यत्वस्य आवश्यवक्तव्यत्वादिति शंकन्ते–

**( वृत्तिः )** पराशयमाशंक्य निराकरोति[2] –

१. दृष्टान्तीकृतदेहेन्द्रियादिषु दृश्यन्ते ] ज१; . . . . न्ते–ज२

२. जन्मादिभेदवन्तोऽतो देहाश्चिद्भेदसाधकाः।
सुबोध्यः सूत्रार्थः। पराशयमाशंक्य निराकरोति ] ज१; ज२ कोशे नास्ति।

**चैतन्यस्येह नित्यस्य कथं जन्मेति चेन्मतिः।**

**( व्याख्या )** चैतन्यस्य आत्मरूपस्य नित्यस्योक्तयुक्तेरिति भावः। यद्यपि शिष्टोत्पत्त्यङ्गीकारेऽपि स्वरूपेण उत्पत्त्यनङ्गीकारात् नोक्तदोषप्रसङ्गः।

तथापि कैमुतिकन्यायेनाऽपि नित्यत्वं साधयति–

**अत्यल्पमिदमेते च नित्या देहेन्द्रिया यतः।।८२।।**

**( व्याख्या )** स्वरूपेणोत्पत्तिरहितस्य विशिष्टोत्पत्त्यङ्गीकारमात्रेण यदनित्यत्वमाशंकितमिदमत्यल्पं यतः स्वरूपेण उत्पत्तिमन्त एते देहेन्द्रियाश्च नित्याः। छान्दसः पुंल्लिङ्गनिर्देशः।

**( वृत्तिः )** इदं मननमत्यल्पमिति स्थूलविषयमिति भावः। ततो नित्यदेहेन्द्रियादीनामिव जन्मात्मनामिति भावः। सुलभः श्लोकार्थः।

**( व्याख्या )** ननु देहेन्द्रियादीनां कथं नित्यत्वं पूर्वमविद्यमानानां स्वोपादाने उत्पत्तिदर्शनात् उत्तरकालं च अनुपलम्भेन स्वरूपेण नाशाच्चेत्यत आह–

**( वृत्तिः )** अथ कथं जन्ममरणम् अनुगच्छतां[1] नित्यत्वं नास्तीति वा कुतः। सदा किल सत्वस्यैव नित्यत्वात् सदासत्त्वं वा तथाविधशरीरादेः कुत इत्याशंकायां तत्सिद्ध्यर्थं[2] पुनः सत्कार्यवादिनां चत्वारः पक्षाः। केचिच्छक्तिसमाहारात्मकं कारणं शक्तय एव व्यक्तिभूताः कार्यव्यपदेशं भजन्त्य इति भाषन्ते। यदाहुः –

शक्तिमात्रसमूहस्य भावस्य परिणामतः।
कदाचिद्व्यज्यते काचिच्छक्तिः काचित् प्रलीयते।। इति।

तदपरे त्वभिव्यक्तिभावानां न रूपान्तरपरावृत्तिः। अपितु उपलभ्यमानतैव सैव जन्म कथ्यत इत्याहुः[3]। तदितरे पुनः सन्निवेशविशेषमात्रं कारणस्य कार्यं हेम्नः कटककेयूरादिवदिति कथयन्ति। तदन्ये क्रमविचित्रस्वभावत्वात् भावाः क्रमेणानन्तमवस्थाविशेषमनुभवन्तो जन्मादिव्यपदेशं भजन्तीत्यभ्युपगतवन्तः।

तदेतच्चतुष्पक्षेषु समनयोक्तिं संदर्शयति –

**नासतो विद्यते भावो नाभावो विद्यते सतः।**

**( व्याख्या )** असतो वासनारूपेणापि अविद्यमानस्य भावः उत्पत्तिः न विद्यते नोपपद्यत इत्यर्थः। सतश्चाभावः निरन्वयध्वंसः न विद्यते। असतः शशविषाणादेः सतोऽपि आत्मनः उत्पत्तिविनाशयोः अदर्शनादिति भावः। अतः सदेवकार्यमुत्पद्यत इति। तदुक्तं सांख्यैः–

---

१. अनुगच्छताम् ] ज२,ज३; आगच्छतां–ज१;

२. नित्यत्वं नास्तीति वा कुतः। सदा किल सत्वस्यैव नित्यत्वात् सदासत्त्वं वा तथाविधशरीरादेः कुत इत्याशंकायां तत्सिद्ध्यर्थं ] ज१; नित्यत्वम् भ . . . .न्तःसिद्ध्यर्थं–ज२

३. तदपरे त्वभिव्यक्तिभावानां न रूपान्तरपरावृत्तिः। अपितु उपलभ्यमानतैव सैव जन्म कथ्यत इत्याहुः ] ज१;त . . . . हुः–ज२

असदकरणात् उपादानग्रहणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्। इति। अस्यार्थः। असतः शशशृङ्गादेः उत्पत्त्यसम्भवात् उत्पत्तेः पूर्वं कार्याणां सत्त्वमेव स्वीकर्तव्यम्। अन्यथा शशशृङ्गादेरिव मृदादिषु घटाद्युत्पत्तिप्रसङ्गात्। न च वाच्यम् अत्यन्तासत्त्वस्यैवानुत्पत्तिप्रयोजकत्वेन घटादीनां तदभावात् उत्पत्तिः भविष्यतीति। लाघवात् असत्त्वस्यैव अनुत्पत्तिप्रयोजकत्वात् नत्वत्यन्तासत्त्वस्य गौरवात्। न च वाच्यमुत्पत्तेः पूर्वमपि कार्याणां सत्वे कारकव्यापारवैयर्थ्यमिति। तदभिव्यक्त्यर्थत्वात् कारकव्यापारस्य। यथा कूपादौ खननादिव्यापारो जलाभिव्यक्त्यर्थः। न चैवं कूपादौ जलादिकं खननव्यापारादभिव्यक्तमितिवत् मृदादिषु घटादिकमभिव्यक्तमिति प्रतीतिः स्यात् न तूत्पन्नमिति। अन्यथा कूपादिषु खननव्यापारात् जलादिकमुत्पन्नमिति प्रतीतिः किं न स्यात् उत्पत्तेः पूर्वमपि कार्यसत्त्वस्योभयत्रापि तुल्यत्वादिति चेत् न। यत्र स्थूलरूपेण पूर्वं विद्यमानस्य पश्चादभिव्यक्तिः तत्र व्यक्तमिति प्रतीतिः। यत्र सूक्ष्मरूपेण पूर्वं विद्यमानस्य पश्चात् स्थूलरूपेणाभिव्यक्तिः तत्रोत्पन्नमिति प्रतीतिः इति व्यवस्थायाः संभवात्। यद्वा यत्र कारणावस्थाव्यतिरेकेण द्रव्यान्तरेण प्रतिबन्धः तत्राभिव्यक्तमिति प्रतीतिः यत्र तु कारणावस्थाया एव प्रतिबन्धकत्वं तत्रोत्पन्नमिति प्रतीतिः। तथाहि कूपादौ जलावस्थाव्यतिरेकेण पार्थिवद्रव्यान्तरस्य प्रतिबन्धकत्वात् तत्राभिव्यक्तमिति व्यवह्रियते। अन्यत्र घटादिस्थलेषु मृदाद्यवस्थाया एव प्रतिबन्धकत्वकल्पनात् घटादिक-मुत्पन्नमिति व्यवह्रियते। अत एवेदमपि चोद्यं परास्तं यदि कुलालादिव्यापारात् पूर्वमपि घटादीनां सत्त्वं स्वीक्रियते तदा उपलम्भप्रसङ्ग इति मृदाद्यवस्थाया एव प्रतिबन्धकत्वस्वीकारात्।

ननु कूपादिषु जलादिसत्त्वस्य प्रमाणप्रमितत्वेन तदनुपलब्धिप्रयोजकतया द्रव्यान्तरं प्रतिबन्धकं कल्प्यते। इह तु तादृशप्रमाणाभावेन मघ्दाद्यवस्थायाः प्रतिबन्धकत्वकल्पनमेव न युज्यते। तदसत्त्वेनापि तदनुपलब्धेरुपपत्तेरिति चेन्न घटः मृत्पिण्डे पूर्वमपि सन् तत्रोत्पद्यमानत्वाद्यो यत्र असन् स तत्र नोत्पद्यते यथा सिक्तायां तैलं शशमस्तके शृङ्गं वेति प्रमाणेन घटादिसत्त्वस्य पूर्वमपि आवश्यकत्वेन तदनुपलब्धिप्रयोजकतया मृदाद्यवस्थाया एव प्रतिबन्धकत्वकल्पनात्। न च वाच्यं सत्कार्यवादे अभिव्यक्तेरपि पूर्वं विद्यमानत्वेन कारकव्यापारवैयर्थ्यमिति। तस्या अपि सूक्ष्मरूपेण विद्यमानायाः स्थूलरूपेणाभिव्यक्त्यर्थं कारकव्यापारस्यावश्यकत्वात्। न चैवमनवस्थेति वाच्यम्। उत्पत्तावपि तुल्यत्वात्। तथाहि घटाद्युत्पत्तिरपि यदि पूर्वं सती तदा कारकव्यापारवैयर्थ्यम् अथासती तदा उत्पत्तेरपि उत्पत्यन्तरमावश्यकमित्यनवस्था। अथैतद्दोषपरिजिहीर्षया उत्पत्तेरेव स्वपरनिर्वाहकत्वं कल्प्यते तदा प्रकृतेऽपि तुल्यम्। तदुक्तं श्रीमन्मृगेन्द्रे –

तद्व्यक्तिर्जननं नाम तत्कारकसमाश्रयात्[1]।
तेन तन्तुगताकारं पटाकारावरोधकम्।

---

१. तत्कारकसमाश्रयात्] मु तत्कारणसमाश्रयात्-क१;

वेमादिनाऽपनीयाथ पटव्यक्तिः प्रकाश्यते।
यथा घटादिगूढस्य[1] घटादेस्तद्ब्युदासतः।

नासतः क्रियते व्यक्तिः कलादेर्ग्रन्थितस्तदा। इति। उपादानग्रहणादित्यस्यापि अयमर्थः। उपादानं कारणं गृह्यते इति ग्रहणं संबन्धः कार्यस्य कारणेन संबन्धात् उत्पत्तेः पूर्वं कार्यसत्त्वमावश्यकमिति। न च वाच्यमसंबद्धस्यैव कार्यस्य कारणादुत्पत्तिरस्त्विति। तथात्वेऽतिप्रसङ्गात् सर्वस्मादपि कारणात् सर्वं किमिति नोत्पद्यते। तदुक्तं सांख्यैः–

असत्त्वान्नास्ति संबन्धः कारणैः सत्त्वसङ्गिभिः।

असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः। इति। नन्वसंबद्धस्यैव जनकत्वेऽपि न सर्वः सर्वं जनयति। अपितु शक्तमेव शक्तं जनयतीति चेन्न। शक्तेरपि कार्यसंबन्धितया तत्प्रयोजकस्य आवश्यवाच्यत्वात्। अन्यथा पूर्वोक्तदोषानुवृत्तिप्रसङ्गात्। तदुक्तं श्रीमन्मृगेन्द्रेऽपि–

तदाधाराणि कार्याणि शक्तिरूपाणि संहृतौ।
विवृतौ व्यक्तिरूपाणि व्याप्रियन्तेऽर्थसिद्धये।
तन्त्वादिकारकादानं पटासत्वे पटार्थिनः।
सत्त्वे कारकशब्दोऽपि व्यपैतीति हतं जगत्।
साफल्यमसदुत्पत्तावस्तु कारकवस्तुनः।

उत्पादयतु सर्वस्मात् सर्वः सर्वमभीप्सितम्। इति। एवं च प्रसङ्गात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणादिति हेतुद्वयं व्याख्यातम्। कारणाभावादित्यस्यायमर्थः कारणस्योपादनस्य कार्येण उपादेयेन सहाभिन्नत्वादपि सदेवकार्यमभिव्यज्यत इति स्वीकर्तव्यम्। तदभेदस्तु मृद्घट इति सामानाधिकरण्यप्रतीत्यादिनाऽवगन्तव्यः। एवं च पूर्वोक्तयुक्तिभिः देहेन्द्रियादिकं सदेव जायत इति संक्षेपः। गीतासु च –

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।इति।

सत्कार्यवादे छान्दोग्यश्रुतिरपि असत्कार्यं निरस्य सत्कार्यमेव वदति।

परमप्रकृतमुपसंहरति–

**तस्मादेकात्मवादोऽयं कल्पितो मूढचेतनैः।।८३।।**

यस्मात् कारणात् जन्ममरणादिभेदरूपेणानुमानेनार्थापत्त्या वा आत्मभेदः प्रमितः तस्मात् अयं भवद्भिः उक्तः एकात्मवादः मूढचेतनैरज्ञैः परिकल्पितः न प्रमाणसिद्ध इत्यर्थः।

**(वृत्तिः)** असतः शशविषाणादेर्न भावः। न हि किल विद्यमानत्वं सतः शिवादेः कदाचिदपि नाभावः न ह्यविद्यमानत्वम्। यद्येवं सतः[2] पर्वतादेरिव कृतत्वमस्तीति कृतस्य

१. घटादिगूढस्य–मु घटाधिरूढस्य–क१;

२. विद्यमानत्वं सतः शिवादेः कदाचिदपि नाभावः न ह्यविद्यमानत्वम्। यद्येवं सतः ] ज२,ज३; विद्यमानत्वं यद्येवं –ज१;

करणायोगात्[1] अकिञ्चित्करतया कारकाणां वैयर्थ्यं स्यात्। सत्यम्। सत्कार्यवादचतुष्पक्षेषु तावद्द्वितीयतृतीयपक्षयोः क्षीरदध्यादिषु[2] रूपान्तरपरावृत्तिदर्शनात्। न तथा त्वरूपान्तरा-परावृत्तिरिति। तत्र पुनर्माधुर्याल्लतादिरसाद्यन्यथात्वदर्शनान्न तथात्वसन्निवेश इत्यव्यापकत्वात्। कारणिकलक्षणस्य प्रथमपक्षस्वीकारेण मृगेन्द्रे–

तदाधाराणि कार्याणि शक्तिरूपाणि संहृतौ।

विकृतौ व्यक्तिरूपाणि व्याप्रियन्तेऽर्थसिद्धय:। इति श्रुतेः कारणलक्षणकार्यशक्तय एव व्यक्तीभूताः कार्यशब्दैः शब्द्यन्ते। पुनश्चतुर्थपक्षस्वीकारेण श्रीमन्मतङ्गे–

प्रादुर्भवति यद्यस्मत् तदेवात्मनामादरात्।

साधयेन्मुनिशार्दूल स्थानमप्यविचारतः। इति श्रुतेः कारणक्षीराद्याधारकुण्डादौ क्षीरं नष्टमन्यत्र वा गता। दध्यादि त्वसदेवोत्पन्नमत कुतश्चिदागतं भवतीति। न हि प्रत्यक्षेण प्रतीयते किन्तु तदेव तथा तथान्यथात्वेन क्रमविचित्रस्वभावत्वाद्वस्त्वेकं कारणलक्षणं कार्यलक्षणमनन्तमवस्थाविशेषम् अनुविदधातीति[3] कारणं कार्यशब्दैर्वा कथ्यते। कारणस्य शक्तिसमाहारात्मकत्वात् मायायाः शक्तिरूपत्वात्[4] शक्तेः शक्त्यन्तरकल्पनायामनवस्थाप्रसङ्गात्। कार्यमेव शक्तिमदिति तत्कार्यशक्तिसमाहारात्मकत्वात् माया शक्तिमती स्वकार्यशक्तिस्वाङ्गत्वात् स्वकार्यं प्रत्यङ्गिनीति च गम्यते। ततः कारणमिदमस्येति स्वावच्छेदकानभिव्यक्तकार्यशक्तिलक्षणकारणाकारेण तच्छक्त्यव्यतिरिक्तत्वात् कारणेन वा प्रतिबन्धतत्कारणाकारस्वशक्तिव्यक्तिलक्षणकार्याकारः शक्त्यात्मना सत्यामप्यभिव्यक्तौ कारकसन्निध्यभिव्यक्तस्वभावेति शिवत्वाभिव्यक्तिपरीक्षायां लेशतः कथञ्चित् परीक्षितेति जनकशक्तिमद्भिर्निमित्तकर्तृतत्सहकर्तृभूतैः कारकैः कारणाकारप्रोत्सारणेन कार्याकारलक्षणान्यथात्वकरणेन क्रियत इत्यभिव्यक्त्यस्तित्वात् तदेव जननमिति न कारकवैय्यर्थम्। तदुक्तं मृगेन्द्रे–

तद्व्यक्तिर्जननं नाम तत्कारकसमाश्रयात्।
तेन तन्तुगताकारं पटाकारावरोधकम्।।

वेमादिनापनीयाथ पटव्यक्तिः प्रकाश्यते।। इति। जन्यशक्तिर्नियामिकेत्यनेन शक्तिः शक्तिमन्तं न व्यभिचरति। ततः रत्नत्रयादौ–

परिणामो हि वस्तूनां पूर्वावस्थापरिच्युतेः।
तदवस्थं हि वस्त्येकं पूर्वं क्षीरं ततो दधि।।

---

१. करणायोगात् ] ज१;कारणायोगात्–ज२

२. कारकाणां वैयर्थ्यं स्यात्। सत्यम्। सत्कार्यवादचतुष्पक्षेषु तावद्द्वितीयतृतीयपक्षयोः क्षीरदध्यादिषु ] ज१;कारक . . . . रदध्यादिषु–ज२

३. अनुविदधातीति ] सं० पाठः ; अनुविधातीति–ज१; . . . . –ज२; . . . . दधातीति–ज३

४. मायायाः शक्तिरूपत्वात् ] ज२,ज३; मायाशक्तिरूपत्वात्–ज१;मायायाः शक्तिरूपत्वात्–ज२

पश्चात् तक्रं तथा माया विचित्रपरिणामतः। इति। श्रुतेः क्षीरादिरूपकमेव वस्तु क्रमेणापृथक्सिद्धदधिनवनीता-द्यनेकस्वभाववदित्यनभिव्यक्तदध्यादिस्वरूपं क्षीरम्। तथा हि व्यक्तं सत् दध्यादिभूमिकया कार्यकाले पुनरनभिव्यक्तस्वशक्तिरूपक्षीरस्वरूपं दध्यादि च क्षीरभूमिकया कारणकाले वर्तत इति समवैति स्वधर्मान्वयेन कार्यमित्युपादानकारणं समवायिकारणशब्दशब्दितं स्यात्। न तु परिणामपक्षेऽस्मिन् असमुत्पन्नकार्यकालमात्रे कार्येण सह कारणस्य नैयायिकादिगीतवदयुतसिद्धत्वादिना समवायिकारणमुपपद्यते। आविर्भावतिरोभावौ जन्मनाशशब्दशब्दितौ जन्मनाशोपचरितौ। ततः कार्यस्य कारणावच्छेदकत्वात्। अन्यथानवच्छिन्नायां वन्ध्यायामपि सन्ततिः स्यादिति प्रागपि कार्यास्तित्वसिद्धिः। ततः शरीरादिरूपकार्याकारस्य स्वप्रतिबन्धककारणाकारप्रोत्सारणेनान्यथात्वकरणेनाभिव्यक्तिः। पुनः कारणाकारस्य कार्याकारप्रोत्सारणेनान्यथात्वकरणेन शक्तिलक्षणापातनं जन्म च नाशश्चेति क्रमतः कथ्यते। तथाऽऽत्मनोऽपि सूक्ष्मदेहानुषङ्गिते सति स्थूलदेहे तत्र कलादिभिः स्वप्रतिबन्धकस्वचिदावारकत्वलक्षणमलप्रोत्सारणेनेश्वरेण अन्यथात्वकारणेनावारकत्वनिवृत्ति-लक्षणैकस्वभावत्वात्। मले स्वनिवृत्तिलक्षणस्य रूपान्तरापातनेन तल्लक्षणरूपान्तर-परिणतेस्तस्याश्चस्वेतरमलनिष्ठस्वसन्निविष्टत्वात् स्वचिदविकृतिमदभिव्यक्तिः।

पुनस्थूलदेहे पाते त्वसतीष्विवावतिष्ठतीषु सूक्ष्मदेहाङ्गभूतकलादिकलासु स्वाप्रतिबन्ध-कावारकत्वनिवृत्तिलक्षणमलस्वरूपप्रोत्सारणेनेश्वरेणान्यथात्वकरणेनावारकत्वनिवृत्तिलक्षणै-कस्वभावत्वात्। मले स्वावारकत्वलक्षणस्वरूपान्तरापातनेन तल्लक्षणरूपान्तर-परिणतेस्तस्याश्च स्वेतरमलनिष्ठस्वसन्निविष्टत्वात् स्वचिदविकृतिमदनभिव्यक्तिश्च जन्म च नाशश्चेति क्रमतः कथ्यते। ज्ञानचक्षुर्युतानां ज्ञानस्यैव ज्ञेयार्थसत्तामात्रव्यापकत्वात्। न हि कारणकाले स्वशक्त्यात्मना स्थितकार्यस्य कार्यकाले तच्छक्तिव्यक्त्यात्मना स्थितकारणस्य पुनरात्मनः स्वचिच्छक्त्यभिव्यक्त्यनभिव्यक्तिलक्षणविविधस्थितेश्चास्मदाद्यैन्द्रियकप्रत्यक्षानुप लसत्त्वादसिद्धिर्दिव्यचक्षुस्सिद्धसत्ताकत्वात्। पुनर्महामायामायाद्युपादनपरमापरमकारणबृन्दमेव स्वस्वजन्यशक्त्यात्मकम्। न तु शिवादिनिमित्तकारणशिवादिसहकारिभूतमलादि-सहकारिकारणबृन्दं शिवसहकारिभूतशिवशक्त्यादिजनकशक्तिमत्तदिति जन्यापरमाम्नः कार्यस्य शिवादौ शक्त्यात्मना स्थित्यनुपपत्तेः। ततः शरीरादिषु तु स्वाकारान्यतरापातनतिरस्कृत-विकृतिमच्छक्तिव्यक्त्यात्मस्थितेः। तत्रोपचारतो ह्यनित्यशब्दः प्रथितः प्रवर्तत इति सर्वं समञ्जसम्।

तस्माज्जन्ममरणादिविभिदया विभिन्नात्मसिद्धिः। तत्त्वसंग्रहादौ –

असकृत् पृथगुपलब्धाः पुरुषास्तेनापि नत्वैक्यम्। इति श्रुतेः। असकृत् पृथक् स्वस्वानुभूतिसिद्धेश्च अयमेकात्मवादः मूढचेतनैः अज्ञैः हिरण्यगर्भप्रभृतिभिः कल्पितो मिथ्यापातितः। ननु तेऽपि सर्वज्ञाः। सत्यं स्वावधेः स्वोर्ध्वं न जानन्तीत्यदोषः। तदयुक्तम्।

सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा।
अथोभावपि सर्वज्ञौ मतभेदस्तयोः कथम्।।

इति प्रोक्तरीत्या निरस्ताः कुतार्किककुविकल्पा अपि।

**( व्याख्या )** पूर्वोक्तान्यथोपपत्तिं व्यभिचारं च अर्थापत्त्यनुमानयोराशंकन्ते ऋषयः –

**( वृत्तिः )** ऋषयः तच्छास्त्रवासनावशगाः पुनः संचोदयन्ति –

**अथाकाशं यथा कुम्भकलशोदञ्चनादिषु।**
**एकमेव स्थितं तत्वद्देहेष्वप्यात्मसंस्थितिः।।८४।।**

**( व्याख्या )** कुंभः महाघटः कलशः अल्पघटः उदञ्चनं सच्छिद्रनासिकम्। एषु कुम्भाकाशो नष्टः कलशाकाश उत्पन्न इत्यादिप्रतीत्या भिन्नत्वेन प्रतीयमानमपि आकाशम् एतेषामुत्पत्त्यादीनां सोपाधिकाकाशधर्मत्वेन स्वरूपत एकमेव न भिन्नमिति स्थितं निश्चितम्। तद्वद्देहेष्वपि आत्मसंस्थितिः संस्थितः आत्मा स्वरूपत एक एवास्तु न प्रतिशरीरं भिन्नः। उत्पत्तिविनाशादयोऽपि व्यवस्थिता विरुद्धधर्मा औपाधिकभेदेनापि उपपद्यन्ते। तथा चोक्तविरुद्धधर्माध्यस्तत्वस्य स्वरूपतो भेदं विनाप्युपपन्नत्वेन अर्थापत्तेरन्यथोपपत्तिः। सामान्यव्याप्तौ विरुद्धधर्मवति घटाकाशादौ स्वरूपतो भेदाभावादुक्तानुमानस्य[1] व्यभिचारश्चेति भावः।

**( वृत्तिः )** उदञ्चनं सच्छिद्रनासिका। स्पष्टः श्लोकार्थः।

**( व्याख्या )** प्रथमं गूढाभिसन्धिः दृष्टान्तदार्ष्टान्तिकयोः वैषम्यमाह ईश्वरः–

**तच्चैकरूपमाकाशं नैवं चैतन्यमिष्यते।**

**( व्याख्या )** आकाशमुपाधिभेदेन भिन्नमपि एकरूपं प्रतीयते। चैतन्यमात्मा नैवमेकरूपं न प्रतीयते। किन्तु भिन्नरूपमेव प्रत्युपाधि प्रतीयत इत्यर्थः।

तदेवाह –

**भोक्तुमिच्छा यदैकस्य गन्तुमिच्छापरस्य च।।८५।।**
**तदेवमस्माच्चैतन्यं भिन्नरूपमिति स्थितम्।**

**( व्याख्या )** यदा एकस्य भोक्तुमिच्छा तदैवापरस्य तद्विरुद्धा गन्तुमिच्छा जायते न त्वेकरूपत्वं प्रतीयते। एवंशब्दः प्रकारे। तस्य तस्यान्याऽन्या इच्छा जायते। अतो दृष्टान्तवैषम्यात् प्रकृते चैतन्यं स्वतो भिन्नरूपमिति निश्चीयते।

इदमेव व्यतिरेकमुखेनोपपादयति–

**यद्यभिन्नं तु सर्वेषां भोक्तुमिच्छैकदा भवेत्।।८६।।**

---

१. भेदाभावादुक्तानुमानस्य] मु भेदाभावेन नोक्तानुमानस्य–क१;

**( व्याख्या )** यदि चैतन्यमभिन्नं सर्वेषां चैतन्यरूपाणामात्मनां भोक्तुमिच्छैकदा भवेत्। न गन्तुमिच्छा तदविरुद्धेति भावः।

**( वृत्तिः )** सर्वत्र कलशोदञ्चनादिषु स्थितं तच्चाकाशं स्वशब्दलक्षणैकरूपकार्यद्वारा एकरूपमनुमीयते। एवमेकरूपं चैतन्यं नेष्यते। कुत इत्यत आह भोक्तुमित्यादि। यदा यस्मिन् काले तदा तस्मिन् काले एवमित्थमस्मात्। इच्छाभेदात् एकदा एककाले स्पष्टस्तदितरपदार्थः।

**( व्याख्या )** तत्रैतावता दृष्टान्तवैषम्येण पूर्वोक्तान्यथोपपत्तेर्न परिहार इत्याशय्यमविद्वांसः[१] शंकन्ते ऋषयः–

**सोपाधिकात्मधर्मस्य भेदादिति ननूदितम्।**

**( व्याख्या )** भेदादित्यन्तस्यार्थस्तूक्त एव। इति एवमुदितम् उक्तं नन्वित्यर्थः। अत्र नन्विति काक्वा पूर्वोक्तान्यथोपपत्तेर्नानेन परिहार इति भावः सूचितः।

**( वृत्तिः )** नन्वस्माभिः सोपाधिकात्मधर्मस्य भेदादित्युक्तम्। अयमाशयः। इच्छा मनोवृत्तिः तदिच्छाभेदा मनोभेदसाधने पर्यवस्यति। मनसां हि संसारधर्म इत्युक्तत्वादिति। तदयुक्तम्। इच्छाया भोग्यसंकर्घप्तिलक्षणस्वनिष्ठसमुद्यमचित्स्वरूपत्वात् तस्यास्त्वचेतनसमवायायोगात्। मनोभिव्यक्तचिच्छक्तिवृत्तिरिच्छेति निश्चिततत्वात्। ततो न मनसामिति निश्रेयसहेतुतया शास्त्राणां प्रवृत्तेरात्मनामेव बन्धमोक्षावभ्युपगन्तव्यौ। अन्यथा स्यादेकमेवाद्वितीयं ब्रह्मैव सत्यं ततस्तज्ज्ञानमेव मुक्तेः साधनमितीदमुच्यमानं माता मे वन्ध्येतिवत्। तदुक्तं

मोक्षकारिकासु –

एकत्वदर्शनं मुक्तेः साधनं त्वात्मबाधितम्।
मोच्यमोचककर्तॄणां नाभेदे सा यतो भवेत्।। इति।

एकमुक्तावभ्युपगतायां एक मोक्षे सर्वमोक्षप्रसंगपरिहारार्थमात्मभेदोऽभ्युपगन्तव्यः। भोगोऽस्य वेदना पुंसः सुखदुःखादिलक्षणा इति श्रुतेः। तस्य वैचित्र्यदर्शनात् तत्समवेतिनां भेदसिद्धिरिति नात्यैक्यव्यक्त्यैक्यभ्रान्तिं त्यजत। किञ्च स्वसंवित्सिद्धं वस्तु नत्वसत्यम्। स्वेतरावेद्यत्वात्। यत् स्वेतरावेद्यं तत् स्वसंवित्सिद्धं सत्यं ब्रह्मवत्। न च ततः किमिति वाच्यम्। आत्मनां स्वात्मा प्रत्येकं परात्मानुमातृतया परात्मभ्यो भिन्न एव स्वसंविदि प्रतिभासते।

यदि स्वानुभूतिसिद्धमप्यसत्यम्। अथ यदि पुनः स्वानुभूतिः सत्या तदा सा ब्रह्माद्वैतप्रतिहन्त्रीति विलीनामसत्यां वा विभाव्यते। तर्हि त्वद्दृशि श्रुतीनामपि परमार्थतोऽसत्यत्वाच्छशविषाणलिखितभूरिवासत्यकॢप्तिकॢप्तं निष्प्रमाणं द्विचन्द्रादिवत्[२] ब्रह्माप्यसत्यमित्यान्ध्यं जगत् भवेत्। अथ यथा कथञ्चिद्वा तदभेदसिद्धिर्यद्यस्ति सर्वमेवेदं ब्रह्मेति कः कस्य किं कुर्यादित्यसंगतम्। किञ्च विविक्तब्रह्मज्ञानाद्यदि ब्रह्मणः सदा सर्वथा

---

१. इत्याशयमविद्वांसः] मु इत्याशयं विद्वांसः-क१;

२. निष्प्रमाणं द्विचन्द्रादिवत् ] ज३; निष्प्रमाणद्विचन्द्रादिवत् –ज१ ;निष्प्रेक्षणद्विचन्द्रादिवत् –ज२

शरीरत्वावच्छिन्नत्वसर्वशरीरानवच्छिन्नत्वं जातं तर्हि भ्रान्तिर्गमिष्यति। यदि यदा कदाचिद्यथा कथञ्चिद्येन केनाप्यवच्छिद्यते। तत्र शरीरादिष्वेकत्र चिदावासो भवति। न खल्वेकात्मभाष्यं पठतां भ्रान्तिरभितः स्वात्मनः[1] कदाचिदपि निरवशेषं गमिष्यति।

**( व्याख्या )** सूचितमाशयमाविष्करोति ईश्वरः-

**( वृत्तिः )** ईश्वरः पुरा स्ववदनसमुत्थोक्तिभिः सह सर्वमिदं हृदि निधायाह -

**अणोरभेदे संसिद्धे तथा वक्तव्यमग्रजाः।।८७।।**

**( व्याख्या )** विरुद्धधर्मस्य स्वतः स्वरूपतो भिन्नाश्रयत्वमौत्सर्गिकम्। तत्र यदि तदाश्रयाणां बलवता प्रमाणेनाभेदः सिद्धः तत्रापवादेन उपाधिभेदेन भिन्नाश्रयत्वं वक्तव्यम्। यथा घटाकाशादिषु स एवायमाकाश इति प्रत्यभिज्ञादिना स्वरूपतोऽभेदे सिद्धे रजोधूमादिसम्बन्धतदभावादिरूपविरुद्धधर्मस्यौपाधिकभेदेन भिन्नाश्रयत्वमुच्यत इत्यर्थः। तद्वदत्रापि अणोः बलवता प्रमाणेनाभेदे संसिद्धे तथा वक्तव्यमुपाधिभेदेन भिन्नाश्रयत्वं वक्तव्यम्। हे अग्रजाः ब्राह्मणा इत्यर्थः। प्रकृते तादृशप्रमाणाभावात् तथा वक्तुं न शक्यत इति भावः।

नन्वत्रापि अस्त्येव बलवद्बाधकं प्रमाणं श्रुतिः। तथाहि बह्वीभिः श्रुतिभिर्जीवपरयोरभेदः प्रतिपाद्यते प्रत्यक्षेण भेदः प्रतीयते। इदं च भेदाभेदद्वयं स्वतो भेदे न सम्भवतीति भेदस्यौपाधिकत्वं वक्तव्यम्। अत्रोपाधिः को वेत्यपेक्षायां शरीरान्तःकरणादीनां सुषुप्तावननुस्यूतत्वेन तदनुस्यूता अविद्यैवोपाधिर्वाच्या। सा च लाघवानुगृहीतश्रुतिस्थैकवचनानुसारात् एकत्वश्रुतेश्चैकैवेति तदुपाधिकोऽपि जीव एक एवेति चेत्, मैवम्। प्रत्यक्षादिप्रमाणविरोधे[2] तासां भेद-श्रुतीनामुपासनाद्यन्यार्थकत्वेनापि उपपत्तेः तन्मूलकस्य उक्तकल्पनस्यानवसर इति शिवस्य दयालोर्हृदयम्। किंचैकमुक्तौ सर्वमुक्तिप्रसङ्गेन बहुश्रुतिविरोधेन च स्वयूथ्यैरेवायं पक्षो निरस्त इति। एवं च नान्यथोपपत्तिरर्थापत्तेः नाप्यनुमानस्य[3] उक्तव्यभिचारः। बाधकाभावे सतीति हेतोर्विशेषणसूचनात्।

अत उक्तार्थापत्त्यादिभिर्भेदसिद्धेः नाभेदसिद्धिरित्याह-

**युक्तिभिः साधिते भेदे नासिद्धस्वीकृतिः शुभा।**

**( व्याख्या )** युक्तिभिरिति बहुवचतादनेकविरुद्धधर्माध्यासलक्षणहेतूपन्यासात् प्रमाण-सिद्धभेदापेक्षया प्रमाणासिद्धस्य अभेदस्य स्वीकृतिः न शुभा युक्ता नेत्यर्थः।

एवं च दृष्टान्तेनान्यथोपपत्त्युपपादकं भावाभावलक्षणविरुद्धधर्मद्वयसंबन्धस्यान्यथोपपत्त्युपपादकं वा यदुक्तं तदपि निरस्तमित्याह-

---

१. भ्रान्तिरभितः स्वात्मनः] ज२ भ्रान्तिरहितस्वात्मनः ] ज१;

२. प्रत्यक्षादिप्रमाणविरोधे] मु प्रत्यक्षादिप्रमाणसिद्धविरोधेन-क१;

३. नाप्यनुमानस्य] क१; नाप्यनुमाने-मु

**अत एव घटाकाशे रजोधूमादिभिर्युते।।८८।।**
**न सर्वे संप्रयुज्यन्ते यथान्ये तन्नदूषणम्।**

**(व्याख्या)** अत्र घटाकाश इत्यारभ्य अन्ये इत्यन्तं पूर्वपक्ष्युक्तस्य प्रतीकेनानुवादः। अत्रान्यशब्देन जीवा इत्यस्यार्थतोऽनुवादः। तत्र यदुक्तं दूषणमन्यथोपपत्त्यादिकं तदत्र नास्ति। अत्र हेतुरत एवेति। अभेदे प्रबलप्रमाणाभावादेवेत्यर्थः।

**(वृत्तिः)** हे अग्रजाः अणोरात्मनो अभेदे स्वाभाविकधर्मरूपहेतुभिः संसिद्धे दृश्यमानभेदव्यवहारपरिहारार्थं तथा सोपाधिकधर्मादिदमिति वक्तव्यम्। युक्तिभिरात्मसु निविष्टस्वाभाविकभेदलक्षणस्वसंविद्धर्मरूपाभिर्भेदे साधिते तत्रासिद्धिस्वीकृतिर्न शुभा। अत इत्यादिश्लोकार्थः स्पष्टः।

**(व्याख्या)** यत्तूक्तं प्रमाणगम्यत्वं नास्तीति तदुद्धर्तुमनुवदति–

**(वृत्तिः)** असिद्धिं पौर्विकतमप्रयुक्तहेतौ दर्शयति –

**भेदस्य मेयधर्मत्वादिति यच्चोदितं पुरा।।८९।।**
**स च हेतुरसिद्धोऽत्र मेयामेयार्थयोर्यतः।**

**भेदोऽप्युभयनिष्ठः स्यात्**

**(व्याख्या)** भेदस्येति। अनुवादांशस्यार्थस्तु उक्त एव। तत्रात्मनो मेयत्वमात्म-निष्ठभेदमात्रग्रहणार्थं वक्तव्यम् उतात्मनिष्ठात्मान्तरप्रतियोगिकभेदग्रहणार्थमिति विकल्प्य आद्ये तन्न वक्तव्यमित्याह स च हेतुरसिद्ध इति। तस्मिन् पक्षे आत्मनो मेयत्वस्यावश्यकत्वमसिद्धमित्यर्थः। तदर्थं न वक्तव्यमिति यावत्। तत्र हेतुमाह मेयामेयार्थयोरिति। मेयामेयार्थयोर्घटात्मनोर्भेदः उभयनिष्ठ एव स्यादपि घटात्मानौ भिन्नाविति प्रतीतेः। न चैवं स्वस्मिन् विरुद्धस्वभेदापत्तिः स्वनिष्ठस्वनिरूपितभेदस्यैव विरोधित्वात्। प्रकृते च भेदस्योभयनिष्ठत्वेऽपि स्वनिरूपितभेदस्य स्वस्मिन्ननङ्गीकारात्। यथा घटपटादिसंयोगस्य उभयनिष्ठत्वेऽपि घटनिरूपितसंयोगो न घटे तद्वदिहापीति भावः। तथा च तद्भेदे घटस्यापि आश्रयत्वात् यावदाश्रयविषयकत्वस्य गौरवेण अप्रयोजकत्वात् तदर्थमात्मनो मेयत्वं नावश्यं वक्तव्यमिति भावः।

ननु भेदस्यैकनिष्ठत्वपक्षे तदवश्यवक्तव्यमेव। अपि चात्मनिष्ठात्मप्रतियोगिकभेदग्रहणार्थमिति द्वितीयविकल्पे तदवश्यमेवेत्याशंक्य तर्हि तदच्युत एवेत्यत आह–

**न च मातुरमेयता।।९०।।**

**(व्याख्या)** इत्यात्मानं जानामीत्यनुभवात्।

किं च अमेयत्वे बाधकमाह–

**शिवस्य मेया ह्यात्मानो न चेत् सर्वज्ञताक्षतिः।**

**(व्याख्या)** आत्मानः शिवस्य मेया न चेत् तस्य शिवस्य सर्वज्ञत्वं न स्यात्। न चैवं प्रमातृप्रमेयसंकरोऽपि उपधेयसंकरेऽपि उपाधेरसंकरादिति भावः। भेदस्य

मेयधर्मत्वादिति स्वतन्त्रानुपक्षे व्याक्रियते। स हेतुः मेयमातृधर्मत्वादिति पूर्वोक्तहेतुरसिद्धः विशेषणासिद्ध इत्यर्थः। तत्र हेतुमाह मेयामेयार्थयोर्यत इति। यतो मेयामेयार्थयोर्भेदो मेयप्रतियोगिकोऽमेयप्रतियोगिकश्च भेद उभयनिष्ठः स्यात् अन्योन्यप्रतियोगिकभेदस्यान्योन्य-धर्मत्वात्। अतो विशेषणासिद्धिरिति भावः। इदं च मातुरमेयत्वमभ्युपेत्योक्तम्। वस्तुतस्तु प्रमातुरपि प्रमेयत्वेन हेतुर्विरुद्ध इत्याह न च मातुरमेयतेति। आत्मानं जानामीति सर्वानुभवसिद्धत्वादिति भावः। आत्मनो मेयत्वानङ्गीकारे शिवस्य सर्वज्ञताक्षतिं बाधकमाह शिवस्येत्यादिना। एवं च गन्धः घटधर्मो न पार्थिवासाधारणधर्मत्वादित्यत्र घटस्य पार्थिवत्वेन हेतोर्विरोध इव प्रकृतेऽपि विरोध इति द्रष्टव्यम्। ननु घटादिज्ञानमस्तीति सर्ववादिनामविवादं तच्चैकरूपमेव उपाधिपरामर्शमन्तरेणाविभासमानभेदत्वात् आकाशवत्। स एव चास्माकमात्मा तस्य च ज्ञातृत्वं बुद्ध्याद्युपाधिकृतमिति नात्मभेदः सिध्यति।

एवं चात्मभेदस्य प्रमाणसिद्धत्वात् उक्तव्यवस्थादिकमपि उपाधिनैव उपपादनीयमित्याशंक्य ज्ञप्तिमात्रतां निराकरोति–

**ज्ञाता चायं न तु ज्ञप्तिमात्रोऽर्थग्राहको यतः।।९१।।**

**( व्याख्या )** अयं चात्मा ज्ञाता न तु ज्ञप्तिमात्रः। तत्र हेतुः यतोऽर्थग्राहकः। घटं जानामीत्यनुभवात् यतोऽर्थग्रहणकर्ता अत इत्यर्थः।

**( वृत्तिः )** अत्राभेदसिद्धौ भेदस्य मेयधर्मत्वादिति प्रयुज्य यच्चोदितं पुरा येन हेतुनाऽऽशङ्कितं स च हेतुः मेयामेयार्थयोर्युतः सन्नसिद्धः। केवलं मेयार्थरूपपक्षनिष्ठत्वासिद्ध्या स्वरूपासिद्धो भवति। अथ किमित्यत आह भेदोऽपीति।

मातृमेययोर्विवेके क्रियमाणे तदन्यथानुपपत्या भेदेऽपि परस्परं विसदृशलक्षणमपि परिच्छेदकतयोभयनिष्ठः स्यात्।

किञ्च मातुरमेयतापि न कुतः यतः शिवस्येत्यनुषज्य सुकरोऽर्थः। नैयायिकदृशेदमुक्तम्। अयमाशयः। अमेयार्थे मेयतया त्वमितिः सर्वज्ञस्यापि शिवस्य न दूषणं भूषणमेव। मेयतया मितेर्मेयार्थसत्तामात्रव्यापकत्वात्। यथा शिवः

स्वात्मानं मेयविसदृशतया स्वेतरानुसन्धातृमात्रतया साक्षात् करोति। तथा तान् मेयविसदृशतया कथञ्चित् स्फुरणस्फुरिततया सुलक्षितस्वसादृश्यनिबन्धनतया स्वचिच्छक्त्या साक्षात्करोतीति चिन्मात्रमेव ब्रह्म नहि सर्वज्ञतादिगुणकं तेषामौपाधिकत्वात्। तदेतच्छायया शङ्कितं च रत्नत्रये–

कार्योपाधिवशात् शक्तिसंज्ञा स्यादपि चिद्घने।

न तु शक्तिः परापेक्षा वस्तुतोऽस्तीति केचन। इति। ततस्तस्य सर्वज्ञताक्षतिर्नेष्टविधातेति पराशयं हृदि समाशंक्य निराकरोति ज्ञातेत्यादिना।

अयं शिवः चशब्दः समुच्चयार्थः आत्मा च स्वतो ज्ञाता स्वसंविल्लक्षणोऽपि परसंवित् समवेती सन् परिसंवेत्ता न तु ज्ञप्तिमात्रः। न हि स्वपरविषयविरहचिद्रूपः परसंविद्विधुरस्वसंविद्रूप

इत्यपि हि न वाच्यम्। स्वसंविदित्यत्र स्वपद-समर्थिता स्वसंवेद्या परापेक्षणी संवित्तिः कथ्यते। संवित्पदसमर्थिता तु परानपेक्षिणी स्वपदसमर्थितपरसंवित्यपेक्षिणी स्वपदसमर्थितपरसंवित्तेः प्रत्यग्रूपस्वलक्षणी संवित्तिः कथ्यते। स्वसंवेद्येत्यत्रापि स्वपदसमर्थिता परानपेक्षिणी स्वसंवित्तिः कथ्यते। संवेद्या पदसमर्थिता तु परापेक्षिणी परसंवित्तिः कथ्यते। परसंवित्तिरित्यत्र परपदसमर्थिता स्वेतरचिदचित्पदार्थाः कथ्यन्ते। संवित्तिपदसमर्थिता परसंवित्तिः कथ्यते। इत्थं तत्र कयाचिदन्तरा काचिन्नसिध्यति। कुतो ज्ञाता यतः अर्थग्राहकः सदा पदार्थवेत्ता लक्ष्यते। तदुक्तं मृगेन्द्रे –

सर्वज्ञः सर्वकर्तृत्वात् साधनाङ्गफलैः सह।
यो यज्जानाति कुरुते स तदेवेति सुस्थितम्।। इति।

**( व्याख्या )** नन्वयमनुभवो ज्ञप्तिमात्रस्वरूपस्यात्मनो ज्ञातृरूपबुद्ध्युपाधिकृत इति शंकन्ते ऋषयः-

**( वृत्तिः )** ऋषयः –

**ज्ञप्त्यात्मैवायमुद्दिष्टो ज्ञातृत्वं महतो मतम्।**

**( व्याख्या )** अयमात्मा ज्ञप्त्यैकशरीर एवेत्युद्दिष्टः। श्रुत्यादिभिरिति शेषः। तदुक्तं सूतसंहितायाम्-

आहुश्चिद्रूपतो भेदः चितो नास्त्येव सर्वथा। इति। अस्यार्थः चिद्रूपात् ईश्वरात् चिद्रूपस्य आत्मनो भेदो नास्तीति। कथं तर्हि घटं जानामीति ज्ञातृत्वेन अनुभवत्यत्राह ज्ञातृत्वमिति। अनुभूयमानं ज्ञातृत्वं महतो बुद्धेरेव सम्बन्धीति मतं बहुश्रुतिसम्मतम्। इदं च सिद्धान्तशैवसम्मतं चेत्याह-

**महानध्यवसायात्मा तन्त्रेऽप्यस्मिन् महेश्वर।।९२।।**

**( व्याख्या )** अस्मिन्नपि तन्त्रे महत्तत्त्वं बुद्धिरिति यावत्। अध्यवसायात्मा अध्यवसाय एवात्मा स्वाभाविको धर्मो यस्य सः तथोक्तः। यद्वक्षयति सा बुद्धिरुदिता तन्त्रे विषयाध्यवसायिनीत्यादि पाशपटले।

**( वृत्तिः )** हे महेश्वर ! अयमस्माभिः परमात्मसंज्ञितशिवाद्वैती जीवः ज्ञप्त्यात्मोद्दृष्टः। तदुक्तं सूतसंहितायां –

आहुश्चिद्रूपतो भेदं चितो नास्त्येव सर्वदा। इति।

ज्ञातृत्वं स्वपरसंवेतृत्वं महतो मतेर्मतमिष्टम्।

अस्मिन् शैवतन्त्रेऽपि महान् बुद्धिरध्यवसायात्मा ग्राह्यपरामर्शरूपः इति श्रुतमिति शेषः।

**( व्याख्या )** अत्र जानामीति किं बुद्धिरेव ज्ञातृत्वेनानुभूयत इत्युच्यते उत बुद्धिनिष्ठज्ञातृत्वमात्मन्यध्यस्यत इति विकल्प्याह ईश्वरः-

**( वृत्तिः )** ईश्वरः –

**सर्वे ज्ञातार एवेह दृश्यन्ते प्राणिनः सदा।**
**न बौद्धमेतज्ज्ञातृत्वं युक्तं तस्या जडत्वतः।।९३।।**

**( व्याख्या )** इह लोके सर्वे प्राणिनः ज्ञातार एव दृश्यन्ते। नात्र विवाद इति भावः। एतदनुभूयमानं ज्ञातृत्वं न बौद्धं बुद्धिधर्मो न भवतीत्यर्थः। अत्र हेतुमाह तस्या बुद्धेः जडत्वतः अचेनत्वादित्यर्थः।

**( वृत्तिः )** सर्वे वेदविद्दृशा अनादिमुक्तपरमात्माद्वैतिनः अस्मादृशा तदनद्वैतिनः प्राणिनः इह लोके ज्ञातार एव स्वचित्स्वेतरचिदचित्संवेत्तार एव सदा दृश्यन्ते। ननु न निबन्धनमिति मतेरेवास्तु ज्ञातृत्वम्। तन्न। एतत् नानार्थपरसंवेदनतयाऽनुभूयमानं ज्ञातृत्वं न बौद्धम्। न बुद्धिसमवेति युक्तं तस्या बुद्धेर्जडत्वतः। कथं पुनर्जडात्मनि चित्समवेतित्वं न्यायवादिभिर्गीयते। तदुक्तं गुणव्यतिरिक्ततद्रूपतयोत्तरत्र गुणिनः साधनीयत्वात्।

**( व्याख्या )** किं तर्हि बुद्धेरध्यवसायात्मकत्वं ज्ञानाध्यवसाययोरभेदात् इत्यत आह–

**( वृत्तिः )** बाधान्तरमाह –

**किंच बुद्ध्यादिभिर्ज्ञानं व्यज्यतेऽत्र सदैव हि।**

**( व्याख्या )** अध्यवसायाकारपरिणतबुद्धिकलादिभिः ज्ञानं सदा व्यज्यत एव। अतो व्यञ्जकत्वेन बुद्ध्यादेरध्ववसायस्य ज्ञानाद्भेदः।

प्रत्युत विपरीतं च आत्मन एव ज्ञातृत्वेन अनुभवादित्याह–

**किंचानुभूयते ह्यात्मा स्वपरात्मप्रकाशकः।।९४।।**

**( व्याख्या )** घटमहं जानामीत्यहन्त्वसामानाधिकरण्येन स्वपरप्रकाशत्वस्यानुभूयमानत्वादित्यर्थः।

ननु परप्रकाशकत्वस्य कादाचित्कत्वेन कथमात्मधर्मत्वं तथात्वे आत्मनो विकारित्वप्रसङ्गादित्यत आह–

**परप्रकाशकत्वं च नित्यं नित्यगुणो यतः।**

**( व्याख्या )** यतो नित्यगुण अतः परप्रकाशकत्वं नित्यमित्यर्थः। इदं चोत्तरत्र प्रतिपादयिष्यते।

**( वृत्तिः )** किंच इतोऽपि न चिन्मात्रेण सिध्यति। यतो बुध्यादिभिः स्वकार्यप्रकाशादिद्वारा ज्ञानं ज्ञातृकत्वोत्थमत्र देहे सदैव ह्यभिव्यज्यते। ततः का क्षतिरिति न वाच्यम्। यद्व्यञ्जकं न तद्व्यङ्ग्यमिति बिन्दुपटले परीक्षितत्वात्। किंचात्मपरात्मप्रकाशको हि सदाऽविलुप्तस्वपरविषयवेदनात्मको ह्यनुभूयते। यद्वा व्यञ्जकनिरपेक्षत्वात् स्वयं प्रकाशो भूत्वा परत्र सूर्यकान्तलक्षणाग्नौ स्वशक्तिसदृशीं स्वपरप्रकाशिनीं शक्तिं प्रकाशयन् स्वपरप्रकाशः

सूर्य इव यथा शिवो व्यञ्जकनिरपेक्षत्वात् स्वयं प्रकाशो भूत्वा परत्र पाशमात्रमुक्तमुक्ते स्वशक्तिसदृशीं स्वपरप्रकाशिनीं शक्तिं प्रकाशयन् स्वप्ररप्रकाशः। तथा मुक्तः शिवशक्तिकृत मलशक्त्यात्यन्तिकविच्छित्तिचिच्छक्तिसर्वथाभिव्यक्तिसमनन्तरं न पशुशक्तिरिव पुनः पुनः सापेक्षिणीति शक्तेर्व्यञ्जकनिरपेक्षत्वात्। शिवो भूत्वा शिव इव स्वयंप्रकाशः परत्र भविष्यति पाशमात्रमुक्तमुक्तान्तरे न प्रतिबन्धः स्वस्येत्यवर्जनीयतया शिवमतिं प्रत्यनवनत्यनुन्नतितया समुत्थस्वमतिः शिवापृथगाचरिताधिकारः शिवसमस्वशक्तिसदृशीं स्वशक्तितरां स्वपरप्रकाशिनीं शक्तिं शिवापृथक् प्रकाशयन् शिव इव स्वपरप्रकाशोऽनुभूयते। पृथक् न प्रसारिणी स्वमतिरिति शिवमतिं प्रत्यनुन्नत्यवनतिस्वमतित्वान्न जगत्कर्तेति चानुभूयते। तथा परमुक्तः पुनराचार्यश्च स्वमतसंस्कारपूर्वशास्त्रोपदेशद्वारा सापेक्षशक्ति यथा तथा स्वानुरूपं परचिच्छक्तिं प्रबोधयन् स्वपरप्रकाशोऽनुमीयते। ननु परप्रकाशस्य विलोपनीयत्वदर्शनात् कथमात्मस्वरूपत्वम्। मैवम्। स्वप्रकाशवत् परप्रकाशत्वं च नित्यं यतो नित्यगुणः सदास्तिकवस्तुधर्मः। अयमाशयः। द्विविधं विज्ञानमध्यवसायात्मकमनध्यवसायात्मकं चेति। तत्र प्रथमोद्दिष्टपरामर्शात्मकं तु ज्ञायतेऽनेनेति ज्ञानमिति प्रकाशभूतानध्यवसायाभिव्यञ्जकतया सुनिगदितबुद्धिप्रकाशो ह्यनित्यः। तदपेक्षया हि घटज्ञानात् पटज्ञानं विलक्षणमित्यादिकम्। तदपरं तु तदभिव्यक्ततदध्यवसितार्थविषयं भूत्वा पुनस्तदनुसन्धातृसक्तद्विपल्पाध्यावसितं परोन्मुखचिद्रूपं तस्मिन् बौद्धे विलुप्तेऽपि विलुप्तायामपि दीपदीप्तौ नेत्रपरोन्मुखतेज इवाविलुप्य स्थित्वा पुनस्तत्सहकारिसन्निधौ सदा प्रकाशते।

**( व्याख्या )** द्वितीयं विकल्पं दूषयति–

**( वृत्तिः )** ननु आरोपितबुद्धिज्ञातृत्वं भ्रान्त्या स्वरूपमिव लक्ष्यते। तन्नेत्याह –

**ज्ञातृत्वं नैतदध्यासकृतं भवितुमर्हति।।९५।।**
**अन्यत्र दृष्टधर्माणामन्यत्राध्यास इष्यते।**
**आत्मेतरस्य ज्ञातृत्वासिद्धेर्नाध्यास इष्यते।।९६।।**

**( व्याख्या )** एतदात्मनिष्ठत्वेन ज्ञायमानं ज्ञातृत्वमध्यासकृतं भवितुं नार्हति अत्र हेतुः आत्मेतरस्येति। बुद्ध्यादेरचेतनत्वेन ज्ञातृत्वनिराकरणादिति भावः। तत्राप्रयोजकमाशंक्योपोद्घातेनाह अन्यत्रेति। यथा शुक्त्यादौ अन्यत्र दृष्टरजतत्वादेरारोपः। न चान्यत्रेत्यप्रयोजकं स्वस्मिन्नेव पूर्वपूर्वदृष्टस्य उत्तरोत्तराध्याससम्भवादिति वाच्यम्। उत्तरोत्तरभ्रान्तेः पूर्वपूर्वभ्रान्तिहेतुत्वे अनवस्थानात् भ्रान्तेः प्रमापूर्वकत्वाङ्गीकारस्यैव उचितत्वात् इति भावः।

**( वृत्तिः )** एतत् ज्ञातृत्वं परप्रकाशः नाध्यासकृतं नारोपितं भवितुमर्हति। यतः अन्यत्र सर्पादौ दृष्टधर्माणां वार्धक्यदैर्घ्यादीनामन्यत्र रज्ज्वादौ अध्यास आरोप इष्यते। ततः किमिति न वाच्यम्। क्वापीत्यध्याहृत्यात्मेत्यनुषज्य सुकरोर्थः। तदिदं स्वानुभूत्याऽनुभूयते। न हि स्वात्मनि भ्रान्तिरस्ति। तदुक्तं–

सर्वमालम्बने भ्रान्तं न स्वात्मनि कथंचन। इति। तस्यां भ्रान्तित्वे त्वद्दृशापि स्वानुभूतिसिद्धब्रह्मणोऽप्यसत्यत्वप्रसंग इति सर्वं शशविषाणकल्पं स्यात्। ननु स्वानुभूतिरसत्योपाधिसमुत्था ब्रह्मसिद्धिं कृत्वा विलीय असती स्यात्। अयुक्तमेतत्। यतस्तर्हि तथा ब्रह्मापि विलीय असत् स्यात्। नास्तीति कुतः। निष्प्रमाणत्वात्। अथ यदा ब्रह्मणो सिद्धिः कल्प्यते तदा पुनः तत्सिद्धयेऽनुभूतिः समुत्थीयते। यद्येवं ब्रह्मापि तदा समुत्थीयत इति ब्रह्म स्वोन्मज्जननिमज्जनस्वपरिभूतेर्नान्तं पश्यति। ततः स्वेतरसंवित्तिलक्षणज्ञातृत्वं स्वेतरज्ञातृलक्षणस्वाभाविकस्वसंवित्तिसमुत्थस्वानुभूतिसिद्धमिति न ज्ञप्तिमात्रौ शिवात्मनौ। ननु शिवज्ञातृत्वं ज्ञेयसापेक्षत्वात्। ज्ञेयोपाधिसमुत्थं न स्वाभाविकम्। तदयुक्तम्। ज्ञप्तिमात्रं ब्रह्मेति पठन्तो भवन्तोऽपि ज्ञप्तिः केति केनचित् पृष्टाः किं ब्रूयुः। वयं तु ज्ञानमिति ब्रूमः। अहो बत तर्हि कस्येति तेन भूयो भवन्तः पृष्टाः पुनः किं ब्रूयुः। न च निर्विषयज्ञानमिति न गत्यन्तरमिति पुनः किंचानुभूयते। ह्यात्मा स्वरूपात्मप्रकाशक इति श्रुतिं संपूज्य स्वस्य स्वेतरस्येति च भवद्भिः सूत्तरं दीयताम्।

**( व्याख्या )** नन्वात्मेतरस्येत्यसिद्धो हेतुः बुद्ध्यादेः स्वतो बोध्यत्वाभावेऽपि चित्प्रतिबिम्बेन बोध्यत्वसम्भवादित्याशङ्कां निराकर्तुमनुवदति–

**( वृत्तिः )** अन्यथासिद्धिमाशंक्य निरस्यति –

**अथ चित्प्रतिबिम्बेन बुद्ध्यादेर्बोद्धृता भवेत्।**

**( व्याख्या )** अध्यवसायाकारेण परिणतबुध्यादेरित्यर्थः। एवमुत्तरत्रापि स्पष्टोऽर्थः। तत्र केवलप्रतिबिम्बमात्रेण बोद्धृत्वासम्भवात् तत्प्रमाया असम्भवाच्च संक्रान्तिपर्यन्तं प्रतिबिम्बितत्वं वाच्यम्। अत एवोत्तरत्रापि प्रतिबिम्बपर्यायत्वेन संक्रान्तिवादं[1] वक्ष्यति।

एवं च सत्याह –

**तर्हि चित्प्रतिबिम्बेन बुद्ध्यादिरपि चिद्भवेत्।।९७।।**

**( व्याख्या )** अपि शब्द एवकारार्थः। बुद्ध्यादिरेव चिद्भवेत् चेतनो भवेदित्यर्थः। चेतनश्चेतनत्वेनाभिमत आत्मा चेतनो न भवेत्। अथवा स्वरूपेण न भवेदित्यर्थः।

तत्रोभयत्रापि हेतुमाह–

**यतो न चेतनो बुद्धौ चिद्रूपः प्रतिबिम्बितः।**

**( व्याख्या )** यतो बुद्धौ चिद्रूपः प्रतिबिम्बितः बुद्धौ अध्यवसाये प्रतिबिम्बितः संक्रान्तः यथा जलादौ चिरनिक्षिप्तस्य पुष्पादेः सौरभ्यसंक्रमेण जलादिकमेव सुरभित्वेन अनुभूयते न तु पुष्पादिकम्। यथा वा रसलिङ्गे रसस्य संक्रमेण सस्यादौ लवणसंक्रमेण वा न रसलवणादिस्वरूपदर्शनं तद्वदिति भावः।

---

१. संक्रान्तिवादं] क१; संक्रान्तिं–मु

**( वृत्तिः )** अथ यदि न हि बुद्धेर्नैसर्गिकं ज्ञातृत्वम्। किंतु जले चन्द्रमस इव बुद्धौ चित्प्रतिबिम्बेन बुद्ध्या सुखदुःखवेदनाभिः सह देहो धृतो भवेत्। नहि किलात्मना तर्हि बुद्ध्यादिरपि चित्प्रतिबिम्बेन चिद्भवेत्।

समानधर्मिण्येव प्रतिबिम्बदर्शनात्[१] '। अथवा चिद्रूप आत्मा न चेतनो भवेत्। यतो बुद्धौ चिद्रूपरहितायां प्रतिबिम्बितः ततो नात्मेत्यात्मान्तरकल्पनायामनवस्था स्यात्।

**( व्याख्या )** इयता ग्रन्थेन चितः प्रतिबिम्बसम्भवमभ्युपेत्य उक्तम्। इदानीं प्रतिबिम्ब एव न सम्भवतीत्याह–

**( वृत्तिः )** अत्र नियतिः केत्याह –

**न चायं प्रतिबिम्बोऽपि चिद्रूपस्यात्मनो मतः।।९८।।**

**( व्याख्या )** चिद्रूपस्येति हेतुगर्भं विशेषणं तथा च चिद्रूपत्वादात्मनः प्रतिबिम्बो न मतः न सम्भावितः।

तत्राप्रयोजकत्वमाशंक्य दृष्टविरोधेन वा व्यतिरेकव्याप्तिप्रदर्शनेन वा परिहरति–

**जडे जडस्य संक्रान्तिर्युज्यते परिणामिनः।**

**( व्याख्या )** अत्र जड इति जडग्रहणं आत्मनि वक्ष्यमाणबुद्धिप्रतिबिम्बनिरासार्थम्। किंच सर्वसंक्रमस्यापि अवयवसंक्रमणं विनाप्यदर्शनात् परिणामिन एव संक्रमणं वाच्यम्। आत्मनश्च परिणामित्वात् संक्रमणं न सम्भवतीत्यभिप्रायेणाह परिणामिन इति।

ननु तथापि चैतन्यरूपे आत्मनि अध्यवसायादिपरिणामिन्या व्यापारवत्या बुद्धेः प्रतिबिम्बेनोपाधिभेदेन ज्ञातृत्वं सम्भवतीत्यत आह–

**बुद्ध्यादेः प्रतिबिम्बोऽपि न स्यादात्मन्यसम्भवात्।।९९।।**

**( व्याख्या )** आत्मन्यजडे बुद्ध्यादेः प्रतिबिम्बो न स्यात् नास्तीत्यर्थः। तत्र हेतुमाह असम्भवादिति। जडे जडस्य संक्रान्तिरिति पूर्वोक्तयुक्तेरिति भावः।

उक्तं परमतदूषणमुपसंहरति–

**अन्योन्याध्यासवादोऽयं कुदृष्टिपरिकल्पितः।**

**( व्याख्या )** तस्मादित्यध्याहारः। उक्तयुक्तिभ्य अयमितरेतराध्यासवादः कुदृष्टिभिः भ्रान्तैः परिकल्पितः।

**( वृत्तिः )** परिणतिमितादचिद्व्याप्तित्वादचिति न हि चिदचिति न हि चितः चिति न ह्यचितं प्रतिबिम्ब इत्यर्थः। अयमन्योन्याध्यासवादः चित्प्रतिबिम्बेन मतौ चिदारोपः तत्प्रतिबुद्धिप्रतिबिम्बेन चिति ज्ञातृत्वरूपः क्रियत इति परस्परारोपोक्तिः कुदृष्टिपरिकल्पितः असर्वज्ञप्रणतशास्त्रकर्घ्पितकलिता सुकोस्थदितरा पदार्थः। ननु कस्तूरिकामोदादिभिः पटादेरिव

---

१. "अथवा चिद्रूप . . . . वेदान्तविन्निराकृतिमुपसंहरति" पर्यन्तं ग्रन्थभागः ज२ कोशे न विद्यते।

सम्पर्कसंक्रान्तिः। प्रतिबिम्बस्तु न तथेति किमत्र संक्रान्ति शब्देः समुच्चरितः। सत्यम्। संक्रान्तेरपि परिणतिमदचिद्व्याप्तसादृश्यात् तदुक्तिपुरस्कृतदुरुक्तिपरिहारार्थं संक्रान्तिशब्देन प्रतिबिम्बः प्रतिबिम्बशब्देन संक्रान्तिर्वा समभिधीयत इति समधिगम्यते। भोगकारिकासु च।

भोग्ये भोगप्रदो च्छाया यथा चन्द्रमसो जल इत्यत्र प्रतिबिम्बार्थप्रदे भोगो बुद्धिवृत्त्यनुरञ्जनमित्यत्र संक्रान्त्यर्थप्रदे सति। प्रथमोक्तिस्तु बुद्धिप्रकाशे। भोग्यभोक्तृत्व–सम्बन्धितया विशिष्टस्वरूपाभिव्यक्तिमात्रे दृष्टान्तदर्शनी। द्वितीयोक्तिस्तु तद्विषयीकरण–मात्रार्थप्रदेति गुरवः। आत्मा स्वशरीरमयस्कान्तवदसंस्पर्श्यस्वसंकल्पक्रियार्थक्रियाविशिष्टशक्तिसम्बन्धलक्षणसन्निधिमात्रेण स्पन्दयति शिवोऽपि विश्वं तथेत्युक्तं च उत्तरत्रापि यथावसरं स्पष्टः ब्रूमः। तदनेन मलादिभिः संयोगोक्तिश्च तत्र तत्र सम्बन्धमात्रार्थप्रदेति सयुक्तिकलिता। किंच तदितदर्पणस्थानीयबुद्धिप्रतिबिम्बितः शिवः। पुरुषश्च सुपरिज्ञायत इति केचित् सेश्वरसांख्यदृष्ट्यनुवासितास्तेपि प्रतिक्षिप्ताः। ननु व्यक्ताव्यक्तज्ञसम्बुद्धिः सिद्धिरिति श्रुतेः कथं न पुरुषः सबुद्धिबोधप्रकाश्यः। सत्यम्। नहि प्रकाश्यतया किन्तु व्यक्ताव्यक्तविषये हि बुद्धिबोधये तत्प्रकाशकतयात्यन्ताविविक्तः पुरुषः स्वयं प्रकाशते। नित्यगुणिनस्तदव्यतिरिक्ततद्रूपगुणत्वात्।

**( व्याख्या )** इयता अणवः परीक्षिताः। इतः परं पशुः पशुत्वसंयोगादित्युक्तं मलस्वरूपं परीक्ष्यते आपटलपरिसमाप्तेः। तत्र मले वक्ष्यमाणव्यतिरेक्यनुमानसिद्ध्यर्थं चिच्छक्तेः नित्यत्वादिकं साधनीयम्। तत्र स्वात्मनि ज्ञातृत्वं स्वाभाविकं तथापि तदनित्यमेव इन्द्रि–याद्यन्वयव्यतिरेकानुविधायित्वादिति ज्ञानोत्पत्तिमत एव मलाभावं च वदन्तं महाव्रतादिकं नैयायिकादिकं च प्रथमं निराकरोति–

**( वृत्तिः )** ज्ञातृत्वस्य तन्नित्यमित्यत्याह –

**ज्ञातृत्वमपि तन्नित्यं धर्मत्वान्नित्यवस्तुनः।।१००।।**
**नानित्यधर्मा धर्मि स्यात् नित्य आत्मा मुनीश्वराः।**

**( व्याख्या )** हे मुनीश्वराः। तत् पूर्वोक्तं ज्ञातृत्वम्। अपिश्चार्थे अवतारिकोक्तशंकाद्योतकः। नित्यं कालानवच्छिन्नं नित्यवस्तुनो धर्मत्वात् आत्मत्वादिवदिति। अत्र श्रुतिः। न च शब्दादौ व्यभिचारः। नित्यत्वेनोभयवादिसिद्धवस्तुधर्मत्वस्यैव विवक्षितत्वात्। आकाशनित्यत्वस्य चोभयवाद्यसिद्धत्वात्। अप्रयोजकत्वमाशंक्याह नानित्येति। नित्य आत्मा धर्मी अनित्यधर्मा न स्यात् न सम्भवतीत्यर्थः। 'उपयन्नपयंश्चापि धर्मिणं विकरोति हि' इति न्यायेन धर्मस्य नाशे धर्मिणो विकारित्वप्रसङ्गः। अनित्यधर्मेत्ययं धर्मादनिच् केवलादित्यनिच्प्रत्ययान्तः। एवं चेन्द्रियाद्यन्वयव्यतिरेकानुविधानं चाभिव्यञ्जकत्वेनान्यथाप्युपपद्यत इति भावः।

**( वृत्तिः )** अर्थः सुव्यक्तः।

**( व्याख्या )** ननु तथापि ज्ञानमव्याप्यवृत्त्यैव शरीरावच्छिन्नप्रदेश एवोपलभ्यमानत्वादिति पुनरपि तन्मतमाशंक्याह–

**( वृत्तिः )** नैकदेशवर्तित्वं चेत्याह –

**तच्चेह विभुधर्मत्वात् न च क्वाचित्कमिष्यते।।१०१।।**

**नित्यत्वमिव**

**( व्याख्या )** तच्च। चशब्दः शंकाद्योतकः। तच्च ज्ञातृत्वं क्वाचित्कं न विभुधर्मत्वात् तद्गतनित्यत्वमिव। अत्रापि विभुत्वेनोभयवादिसिद्धधर्मत्वस्य विवक्षितत्वात् तन्मते न शब्दादौ व्यभिचारः।

उपसंहरति –

**तेनात्मा स्थितः सर्वार्थदृक्क्रियः।**

**( व्याख्या )** सर्वार्थसम्बन्धिनी व्यापिका दृक्क्रिया यस्य स तथोक्तः।

**( वृत्तिः )** तच्च ज्ञातृत्वमपि क्वाचित्कमैकदेशिकं नेष्यते। तस्य विभुधर्मत्वात्। नित्यत्वमपि क्वाचित्कवस्तुनि न सम्भवतीति शेषः। तेनात्मा स्थितः सर्वार्थदृक्क्रियः। मुक्तेरमुक्तेः क्रमतो व्यक्ताव्यक्तशिवतायुत स्थितः।

**( व्याख्या )** अप्रयोजकत्वमाशंक्य हेतूच्छित्तिरेव विपक्षे बाधकतर्क इत्याह–

**( वृत्तिः )** अन्यथा बाधास्तीति च प्रदर्शयन् विषयापेक्षत्वमौपाधिकमिति वदतां वादः सोपहास इति सूचयन् नैसर्गिकस्वरूपतया सुषुप्त्याद्यवस्थासु चान्तरविषयाद्यपेक्षत्वं चाह–

**ज्ञातृत्वमपि यद्यस्य क्वाचित्कं विभुता कुतः।।१०२।।**

**( व्याख्या )** ज्ञातृत्वं यदि क्वाचित्कं स्यात् तदा अस्यापि आत्मनोऽपि कुतो विभुता। एवं चात्मनो विभुत्वाभावे विभुधर्मत्वलक्षणो हेतुरुच्छिद्येतेति भावः।

आपाद्यापादकयोर्वैयधिकरण्यमाशंक्य धर्मिसमानव्याप्तिकत्वं धर्मस्याह–

**धर्मिणो यावती व्याप्तिः तावद्धर्मस्य च स्थितिः।**

**( व्याख्या )** धर्मिणो यावद्देशसम्बन्धिनी व्याप्तिः धर्मस्य च स्थितिर्व्याप्तिः तावद्देशसम्बन्धिनीत्यर्थः।

तत्र दृष्टान्तमाह–

**यथा पटस्थितं शौक्ल्यं पटं व्याप्याखिलं स्थितम्।।१०३।।**

**( व्याख्या )** अखिलमित्यवयवकात्स्न्याभिप्रायेण। तेन सर्वावयवावच्छेदेन शौकल्यं यथा पटं व्याप्य वर्तते।

एवं ज्ञातृत्वस्य साधितं नित्यत्वं व्यापकत्वं चोपसंहरति–

**स्थितं व्याप्यैवमात्मानं ज्ञातृत्वमपि सर्वदा।**

**( व्याख्या )** सर्वदेत्यनेन नित्यत्वस्यापि उपसंहारः। संयोगविभागादिषु व्यभिचारः हेतौ तद्व्यतिरिक्तत्वे सतीति विशेषणेन वा तेषां व्याप्यवृत्तित्वाद्यङ्गीकारेण वा यथासिद्धान्तं परिहरणीयः।

अत्र कश्चिन्मलाभाववादी नित्यस्यापि ज्ञानस्य विषयौन्मुख्यनियमा नास्ति सुषुप्तिप्रलयादौ विषयाभावेऽपि ज्ञानसत्वादिति मन्यते। तन्मतं निराकरोति–

**न च निर्विषयं ज्ञानं**

**( व्याख्या )** तत्र हेतुः–

**परापेक्षं स्वरूपतः।।१०४।।**

**( व्याख्या )** स्वभावतः परापेक्षं विषयप्रकाशनस्वभावत्वात्। ज्ञानस्य निर्विषयत्वे स्वभावव्याहतेः। न च सुषुप्तिप्रलयादौ विषयासम्भवः। आत्मस्वरूपस्यैव तत्रापि विषयत्व–सम्भवादिति भावः। इदं चोत्तरत्र प्रपञ्चयिष्यते। अत्र रामानुजादयः[1] आत्मनः वालाग्रशतभागपरिमाणबोधकश्रुत्यनुसारेण परलोकयात्राप्रतिपादकश्रुत्यनुसारेण चाणु–परिमाण एवात्मेत्याहुः। कौलार्हतादयस्तु परलोकयात्राबोधकश्रुत्यनुसारेण च देह–व्यापकज्ञानसुखादितत्कार्यदर्शनाच्च देहपरिमाण एवात्मा। न चैवं कर्मवशेन पुत्तिकादिशरीरस्थस्य तादृशसूक्ष्मपरिमाणस्यात्मनः पुनः कर्मवशेन गजादिदेहप्राप्तौ पूर्ववत् पुत्तिकापरिमाणत्वे गज शरीरव्यापितत्कार्यानुपपत्तितादवस्थ्यमिति वाच्यम्।

**( वृत्तिः )** यदिज्ञातृत्वमपि धर्मरूपमपि क्वाचित्कं तद्धर्मलक्षणस्वलक्षणस्यास्यात्मनो धर्मिणो विभुता कुत इत्यन्वयः। ज्ञानं धर्मलक्षणं न च निर्विषं स्वरूपतः अनुपाधितः धर्मिलक्षणं ज्ञानं स्वापेक्षितमिव परापेक्षं विषयापेक्षं तदेव शक्तिः। पुनस्तदेव स्वापेक्षं सच्छक्तिमानिति प्रमाणपटले स्पष्टयिष्यामः। स्पष्टस्तदितरपदार्थः।

**( व्याख्या )** एतदनुसारेण तस्य संकोचविकासाभ्युपगमादित्याहुः। तन्मतमवलम्ब्य पूर्वोक्तहेतोरसिद्धिमाशंकन्ते ऋषयः–

**( वृत्तिः )** तदित्थं स्वच्छायाकुक्षिनिक्षिप्ताधुनिकशैवैकदेशिकमतवेदान्तवादिमतनिराकृतौ सत्यां प्रासङ्गिकदिगम्बरपाञ्चरात्रदृशा ऋषयश्चोदयन्ति –

**व्यापकत्वे ह्यणोः सिद्धे धर्मव्यापकता भवेत्।**
**अन्यत्रानुपलब्धस्य देहाद्व्यापकता कुतः।।१०५।।**

**( व्याख्या )** अणोरात्मनो व्यापकत्वे सिद्धे व्यापकधर्मत्वेन हेतुना तद्धर्मस्य ज्ञातृत्वस्य व्यापकता भवेत्। तस्यात्मनो व्यापकता कुतः। न कुतोऽपीत्यर्थः। तत्र हेतुः

---

१. रामानुजादयः] मु केचिद्वैष्णवादयः–क१;

देहादन्यत्रानुपलब्धस्येति। अन्यत्र बहिः प्रदेशे अनुपलब्धस्येति हेतुगर्भं विशेषणम्। अनुपलभ्यमानत्वादित्यर्थः।

**( वृत्तिः )** देहादन्यत्रेत्यनुषङ्गः। सुव्यक्तः श्लोकार्थः।

**( व्याख्या )** तन्मतद्वयं निराकरोति ईश्वरः–

**( वृत्तिः )** ईश्वरः अविभुत्वसिद्धये प्रयुक्ताद्देहादन्यत्रानुपलब्धेरिति हेतोर्विभुत्व-साधनहेतुनैवासिद्धिं प्रदर्शयति –

**न देहपरिमाणत्वमणूनामुपपद्यते।**

**( व्याख्या )** अणूनामात्मनां देहसमानपरिमाणत्वम् इदं चाणुपरिमाणस्यापि उपलक्षणं वक्ष्यमाणहेतुसाम्यात् नोपपद्यत इति।

तत्र हेतुमाह–

**तस्माद्देहादतोऽन्यत्र स्थितार्थग्राहकत्वतः।।१०६।।**

**( व्याख्या )** अतोऽस्माद्देहादन्यत्र बहिः प्रदेशस्थितस्यार्थस्य ध्रुवमण्डलादेः ग्राहकत्वात्। न चेदमसिद्धम्। ध्रुवमहं पश्यामीत्यनुभवस्य सर्वलोकप्रसिद्धत्वादित्याह तस्मादिति। अयं भावः। उक्तानुभवेन ध्रुवग्रहणेनानुभवस्य ध्रुवसम्बन्धो वक्तव्यः स चात्रस्थस्य प्रकाशस्य स्वरूपलक्षणसम्बन्धो न सम्भवति। प्रकाशस्य सौरालोकादेः द्रव्यग्रहणे द्रव्यसंयुक्तस्यैव ग्राहकत्वदर्शनात्। एवं च चिच्छक्तेरालोकादिवत् ध्रुवादिविषयसंयोगो वाच्यः। न चाश्रयं विना तस्या आत्मधर्मभूताया व्यापनं संभवतीत्यात्मनोऽपि तत्र व्याप्तिर्वाच्येति न देहादिपरिमाणत्वमात्मन इति भावः। किंचाणुपरिमाणत्वे देहव्यापिसुखादिकं नोपलभ्येत। गुणस्य गुणिनं विनाऽन्यत्रावस्थानायोगात्। न प्रभादिवत् गुण्यधिकदेशेऽपि वर्तनं प्रसरणशीलत्वादुपपद्यत इति वाच्यम्। प्रभायां निरूपाधिकक्रियावत्वादिदर्शनेन द्रव्यान्तरत्वेन दीपादिगुणत्वाभावात्। न चैवमपि गन्धादेः गुणस्येवास्यापि गुणिदेशाधिकदेशवृत्तित्वमुपपद्यत इति वाच्यम्। तत्रापि केतक्यादिस्थितस्यैव गन्धस्यान्यत्र व्यापिनो नोपलब्धिः। किन्तु अनुकूलवायुसमानीततदवयवनिष्ठगन्धस्यैव। अत एव तदवयवानयनाय अनुकूलवाय्वपेक्षा उपपद्यते। न चैवं केतक्यादिन्यूनताद्यापत्तिः। तत्तद्भोजकादृष्टवशेनावयवान्तरानुप्रवेशात्। किंच देहपरिमाणत्वे आत्मनः संकोचविकासवत्वे च सावयवत्वेनानित्यत्वात् कृतहाना-कृताभ्यागमापत्तिः। एवं चोत्क्रान्तिगत्यादिकं पुर्यष्टकाद्युपाध्यपेक्षया नेयम्। वालाग्रश्रुतिरपि आत्मनः सूक्ष्मबुद्धिग्राह्यत्वाभिप्राया।

नन्वन्यत्रार्थग्राहकत्वमात्रेण नात्मनो विभुत्वम्। अत्र पूर्वोक्तमतद्वयेऽप्यात्मन एव तत्र ग मनसम्भवेनार्थग्राहकत्वोपपत्तेरित्याशंक्याह–

**( वृत्तिः )** ध्रुवमहं जानामीति तत्र स्थितार्थवेतृत्वात् हेत्वन्तरं प्रयुनक्ति –

**किं चाभिव्यञ्जको यत्र यत्र देहेन्द्रियादिकम्।**
**तत्र सर्वत्र तत्कार्यदृष्टेर्व्यापकताऽऽत्मनः।।१०७।।**

**(व्याख्या)** यत्राभिव्यञ्जकः आलोकादिसम्बन्धः ध्रुवादि विषयः यत्र देहन्द्रियादिकं तत्र सर्वत्रोभयत्रापि युगपत् तत्कार्यदृष्टेः स्थूलोऽहमिदानीं ध्रुवं पश्यामीत्यनुभवात्। तथा च युगपदेव ध्रुवमण्डले देहे चात्मनोऽवस्थानं वाच्यम्। तच्च पक्षद्वयेऽपि न सम्भवतीत्याह व्यापकतेति।

**(वृत्तिः)** किंच यथा यत्र प्रमाणताल्वोष्ठपुटयोगादिकमभिव्यञ्जकः तत्र स्थूलध्वन्यात्मस्वकार्यदृष्टेराकाशस्य व्यापकता तथा यत्र देहेन्द्रियादिकमभिव्यञ्जकः तत्र सर्वत्र तत्कार्यदृष्टेस्तदात्मार्थक्रियालक्षणचिदभिव्यक्तिदर्शनात्।

**(व्याख्या)** नन्वेतावता ध्रुवमण्डलादिपर्यन्तं व्यापकत्वमस्तु अतः परं विभुवीक्षणमित्याशंक्य वैभवे अनुमानमाह। पूर्वोक्तं च सर्वं परमतनिरासमात्राभिप्रायेण। एवं च समनन्तरग्रन्थे व्यापकताशब्दोऽपि देहसमानपरिमाणत्वाद्यभावपरः।

**(वृत्तिः)** व्यापकताम्ननस्सिध्यति युक्त्यन्तरेण पुनः समुद्धरति –

**व्यापकोऽयममूर्तत्वात् यथा व्योम ततस्तथा।**

**(व्याख्या)** अयमात्मा व्यापकः परममहत्परिमाणयोगी अमूर्तत्वात् मूर्तत्वं परिच्छिन्नपरिमाणयोगित्वं तच्छून्यद्रव्यत्वादिति हेत्वर्थः। न चैवं साध्यवद्धेतोरपि सन्दिग्धत्वेन साध्यसमता। उक्तयुक्त्यादिभिः कृतहानाकृताभ्यागमप्रसङ्गेन च परिच्छिन्नपरिमाणाभाववत्वस्य निश्चयात्। यद्यपि परं प्रत्यसिद्धो हेतुः तथापि प्रसाध्याङ्गकमिदमनुमानम्। व्योमेति लोकप्रतीत्यभिप्रायेण दृष्टान्तः। यद्वात्र व्योमशब्देन परव्योमशब्दवाच्य ईश्वर एवोच्यत इति। यद्वा मूर्तशब्देन परिच्छिन्नपरिमाणयोगिनः सर्वे जडा लक्ष्यन्ते। तद्भिन्नत्वादजडत्वादिन्यर्थः। अतो न परं प्रत्यसिद्ध्यादिशंकावकाशः। अत्र पक्षे पूर्वोक्तयुक्त्या ईश्वर एव दृष्टान्तः। एवं च हेत्वसिद्ध्यभावात् सिद्धमात्मनो व्यापकत्वम्।

अत एव चिच्छक्तेः व्यापकत्वमित्याह–

**तद्धर्मभूतं ज्ञानं च व्यापकं विषयोन्मुखम्।।१०८।।**

**(व्याख्या)** तद्धर्मभूतं ज्ञानं च व्यापकम्। इदानीं पूर्वोक्तविषयौन्मुख्यं पराभिमतहेतुनिरासपूर्वकं स्थापयितुमुपक्षिपति विषयोन्मुखमिति।

**(वृत्तिः)** व्योमेत्यन्तार्थः स्पष्टः। तथा चायमित्युपनयमध्याहृत्य ततस्तथेति निगमनरूपानुषङ्गः मध्यमदीपकता। पुनस्ततस्ततस्तस्मादमूर्तत्वात्तथात्मेव तद्धर्मभूतं विषयोन्मुखं ज्ञानं च व्यापकमिति विवेकः। नन्वाकाशस्य स्वकार्यावधिका हि व्यापकता। सत्यम्। अत्रापि मेयार्थमात्रवेदनमस्य कार्यमिति तदवधिका सा साध्यतामिदानीं मलावरुद्धत्वान्न दृश्यत इत्यनुपदमेव वक्ष्यतीति न ह्यसमञ्जसम्। अथवा व्योमशब्देन बिन्दुः शिवो वा विवक्षितः।

चिद्रूपत्वाद्यथेश्वर इति वा विभुत्वसिद्धिः। ननु एकेन व्याप्ते जगति तदितरस्यावस्थानं न संगच्छते। पुनः कर्मसंस्कारश्च स्यात्। तदयुक्तम्। शीतधूमालोकादिभिरनैकान्तिकत्वात्। चिकीर्षाभिदावताममूर्तानां कर्मसांकर्यं यथा न भवति तथा असंस्पृश्यावस्थानं चोपपद्यत इति न काचित् क्षतिः।

**( व्याख्या )** तदेव पराभिमतं हेतुमुपन्यस्य दूषयति –

**( वृत्तिः )** प्रासङ्गिकदिगम्बरान् पराकृत्य वेदान्तविन्निराकृतिमुपसंहरति[१] –

**यन्नित्यरूपं विज्ञानं तच्च निर्विषयात्मकम्।**
**पक्षोऽध्यक्षनिरस्तोऽयं स्वपरग्राहकत्वतः।।१०९।।**
**अणोः प्रत्यात्मसिद्धत्वान्नानुमाऽध्यक्षबाधिका।**

**( व्याख्या )** इदं च चिच्छक्तिरूपं ज्ञानं निर्विषयं विषयानुन्मुखं नित्यज्ञानत्वादित्यनुमानं हृदि निधाय उदाहरणमाह यन्नित्यरूपमिति। यद्विज्ञानं नित्यरूपं तत् निर्विषयात्मकं विषयानुन्मुखमित्यर्थः। अत्र स्वरूपचैतन्यवदिति शेषः। इत्ययं पक्षः इदमनुमानमित्यर्थः। अध्यक्षनिरस्तः घटमहं जानामीति प्रत्यक्षबाधित इत्यर्थः। तदेव प्रत्यक्षप्रसिद्धं इत्याशंक्याह स्वपरग्राहकत्वतः इति। अणोः स्वपरग्राहकत्वेन प्रत्यक्षसिद्धत्वात्[२] प्रतिपुरुषम् अनुभूयमानत्वादित्यर्थः। उक्तानुमानमेव प्रत्यक्षस्य बाधकं किं न स्यादित्यत आह नानुमाऽध्यक्षबाधिका। सर्वप्रमाणोपजीव्यत्वेन प्रत्यक्षप्रमाणस्य प्रबलत्वात्। अन्यथा अग्निशैत्यानुमानमपि वह्न्यौष्ण्यप्रत्यक्षस्य बाधकं स्यादिति भावः।

ननु घटमहं जानामीत्यनेन चिच्छक्तेः विषयौन्मुख्यं न गृह्यते। किन्तु अध्यवसायात्मकबुद्धिवृत्तेरेव। अतो नानुमानस्य प्रत्यक्षेण बाधः भिन्नविषयत्वादित्यत आह–

**नेह ग्राहकता बुद्धेः साधितत्वाज्जडत्वतः।।११०।।**

**( व्याख्या )** बुद्धेः ग्राहकता न विषयोन्मुखग्रहणकर्तृता न जडत्वतः जडत्वादिति साधितत्वात्। न बौद्धमेतत् ज्ञातृत्वमित्यादिनेत्यर्थः। तथा च घटमहं जानामीति प्रत्यक्षस्य चिच्छक्तिविषयौन्मुख्यविषयत्वमेव न बुद्धिवृत्तिविषयौन्मुख्यविषयत्वमिति समानविषयत्वात् प्रत्यक्षेणानुमानबाध इति भावः।

**( वृत्तिः )** यन्नित्यरूपं विज्ञानं यद्विशेषेण विषयं ज्ञायत इति विज्ञानम्। तच्च माता मे वन्ध्येतिवन्निर्विषयात्मकमित्युक्तोऽयं पक्षो वेदान्तवित्परिगृहीतः। अणोरात्मन स्वपरग्राहकत्वतः विषयसंवेदनलक्षणस्वसंवेदनलक्षणधुरन्धरतदितरलक्षणविधुरस्वरूपतया स्वानुभूतिलक्षणेन प्रत्यक्षेण प्रत्यात्मसिद्धत्वात्। कामिकेऽपि। तदुक्तं स्वपरज्ञातृभावत इति। अत्रायमर्थः। चिद्रूपमात्मनो रूपं दृक्क्रियागुणलक्षितमिति पराख्यायामुक्तत्वात्। स्ववेदने

१. ग्रन्थः पुनरारभते।

२. प्रत्यक्षसिद्धत्वात्] क१; प्रत्यात्मसिद्धत्वात्-मु

चिद्रूपमात्रं प्रमाता स्वग्राहकत्वं प्रमुखपरवेदने चिद्रूपसहजं स्वग्राहकत्वं प्रमाता परग्राहकत्वं प्रमाणमित्यध्यक्षनिरस्तम्। प्रत्यक्षप्रतिक्षिप्तः पाशाद्विमुक्तावधिके अनादिपाशकदर्थितत्ववासनाभासवशात् स्तम्भितशक्तिके तुर्यके पौरुषिकफले तदेतज्ज्ञप्तिमात्रतयोपासनीयः। ततः शिवत्वेनेति शिवशास्त्रविदः।

तदुक्तं सिद्धान्तसारावल्याम्–

तुर्यकं देहाक्षोपरतौ स्वचिन्मतिरथातीतं शिवत्वोदय इति।

स्वच्छन्देपि –

पाशावलोकनं त्यक्त्वा स्वरूपालोकनं हि यत्।
आत्मव्याप्तिर्भवेदेषा शिवव्याप्तिरथोऽन्यथा।।
सर्वज्ञादिगुणार्था व्यापकान् भावयेद्यदा।
शिवव्याप्तिर्भवेदेषा चैतन्ये हेतुरूपिणि।इति।।

ननु सर्वज्ञतादिकमीश्वरसमावस्थाजन्यत्वात् सोपाधिकम्। तदयुक्तम्। न परन्तत्र न तत्र व्यक्तम्। सर्वथेति किन्तु स्थूलं सविकल्पं व्यक्तं तद्व्यक्त्यन्तरबाधितव्यमिति स्वीकृतत्वात्। ननु चिन्मात्रात्मसिद्धामनुमानमस्ति[1]। तदयुक्तम्। यतो नानुमाऽध्यक्षबाधिका। नानुमानं प्रत्यक्षबाधकं परसंवेतृतया स्वानुभूतिप्रत्यक्षसिद्धसत्ताकस्य नानुमानादिबाधाऽस्ति कथंचिदपि। यदाहुः–

**अनुभूतौ प्रमाणानां परनिष्ठा समाप्यते।**
**स्वतस्तयैव या ज्ञप्तिः किं तत्रान्यैः प्रमान्तरैः। इति।।**

नेहेत्याद्यर्थः सुबोधः।

**(व्याख्या)** ननु चिच्छक्तेरात्मधर्मत्वेऽपि शिवस्य परिग्रहशक्तिवदत्यन्तभिन्नत्वेन संयोगितया तद्धर्मत्वे आत्मनोऽपि बुद्धिवज्जडत्वापत्तिः तादृशसम्बन्धस्य घटादिसाधारणतया चेतनत्वाप्रयोजकादित्याशंक्याह–

**(वृत्तिः)** ननु विविक्ततया स्वसंवेदनलक्षणपरसंवेतृव्यतिरिक्ततया परसंवेदनं सुवेद्यं नेत्याह –

**किंचैतद् ग्राहकत्वं च न भेदादात्मनां स्थितम्।**
**स्वरूपं तु ततस्तेषां ग्राहकत्वेन संस्थिते:।।१११।।**

**(व्याख्या)** एतद्ग्राहकत्वं च ज्ञानशक्तिश्च आत्मनां भेदात् भेदेन अत्यन्तभेदेन परिग्रहशक्तिवत् न स्थितम्। नानुभूतं प्रमाणेन स्वरूपमेव तादात्म्यसम्बन्धेन संबद्धमेव। तदुक्तमागमे–

---

१. चिन्मात्रात्मसिद्धावनुमानमस्ति] सं० पाठः ; चिन्मात्रात्मसिद्धामनुमानमस्ति–ज१; चिन्मात्रात्मसिद्धानुमानजत्वात् सोपाधिकम्–ज२; चिन्मात्रार्थसिद्धावनुमानमस्ति–ज३

सम्बन्धः शक्तिमच्छक्त्योस्तादात्म्यं स्यादिति स्थितिः। इति। न केवलं भेदेन प्रमाणासिद्धत्वमात्रेण तादात्म्यम्। अपितु रूपादिवन्नियमेन तद्वत्वेनैवानुभवादित्याह सर्वदाग्राहकत्वेनैव संस्थितेरनुभवात्। घटं जानामीत्येव आत्मनः सदानुभवादिति भावः। अनेन चिच्छक्तेः चेतनतादात्म्यांशमादाय चेतनत्वात् यदुक्तं परैश्चिच्छक्तेरचेतनत्वे सत्यनेकत्वेन कार्यत्वप्रसङ्ग इति तदापि निरस्तम्। तदुक्तं मृगेन्द्रे–

शक्तिर्नाचेतना चितः। इति। ननु ग्राहकत्वानुभवात् आत्मनो ज्ञानाद् भेद उक्तः तत्र सत्यपि तादात्म्ये मृद्घटयोरिवांशभेदेनापि भेदः प्रदर्शनीय इत्याशंक्याग्नौ परप्रकाशकत्वशक्तिरूप शुक्लभास्वररूपवत् सैन्धवघने लवणरसवच्च व्यापितया आत्मनां स्थितैव शक्तिः। तथा चाव्याप्तांशस्याभावान्नांशभेदेन तत्प्रदर्शनसम्भवः। ज्ञानाद्भेदे च प्रमाणमुक्तमेव।

**( वृत्तिः )** किंच पुनरात्मनामुक्तलक्षणवेतघ्णामेतत्ग्राहकत्वं परसंवेदनं न भेदात् स्थितं किन्तु ततस्तेषां स्वरूपं यतो ग्राहकत्वेन वेतृभावेनापृथक्सिद्धतया तत्परोन्मुखसंविदः संस्थितेः। तथानुभूयत इत्याशयः।

**( व्याख्या )** ईदृशस्य उक्तविधया खण्डने सहजशक्तिमतां वह्न्यादीनामपि उच्छित्तिः स्यादित्यभिप्रायेणाह–

**( वृत्तिः )** तदुदाहृत्योपसंहरति –

**न ह्यंशेन पदार्थानां विचारः शोभते क्वचित्।**

**( व्याख्या )** पदार्थानां सहजशक्तिमतां वह्न्यादीनाम् अंशेन अंशभेदमादाय भेदविचारः न क्वचिदपि शोभते। वह्न्यादेरप्युच्छित्तिप्रसङ्गादिति भावः।

सामान्यत उक्तमेव विशिष्य दर्शयति–

**अग्निः शक्तिं विना कीदृगितिचिन्ता न कुत्रचित्।।११२।।**

**( व्याख्या )** अग्निरग्न्यंशः शक्तिं विना शुक्लभास्वरत्वादिप्रकाशादिशक्त्यंशं विना कीदृगिति चिन्ता कुत्रापि नास्ति। उभयोः प्रमाणसिद्धत्वेन निष्फलत्वात् खण्डनमात्रपर्यवसितस्य उक्तविचारस्येति भावः।

इयता प्रबन्धेनोपपादितं ज्ञानस्य नित्यत्वं व्यापित्वं विषयौन्मुख्यत्वं च उपसंहरति–

**स्वपरग्राहकस्तस्मात् सर्वदाऽऽत्मा व्यवस्थितः।**

**( व्याख्या )** तस्मात् उक्तयुक्तिभिः सर्वदा स्वपरग्राहको व्यवस्थितः निश्चितः। अत्र व्यापिज्ञानक्रियाशक्तिकश्चेत्यध्याहर्तव्यम्। अत्र स्वपरग्राहक इत्यनेन विषयमौन्मुख्यस्य सर्वदेत्यनेन नित्यत्वस्याध्याहृतेन व्यापित्वस्य चोपसंहारो द्रष्टव्यः।

**( वृत्तिः )** अर्थः सुव्यक्तः। अयमाशयः। अग्नेर्दाहप्रकाशलक्षणशक्तिं विनाऽग्निः कीदृगीदृगिति यथा न भवति हि चिन्ता पर्यालोचना तथाऽऽत्मनो दृक्क्रियालक्षणशक्तिं विनाऽऽत्मा

कीदृगीदृगिति न भवति। हि यैव हि परसंवित्तिः शक्तिरूपा परस्वघटितप्रकाशदीपदीप्तिवत् सैव हि स्वसंवित्तिः सती स्वसंवित्ति सिद्धा।

**( व्याख्या )** त्रितयसाधनस्य फलमाह–

**( वृत्तिः )** शक्तिमदात्मनो रूपमित्यपृथक्सिद्धत्वात् पशुपदार्थान्तर्भूततयोद्दिष्टं मलं परिक्षितुं तमुपक्षिपति –

**तद्वत् स्वतोऽमी सर्वज्ञाः**

**( व्याख्या )** अमी अणवः स्वतः सर्वज्ञाः नित्यव्यापकविषयोन्मुखज्ञानशक्तिमत्वा–दिति पूर्वसूत्रोपसंहृतो हेतुर्द्रष्टव्यः। अत्राप्रकृतोऽपि शिवः शास्त्रप्रसिद्धत्वादौचित्याच्च तच्छब्देन दृष्टान्ततया परामृश्यते। यद्वा तद्वत्स्वत इत्येकं पदम्। तद्वती व्यापकत्वादिमती स्वीया ज्ञानक्रियाशक्तिः येषां ते तद्वत्स्वाः। भावप्रधानो निर्देशः। तत इति हेतुर्द्रष्टव्यः। अतो न हेत्वनुषङ्गः न वा तच्छब्दस्याप्रकृतार्थता। अस्मिन् व्याख्याने शिववदिति दृष्टान्तोऽध्याहर्तव्यः।

यदर्थं नित्यं सार्वज्ञ्यं साधितं तदाह–

**किंचिज्ज्ञत्वं तु कारणात्। इति।।११३।।**

**( व्याख्या )** एवं च स्वतः सर्वज्ञस्यानुभूयमानं किंचिज्ज्ञत्वमावारकादेव सिध्यतीत्यावारकसिद्धिरिति भावः। तुशब्द एवकारार्थः। स च भिन्नक्रमः कारणादेव आवारकादेवेत्यर्थः अत्र श्रुतिः। अत्रानुमानप्रयोगश्चोत्तरत्र वक्ष्यते।

तच्चावारकं वक्ष्यमाणपरिशेषान्मल इत्याह–

**निरुद्धं येन सार्वज्ञ्यं स मलः परिपठ्यते।**

**( व्याख्या )** स सार्वज्ञ्यनिरोधको मलः ज्ञानाभावादिलक्षणः परिपठ्यते। आगमेष्विति शेषः।

**( वृत्तिः )** यथा शिवः सर्वज्ञस्तद्वत् स्वता उपर्युपमर्दनकर्तृनैसर्गिकतया अमी ह्यात्मानः सर्वज्ञाः सर्वस्यार्थ तस्या नारतत्वेन सत्तामात्रतया स्वसंवेद्यपरसंवित्समवेतिनः सन्तः स्वानुभूतिवृत्तिलक्षणस्वसंवेत्तारः। तदुक्तं रत्नत्रये–

परसंवित्स्वरूपायाः शक्तेरसति बन्धने।<br>
परमात्रं प्रकाशेत मुक्ताणूनामनारतः।।<br>
ततो विमुक्ताः सर्वज्ञा न तु चिन्मात्रवेदिनः।<br>
यो यदा वर्तते भावो भूतो भावी च तत्तदा।।<br>
यथार्थस्थिति गृह्णाति स्वसंवेद्या चिदव्यया। इति।

तर्हि कथमिदानीं भोग्यतया किञ्चिज्ज्ञत्वं दृश्यते। सत्यम्। किञ्चिज्ज्ञत्वं त्वधुना ज्ञेयत्वावच्छिन्नज्ञेयव्याप्तिविधुर–भोग्यतया वेदनं तु कारणात्। कलोपबृंहितबलवत्

स्वविरुद्धवस्त्वन्तरनिमित्तान्न स्वत इत्यनुमीयते। निरुद्धमित्याद्यर्थः स्पष्टः। मलिनीकरोति ज्ञानक्रिये आच्छादयतीति मलः सर्वज्ञस्येदं सार्वज्ञ्यं सर्वज्ञत्वमित्यर्थः।

**( व्याख्या )** नन्वस्त्वेतावता किंचिदावरकं तस्य ज्ञानाभावादिविलक्षणत्वे किं प्रमाणमित्यत आह–

**( वृत्तिः )** स मलस्तु यथावद्ब्रह्मज्ञानविरोधिगुण इति वेदान्तविदः। तान् प्रतिक्षिपति–

**तच्च द्रव्यं यतः कर्मनिवर्त्यं पटलादिवत्।।११४।।**

**( व्याख्या )** तच्चावरकं द्रव्यं भवितुमर्हति कर्मनिवर्त्यत्वात् भिषग्व्यापार–निवर्त्यचक्षुःपटलवत्। न च हेतोरसिद्धिः।

दीक्षैव मोचयेत् पाशानित्यादिश्रवणात्।

अयं च गङ्गास्नानादिक्रियानिवर्त्यपापादिषु व्यभिचारीत्यस्वरसादाह–

**किं च द्रव्यं मलोऽनेकशक्तिमत्वाद्यथाऽनलः।**

**( व्याख्या )** मलो द्रव्यमनेकशक्तिमत्वात् यथाऽनलः। न च हेतोरसिद्धिः दीक्षया मलस्यैव निवृत्तावेकमुक्तौ सर्वमुक्तिप्रसङ्गेन तच्छक्तिनिवृत्तिरेव वाच्या। तस्या अपि शक्तेरेकत्वे उक्तातिप्रसङ्गतादवस्थ्यात् प्रतिपुरुषं भिन्नभिन्नावरकाशक्तेः स्वीकार्यत्वात्। तदुक्तं मृगेन्द्रे–

प्रत्यात्मस्थस्वकालान्तापायिशक्तिसमूहवत्। इति। प्रकाशजननशक्तियुक्ते भास्वररूपे व्यभिचारवारणायानेकपदम्। हेतुद्वयं च स्वमताभिप्रायेण। यद्वा वक्ष्यमाणव्यतिरेक्यनुमाने ज्ञानाभावादिनार्थान्तरं निराकरिष्यन् तत्र प्रथमं शास्त्रार्थपर्यालोचनया अर्थान्तरं निराकरोति तच्च द्रव्यमित्यारभ्य यथालन इत्यन्तेन। तस्य चायमर्थः। उक्तहेतुद्वयस्य प्रायशो द्रव्येषु दर्शनादावारकस्य नाभावव्यतिरेकः सम्भाव्यत इति।

**( वृत्तिः )** तच्च मलसंज्ञितवस्तु च द्रव्यं यतः कर्मनिवर्त्यं दीक्षात्मक्रियाप्रोत्सारितव्यवम्। तस्माद्धेतोः पटलादिवत् पटलादिकं तु चक्षुर्वैद्यव्यापारादिना निवर्त्यं भूत्वा न हि द्रव्यत्वं व्यभिचरति। नन्वस्मद्दृशा ज्ञानमात्रनिवर्त्यमिति हेतुरसिद्धोऽयम्। पुनरतः प्रतिबन्धकत्वे सति द्रव्यत्वात् कर्मनिवर्त्यं कर्मनिवर्त्यत्वाद्द्रव्यमितीतरेतराश्रयता च। सत्यम्। अत एव तदसिद्धिनिरसनार्थं हेत्वन्तरं प्रयुनक्ति। किंच इतोऽपि मलो द्रव्यमनेकशक्तिमत्वात् अनन्तपुरुषचिच्छक्तितिरस्करणान्यथानुपपत्त्या पुनरेकमोक्षे सर्वमोक्षादर्शनाद्धेतोः स्वाधिकारान्तापगन्तरि सति मलेमलस्यानेकत्वे सत्यप्यचैतन्ये सत्यनेकत्वादनित्यमित्यादिकत्वसिद्धेः। स मलः कारणमृग्य इत्यनवस्था स्यात्। यदि स तु निर्हेतुकः पुनर्मुक्तानपि रुणद्धि। तदुक्तं मृगेन्द्रे–

तदनादिस्थमर्वाग्वा तद्धेतुस्ततः सोऽन्यथा।
रुणद्धि मुक्तानेवं चेन्मोक्षे यत्नस्ततो मृषा। इति।।

तदेतदन्यथानुपपत्तेश्च सिद्धं ह्यनन्तस्वाधिकारान्तापगन्तृस्वभेदशक्तित्वम्। यथाऽनलः अनलस्य हि अनन्तबोध्यशोष्यदाह्यप्रकाश्यविषयस्वान्तर्भेदभिन्नशक्तिकः शक्तिकार्यद्वारा पगम्यते। सोऽनलो द्रव्यं च तासां मलशक्तीनां चिदनुग्राहार्थं तत्परिणामार्थं रोधकत्वलक्षणधर्मानुवर्तनात् शिवशक्तिरपि चिदनुग्रहार्थं अचिदनुग्रहप्रवृत्ता अपि तिरोधायिकेति पाशतयोपचर्यते। सैव यदेशानमन्त्रलिंगसमुद्देशान्या शक्त्या स्वकृतपाकमलानां कैवल्याभिमुखं करोति तदा चिदनुग्राहिका भूत्वा तिष्ठति। तदुक्तं मृगेन्द्रे–

तासां महेश्वरी शक्तिः सर्वानुग्राहिका शिवा।
धर्मानुवर्तनादेव पाश इत्युपचर्यते।।
परिणामयन्ती ताश्च रोधान्तं कार्कचित्त्विषा।
यदोन्मीलनमाधत्ते तदाऽनुग्राहिकोच्यते।। इति।

**( व्याख्या )** इदानीमावारकत्वमप्यभावादीनां न सम्भवतीति न तैरर्थान्तरमिति विकल्पपूर्वकमाह–

**( वृत्तिः )** स्वीकृत्य विकल्प्य दूषयति –

**तदिहाज्ञानमात्रं चेद् ज्ञानाभावः किमज्ञता।।११५।।**
**अन्यथा प्रतिभासो वा गतिरन्या न विद्यते।**

**( व्याख्या )** आवारकमज्ञानमात्रं चेत् सा अज्ञानं किं ज्ञानाभावः अन्यथा ज्ञानं वा तन्त्रः यथाक्रमं प्रसज्यप्रतिषेधपर्युदासार्थकत्वाभ्यामुभयव्यतिरेकेण तन्त्रोऽर्थान्तरासम्भवादिति भावः।

**( वृत्तिः )** अज्ञानशब्दशब्दितं ज्ञानाभावविपरीतज्ञानतद्वितयं नान्यदित्यर्थः। स्पष्टः पदार्थः।

**( व्याख्या )** तत्राद्यकल्पमनूद्य निराकरोति–

**( वृत्तिः )** ततः का क्षतिरित्यत आह –

**ज्ञानाभावो न चाज्ञानं तस्याकिंचित्करत्वतः।।११६।।**
**न ह्यभावो घटस्येह जलमाहरति क्वचित्।**

**( व्याख्या )** अज्ञानशब्दस्य ज्ञानाभावो नार्थः। तस्याभावस्याकिंचित्करत्वतः अर्थक्रियाकारित्वाभावेन ज्ञानाभावस्यापि आवारकत्वासम्भवात्। अभावस्याकिंचित्करत्वमेव उपपादयति न ह्यभाव इति। न हि घटस्याभावः क्वचिदपि घटवज्जलमाहरति। हिः प्रसिद्धौ। तथा दर्शनीदिति भावः। जलाहरणाभावप्रदर्शनमर्थक्रियासामान्याभावोपलक्षणम्।

ननु विहिताकरणादेः प्रत्यवायादिहेतुत्वस्य सर्वशास्त्रासिद्धत्वेनाभावस्य अकिंचित्करत्व मसिद्धमित्यस्वरसादत्यन्ताभावान्योन्याभावध्वंसानां मुक्तावपि सत्त्वेनावरणप्रसङ्गेन प्रागभाव एवावारकत्वेन वाच्य इति तत्र दूषणान्तरमाह–

**ज्ञानस्य प्रागभावश्चेत् ज्ञानोत्पत्तिः प्रसज्यते।।११७।।**

**( व्याख्या )** ज्ञानप्रागभावश्चेत् आवारकः स्यादित्युच्येत। तर्हि तन्न सम्भवति। मुख्यज्ञानस्योत्पत्तिप्रसङ्गेन तत्प्रागभावस्यैवाभावात्। न च बुद्धिधर्मविषयाध्यवसायप्रागभाव एवावारक इति वाच्यम्। प्रागभावस्यावारकत्वे तन्निवृत्तेर्मोक्षस्य जन्यभावरूपज्ञानत्वेन विनाशित्वनियमेनानित्यत्वप्रसङ्गात्। इदमप्यभिसन्धायोक्तं ज्ञानोत्पत्तिः प्रसज्यत इति।

**( वृत्तिः )** तत्र ज्ञानाभाव ज्ञानप्रध्वंसलक्षणमज्ञानम्। न च सार्वज्ज्यतिरस्कतृ तस्येत्यादिक्वचिदित्यन्तार्थः स्पष्टः। पुनरत्र यः प्रध्वंसलक्षणः सोऽर्थक्रियाविरतिलक्षण-ज्ञानौपाधिकधर्मभूतज्ञानानभिव्यक्तिः। शक्त्यात्मना स्थितिरिरिति सैव मलार्थक्रियेष्टा कृष्टफलमिति अर्थक्रियाफलार्थक्रियावतोरभेददोषश्च स्यात्। यदि ततो भिदाऽस्ति तुच्छत्वात्तस्य तन्निवर्तकज्ञानादेरफलत्वप्रसङ्गः पुनः स्यात्। ज्ञानस्य प्रागभावश्चेत् अज्ञानशब्दवाच्यं ज्ञानस्य प्रागभावलक्षणं यत्तदेव यदि सार्वज्ञतिरस्कर्तृ तर्हि प्रागभावः प्रध्वंसाभावपश्चिमकौटिकी कार्यशक्त्यात्मना स्थितिरिरिति आकाशपरीक्षायां परीक्षितव्यत्वात् तस्य ज्ञानं प्रति कारणत्वात्। तस्मात् ज्ञानोत्पत्तिः प्रसज्यते। अन्त्यन्ताभावान्योन्याभावौ त्वत्राप्रसक्तौ हीत्युपेक्षितौ।

**( व्याख्या )** द्वितीयं निराकरोति-

**( वृत्तिः )** द्वितीयपक्षं प्रतिपक्षिपति -

**नाप्येतदन्यथाज्ञानं तस्याप्यनुदयात् स्वतः।**

**( व्याख्या )** एतदावारकमन्यथाज्ञानं न भ्रान्तिज्ञानमपि न। तत्र हेतुमाह तस्यापीति। तस्यापि भ्रान्तिज्ञानस्य नित्यव्यापकचिच्छक्तिमतः स्वत आवारकं विना अनुदयासम्भवात् तदर्थमेवावारकं भ्रान्तिज्ञानविलक्षणमङ्गीकर्तव्यमिति भावः।

स्वतो न सम्भवति इत्युक्तं दृष्टान्ते दर्शयति-

**शुक्तिकारजतज्ञानं न भवेत् पटलं विना।।११८।।**

**( व्याख्या )** शुक्तिकायामिदं रजतमिति ज्ञानं चक्षुःपटलं विना न भवेत् न सम्भवेत् खल्वित्यर्थः। यद्वा पटलमावरणमित्यर्थः।

**( वृत्तिः )** अन्यथाज्ञानमनात्मन्यभिमानाद्यन्यथालक्षणमज्ञानमपि नैतत्। सार्वज्ञति-रस्कर्तृ तस्यापि बुद्ध्यविविक्ततया सुख्यहं दुःख्यहं चेत्यादिविपर्ययरूपस्यापि अन्यचिच्छक्तितिरस्कृततदंतरा तथा स्वतोऽनुदयात्। यथा चक्षुश्छदकं पटलं विना सादृश्यो-पाधिमात्रजनितसम्यग्ज्ञाननिवर्त्यमानादज्ञानादन्यत् सम्यग्ज्ञानमात्रानिवर्त्यं शुक्तिकारजतज्ञानं न भवेत्। तदुक्तं रत्नत्रये-

सा तु संविदविज्ञाता तैस्तैर्भावैर्विवर्तते।
मलोपरुद्धदृक्शक्तेर्नरस्येवोडुराट् पशोः।। इति।

ततस्तदज्ञानोदयनिमित्तं वस्तु ज्ञाननिवर्त्य[1] भवितुमर्हति। आत्मकरणाच्छादकत्वात्तिमिरवदिति क्रियानिवर्त्यत्वात् सिद्धं द्रव्यत्वं ज्ञानादिकं तदुपायभूतं सद्योनिर्वाणसबीजदीक्षितमात्रे तदङ्गत्वेनानुष्ठेयतया न सर्वविषयमिति पुरैव सुविस्तरितम्।

**( व्याख्या )** ननु सम्भवति सादृश्यादिनिमित्तभ्रान्तौ पटलानपेक्षणादित्यस्वरसाद्भ्रान्तिज्ञानमावारकं न भवतीत्यत्र युक्त्यन्तरमाह–

**( वृत्तिः )** पुनर्विकल्प्य निरस्यति–

**किंचैतदन्यथाज्ञानमागन्तुकमथेतरत्।**

**( व्याख्या )** एतदन्यथाज्ञानमागन्तुकं जन्यमथवा इतरदजन्यमित्यर्थः।

एवं विकल्प्याद्यमनूद्य दूषयति–

**आगन्तुकं चेत् चिच्छक्तेर्बाधकं न कदाचन।।११९।।**

**( व्याख्या )** एतदित्यनुषङ्गः। एतदन्यथाज्ञानं आगन्तुकं चेत् जन्यं चेत् कदाचन स्वोत्पत्तेः पूर्वं चिच्छक्तेः बाधकमावारकं न भवेत्। तथा च मुक्तत्वं स्यात्। तदनन्तरं भ्रान्त्युत्पत्तौ मुक्तस्य पुनः संसारित्वप्रसङ्गः।

**( वृत्तिः )** किंचैतत् सार्वज्ञतिरस्कर्तृत्वेन उत्तमज्ञानमागन्तुकमादिसिद्धं किमथेतरत्। नित्यसिद्धं किं तत्र निमित्तमनपेक्षागन्तुकं चेत्। तदा विच्छक्तिः पाशाभिभाविका शक्तिः सिद्धा न दृक्क्रियाभिधेत्यादिश्रुतिविरोधे न तु कदाचन तस्य बाधिका पुनः पुनः प्रयातीति तच्चिन्मुक्तिरपि भवति हि गजस्नानतुल्या। चिच्छक्तेर्बाधकं नेत्यपि सुकरार्थपाठः।

**( व्याख्या )** द्वितीयमनूद्य दूषयति–

**( वृत्तिः )** यद्यनादिसिद्धं तदा दोषानीकं समापतेदित्याह –

**यद्यनागन्तुकं तर्हि नान्यथाज्ञानमेव तत्।**
**अनित्यमेव तज्ज्ञेयं रजतज्ञानवद्द्विजाः।।१२०।।**

**( व्याख्या )** यद्यावारकमनागन्तुकं नित्यं तर्हि तदन्यथाज्ञानमेव न भ्रान्तिज्ञानमेव न स्यात्। अनेन वक्ष्यमाणानुमाने हेतूच्छित्तिरेव बाधिकेत्युक्तम्। अनुमानमाह अनित्यमेवेति। तत् आवारकत्वेनाभिमतमन्यथाज्ञानम् अनित्यमेव अन्यथाज्ञानत्वात् शुक्तौ रजतज्ञानवत्। तथा च द्वितीयकल्पो गर्भस्रावेण गत इति भावः।

**( वृत्तिः )** यत्र विपरीतत्वं तत्रानित्यत्वमिति व्याप्तेः। स्पष्टः श्लोकार्थः।

**( व्याख्या )** अन्यथाज्ञानस्यावारकत्वं दृष्टविरुद्धं चेत्याह–

**( वृत्तिः )** तदसत्यपि तिरस्करणकार्ये तु न प्रसक्तमित्याह –

---

१. ततस्तदज्ञानोदयनिमित्तं वस्तु ज्ञाननिवर्त्यं ] ज१,ज३; ततस्तदज्ञानोदयनिबन्धज्ञानानिवर्त्यं –ज२

**किंचैतदन्यथाज्ञानं न सम्यग्ज्ञानबाधकम्।**
**न दृष्टं शुक्तिकाज्ञानं रजतज्ञानबाधकम्।।१२१।।**

**( व्याख्या )** अन्यथाज्ञानबाधितमिति पाठान्तरम्। एतदन्यथाज्ञानं सम्यग्ज्ञानबाधकं न आवारकं न। तथाऽदृष्टेरित्यर्थः। तामेवादृष्टिं दर्शयति न दृष्टमिति। सम्यग्ज्ञानरूपं शुक्तिकाज्ञानमन्यथाज्ञानबाधितं न दृष्टं आवृतं न दृष्टमित्यर्थः। रजतज्ञानबाधकमिति पाठे रजतज्ञानं बाधकं यस्येति बहुव्रीहिर्द्रष्टव्यः।

**( वृत्तिः )** शुक्तिकायामिदं रजतमिति भ्रान्तिज्ञानसमनन्तरं नेदं रजतं शुक्तिकेयमिति समुत्थातव्यम्। सम्यग्ज्ञानं न पुनः प्राक्स्वलाभ इति न तद्रजतज्ञानबाधितं बाधकमिति पाठे बहुब्रीहिः। स्पष्टः पदार्थः। नह्यनादिसिद्धत्वात्तत् बाधकमिति वाच्यम्। भ्रान्तेरनित्यत्वव्याप्त-त्वेनोक्तत्वाद्यदनादिसिद्धं तथापि प्रवाहतयाऽनादिकालवर्तिदीपस्य तादृगन्धकार इव न बाधकः।

**( व्याख्या )** पक्षीभूतान्यथाज्ञानस्यान्यथाज्ञानत्वेन रजतज्ञानवदनित्यत्वमुक्तम्। तत् प्रमाणबाधितमिति शंकन्ते ऋषयः–

**( वृत्तिः )** किं तु विपर्यासेन ज्ञानबाध्यमित्याह –

**अथ चेन्नित्यसिद्धस्तु तयोः सम्बन्ध उच्यते।**

**( व्याख्या )** तयोः आवार्यावारकयोः सम्बन्धः आवार्यावारकभावः नित्यसिद्धः अनादिसिद्धः। आत्मा केनचिदावृतानादिसार्वज्ञ्यः किंचिज्ज्ञत्वादिति पूर्वं त्वत्सूचितानुमानेनेति भावः। तत्र प्रमीयमाणस्यासार्वज्ञ्यस्यानादित्वात् तथा च सम्बन्धस्य नित्यता अनादित्वमावारकीभूतप्रतियोग्यन्यथा–ज्ञानस्यानादित्वं विना न सम्भवतीति तस्यापि अन्यथाज्ञानस्यानादित्वं स्वरूपेण वा प्रवाहरूपेण वा संस्काररूपेण वा सिध्यतीत्युच्यते चेदित्यर्थः।

एतावतान्यथाज्ञानस्यानित्यत्वपरिहारेऽपि सम्यग्ज्ञानबाधकत्वस्य पूर्वोक्तादृष्टिर-परिहृतैवेत्याह–

**तथापि बाधकं नैतद् ज्ञानस्येहान्यथात्मकम्।।१२२।।**

**( व्याख्या )** तथापि अनादित्वे सिद्धेऽपि अन्यथात्मकं ज्ञानमेतत् ज्ञानस्य बाधकं न आवारकं न। तथा दर्शनादित्युक्तत्वादित्यर्थः।

न केवलमिथ्याज्ञानस्यावारकत्वासम्भवमात्रं किन्तु वस्तु स्वभावेनापि मिथ्याज्ञानस्य सम्यग्ज्ञाननिवर्त्यत्वनियमेन च तदावारकत्वमित्याह–

**प्रत्युत ज्ञानबाध्यं स्यात्**

**( व्याख्या )** ज्ञानेन सम्यग्ज्ञानेन बाध्यं निवर्त्यं स्यात् भवतीत्यर्थः। अतो नावारकमिति भावः।

नत्वेतत् सर्वमनित्यज्ञानविषयमस्तु इदं च अनाद्यन्यथाज्ञानमबाध्यं बाधकं चास्तु अनादित्वादित्यत आह–

**नित्यमप्यन्यथात्मकम्।**

**( व्याख्या )** अन्यथात्मकं ज्ञानं नित्यमपि ज्ञाननिवर्त्यं स्यात् सम्यग्ज्ञाननिवर्त्यमेव स्यादित्यर्थः। वस्तुस्वभावकृतस्य निवर्त्यनिवर्तकभावस्यानादित्वमात्रेणापि निवर्तयितुमशक्य-त्वादिति भावः।

तदेव दर्शयति–

**चिरकालस्थितो दीपः चिरकालतमोऽपहः।।१२३।।**

**( व्याख्या )** चिरकालस्थितो दीपः चिरकालस्थितस्य अन्धकारस्याप्यपहन्ता निवर्तको दृश्यते। तथा च चिरकालस्थायित्वमचिरकालस्थायित्वं वा न निवर्त्यनिवर्तकभावे प्रयोजनं किन्तु वस्तुस्वभाव एव प्रयोजक इति भावः।

**( वृत्तिः )** अथ चेद्यद्यपि गिरिमपि शिरसा भिन्द्यादितिवत् सम्भावनार्थः। सुकरोऽक्षरार्थः।

**( व्याख्या )** पूर्वोक्तयुक्तिभिः भट्टभास्कराद्यभिमतज्ञानाभावादिनार्थान्तरस्य निरस्तत्वात् तद्विलक्षणो मलः सिध्यतीत्याह–

**( वृत्तिः )** उपसंहरति –

**तस्माद्येनात्मनो ज्ञानं बलिना वस्तुना सदा।**
**विरुद्धेनैव बाध्यं स्यात् तन्मलाख्यमितीष्यताम्।।१२४।।**

**( व्याख्या )** तस्मात् पूर्वोक्तयुक्तिभिः ज्ञानाभावादिभिः ज्ञानस्यावरणसम्भवात् आत्मनो ज्ञानं येन बलिना विरुद्धेन धर्मिग्राहकप्रमाणसिद्धेन बलविरोधवता बाध्यं स्यात् आवृतं स्यात् तत् ज्ञानाभावादिविलक्षणं मलाख्यमिष्यताम्।

**( वृत्तिः )** स्पष्टः।

**( व्याख्या )** किंचिज्ज्ञत्वं तु कारणादिति पूर्वसूचितमनुमानं दर्शयति–

**( वृत्तिः )** तत्सत्तासंशयविच्छेदकं हेतुं केवलव्यतिरेकिणं प्रयुनक्ति–

**आत्मा मलावृतः सर्वज्ञत्वे किंचिज्ज्ञता यतः।**
**न किंचिज्ज्ञस्तु यः सोऽयं मलेनापि न संवृतः।।१२५।।**
**यथा शिवस्तस्था नायं मलेनैव समावृतः।**

**( व्याख्या )** यत आत्मनः किंचिज्ज्ञता ततः किंचित् ज्ञानतः किंचिज्ज्ञत्वादित्यर्थः। अत्रात्मा पक्षः आवृतः केनचिदावृतानादिसार्वज्ञ्यः इत्यर्थः। अत आत्मन आवृतत्वसिद्धावपि चिच्छक्तेरनावृतत्वात् पुनः सर्वज्ञत्वप्रसङ्गेन न किंचिज्ज्ञत्वानुभवविरोधः। अत्र कादाचित्कत्वमपि

विशेषणीयम्। अतो न मुक्तात्मन्यंशतो बाधः। अत्र चैतावन्मात्रमेव साध्यम्। मलग्रहणं तु पूर्वोक्तयुक्तिसहकृतपक्षधर्मताबललभ्यसाध्याभिप्रायम्। अन्यथा साध्याप्रसिद्धिप्रसङ्गात्। अत्र किंचिज्ज्ञत्वादित्येतावन्मात्रं हेतुः तावतैव निवर्तनीयस्य जडशिवयोर्व्यभिचारस्य वारणात्। सर्वज्ञत्वग्रहणं तु किंचिज्ज्ञत्वस्य विषयसंनिकर्षादिकारणाभावेनापि उपपन्नत्वेना-प्रयोजकत्वशंकानिरासार्थम्। तथा च सर्वज्ञस्य किंचिज्ज्ञत्वं न कारणाभाव-प्रयोज्यमित्यावरणसिद्धिः। अत एवोदाहरणेऽपि किंचिज्ज्ञत्वस्यैव व्यतिरेकः प्रदर्शितः। हेतावपि कादाचित्कत्वं विवक्षणीयम् अतो न मुक्तात्मसु भागासिद्धिः। अत्रान्वयव्याप्तेरभावात् व्यतिरेकोदाहरणमाह न किंचिज्ज्ञस्त्विति। यस्तु मलेन न संवृतः मलेनावृतसार्वज्ञ्यो न सोऽयं किंचिज्ज्ञोऽपि नेति व्यत्ययेनोदाहरणं बोध्यम्। व्यतिरेकव्याप्तौ साध्याभावस्यैवोद्देश्यत्वात्। विपरीतप्रदर्शनं तु समव्याप्तिसत्वात् तत्रापि दोषाभावाभिप्रायेण। उपनयमाह तथा नायमिति। निगमनमाह मलेनैव समावृत इति। उपनयनिगमनयोः द्वैतं मतम्। पूर्वोक्ताशेषविशेषलाभाय तथाशब्देनैव ते कर्तव्ये इत्येकम्। तथाशब्दस्य प्रकारसादृश्याद्यनेकार्थत्वेन निश्चयासम्भवात् तत्तदसाधारणशब्दोपादानेनैव ते कर्तव्ये इत्यपरम्। तत्राद्यमताभिप्रायेणोपनयः द्वितीयमताभिप्रायेणैव निगमनमिति मन्तव्यम्।

**( वृत्तिः )** हेतुरूपे सतीति दृश्यत इति चाध्याहार्यम्। केवलव्यतिरेकिण्यपि न तथा चायमिति व्यतिरेकव्याप्तिद्वारान्वयव्याप्तौ बुद्धेः पर्यवसितत्वात् उपनयस्तथेत्यादि। तथा चायं सर्वज्ञत्वे सति किंचिज्ज्ञोऽयं तदनुपदवर्तिनिगमनरूपे तस्मादित्यध्याहार्यम्। स्पष्टं तदितरत्।

**( व्याख्या )** किंचाणूनां भोगेषु सक्तिर्दृश्यते। सा च सर्वज्ञानां तेषां विषयेषु दोषदर्शिनां सार्वज्ञ्यावरणमन्तरेणानुपपद्यमाना आवारकत्वं कल्प्यतीत्यर्थापत्तिरपि मले प्रमाणमित्याह–

**( वृत्तिः )** पुनस्तद्रूपं हेत्वन्तरं प्रयुनक्ति–

**किंचायं मलिनो नो चेत् सक्तिर्भोगे कथं भवेत्।।१२६।।**

**( व्याख्या )** अयं स्वतः सर्वज्ञोऽणुः मलिनो नो चेत् मलमस्यास्तीति मलिनः ज्योत्स्ना तमिस्रेत्यादिसूत्रे मलिनेति निपातनात् मत्वर्थीय इनिप्रत्ययः। मलावृतसार्वज्ञ्यो न चेत् अस्येत्यध्याहारः भोगे भुज्यत इति भोगो विषयः तस्मिन् सक्तिरुत्कटेच्छाविशेषः कथं भवेत् न कथमपीत्यर्थः। तथा चानुपपद्यमाना सा आवारकं कल्पयतीति भावः।

ननु सक्तेरिच्छाविशेषरूपायाः ज्ञानमात्रोपपाद्यायाः तेनैवान्यथासिद्धत्वात् किं मलेनेत्याशंक्याह–

**यदि सा निर्मलेऽपि स्यात् मुक्तात्मस्वपि सा भवेत्।**

**( व्याख्या )** सा सक्तिर्निर्मले मलावृतिरहिते ज्ञानमात्रेण यदि स्यात् तदा मुक्तात्मस्वपि सा भवेत्। तेषामपि चेतनत्वाविशेषात्। तथा च ज्ञानातिरिक्तमपि किंचिदुपपादकं कल्प्यमिति भावः।

**( वृत्तिः )** मलिनो मलकदर्थितः। भोगे भोग्ये सक्तिरभिलाषः इतरं सुकरम्।

अयमत्र प्रयोगः। आत्मा मलावृतः भोगासक्तित्वात्। न यस्तथा न स तथा शिवो यथेति।

**( व्याख्या )** ननु तर्हि राग एवोपपादकोऽस्त्विति शंकन्ते ऋषयः–

**( वृत्तिः )** सांख्याशयेनान्यथासिद्धिमाशंक्य परिहरति –

**रागोऽस्ति कारणं सक्तेरिति चेत् किं मलेन तु।।१२७।।**

**( व्याख्या )** सक्तेरुभयसम्मतो ज्ञानादतिरिक्तश्च रागः तत्त्वात्मको भावात्मकश्च कारणमुभयसिद्धमस्ति मलेन किमिति चेदित्यर्थः।

तत्र रागस्य सक्तिकारणत्वमात्रमुच्यत उत चैतन्यावारकत्वमपीति विकल्प्याद्य आह–

**सत्यं रागोऽस्ति तद्धेतुर्न स किंचित्करोऽमले।**

**( व्याख्या )** तद्धेतुः सक्तिहेतुरुभयसिद्धो रागः अस्तीत्येतत् सत्यम्। किन्तु स अमले आवारकमलरहिते अत एव विषयेषु दोषदर्शनवति किंचित्करो न सक्त्यादिजनको न भवतीत्यर्थः।

यदि विशेषदर्शनमुल्लंघ्य कारणत्वमात्रात् सा भवेत्तदा अतिप्रसङ्ग इत्याह–

**अमलेऽपि स चेत् सक्त्यै स्यान्मुक्तेऽप्यविशेषतः।।१२८।।**

**( व्याख्या )** स रागः विशेषदर्शनावारकमलरहितेऽप्यात्मनि सक्त्यै स्याच्चेत् सक्तिं जनयेच्चेत् मुक्तेऽपि सक्त्यै स्यात्। कुतः अविशेषतः। उभयोरपि दोषदर्शित्वाविशेषादित्यर्थः। अत्र यद्यपि मुक्तेऽसाधारणरागो नास्ति तथापि साधारणरागमादायापादनम्। मुक्तशब्देन वा जीवन्मुक्तोऽभिप्रेतः। तस्य सुखादिभोगे सत्यपि असक्तो विषयान् भुङ्क्ते इत्यादिना तस्य विषयेषु सक्त्यभावात्।

अत्राद्यव्याख्याने इष्टापत्तिमाशंक्याह–

**न हि मुक्तः शिवो वापि भोगासक्तः कदाचन।**

**( व्याख्या )** मुक्तो भोगासक्तः कदापि न हि बहुश्रुतिस्मृतिविरोधादित्यर्थः। शिवो वेति। यद्यपि पूर्वं शिवेऽतिप्रसङ्गो नापादितः तथाऽपि शिवग्रहणं दृष्टान्तार्थम्। वाशब्द इवार्थो द्रष्टव्यः।

**( वृत्तिः )** रागो बौद्धो वक्ष्यमाणः प्रत्यर्थमासक्तिकरः। न मायीयः स समवयनीयोऽपि न ह्युधृतो न दृगन्तरसिद्ध इति चेन्मलेन तु किमित्याशयः। अमले स रागो न किंचित्करः न यत् किंचित् स्वार्थक्रियाविधाता। तदुक्तं स्वायम्भुवे –

कर्माशुद्धिशिवत्वानि तेषु सत्सु भवन्त्यमी।
त्रयोऽर्थाः सर्वजगतो भोगभोक्तृत्वमुक्तये।। इति।

अत्र शिवत्वशब्देन शिवशक्तिरुच्यते। मुक्तिशब्देन पाशविमोचनशिवत्वाभिव्यक्तिद्वयमुच्यते। तदन्यत् सुगमम्।

**( व्याख्या )** द्वितीयं विकल्पं निराकरोति–

**( वृत्तिः )** निरपेक्षरागः सक्तिकरो वा भवतु। स तु मलो नो चेत् कथंचिच्छक्तिं तिरस्करोतीत्याह –

**किंचायं प्रत्ययात्मोक्तो रागो बौद्धो यतस्ततः।।१२९।।**

**बुद्धिश्च प्रकृतेः सिद्धा तस्मादेष विनश्वरः।**
**चिच्छक्तेर्नित्यसिद्धायाः सम्भवेद्बाधकः कथम्।।१३०।।**

**( व्याख्या )** अयं रागः प्रत्ययात्मा अत्र प्रत्ययात्मग्रहणं तत्त्वात्मकस्याप्युपलक्षणम्। बौद्धः बुद्धिपरिणामरूपः। अत्र बौद्धग्रहणं कलापरिणामत्वस्याप्युपलक्षणम्। यतः यस्मात् रागः कलाबुद्धिधर्मस्ततो विनश्वरः। तदा स्वयं रागो बुध्यादिधर्मो नित्यधर्मत्वेन नित्यो भवेत्। यदि बुद्ध्यादिः नित्यः स्यात् तदेव नास्तीत्याह बुद्धिश्चेति। अत्र बुद्धिग्रहणं कलाया अप्युपलक्षणं प्रकृतिग्रहणं च मायायाः प्रकृतिमायाभ्यां सिद्धे जन्ये इत्यर्थः। अस्तु विनश्वरत्वं रागस्य प्रकृते किमायातमित्यत आह तस्मात् विनश्वरत्वात् नित्यसिद्धायाः चिच्छक्तेः बाधकः कथं सम्भवेत्। आवारकः कथं भवेत्। न संभवतीत्यर्थः। तत्र हेतुगर्भं विशेषणं नित्यसिद्धाया इति। नित्यसिद्धत्वात् प्रलयेऽपि सत्त्वेनावारकरागस्य तदानीमभावेन तदानीं मुक्तिप्रसङ्ग इति भावः।

**( वृत्तिः )** आसक्तिहेतुत्वेन नात्रोक्तोऽयं रागः। यतः प्रत्ययात्मा भोग्यदशामापन्ने प्रत्ययरूपत्वेनोपस्थितः। ततः बौद्धः।

बुद्धिश्च प्रकृतेः सिद्धोत्पन्ना तस्मात् तद्गुणत्वादेष रागो विनश्वरः। नित्यसिद्धायाश्चिच्छक्तेस्तदुपसंहृतकालेऽपि कस्यचित्तिरस्कृतिमत्यां कथं बाधकः सम्भवेत्। न कथंचिदपि स्यात्।

**( व्याख्या )** ननु तर्हि कर्मैवावारकमस्तु तथा चोक्तानुमानार्थापत्त्योः यथा क्रममर्थान्तरान्यथोपपत्ती इत्याशंक्य निराकरोति–

**( वृत्तिः )** कर्मैव स्वापेऽप्यस्तीत्यावरणत्वेन क्लृप्तिकलितं किं मलेनेति क्षपणकाः। तदयुक्तमित्याह –

**कर्मणापि न च ज्ञानबाधः सम्भवति द्विजाः।**

**( व्याख्या )** कर्मणापि ज्ञानस्य चिच्छक्तेः बाधः आवरणं न सम्भवति।

कुत इत्यपेक्षायामत्र कर्मशब्देन धर्ममात्रमुच्यते उताधर्मोऽपीति विकल्प्याद्याभिप्रायेण हेतुमाह–

**साध्यत्वात् कर्मणः पुंसः साधकत्वेन संस्थितेः॥१३१॥**

**( व्याख्या )** कर्मणो धर्माधर्मात्मकस्य सिद्धिमिच्छता पुंसा बहुवित्तव्ययायासादिभिः साधितत्वादित्यर्थः। अतः पुंसः साधकत्वेन श्रेयःसाधकत्वेन संस्थितेः संस्थिततत्वात् कर्मणः आवारकत्वस्य च श्रेयोविरोधित्वादिति भावः।

**( वृत्तिः )** सुव्यक्तः श्लोकार्थः। अयमाशयः। आवरणनिवृत्तिद्वारा चिदभिव्यक्ति-कारककलादियोगादनन्तरं कर्मपुरुषयोः साध्यसाधकसम्बन्धादिति।

**( व्याख्या )** द्वितीयकल्पेनाह– किं चेति।

**( वृत्तिः )** इतोऽपि न हीत्याह –

**किं च भोगैकहेतुस्तत् कथं भोगस्य बाधकम्।**

**( व्याख्या )** भोगहेतुत्वेन सिद्धं कर्म कथं भोगस्य बाधकमावारकम्।

ननु केनोक्तं भोगस्यावारकमिति। ज्ञानावारकत्वस्यैवोक्तत्वादित्यत आह–

**यतो ज्ञानात्मको भोगो**

भोगो ज्ञानात्मक एव अतो ज्ञानावारकत्वोक्त्या भोगावारकत्वमप्युक्तमेवेति भावः।

अस्तु भोगावारकत्वं काऽत्र कथेत्यत आह–

**न हि तेन तदावृतिः॥१३२॥**

तेन भोगहेतुत्वेन प्रमाणसिद्धेन कर्मणा तस्य ज्ञानात्मकस्य भोगस्यावृतिः न हि सम्भवति। धर्मिग्राहकप्रमाणसिद्धभोगैकहेतुत्वविरोधात्। यदि भोगं विना तस्य फलान्तरमपि अस्ति तदा कथंचिदेवं कल्पयितुं शक्यते। तदपि नास्तीत्यभिप्रायेणोक्तं भोगैकेति।

**( वृत्तिः )** किंच तत् कर्म भोगैकहेतुः साक्षाद्धेतुतया सुखदुःखाकारेण परिणतत्वात् भागा द्वितीयहेतुः। भोगस्य बाधकं तिरस्कर्तृ कथं[1] कथंचिदपि न स्यात्। ननु न ह्यस्माभिर्भोगतिरस्करणं कर्मण उच्यते। किंतु चिच्छक्तितिरस्करणम्। सत्यम्। तदर्थमेतत् यतः कारणात् भोगो ज्ञानात्मकः कर्मजसुखदुःखानुभूतिलक्षणचिद्रूपः।

ततस्तेन कर्मणा तदावृतिः। तच्चिच्छक्तेः कर्तव्यज्ञानतिरस्कृतिः न हि क्रियते।

**( व्याख्या )** दूषणान्तरमपि आह–

**( वृत्तिः )** पुनस्तत्र युक्तिं वितनोति –

**धर्माधर्मात्मकं कर्म तौ च बुद्धौ व्यवस्थितौ।**
**व्याप्त्यभावात् तयोरूर्ध्वं बन्धकौ सर्वतः कथम्॥१३३॥**

---

१. भागा द्वितीयहेतुः। भोगस्य बाधकं तिरस्कर्तृ कथं ] ज१; ज२ कोशे नास्ति।

**( व्याख्या )** अत्र कर्मशब्देन धर्माधर्मात्मकमेव विवक्षणीयम्। न क्रियामात्रम्। ततः किं तत्राह तौ चेति। तौ च बुद्धौ बुद्धिधर्मतया व्यवस्थितौ। समाहारप्राधान्येन पूर्वमेकवचनान्तेन निर्दिष्टयोरपि धर्माधर्मयोः बुद्ध्या समाहारिप्राधान्येन विवक्षितत्वात्ताविति द्विवचननिर्देशः। इदं च बुद्धिनिरूपणे उत्तरत्र स्फुटम्। ततोऽपि किं तत्राह तयोर्धर्माधर्मयोरूर्ध्वं बुद्धितत्त्वादूर्ध्वं व्याप्त्यभावात् तत्रावर्तनात् तत् प्रदेशावच्छेदेन चिच्छक्तेरावृतौ कथं व्याप्रियेते। व्यापारो न सम्भवतीत्यर्थः। तथा च बुद्धेः अधःस्थितानां पुंसां तदूर्ध्ववर्तिपदार्थोपलम्भप्रसङ्गः तदूर्ध्ववर्तिनां पुंसां तत्रैतदावरणाभावेन तत्रत्य सर्वार्थोपलम्भप्रसङ्गश्चेति भावः।

**( वृत्तिः )** सुगमम्। पराशयं परिज्ञातुमेतद् बुद्ध्यादेः प्रकृतेरूर्ध्वमपि सूक्ष्मदेहसुनिविष्टतया मायायां च शक्त्यात्मना प्रलये स्ववासनालक्षणकर्मणा सह प्रगमत्वात्। स्वकीयदृशा तु विज्ञानकेवलविषये कथमित्याशयः।

**( व्याख्या )** किंच धर्माधर्मौ सुखादिविचित्रभोगजनकत्वेन सिद्धौ तयोश्च नावृतिहेतुत्वमपि कल्पयितुं शक्यते। एकस्यासाधारणव्यापारद्वयजनकत्वादर्शनादित्याह किं चेति।

**( वृत्तिः )** पुनरपि –

**किंच भोगप्रवृत्तौ तौ व्याप्रियेते कथं वृतौ।**

**( व्याख्या )** तौ धर्माधर्मौ भोगप्रवृत्तौ भोगलक्षणासाधारणकार्यजनकत्वेन धर्मिग्राहकमानसिद्धौ अतः कथं वृतौ आवृतिलक्षणासाधारणकार्ये व्याप्रियेते प्रवर्तेते दर्शनविरोधादिति भावः।

ननु धर्मान्तरकल्पने गौरवात् कॢप्तस्यैव धर्मिणः कार्यान्तरं प्रत्यपि जनकत्वमस्तु धर्मिकल्पनातो धर्मिकल्पना लघीयसीति न्यायादित्यत आह–

**अन्यत्रापि प्रवृत्तस्य यद्यप्यत्रापि हेतुता।।१३४।।**
**अनेकतत्त्वसंकॢप्तिः कार्यभेदाद्विहन्यते।**

**( व्याख्या )** अन्यत्र भोगादिषु तत्तदसाधारणव्यापारत्वेन धर्मिग्राहकमानसिद्धेषु प्रवृत्तस्य जनकस्यापि। यद्यपीति निपातः समुच्चयार्थः। अत्रापि आवृत्त्यादौ असाधारणकार्यान्तरेऽपि हेतुता यदि कल्प्यते तदा कार्यभेदात् क्रियांशाभिव्यञ्जकत्वाद्यसाधारणकार्यभेदात् कलाद्यनेकतत्त्वसंक्लृप्तिः शास्त्रसिद्धा सा विहन्यते। उक्तयुक्त्या कलाद्यन्यतमस्यैकस्यैव सर्वकार्यजनकत्वकल्पनासम्भवात्। यदि च तदेकमात्रजनकत्वग्राहकधर्मिग्राहक–प्रमाणविरोधात् न कार्यान्तरजनकत्वं कलादाविति तत्त्वान्तरसिद्धिः तदा प्रकृतेपि तुल्यमिति भावः।

इयता प्रबन्धेन साधितं कर्मणा अर्थान्तरान्यथोपपत्तिनिराकरणमुपसंहरति–

**तस्मात् न कर्म चिच्छक्तेर्बाधकं संव्यवस्थितम्।।१३५।।**

तस्मात् उक्तयुक्तिभिः कर्म चिच्छक्तेः नित्यव्यापिकात्मिकाया बाधकं नेत्यावारकं नेति संव्यवस्थितं निश्चितम्।

**( वृत्तिः )** किंच तौ धर्माधर्मौ भोगप्रसक्तौ अधर्मस्यापि दुःखमोहवेदनहेतुत्वात् सुखदुःखमोहवेदनलक्षणभोगफलचरितार्थक्रियौ तौ ततः कथं नियमनं विना वृतौ चिच्छक्तितिरस्कृतौ व्याप्रियेते सव्यापारौ भवतः। अन्यत्रापि भोगादिलक्षणकार्येऽपि प्रवृत्तस्य कर्मादेरत्रापि चिच्छक्तितिरस्कृतौ च। यद्यपि हेतुता समस्तमेकेनालमिति कार्यभेदात् कर्तृत्वव्यञ्जनादिकर्तव्यभिदाया अनेकतत्त्वसंकर्षप्तेः बहुकलादितत्त्वकल्पना विहन्यते क्षतिकलिता क्रियते। तस्मादित्यादि सुगमम्। चिदभिव्यक्तिकरं कर्म स्वार्थक्रिया-विरुद्धचिदनभिव्यक्तिकरं न हीति मायापरीक्षायां मलार्थक्रियाकर्त्री नेति परीक्षितत्वात् न माया चेति।

**( व्याख्या )** कर्मणः स्वकार्यविरोधादपि नावारकत्वमित्याह किंचेति-

**( वृत्तिः )** सुष्ठूक्त्वोपसंहरति -

**किंचाभिव्यञ्जकं कर्म चिच्छक्तेर्बाधकं कथम्।**

**( व्याख्या )** चिच्छक्तेः नित्यव्यापिकात्मिकायाः अस्याः कर्म अभिव्यञ्जकं चिच्छक्त्यभिव्यञ्जकं चिच्छक्त्यभिव्यक्तिभूतभोगहेतुत्वात् अतः कथं तस्या बाधकं स्यात् आवारकं स्यात्। अभिव्यक्त्यावृत्त्योः कार्ययोर्विरोधेनैककारणत्वासम्भवादिति भावः। यद्यपि किंचाभिव्यञ्जकमित्येतद्दूषणं उपसंहरात् पूर्वमेव वक्तव्यं तथापि मायाया आवृतिहेतुत्वनिरासेऽप्यस्यैव हेतुत्वात् तत्सन्निधावुपन्यस्तम्।

नन्वेवमपि मायाया अर्थान्तरान्यथोपपत्ती इत्याशंक्य निराकरोति-

**मायापि बाधिका न स्यादित्युक्तं तन्निरूपणे।।१३६।।**

**( व्याख्या )** मायापि चिच्छक्तेरित्यनुषङ्गः बाधिका आवारिका न स्यात् न सम्भवतीति तन्निरूपणे मायानिरूपणे न च माया मल इत्यत्रोक्तं साधकमिति शेषः। तच्च कार्यद्वारा व्यञ्जकत्वादिति।

इयता प्रबन्धेनोपपादितं परमप्रकृतमुपसंहरति-

**मल एवं समुद्दिष्टः पुंसां सार्वज्ञ्यबाधकः।**

एवमुक्तानुमानार्थापत्तिभ्यां पुंसां सर्वज्ञत्वबाधकः अनादिसार्वज्ञ्याच्छादकत्वेन मलः समुद्दिष्टः साधित इत्यर्थः।

**( वृत्तिः )** स्पष्टोऽक्षरार्थः। माया कार्यद्वारा बाधिकेति चेत् प्रलयकैवल्यावस्थायां तदभावे बन्धमुक्तयोरविशेषेण सर्वेषु सर्वज्ञत्वं संनिपतेत् कार्यद्वारेदानीं ज्ञत्वप्रकाशिका स्वरूपेण च नाप्रकाशिकेत्यादिभिः सुचर्चिताः। तथाऽप्यत्रापि कथंचित् परीक्ष्यते। यदि

स्वरूपेण बाधिका एकत्वात् तस्या दीक्षात स्वनिरोधनैकमोक्षे सर्वमोक्षप्रसङ्गः। अनेकत्वे तस्याऽचैतन्ये सत्यनैकत्वादनित्यत्वं सुसंसिद्धमिति प्रलयकैवल्यावस्थायां बन्धमुक्त-योरविशेषप्रसङ्गसहसमुत्थानवस्थाप्रसङ्गः स्यात्। ननु मलस्य भवद्भिः क्लृप्त इव प्रतिपुरुषं तस्याः कार्यजनिकाशक्तयो भवन्तु[१]। तदयुक्तम्। शक्तेः शक्त्यन्तरायोगात् शक्त्यवस्थैव कारणं व्यक्त्यवस्थैव कार्यमिति कार्यशक्त्यात्मकत्वात्। कार्यशक्तय एव तस्याः शक्तय उपचर्यन्ते न तु तस्याः कार्यजनिकाशक्तय इति सत्कार्यवादे प्रपञ्चितमित्यलमतिविस्तरेण। प्रकृतिरेव तमो लक्षणेति पञ्च पर्वात्मा विपर्ययेण युक्ता मल इति सांख्यदृष्ट्यनुवासिताः प्रकृतिमलवादिनः मायामलवादिनां पाशुपतदीनामिदानीं कृतनिरासेन समनीतेर्निरस्ताः। ततः तत्पारन्त्र्यं बन्धत्वं तस्मिन्नित्ये चिदादिवत्। मुक्तिसाधनसन्दोहो व्यर्थोऽलमनया धिया। इति मृगेन्द्रश्रुतेः। अस्वातन्त्र्यादिकं न स्वाभाविकमिति मलौपाधिकं सिद्धमिति ततोऽपि मलसिद्धिः। तथा हि आत्मानः केनचित् बन्धेन बद्धाः अस्वातन्त्र्यदर्शनात् मेषादिपशुवत्।

**( व्याख्या )** मलस्य कार्यभेदौपाधिकं भेदं दर्शयति–

**( वृत्तिः )** मलशब्दवाच्यानि तु सप्तेत्याह –

**मलोऽपि सप्तधा ज्ञेयो मोहश्चापि मदस्तथा।।१३७।।**
**रागोऽन्यश्च विषादाख्यः तापः शोषश्च सप्तमः।**
**वैचित्र्यमपि सर्वेषां मलिनानां प्रकीर्तितम्।।१३८।।**

**( व्याख्या )** तदेव सप्तविधत्वं मोहश्चेत्यादिना प्रकीर्तितमित्यन्तेन दर्शयति।

**( वृत्तिः )** लक्षणपरीक्षोक्तिभ्यां परिज्ञेयोऽस्यार्थः। ननु मतङ्गे उद्दिष्टसहर्षणाख्यमलोऽत्र किमिति नोद्दिष्टः पुनरत्र चोद्दिष्टः स तापाख्यमलस्तत्र किमिति न उद्दिष्टः। सत्यम्। तत्र विषादेऽन्तर्भूततयाऽत्र वैचित्र्येऽन्तर्भूततयेत्यविरोधः।

**( व्याख्या )** तत्र सप्तानामपि मलानां बन्धकत्वाविशेषेऽपि मोहनामा मलः सर्वानर्थहेतुत्वादत्यन्तकबाधक इत्याह–

**( वृत्तिः )** लक्षणपरीक्षे विदधाति–

**मोहो नाम मलः पुंसां सहजोऽनादिमानिह।**
**योनिः षण्णां मदादीनां प्रधानत्वाद्द्विजोत्तमाः।।१३९।।**

**( व्याख्या )** सहज आसंसारमभिव्याप्य स्थितः अत एवोपाधिभूतमोहस्य प्रवाहानादित्वेन योऽनादिः कार्यभूतो मोहस्तद्वान्। मदादीनामुपाधिभूतानां षण्णां योनिः प्रयोजकः प्रधानत्वात्। मोहं विनेतरेषां मदादीनामसम्भवादस्य प्राधान्यम्।

तदेव मलस्य सप्तविधत्वं कार्योपाधिभेदेन तत्तन्नामव्यपदेशेन क्रमेण दर्शयति–

---

१. भवन्तु–सं०पाठः; भविष्यन्तु–ज१,ज२; भविष्य . . . . –ज३

**यस्मिन् सत्यात्मनो मोहो जानतोऽप्यङ्गनादिषु।**
**स मोह इति विख्यातो वर्ज्यावर्ज्याविभागतः।।१४०।।**

**( व्याख्या )** जानतोऽपि वर्ज्यावर्ज्यविभागं शास्त्रतो जानतोऽपि आत्मनो यस्मिन् मले सति वर्ज्यावर्ज्य अविभागतः। अङ्गनादिषु एषा वर्ज्या एषा अवर्ज्येति विभागं परिभूय मोहो भ्रान्तिः जायते स मोह इति विख्यातः मोहकार्योपाधिकः। अत एव मोह इति विख्यातो मल इत्यर्थः।

**( वृत्तिः )** इह सप्तसु मध्ये मोहो नाम मलः पुंसामनादिमान् सहजो अनाद्यावार्या–वारकलक्षणसंबन्धी। हे द्विजोत्तमाः। ततः प्रधानत्वात् षण्णां मदादीनां योनिः बुद्धि–संस्कृतिलक्षणोपादानात् उत्पत्तौ कर्तुः सहकारी। तदभावे हि परिणतमलानां दीक्षितानां मायागर्भादिकार्यादीनां मायीयबन्धसद्भावेऽपि मदादयो न भवन्ति। ततस्ते किल स्वोत्पत्तौ सहजमलसहकारित्वात्। यद्यपि बुद्ध्युपसंहृतौ कारणरूपतद्बुद्धिसंस्कारत्वेनावस्थिताः सन्त स्वतो बुद्धिधर्मत्वेन सत्त्वादिलक्षणबुद्धिसंस्कृतिरूपकर्मोपादानधर्मज्ञानादिभोग्यदशात्म–सुखदुःखमोहाकारसिद्ध्यादिप्रत्ययरूपत्वेन वक्ष्यमाणरूपवद्रूपविशेषाः सहजशब्दशब्दिताः। कलाद्युत्पत्तौ तेषां निमित्तत्वेन मलगुणतुल्यत्वान्मलगुणत्वेन चोपचर्यते। यथा दृङ्निरोधात्मके मोहशब्दशब्दितान्धकारे सति दीपः प्रकाशलक्षणोऽपि मोहशब्दशब्दितो नीलोत्पलादौ रक्तोत्पलादिविपरीतप्रकाशको भवति। तथा यस्मिन् सत्यात्मनो जानतोऽपि कलादिव्यक्तचित् सन् वर्ज्यं तदवर्ज्यमिदमिति बुध्यतोऽपि पुंबोधव्यक्तिभूमिभूतबाध्यप्रकाशलक्षणो वर्ज्यावर्ज्यविभागतोऽङ्गनादिषु मायीयो मोहोऽनित्याशुच्यासुखानात्मसु तद्विपरीतप्रकाशको भवति। तदुक्तं–

मायाशक्तिर्विभुर्नित्या देहिनां परमोहिका।
मोहस्तु विषयासक्तिर्यथा संह्रियते शुभा। इति।।

स तु ज्ञत्वकर्तृत्वनिरोधात्मको मलरूपो मोहः विख्यातः। मायीयमोहोऽपि मलरूपमोहनिमित्तसापेक्षक इति स्पष्टीकृतम्।

**( वृत्तिः )** मदादिस्वरूपमाह –

**प्राप्तामपि स्त्रियं येन स्तौति न स्याः पराङ्गना।**
**दिव्याङ्गनेयमेवेति स मदः परिपठ्यते।।१४१।।**

**तदभावे विषण्णत्वं बाष्पलोचनता यतः।**
**स विषादो मलो नाम प्राणिनामतिदुःखदः।।१४२।।**

**ततस्तापो भवेदन्तः प्रलापात्माऽतिविस्तरः।**
**स ताप इति विख्यातो मलः शोषो भवेत्ततः।।१४३।।**

**स्तब्धात्मा तु यदा यस्मान्मलोऽतीवसुदुस्तरः।**
**एष बन्धुरियं भार्या मृष्टं चेदं धनं मही॥१४४॥**

**कृतार्थो महतो यद्वा कस्त्राता मामकस्य च।**
**कुडुम्बस्यैवमाद्या तु चिन्ता येन नृणां भवेत्॥१४५॥**

**नानामतिकरः सोऽयं मलो वैचित्र्यसंज्ञकः।**
**सप्तैते सहजाः प्रोक्ता मला मलवतां नृणाम्॥१४६॥**

**( व्याख्या )** येन मलेन प्राप्तामपि लब्धामपि स्त्रियमप्यप्राप्ता उत्कृष्टा वा अनुत्कृष्टा वा स्तुत्यर्हा नेतरेति विरोधसूचनाय अपिशब्दः। स्त्रीमात्रमपि स्तौति स्तुतिप्रकारमेवाह नास्या इति। अस्या इति पञ्चमी। अस्याः परा उत्कृष्टा अङ्गना नास्ति इयमेव दिव्याङ्गनेति। स मलः मदोपाधिकत्वान्मद इति पठ्यते। रागस्तु लोकप्रसिद्धत्वात् उत्तरत्र निरूपयिष्यमाणत्वाच्चोद्दिष्टोऽप्युपेक्षितः लेखकप्रमादाद्वा न लिखितः। दैवाद्वियोगादिना तदभावे तस्या अङ्गनाया अभावे असन्निधाने यतः यस्मान्मलाद्विषण्णत्वं बाष्पलोचनता जायते बाष्पयुक्ते लोचने यस्य स तथोक्तः। प्राणिनामतिदुःखदः स मलः विषादो नाम विषादकार्योपाधिकत्वात् विषादाख्यः।

यतो यस्मान्मलात् प्रलापात्मा परिदेवनात्मा अतिविस्तरः शब्दप्रपञ्चो यस्य स तथोक्तः। यद्वा अतिविस्तर इति भिन्नपदं प्रलापस्वरूपविशेषणान्वयि। अथवा प्रलापात्मा प्रलापस्वरूपम् इदं च तापानन्वयि। अतिविस्तरः प्रलापस्तापश्च जायते इति शेषः। स मलस्तापोपाधिकत्वात् ताप इति विख्यातः। ततस्तापानन्तरं यदा यस्मान्मलात् स्तब्धात्मा जायते पुरुषः मूर्च्छितः शुष्कदेहो वा जायते स मलः अतीव सुदुस्तरः अतीव शब्दः अत्यन्तार्थकः। शोषः शोषोपाधिकत्वात् शोष इत्युच्यते।

येन एष बन्धुरियं भार्या इदं धनं मृष्टं संपूर्णं इयं मही च मृष्टा अतोऽहं कृतार्थ इति चिन्ता नघ्णां भवेत् जायते। यद्वा मामकस्य कुटुम्बस्य भार्यादिलक्षणस्य कस्त्राता रक्षिता इत्याद्या एवं प्रकारिका चिन्ता नघ्णां येन भवेदित्यनुषङ्गः। सोऽयं मलः वैचित्र्योपाधिकृ तत्वात् वैचित्र्यसंज्ञितः। वैचित्र्यसंज्ञकत्वे हेतुमाह नानामतिकरः पूर्वोक्तनानाविधबुद्धिकर इत्यर्थः। उपाधिभूता एते प्रोक्ताः सप्त मलाः मलवतां नृणां सहजा आसंसारमभिव्याप्य स्थिता इत्यर्थः।

**( वृत्तिः )** तदभावे स्त्र्यभावे स्तब्धात्मा शुष्कदेहः। मृष्टं परिपूर्णितम्। मृष्टमिति सामान्य-त्वात् सर्वत्र योजनीयम्। एष इत्यादिवैचित्र्यलक्षणम्। रागलक्षणोक्तिस्तु लेखकभ्रमात् पतिता वा स तु हि तादृश्यामप्यनुरञ्जनमात्रकर इति नोक्तो वेदं चिन्त्यम्। स्पष्टस्तदितरपदार्थः।

**( व्याख्या )** नन्वेतन्निरूपणं किमर्थं बन्धकत्वान्निरूपणमिति चेन्मलाच्छादितस्य कलादिभिरेव बन्धसम्भवादित्यत आह–

**( वृत्तिः )** ननु दृक्शक्तिनिरोधात्मकमलधर्मरूपमोहस्यास्तु सहजत्वं मलगुणत्वं च कथं बुद्धिधर्मत्वान्मायीयमोहेन सह मदादिनामित्याशंक्याह –

**मले सति कलादीनां यथा सम्बन्ध इष्यते।**
**एवमेष्वपि सत्स्वेव बन्धयन्ति कलादयः।।१४७।।**

**( व्याख्या )** मले सत्येव यथा कलादीनां सम्बन्धः सम्यग् बन्धः बन्धकत्वमिति यावत् विशेषदर्शनावरणं विना बन्धासम्भवात्। एवमेष्वपि मोहादिष्वपि सत्स्वेव कलादयः पुमांसं बन्धयन्ति बन्धवन्तं कुर्वन्तीत्यर्थः। तद्वदेव विपरीतदर्शनादिरूपमोहादिं विना बन्धासम्भवादिति भावः।

उक्तं सप्तविधं मलमुपसंहरति–

**एते मलवतां पुंसां धर्माः सप्त सहोदिताः।**

**( व्याख्या )** सहोदिताः सहसिद्धा एते मोहादयः सप्त मलवतां पुंसां धर्मा मलोपाधिप्रयुक्ता धर्मा उक्ता इत्यर्थः।

**( वृत्तिः )** यथा दृङ्निरोधात्मके मले सति कलादीनां भोगार्थं पुंभिः सम्बन्ध इष्यते एवमेष्वपि मायीयमोहेन सह मायीयमदादिष्वपि बुद्धिप्रलयेऽपि कारणरूपतद्बुद्धि-संस्कृतिरूपत्वात्। सत्स्वेव कलादयः पुंसो बन्धयन्ति। ततो मलवतां पुंसां एते स्वान्तः कृतप्राकृतमोहमलधर्मरूपमोहेन सह मदादयः सप्त धर्मा मलस्वभावाः सहोदिताः सहजाः कथ्यन्ते।

**( व्याख्या )** इयता प्रबन्धेन सकार्यो मलो निरूपितः। तत्रापि युक्तिबाधस्तुल्य इत्याशंकन्ते ऋषयः–

**( वृत्तिः )** मलपदार्थं स्वीकृत्य ऋषयस्तत्कर्तव्यसक्ता संशयवन्तः शंकयन्ति –

**जडेनाजडरूपस्य तिरस्कारो न युज्यते।।१४८।।**

**( व्याख्या )** जडेन मलेन अजडस्य चिच्छिक्तिरूपस्य तिरस्कारो बाधः तमःपटादिसाधारणो न युज्यते युक्तिविरोधादिति भावः।

मलस्य कृत्यमप्यनुपपन्नमिति संक्षेपेणाह–

**आवृतिश्च न युक्ताऽस्य व्यापकत्वेन हेतुना।**

**( व्याख्या )** अस्य अजडस्य शरीरादेः पटादिनेव मलेनावृतिरावरणं न युक्ता। तत्र हेतुमाह व्यापकत्वेनेति। चिच्छक्तेर्व्यापकत्वेन कारणेनेत्यर्थः। आव्रियमाणस्य पदार्थस्यावारकद्रव्यापेक्षया न्यूनपरिमाणत्वं वक्तव्यम्। तच्च न सम्भवति व्यापकत्वविरोधादिति भावः।

**( वृत्तिः )** जडेन मलाख्येनाजडरूपस्यात्मस्वरूपस्य तिरस्कार आवृतिर्न युज्यते। आवृतिः साऽस्ति यद्यपि अजडस्यात्मस्वरूपस्य व्यापकत्वेन हेतुना व्यापकत्वादिति प्रयोक्तव्याद्धेतोः आवृतिश्च न युक्ता।

**( व्याख्या )** अत्र किं बाधकद्रव्यमात्रस्याक्षेपः उत बाधकद्रव्यमङ्गीकृत्य तद्गतजाड्याक्षेपः। नाद्यः उक्तप्रमाणसिद्धत्वादित्याह ईश्वरः–

**( वृत्तिः )** ईश्वरः प्रथमपक्षे परिहृतिं विधत्ते –

**अनादिकालसंरूढान्मलाख्याद्वासितादणोः ।।१४९।।**
**अजडापि तिरोभूता शक्तिर्नित्या जडात्मनः[1]।**

**( व्याख्या )** अणोः नित्या शक्तिः चिच्छक्तिरनादिकालसंरूढादासंसारमभिव्याप्य रूषितात् यद्वा आदिः कालो न विद्यते यस्य तदनादिकालम् अत एव बहुकालमुपेक्षितचक्षुःपटलादिवत् संरूढात् सम्यग् लग्नादत एव वासितात् स्वाहितवासनायुक्तात् अत एवास्यापाकरणे महाभिष ग्रूपशिवव्यापारीभूतदीक्षाऽपेक्षेति भावः। मलाख्याद्व्यात्तिरोभूता। अत्र च प्रमाणद्वयमुक्तमेव। न द्वितीय इत्याह अजडापि चित्स्वरूपाऽपि जडात्मनः सकाशात् तिरोभूता। ननु उक्तो विरोध इति चेत् किमनेन आच्छादकस्य निरास उत तस्य चैतन्यं सिसाधयिषितम्। नाद्यः तस्य साधितत्वात्।

**( वृत्तिः )** आगन्तुकघटिता किल विस्तारितेयं विकघ्प्तिः। अनादिकालसंरूढाद– नागन्तुकतिरस्कर्तृतिरस्कार्यलक्षणसम्बन्धकृतात् मलाख्याद्वासितात् वासनाद्धेतोः मलाख्यादित्यनेन द्रव्यत्वसिद्धेः स्वतः केनचिदाहितवासनाभूत्वाऽनात्मनि गुणत्वेन स्थितिः। तथात्वे विकारित्वमापतेदिति सूचितम्। अणोरात्मनो नित्या शक्तिः अजडाऽपि जडात्मना मलेन तिरोभूतेति युष्मत्कृतविकृप्तिः सैषात्रासंस्पर्शनी।

**( व्याख्या )** न द्वितीय इत्याह। किंचाजडमिति–

**( वृत्तिः )** तत्र हेतुं प्रयुनक्ति –

**किंचाजडं जडेनैव बाध्यते नाजडेन तु।।१५०।।**
**सजातीयत्वतो हेतोर्नाणूनामीश्वरो यथा।**

**( व्याख्या )** अजडं वस्तु जडेनैव बाध्यत इत्यवश्यमभ्युपगन्तव्यम्। एवकारव्यावर्त्यमाह नाजडेनेति। बाध्यत इत्यनुषङ्गः। तत्र हेतुमाह सजातीयत्वत इति। सजातीयस्य बाधकत्वाभावे दृष्टान्तमाह नाणूनामिति। तथा चेत्थमनुमानमिह विवक्षितम्। चेतनाच्छादकमिदं द्रव्यं चेतनसजातीयं न भवति चेतनबाधकत्वादिति। अत्र व्यतिरेकदृष्टान्तमाह नाणूनामिति।

सामान्यव्याप्तावन्वयदृष्टान्तमप्याह–

**यथाभिभूतगन्धस्य निम्बत्वक्चन्दनस्य तु।।१५१।।**

**( व्याख्या )** यथा चन्दनस्य निम्बत्वग्बाधिका बाधकत्वमेव दर्शयति अभिभूतगन्धस्येति। यथा सुरभि चन्दनं विजातीयया निम्बत्वचाऽऽच्छादितं सदभिभूतसौरभ्यं भवति तद्वदाच्छादकमिदं द्रव्यमाच्छाद्याद्विजातीयमेव स्वीकर्तव्यमिति भावः।

---

१. जडात्मनः–उमापतिशिवव्याख्यादृतः पाठः; जडात्मना–ज्ञानप्रकाशवृत्तिस्थः पाठः

**( वृत्तिः )** किंचाजडं चित् जडेन बाध्यते तिरोधीयते। नाजडेन न चिदन्तरेण तिरोधानशक्तिरपि मलशक्तिस्वप्रकटनद्वारेत्युक्तत्वात्। सेयं प्रतिज्ञा। कुतः सजातीयत्वतो हेतोः चिदेकजातीयत्वादिति हेतोः। यथाणूनामात्मनामीश्वरः सजातीयो न निरपेक्षस्तिरस्कर्ता। यथाभिभूतगन्धस्य विजातीयजलादिना तिरोभूतसुरभेश्चन्दनस्य निम्बत्वक् न भूयः सुरभिं तिरस्करोति। किन्त्वौपाधिकनिस्सुरभित्त्वं निरस्य सुरभित्वं व्यञ्जयति। यतश्चिदचिदन्तरेण नास्ति हि तृतीयं वस्तु। ततश्चितश्चित्तिरस्करणं नेति साधितं च।

**( व्याख्या )** इदानीं परिशेषानुमानेनापि आच्छादकस्य जडत्वमङ्गीकर्तव्यमित्याह–

**( वृत्तिः )** तिरस्करणीया च चिच्छक्तिर्यदि न जडेन तर्हि केन तिरस्क्रियते इति निर्बन्धयन्ति–

**किंचाजडं जडान्नो चेद् बाध्यं तत् केन बाध्यते।**

**( व्याख्या )** अजडं चेतनात्मकं बाध्यं वस्तु जडान्नो चेद् जडात् सकाशात् न चेत् केन बाध्यते न केनापि बाध्यतेत्यर्थः। तथा चेत्थमनुमानं विवक्षितं चेतनः जडबाध्यः जडादन्यादबाध्यत्वे सति बाध्यत्वात् इति।

नन्वत्र विशेषणासिद्धिरिति चेत् तत्र वक्तव्यं किं जडाजडाभ्यां वस्तुभ्यामन्येन बाध्यत इति विशेषणासिद्धत्वमुताजडेनैव बाध्यत इति विकल्प्य नाद्य इत्याह–

**अजडं वा जडं वापि द्वयं वस्तु विनिश्चितम्।।१५२।।**

**( व्याख्या )** लोके वस्तु अजडं जडं चेति द्वयमेव विनिश्चितं द्विप्रकारमेव निर्णीतम्। परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायाद् जडाजडाभ्यामन्यदेव नास्तीति भावः।

**( वृत्तिः )** सुगमम्।

**( व्याख्या )** द्वितीयं निराचष्टे–

**( वृत्तिः )** चिच्छक्त्यन्तरेण न चिच्छक्तिस्तिरस्क्रियत इति पुनरुपोद्बलयित्वोप-संहरति–

**आत्मा नात्मान्तराद्बाध्यो विनाशाद्बाधकात्मनः।**

**( व्याख्या )** आत्मा चेतनः आत्मान्तरात् चेतनान्तराद्बाध्यो न। तत्र हेतुः बाधकस्य आत्मनश्चेतनस्य विनाशात् विनाशप्रसङ्गादित्यर्थः। मुक्ताविति शेषः।

कुतस्तन्नाशप्रसङ्ग इत्यत आह–

**तन्नाशमन्तरा यस्मान्मुक्तिर्न स्यात् चिदात्मनः।।१५३।।**

**( व्याख्या )** तन्नाशं बाधकत्वेनाभिमतस्यात्मनो नाशमन्तरा चिदात्मनो बद्धस्य मुक्तिर्न स्यात् न सम्भवतीत्यर्थः। ननु सिद्धान्तेऽपि बाधकस्य मलस्य न विनाशोऽभ्युपगम्यते। नित्यत्वादेकमुक्तौ सर्वमुक्तिप्रसङ्गाच्च। किन्तु तच्छक्तेरेव। स चात्रापि बाधकात्मविनाशमन्तरेणापि सम्भवतीति

चेन्न। तत्र न तावद्बन्धकात्मा बद्धो भवितुमर्हति तस्य बन्धकेन निरुद्धशक्तित्वेन बन्धकत्वायोगात् तस्यापि बन्धकान्तरापेक्षायामनवस्थानाच्च। नापीश्वरः तस्य मोचकत्वेन बन्धकत्वायोगाच्च। तथा चोभयविलक्षणोऽनावृतः सर्वगडुरात्मा बन्धको वाच्यः। तत्र न प्रमाणम्। उक्तयुक्त्या जडस्यापि बन्धत्वस्य सम्भवात्। प्रत्युत सजातीयत्वेन बन्धकत्वायोगाच्च।

उक्तं परिशषानुमानमुपसंहरति–

**जडेनैवाजडं तस्माद्बाध्यमभ्युपगम्यताम्।**

**( व्याख्या )** तस्मात् यस्मात् सजातीयत्वादिना अजडस्य बाधकत्वं न सम्भवति अतः अजडं जडेनैव बाध्यमभ्युपगम्यताम्।

**( वृत्तिः )** सुगमम्। मलशक्तेरावारकत्वलक्षणरूपान्तरान्यथात्वलक्षणनिवृत्तिमयरूपान्तर–परिणतिरूपावारकत्वलक्षणरूपान्तरतिरोभूतिमयनाशं विना न मुक्तिरिति यथोक्तं तथा तिरस्कर्त्रात्मशक्तेस्तद्रूपजडत्वाविनाभूतनाशं विना तिरस्कार्यात्मनो न कदाचन मुक्तिरित्याशयः। ननु तिरस्कर्त्रात्मशक्तेर्नाशो न रूपान्तरान्यथात्वरूपान्तरपरिणतिरूपतिरोभूतिलक्षणः किंतु स्वेतरस्वतिरस्कारकात्मान्तरशक्तिकृततिरोभूतिरूपः। तदयुक्तम्। तत्तिरस्कारकात्मान्तरशक्तेरपि तथेत्यनवस्था दुर्निरस्यति गर्हितार्थत्वात्।

**( व्याख्या )** एवं साधितं बाधकस्य जाड्यमभ्युपगम्य इदानीं तस्य कृत्यं पूर्वं संक्षेपेणाक्षिप्तं विस्तरेणाक्षिपन्ति ऋषयः–

**( वृत्तिः )** ऋषयः द्वितीयपक्षं पुनः समुद्धरन्ति –

**अनादिरपि सम्बन्धः प्रोक्तो यदि मलात्मनोः।।१५४।।**

**( व्याख्या )** मलात्मनोः सम्बन्धः अनादिः प्रोक्तो यदि अनादिकालसंरूढादित्यादिना। यदिशब्दोऽङ्गीकारे यदि वेदाः प्रमाणमित्यादिवत्।

अयं च सम्बन्धः आवरणादिकृत्यं विना न सम्भवति। तच्च दुर्निरूपमिति संभावितं विकल्प्य दूषयन्ति–

**मलात् किं क्रियते तत्र शक्तेरावरणं तु वा।**
**अप्रकाशीकृतिर्वापि तत्राद्यस्तु न शोभते।।१५५।।**
**तस्याश्चाभिन्नरूपत्वादात्मनोऽपि प्रसङ्गतः।**

**( व्याख्या )** तत्र संबन्धे च सति शक्तेः चिच्छक्तेः मलात् किमावरणं क्रियते पटवत् अथवा शक्तेरप्रकाशीकृतिः अप्रकाशीकरणं वेत्यर्थः। दीपप्रकाशनाशकवायुवदित्यर्थः। आद्यं दूषयति तत्रेति। न शोभते न युज्यत इत्यर्थः। तत्र हेतुमाह तस्याश्चेति। तस्याश्चिच्छक्तेः आत्मना अभिन्नरूपत्वात्। न भेदादात्मनां स्थितं स्वरूपं तु इत्यादिना तादात्म्यस्य साधितत्वात्। आत्मनोऽपि शक्तिव्याप्ततया स्थितस्य शक्तेरावरणे रूपावरणे घटस्येवावरणं स्यादित्यर्थः।

न चेष्टापत्तिः। सर्वदा अहमिति प्रतीतेरिति भावः। इदं तु व्यापकत्वेन हेतुनेत्युक्तस्यापि दोषस्योपलक्षणम्।

**( वृत्तिः )** मलात्मनोः प्रोक्तः सम्बन्ध आवार्यावारकलक्षणोऽनादिर्यद्यपि तत्रात्मनि मलात् किं क्रियते। न यत् किंचिदपि। तत्र बभञ्जेत्याशयः। शक्तेरावरणं वा अपि तु अप्रकाशीकृतिर्वा। तत्राद्यस्तु न शोभते। तस्याः शक्तेरभिन्नरूपत्वादात्मनोऽपि व्यापकस्य परिमितवस्तुव्याप्तावृतेः प्रसङ्गतः।

**( वृत्तिः )** न द्वितीयोपीत्याह –

**नाप्यप्रकाशीकरणं विनाशित्वप्रसङ्गतः।।१५६।।**
**प्रकाशस्याप्रकाशोऽपि नाशान्नो नाश इष्यते[१]।**

**( व्याख्या )** द्वितीयं दूषयति नापीति। अप्रकाशीकरणं मलकृत्यमित्यपि न युज्यत इत्यर्थः। तत्र हेतुः विनाशित्वेति। चिच्छक्तेर्विनाशप्रसङ्गादित्यर्थः। प्रकाशनाशे स्वरूपनाशस्य कः प्रसङ्गः श्यामनाशे घटस्येव स्वरूपनाशोपपत्तेरित्याशंक्याह प्रकाशस्येति। प्रकाशमानायाः चिच्छक्तेरप्रकाशः प्रकाशरूपधर्माभावः। नाशात् धर्मिणो नाशादेव। न हि सति दीपे प्रकाशाभावो दृष्टः। पाकेन श्यात्मनाशस्थलेऽपि श्यामविशिष्टधर्मिनाशस्यैव स्वीकारात्। इदं च 'किंच यस्य तु यो धर्मः' इत्यत्र स्फुटं प्रतिपादितम्। इष्टापत्तिमाशंक्याह नो नाश इष्यत इति। परप्रकाशत्वं च नित्यमित्यादिना शक्तेर्नित्यत्वसाधनात्।

**( वृत्तिः )** नाप्यप्रकाशीकरणं विनाशित्वप्रसङ्गतः। कुतः प्रकाशस्य चन्द्रिकादेः सूर्यकिरणादिना प्रकाशोऽपि विनाशान्नावशिष्यते। सत्कार्यदृशा स्वस्वभावस्य स्वस्वरूपान्तरेण तिरोभूतिरेव विनाशित्वेन स्वीकृतेति परकीयेन स्वस्वभावतिरोभूतिरपि तत्तुल्यत्वेन तत्त्वेनोपचर्यत इत्याशयः।

उपपादितं मलस्य कृत्याक्षेपमुपसंहरन्ति ऋषयः–

**तत्सर्वं कथयेशान सन्देहोऽस्माकमीश्वर।।१५७।।**

**( व्याख्या )** परिदृश्यमानकृत्यस्य दूषितत्वात् कृत्यान्तरस्यादर्शनात् उक्तमलसम्बन्धस्य कृत्यं विनाऽनिर्वाहाच्चास्माकं सन्देहो जायते। अतः कृत्यमुक्तदोषरहितं कथयेत्यर्थः।

**( वृत्तिः )** तदित्याद्यर्थः स्पष्टः।

**( व्याख्या )** ईश्वरस्तु कृत्यान्तरं वदन् शिष्यमनःसमाधानार्थं तदुक्तविकल्पदूषणं प्रतिसमाधेयमित्यनुमोदते ईश्वरः–

**( वृत्तिः )** ईश्वरस्तदनु भाषणपुरःसरं परिहरति –

---

१. नाशान्नो नाश इष्यते–उमापतिव्याख्यादृतः पाठः; विनाशान्नावशिष्यते–ज्ञानप्रकाशवृत्तिस्थः पाठः

**न चावृतिर्मलेनेष्टा चिच्छक्तेर्व्यापकत्वतः।**
**नाप्यप्रकाशीकरणं किन्तु कार्याप्रवर्तनम्॥१५८॥**

**(व्याख्या)** चिच्छक्तेः व्यापकत्वतः इत्येतत् आत्मनोऽपि प्रसङ्गत इत्यस्यापि उपलक्षणम्। तथा चाभ्यां दोषाभ्यां या आवृतिपक्षनिराकृतिः सा इष्टैव सम्यगुक्तं भवद्भिरिति भावः। एवमुत्तरत्रापि योजना। एवं शिष्यमनःसमाधाय स्वाभिमतमदुष्टं कृत्यमाह किंत्विति। कार्यं शक्तेः प्रत्यर्थं सम्बन्धः यद्वक्ष्यति प्रत्यर्थमपि संबन्धः तत् कार्यमिति। तत्राप्रवर्ततनं तदनुकूलशक्तितिरोधानम्।

**(वृत्तिः)** तां चिच्छक्तिमतिरोहितां कथंचिद्वशीकृत्य तच्चिच्छक्तेः कार्ये स्वार्थक्रियालक्षणज्ञानक्रियात्मके तयोरप्रवर्तनं स्ववशीकरणमज्ञत्वाकर्तृत्वात्मस्वविरुद्ध-कार्यकारणं क्रियत इत्युत्तरश्लोकानुषङ्गः। स्पष्टस्तदितरपदार्थः।

**(व्याख्या)** स्वस्मिन् विद्यमानेऽपि शक्तितिरोधानमात्रेण कार्याजनकत्वमित्याशंक्य दृष्टान्तेनोपपादयति-

**(वृत्तिः)** तदुदाहरति -

**क्रियतेऽग्निगता शक्तिर्मन्त्रशक्तितिरोहिता।**
**नैव स्फोटकरी सद्यः प्रज्वलत्यपि पावके॥१५९॥**

**(व्याख्या)** मन्त्रशक्तितिरोहिता क्रियत इत्युत्तरेण संबन्धः। अग्निगता शक्तिः प्रज्वलत्यपि पावके वह्नौ नैव सद्यस्तिरोधानकाले स्फोटकरघ्तथा च प्रकृतेऽपि प्रकाशमानायामपि चिच्छक्तौ सत्यामपि विषयेण संयोगादिकं कार्यं न भवति।

ननु चिच्छक्तेस्तिरोहितत्वेऽपि प्रकाशमानस्यात्मनोऽतिरोहितत्वात् संयोगाद्यभावेऽपि प्रवृत्त्यादिकं किं न स्यादित्यत आह-

**अतिरोहितभावोऽपि मलेनैव स्वशक्तिभिः।**
**तिराहितो हि कार्येषु न चाणुः सम्प्रवर्तते॥१६०॥**

**(व्याख्या)** अणुर्मलेन साक्षादतिरोहितः स्वशक्तिभिर्हेतुभिः कार्येषु तिरोहितः सन्न सम्प्रवर्तते।

**(वृत्तिः)** यथा दाहप्रकाशैकलक्षणैकशक्तिमति पावके प्रज्वलत्यपि अतिरस्कृततथा-भूतशक्तिमति सत्यपि साऽग्निगता शक्तिर्मन्त्रशक्तितिरोहिता मन्त्रशक्तेः स्वरूपानन्यथात्ववशात् पुनरस्ववशीकृतस्वदाहलक्षणकार्यवति सद्यस्तत्कालमनतिक्रम्य नैव स्फोटकरी। तथा अणुरात्मा ज्ञानक्रियालक्षणैकशक्तिमान् अतिरोहितभावोऽपि अतिरस्कृततथाभूतशक्तिरपि मलेनैव स्वशक्तिभिः स्वसन्निधिमात्राभिरसंस्पर्शनीभिः तिरोहितस्वरूपान्यथात्वेन वशीकृतशक्तिः कार्येषु वेदनादिषु न संप्रवर्तते। उपलक्षणं चैतत्। तदीयशक्तिस्तिरोहिता वशीकृता ह्यस्वव-शीकृतस्वदृक्क्रियात्मिका कार्यवती कार्येषु तद्वेदनादिषु न संप्रवर्तते तद्विरुद्धमज्ञात्वा कर्तृत्वात्मकं

कार्यं विधत्ते न तु कारणवैकल्यं विना कार्यं न जायत इति शक्तिपरीक्षायां वक्ष्यमाणत्वात्। स्वरूपानन्यथाकृतिलक्षणशक्तिवशीकृतिपुरःसरं कार्यं तिरस्कृतमिति यावत्।

**( व्याख्या )** नन्वर्थसम्बन्धो ज्ञानप्रकाशकार्यमित्युक्तम्। तन्न सम्भवति अर्थ सम्बद्धप्रकाशस्यैव ज्ञानत्वेन सम्बन्धाभावे अर्थप्रकाशस्वभावत्वरूपज्ञानत्वव्याघातात् तच्छरीरानुप्रविष्टसम्बन्धस्य तत्कार्यत्वं न सम्भवतीति शंकन्ते ऋषयः–

**( वृत्तिः )** ऋषयः कार्यमन्तराशक्तिः केत्याहुः –

**दृक्क्रियारूपिणी शक्तिः कथिता परमेश्वर।**
**ते च विज्ञेयकर्तव्यविरहे न कदाचन।।१६१।।**

**( व्याख्या )** दृग्रूपा चासौ क्रिया च दृक्क्रियारूपिणी ततः किमित्यत आह ते चेति। एकस्यापि शक्तेः वक्ष्यमाणोपाधिभेदेन भेदं मत्वोक्तं ते चेति। विज्ञेयसम्बन्धविरहे दृक् न स्यात्। कर्तव्यसम्बन्धविरहे क्रिया न स्यात्। तद्घटितशरीरत्वात् तयोः।

फलितमाह–

**न हि यस्मात् परं कार्यं ज्ञातृकर्तृत्वरूपतः।**
**शक्तिकार्ये तिरोधानं मलेन कथितं कथम्।।१६२।।**

**( व्याख्या )** तथा च ज्ञानक्रियाशक्तिरूपज्ञातृकर्तृत्वरूपतः परमन्यत् कार्यं नास्तीति यस्मात् तस्मात् शक्तिकार्ये मले न तिरोधानं न चिच्छक्तेस्तिरोधानमिति कथितं कथम्।

**( वृत्तिः )** हे परमेश्वर! पुरा शक्तिः दृक्क्रियारूपिणी नान्यलक्षण–वतीति कथिता लक्षिता। ते च शक्तिलक्षणात्मिके दृक्क्रिये च विज्ञेयकर्तव्यविरहे सति शक्त्यर्थक्रियारूपवेदनकारणतिरोभूतौ सत्यां न कदाचन न कदाचिद्विजृम्भेते। ततः कुतः यस्मात् ज्ञत्वकर्तृत्वरूपतः ज्ञानक्रियालक्षणस्वलक्षणतः।

**( व्याख्या )** इदमेव विवृणोति–

**( वृत्तिः )** न हि शक्तेः परमन्यत् कार्यं वेदनकरणलक्षणार्थक्रिया। ततः का क्षतिरित्यत आहुः –

**शक्तिर्नार्थान्तरं यस्मात् कार्यात् तद्वद शंकर।**

**( व्याख्या )** यस्माद्विज्ञेयादिसम्बन्धरूपकार्यात् शक्तिर्नार्थान्तरं विज्ञेयकार्यघटितत्वाच्छक्तेः। तत्तस्मात् स्वरूपाननुप्रविष्टं कार्यान्तरं वदेति शंकार्थः।

**( वृत्तिः )** हे शंकर ! का नो हानिरिति कथमुच्यते। यस्माच्छक्तिः कार्यमेव शक्तिलक्षणमित्युक्तहेतोः शक्तिः कार्यं प्रति नार्थान्तरम्। किन्तु कार्यं प्रोक्तार्थक्रियाशक्तेरिति पाठे कार्यं नार्थान्तरमिति व्याख्या सुकरा। तत्तस्मात् कारणात् शक्तौ नेति स्वरूपानन्यथात्वेन शक्तिं वशीकृत्य कार्येऽर्थक्रियायां तिरोधानं मलात् स्थितम्। यतः परार्थेत्यादिवक्ष्यमाणनयेन

शक्तिरेव न कर्तव्यं ज्ञानक्रियारूपार्थक्रिया यतः शक्तिदृक्क्रिययोः शक्तिलक्षणशक्त्यर्थ-क्रिययोरविभागस्याभेदस्य भागोक्तौ भिदोक्तौ अर्थक्रियायां मले तिरोधानं कथितं कथं वद कथयस्व।

**( व्याख्या )** स्वरूपातिरिक्तं कार्यमस्तीति प्रथमं प्रतिजानीते ईश्वरः-

**( वृत्तिः )** ईश्वरः परिहरति -

**शक्तिरेव न कर्तव्यं शक्तिदृक्क्रिययोर्यतः।।१६३।।**

**( व्याख्या )** शक्तिदृक्क्रिययोः शक्तिरूपयोर्दृक्क्रिययोः शक्तिरेव कर्तव्यं न किन्तु अन्यदेवेति यतः अतो नोक्तदोष इत्यर्थः। तत्राभेयोः भेदं वक्ष्यति प्रत्यर्थमिति। ननु दृक्क्रियारूपिणीत्येकवचनान्ततया क्वचिदुच्यते। इदानीं दृक्क्रिययोरिति द्विवचनान्ततयोच्यते। इदं तव वचनं विरुद्धमित्याशंक्य स्वभावतोऽभिन्नस्योपाधिभेदेन भेद इदानीमुच्यत इत्याह-

**अविभागस्य भागोक्तौ तद्विभाग उपाधितः।**

**( व्याख्या )** अविभागस्य स्वभावतोऽविभक्तस्य भागोक्तौ भेदोक्तौ भेदोक्तिस्थले उपाधितस्तद्विभाग इति सामान्यतो प्रकृतेऽपि विज्ञेयकर्तव्यरूपोपाधिभेदाद्भेदो द्रष्टव्य इति भावः।

एवं वचनविरोधं परिहृत्य प्रतिज्ञातं शक्तितत्कार्ययोर्भेदं दर्शयति-

**प्रत्यर्थमपि सम्बन्धस्तत्कार्यमितरत्तु यत्।।१६४।।**
**पदार्थमात्रसंवर्ति रूपं तच्छक्तिसंज्ञितम्।**
**सहजं तस्य तज्ज्ञेयं तन्मलेन निरुध्यते।।१६५।।**

**( व्याख्या )** चिच्छक्तेरर्थेन साकं सम्बन्धो द्विविधः प्रत्यर्थं प्रतिविषयं व्यवहारप्रयोजक एकः सम्बन्धः। इदं तु तत्कार्यं न तच्छरीरानुप्रविष्टम्। यस्तु स्वरूपानुप्रविष्टसम्बन्धः स तु पदार्थमात्रसम्बन्धः न तु प्रत्यर्थं सम्बन्धः। तथा च कार्यापेक्षया शक्तिर्भिन्नेत्याह इतरत्त्विति। यत् पदार्थमात्रसंवर्तिरूपं मात्रशब्देन प्रत्यर्थसम्बन्धो व्यावर्त्यते। तच्छक्तिसंज्ञितं तत्तु इतरदेव प्रत्यर्थसम्बन्धरूपकार्याद्भिन्नमेव। तस्य पदार्थमात्रसंवर्तिरूपस्य तत् प्रत्यर्थसम्बन्धिरूपं सहजम्। आवरणाभावे नित्यप्राप्तं ज्ञेयं पूर्वोक्तनित्यत्वादिभिः। अतः तन्मलेन निरूप्यते।

अस्तु तन्निरोधः ततः किमित्यत आह-

**तस्मिन् निरुद्धे तत् कार्यं प्रत्यर्थं वेदनात्मकम्।**
**न जायते ततः कार्यतिरोधानं मलात् स्थितम्।।१६६।।**

**( व्याख्या )** तस्मिन् सहजसम्बन्धे निरुद्धे तत्कार्यं प्रत्यर्थवेदनात्मकं स्फुरणरूपं व्यवहाररूपं वा न जायते। उपसंहरति तत इति।

**( वृत्तिः )** यतः पदार्थेत्यादिवक्ष्यमाणनयेन शक्तिरेव न कर्तव्यं न ज्ञानक्रियारूपार्थक्रिया यतः शक्तिदृक्क्रिययोः शक्तिलक्षणशक्त्यर्थक्रिययोरविभागस्याभेदस्य भागोक्तौ भिदोक्तौ सत्यां तद्विभागस्तद्भेद उपाधितः ज्ञेयकार्यात्मोपाधितः क्लृप्तिः।

कलितः यतो यत् प्रत्यर्थं सम्बन्धः अर्थं प्रत्यर्थं प्रति वेदनं तत्कार्यमपि सैषार्थक्रियापीतरं तच्छक्तिसाक्षात्कार्यादन्यत् शक्त्यर्थक्रियात्मज्ञानक्रियासहजार्थक्रियाः। तदुक्तं मृगेन्द्रे शिवशक्तिपरीक्षायां–

तदेकं विषयानन्त्यात् भेदानन्त्यं प्रपद्यते।
कर्तृत्वं तदभिन्नत्वात् तद्वदेवोपचारतः।। इति।

यतः यत् परार्थमात्रसंवित्तिरूपं स्वेतरशिवादिपदार्थत्वावच्छिन्नपदार्थसत्तामात्रलक्षणं तच्छक्तिसंज्ञितं शक्त्यभिहितम्। तदुक्तं च पुरा शिवशक्तिपरीक्षायाम्–

अनयोर्ज्ञानयोर्हेतुरविशेषात्मिका चितिशक्तिरुक्ता। इति। तस्य स्वसंविल्लक्षणात्म–सहजशक्त्यभिहितशिवत्वापरसंज्ञितपरसंवित्तिरूपस्य। तत्स्वार्थक्रियारूपलक्षणकस्वेतर–विषयमात्रविषयीकरणलक्षणं ज्ञेयम्। क्रियाविभागरूपज्ञानार्थक्रिया न शक्तिरेव कर्तव्यमित्युक्ता। अग्निशक्तेर्दाहाद्यपृथक्सिद्धप्रकाशार्थक्रियेव सहजं स्वलक्षणमपि न लक्ष्यमेव लक्षणं न भिन्नं च तदिति चिन्तामण्यादेः कामप्रदानार्थक्रियेव वृती परिणतिविवर्तविधुरतया अपृथक्प्रथित–सिद्धिमती। सैषार्थक्रिया तदुक्तं रत्नत्रये शिवशक्तिपरीक्षायाम्–

इच्छाकार्यमनिच्छापि कुर्वाणेच्छा चिदव्यया।
ज्ञानमज्ञानरूपैवमक्रियापि क्रियां तथा।।इति।।

तत् ज्ञेयं सहजोक्तलक्षणशक्त्यर्थक्रियामलेन निरुध्यते अमूर्तिमतोर्मलात्मनोर्न संयोग इति प्रथितानुमिते पुनरसंस्पृश्य स्वसन्निधिमात्रेण स्वरूपानन्यथात्वेन शक्तिं कथंचिद् वशीकृत्य स्ववशीक्रियते। तस्मिन्निरुद्धे तस्यामात्मसहजशक्तिसहजशक्त्यार्थ–क्रियायां तिरोभूतायां तत्कार्यं तच्छक्ति अर्थक्रियासहजार्थक्रिया प्रत्यर्थं वेदनात्मकम्। अर्थं प्रत्यर्थं प्रति करणापृथक्सिद्धवेदनात्मिका न जायते न स्ववश्या भवति। ततः मन्त्रशक्त्याऽग्निशक्तेः सत्यामप्यविलुप्तिमत्यां स्वलक्षणस्वदाहादिकार्यतिरस्करणमिव मलात् स्वशक्त्या चिच्छक्तेः कार्यतिरोधानम् उक्तलक्षणार्थक्रियातिरस्करणं स्थितं निश्चितम्।

**( व्याख्या )** इदानीं प्रत्यर्थसम्बन्धाभावे चिच्छक्तेर्विषयाभिमुख्यं पूर्वोक्तं नोपपद्यते। विषयौन्मुख्ये अर्थसम्बन्धप्रसङ्गिति शंकन्ते ऋषयः।

**( वृत्तिः )** ऋषयः स्वीकृत्य पुनश्चोदयन्ति –

**विषयाभिमुखी प्रोक्ता शक्तिर्मलनिरोधतः।**
**विषयाभिमुखी नो चेत् स्थितिमस्या वदेश्वर।।१६७।।**

**( व्याख्या )** शक्तिः चिच्छक्तिः विषयाभिमुखी 'तद्धर्मभूतं ज्ञानं च व्यापकं विषयोन्मुखम्' इत्यादिना प्रोक्ता। इदानीं च मलनिरोधतः मलनिरोधाद्धेतोः विषयाभिमुखी नो चेत् अस्याः चिच्छक्तेः स्थितिमाभिमुख्येननाभिमुख्येन वेति निर्णीय वदेत्यर्थः। तथा च चिच्छक्तेः पूर्वोक्तानुरोधेन विषयाभिमुख्याङ्गीकारे विषयसम्बन्धस्यावर्जनीयत्वेन मलकार्यनिरूपणं तदवस्थमेव। अथ विषयसम्बन्धविघटनलक्षणमलकार्यनिरूपणानुरोधेन विषयानभिमुखत्वं शक्तेरङ्गीक्रियते तदा पूर्वोक्तग्रन्थविरोध इति भावः।

**( वृत्तिः )** हे ईश्वर शक्तिर्विषयाभिमुखी ज्ञेयकार्यपदार्थक्रियालक्षणस्वार्थक्रियाकर्त्री प्रोक्ता सा तु मलनिरोधतः मलवशीकरणात् विषयाभिमुखी अविलुप्तस्वसहजत्वात् स्वावश्यमलवश्या विलुप्तस्वार्थक्रियतया तदर्थक्रियाकर्त्री। नो चेत् न भवति यदि अस्याः शक्ते स्थितं वद कथयस्व।

**( व्याख्या )** चिच्छक्तेर्विषयाभिमुख्येऽपि विषयसम्बन्धाभावः सुसम्पाद इति दृष्टान्तमुखेन प्रतिपादयन् परिहरति ईश्वरः –

**( वृत्तिः )** ईश्वरः –

**यथा चक्षुस्तमोबन्धात् सत्वरूपमपि स्फुटम्।**
**विषयाभिमुखं चापि स्वनिष्ठं व्यवतिष्ठते[1] ।।१६८।।**

**एवं चिच्छक्तिरप्येषा मलशक्त्या विदूषिता।**
**स्वनिष्ठा विषयज्ञानकार्याकर्त्री व्यवस्थिता।।१६९।।**

**( व्याख्या )** यथा चक्षुः सत्वरूपमपि तैजसाहंकारकार्यत्वेन प्रकाशरूपमपि स्फुटमपि उन्मीलितमपि किंचिद्विषयाभिमुखमपि तमोबन्धाद्धेतोः स्वनिष्ठं विषयसम्बन्धरहितमेवावतिष्ठते। न च वाच्यं तत्र विषयसंबन्धोऽपि तदास्तीति। तत्सत्त्वे ज्ञानोत्पत्तिप्रसङ्गात्। न च तत्रालोकरूपकारणाभावादेव ज्ञानानुदयः तत्र चक्षुःसम्बन्धरूपकारणाभावादेव ज्ञानानुत्पत्त्युपपत्तावालोकादेरपि कारणत्वाङ्गीकारे गौरवादिति भावः। एवं यथा चक्षुरेवमेषा विषयोन्मुखी चिच्छक्तिरपि मलशक्त्या विदूषिता अत एव स्वनिष्ठा विषयसम्बन्धरहिता अत एव च विषयज्ञानकार्याकर्त्री प्रत्यर्थवेदनात्मककार्याजनिका व्यवस्थिता। एवं च न पूर्वग्रन्थविरोधः। न वा मलकार्यस्य दुर्निरूपत्वं वेति भावः।

**( वृत्तिः )** यथा चक्षुः उपलक्षणत्वाच्चक्षुग्राहकशक्तिविषयाभिमुखं चापि विषयग्रहणरूपस्वार्थक्रियापि तमोबन्धात्तिमिरवशीकरात् स्फुटं सत्वरूपमपि स्वसद्भावलक्षणस्वार्थक्रियापि यद्वा प्रकाशरूपापि। स्वनिष्ठमस्ववशीकृतस्वार्थक्रिया व्यवतिष्ठते। एवं तद्वत् एषा चिच्छक्तिरपि मलशक्त्याऽविदूषिता। वशीकृतज्ञानक्रियालक्षणस्वार्थक्रिया स्वनिष्ठासंकोचविकासादिकविधुरवतीति सदस्ववशीकृतस्वार्थक्रियावती विषयज्ञानकार्याकर्त्री

---

१. स्वनिष्ठं व्यवतिष्ठते ] सं० पाठः ; सुनिष्टं व्यवतिष्ठते –ज१ ;स्वनिष्ठव्यवतिष्ठते–ज२

जडस्पन्दक्रियाहेतुत्वात्। क्रियाशब्देनापि शब्दितविषयज्ञानलक्षणस्वार्थक्रियाविधात्र्यपि स्वविरुद्धाज्ञत्वाकर्तृत्वात्मकार्यकरी व्यवस्थिता।

**( व्याख्या )** इयता प्रबन्धेनोपपादितं मलनिरूपणमुपसंहरति–

**( वृत्तिः )** उपसंहरति –

**मल एवं समुद्दिष्टः पुंसां सार्वज्ञ्यबाधकः।**

**( व्याख्या )** पुंसामणूनां विषयसम्बन्धविघटनद्वाराऽनादिसार्वज्ञ्यबाधकः मलः एवमुक्तेन प्रकारेण प्रमाणलक्षणपरीक्षादिभिर्निरूपित इत्यर्थः।

ननूक्तप्रमाणसिद्धस्य मलस्य पत्यादिपदार्थोद्देशसमये पृथगुद्देशः किमिति न कृतः मायादिवदनुद्दिष्टस्य वा किमर्थं निरूपणमित्यत आह–

**अनेनैवाभियुक्तत्वात् पशुत्वेन सहास्य च।**
**गणना चोदिता चैव पशुरेवं विबोधितः।।१७०।।**

**( व्याख्या )** अनेनोक्तरूपेणाणवमलेनाभियुक्तत्वादेवाविनाभूतत्वादेव हेतोः पशुत्वम्। तेन हेतुनाऽस्य च मलस्य पशुपदार्थेन सह गणना उद्देशश्च चोदितैव कृतैवेत्यर्थः। एवं च पशुपदार्थ एवास्याप्यन्तर्भावात् तदुद्देश एवास्याप्युद्देश इति भावः। पटलप्रतिपादितमुपसंहरति पशुरेवं विबोधित इति। पशुरेवं लक्षणप्रमाणाभ्यां सपरिकरं विशेषेण निरूपित इत्यर्थः।

**।। इति श्रीमदुमापतिशिवाचार्यविरचिते पौष्करसंहिताभाष्ये ज्ञानपादे चतुर्थः पशुपटलः समाप्तः।।**

**( वृत्तिः )** मल एव पुंसां सार्वज्ञबाधकः। न ह्यज्ञानादिकम्। अनेन मलेनैवावियुक्तत्वादवियोगित्वात् तेन विनाऽत्र शिवशब्दशब्दिते पशुशब्दप्रवृत्त्ययोगात्। अस्य पदार्थस्य पशुत्वेन मलेन सह पशुरिति गणना षट्पदार्थैकसंख्या चशब्दादुद्देशलक्षणोक्तिपूर्वपरीक्षा च चोदिता विचारिता। एवमुक्तप्रकारेण पशुर्विबोधितः परीक्षितः।

**।। श्रीशालिवाटिपुरनिवासिज्ञानप्रकाशाचार्यविरचितायां श्रीमत्पौष्करज्ञानपादवृत्तौ चतुर्थः पटलः।।**

• • •